CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मसूत्रम्

(विद्यानन्दवृत्तिः)

वृत्ति-प्रवक्ता :—

श्री स्वामी विद्यानन्दगिरिः

वेदान्त-सर्वदर्शनाचार्यः

सम्पादक—

लोकेशानन्द शास्त्री

तथा

बलदेवानन्द 'शारद'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशक :—

बिशनदास गिरधारीलाल
कत्थेवाला
आर्यसमाज स्ट्रीट, नया बाँस
दिल्ली—६

प्रथमावृत्तिः

सर्वाधिकारः लेखकाधीनः

१५ अगस्त १९६९

सं० लि०
रामचन्द्र ब्रह्मचारी
प्रच्छद-शिल्पी—
कांजिलाल

पुस्तक-प्राप्ति-स्थान—

(१)
मोतीलाल बनारसीदास,
वाराणसी, दिल्ली, पटना

(२)
चौखम्बा विद्याभवन,
चौक, वाराणसी—१

(३)
श्री दक्षिणामूर्ति सं० म० वि०
मिश्रपोखरा, वाराणसी

(४)
चौखम्बा संस्कृत सीरीज आफिस
वाराणसी

मूल्य—४) चतूरूप्यकाणि

मुद्रक—
गीताधर्म प्रेस, मिश्रपोखरा,
वाराणसी।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अद्वैताग्निनिभो वशेन्द्रियदलो द्वैतान्धकारान्तको भस्माभूषितभालभागभरणो मद्राकृतिर्भास्वरः
विद्यानन्दयतीन्द्रकेन्द्रतिलकः कैलाशपीठेश्वरः, सिद्धो बुद्धजनाधिशुद्धमुकुटो भात्यत्र सिद्धासने ।



अनन्त श्रीविभूषित प० प० महामण्डलेश्वर

श्री विद्यानन्दगिरि जी महाराज

कैलाश आश्रम, ऋषिकेश, (जि० देहरादून)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

* सम्पादकीय *

सम्प्रति मानव शान्ति और अशान्ति के मोड़ पर खड़ा एक टक-टकी लगाके देख रहा है कि उसे कहाँ जाना है? उसे ज्ञात है कि वह उस पथ से जा रहा है जहाँ केवल अशान्ति ही है, किन्तु वह भ्रान्तभ्रमणासे मान बैठा है कि मुझे इसी पथ पर शान्ति और सुख मिलेगा। क्या करें? "केनापि देवेन हृदि स्थितेन" उक्ति के अनुसार वह विवश है।

अन्ततोगत्वा जब वह लक्ष्य प्राप्ति के लिए आध्यात्मिक-जीवन की देहली पर पैर रक्खेगा, तब उसे यह ज्ञात होगा कि शान्ति (आत्यन्तिक-दुःखों की निवृत्ति और परमानन्द की प्राप्ति नाम मोक्ष) के सच्चे पथ का प्रदर्शन केवल उपनिषदें करती हैं।

उपनिषदों की उन दुरूह और दुर्वह गुत्थियोंको "ब्रह्मसूत्र" में महर्षि वेदव्यास श्रीबादरायण ने खोला है किन्तु वह सूत्ररूप होनेके कारण मुमुक्षुओं के लिये अग्राह्य है। अतः भगवत्पाद श्रीशङ्कराचार्य ने हमारे सामने ऐसा सरल वैज्ञानिकभाष्यरूप विश्लेषणात्मक शस्त्र प्रस्तुत किया है, जिसके द्वारा हम सभी ग्रन्थ-ग्रन्थियों का भेदन सरलता से कर सकें, परन्तु शस्त्र चलाना एक कला है। उस कला की विस्तृत सामग्रीका प्रकाशन हमारे इस ग्रन्थ की विशेषता है। "ब्रह्मसूत्रम्" (विद्यानन्दवृत्तिः) नामक ग्रन्थ में हमारा कैसा और कितना प्रयास है तथा हम अपने यत्न में कहां तक सफल हैं यह तो पाठक स्वयं क्षीरनीरविवेक से समझ लेगें। परीक्षोत्तरण के लिये ग्रन्थ के अन्त में 'प्रथितम्' में "सन्तरणी" भी दी है जिससे छात्र अधिक लाभान्वित होंगे।

सम्पादक—लोकेशानन्द शास्त्री

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

—: प्रार्थना :—

शरीरं नीरोगं नवमपि वयः संस्कृतिमती
मतिर्वन्द्या जातिः प्रभुरपि भवान् भक्तिसुलभः ।
इतीयं सामग्री सुकृतशतलभ्या विघटते
न यावत्तावन्मे शृणु करुणमाक्रन्दितमिदम् ॥

* * *

परिम्लानो मानस्तनुरपि तनुस्ताम्यतितमां
मनो मोहावर्ते भ्रमति धृतिरस्तं व्रजति च ।
कथापि क्लेशानामवतरति नोच्छेदपदवीं
दवीयस्यामस्यां भवभुवि मुधा धावति मतिः ॥

* * *

दग्धोऽस्मि तावदमुना दमुना ममान्त—
र्यः प्रज्ज्वलत्यघनिदाघनिदानजन्मा ।
भुक्तस्य मे प्रतिभयातिभयाकुलस्य
वाणी कथं विगलतो गलतोऽभ्युदेति ॥

(स्तुतिकुसुमाञ्जलिः)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीहरिः

—: पूर्वपीठिका :—

(उपोद्घातः)

श्री १००८ स्वामी हरिहरानन्द सरस्वती जी महाराज

(करपात्री जी)

ॐ नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुन्द्रेन्द्रयमानिलेभ्यो नमोस्तु चन्द्रार्कमरुद्गणेभ्यः ॥

चन्द्रचन्द्रिकाप्रवाह इव सुधाशीतलः, मार्तण्डमण्डल इव प्रकाशपुञ्जपिञ्जरः, गगनाभोग इव गम्भीरः, वासन्तविपिनराशिरिव रमणीयः, रत्नाकर इव स्पृहणीयः, पवमान इव पवित्रः, प्राणा वेदानाम्, निष्कर्षः पुराणानाम्, सिद्धान्त उपनिषदाम्, प्रधानं दर्शनानाम्, निकषो विचारचारुतायाः, अभिमानो भारतवसुन्धरायाः, निष्पीडनं पाण्डित्यकाष्ठानाम्, अनुभवसिद्धिः समाधिभाजां, कृतार्थता जीवनस्य, जवनिका अविद्याप्रसरस्य, दिव्यज्योतिः पुरुषार्थस्य, मार्जनं विपदाम्, समाप्तिः संसारदारुणतायाः, समुत्तोलनं स्वतःप्रामाण्यस्य, समन्वयः सर्वधर्माणाम्, विवेकः कर्त्तव्यानां, सिंहनादो द्वैतिमृगाणाम्, विजयोद्घोष आस्तिक्यकौशलस्य, तर्जनं नास्तिक्यस्य, प्रत्यक्षं परमेश्वरस्य समुद्द्योतते वेदान्तराद्धान्तः । यत्र निरूप्यते परमतत्त्वं, मण्ड्यते अखण्डता परब्रह्मणः, निरस्यन्ते भेदाः, प्रदर्श्यते परज्योतिः, प्राप्यते शान्तिः, उपलभ्यते जीवन्मुक्तिः, खण्ड्यन्ते पाखण्डवादाः, विचार्यते जीवनरहस्यं, स्थिरीक्रियते आत्मस्वरूपं लालप्यते मोक्षः, द्रढय्यते मार्ग औपनिषदः, ज्ञाप्यते अनधिगतो भावः, समर्थ्यते सारः । तत्र जागर्ति ब्रह्मसूत्रं द्वैपायनमहर्षेः, तच्चाश्चर्यं संग्रथनं, सम्मेलनं श्रुतीनां, स्फोटनं गम्भीरतायाः, संग्रहः उपादेयतायाः निदर्शनं तपसां, भाण्डागारं विज्ञानस्य, दुरूहता परामर्शानां, दुष्प्रवेशता बुद्धिवैभवस्य । विचार्य सर्वा उपनिषदः, आकलय्य शास्त्राणि निर्मथ्य आगमान्, सन्धार्य गुरूपदेशान्, समुपास्य उपासनीयान्, अनुभूय चरमं प्रकाशं परमानन्दतुन्दिलं, साक्षात् शङ्कर एव आचार्यशङ्करः संन्यस्य बादरायणीयेषु तेषु सूत्रेषु गभीरं, उदात्तं, पेशलं, प्रौढं, सयुक्तिकं, सप्रमाणं, सविस्तरं, महार्थं, परमपुरुषार्थसाधनं जग्रन्थ शारीरकभाष्यं नाम । विश्वं यत्र चमत्कृतं, मोदिता विद्वद्धौरेयाः,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आमोदः प्रसृतः, सन्तोषः प्रवाहितः, प्रतिभाप्रासादो निर्मितः, प्रामाणिकता गुम्फिता, संशया उद्वासिता आनन्दसागरः समुद्वेल्लितः।

तदिदं सर्वोपकारपरमपि दुर्ग्रहं, पेशलमपि अतिकठिनं, सुन्दरमपि अस्पृश्यं, मधुरमपि दवीयस्तमं, प्रविस्तृतमपि अनवारपारीणमालक्ष्य भूयांसो विद्वांसो विभावयाम्बभूवुः व्याख्याननैपुण्यपुण्यरामणीयकानि। तत्र व्यजृम्भन्त श्रीमान्यमान्याः सौभाग्यभाग्यभाजः नेदीयांसोऽन्तेवसतां श्रीमन्तः पद्मपादाचार्याः, यदीयं विवरणप्रस्थानं प्रतिबिम्ववादश्च महनीयमहार्हत्वेन प्रगल्भेते, समादरणीयविभूष्याऽदूष्यवैदुष्याः सुरेश्वराचार्याः वाञ्छाञ्छामधिरोहन्तोऽपि पुण्यषाड्गुण्या इव सिद्धिं प्रतिबन्धातिशयप्रतिबद्धा नाध्यगमन् तदीययशः सिंहासनम्। अपरे च षड्दर्शनव्याख्यानालङ्कर्मीणा दिगन्तविश्रान्तकीर्तयः श्रीश्रीवाचस्पतिमिश्राः यदीयं वाचस्पतिप्रस्थानं, अवच्छेदवादः, परिमलान्तो वेदान्तः, इति डिण्डिमघोषः तदीया व्याख्या दैवतेव पूज्यते दार्शनिकैर्भामतीति।

इत्थं व्याख्यानव्याख्यानपारम्परी संजागरितापि विजृम्भितापि विभासितापि मेदुरितापि स्वस्वकौशलकलाकलितापि अनतिशयितशेमुषीकाणां विहारहारिहारहृतकरणग्रामाणां न प्रमोदावहा नितरां व्युत्पत्तिशक्तिपरिबृंहणीति—

'पतन्ति नास्मिन् विशदाः पतत्रिणो, धृतेन्द्रचापस्यपयोदपंक्तयः।
तथापि पुष्णाति नभाश्रियं परां, न रम्यमाहार्यमपेक्षते गुणम् ॥

इति भारविभणितककुभा माधुर्यौजः प्रसादेषु प्राचेतस व्यासकालिदासप्रमुखान्तर्वाणिप्रवीणैरादरकर्मतां प्रतिपनीपदितः प्रसादो गुणो गौरवगूरितः। तथा च सरलता, साधारणबुद्धिवेद्यता, सर्वोपकारकारणता, प्राञ्जलता केभ्यो न शुचिरुचिमादधताम्, अतः श्रीनृसिंहगिरिमहेशयतिमहोदयशिष्यतां चरितार्थयन्तो यथार्थाभिधाना विद्यानन्दवृत्तिप्रावीवृतन् लोकैषणापराङ्मुखा श्रीविद्यानन्दस्वामिमहाभागाः। विभूषयाम्बभूवुश्चैतां सर्ववेद्यां कर्तुं रमणीयया राष्ट्रभाषासिंहासनसाम्राज्यप्राज्यदीक्षादीक्षितया भाषया भारतभारतीमण्डलमण्डनमण्डितयेति सुरम्यमिदं सुशोभनमदः कमनीयमेतत्।

'धन्यास्ते कवयो यदीयरसनारूढाध्वसंचारिणी,
धावन्तीव सरस्वती द्रुतपदन्यासेन निष्क्रामति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्माकं रसपिच्छले पथि गिरां देवीजवो नोदयत्,

पीनोत्तुङ्गपयोधरेव युवतिर्मान्थर्यमालम्बते ॥'

इत्यनुहरन्ती वक्तुं विवशयन्ती समुदीरयितुमीरयन्ती प्रकटयन्ती पुरासरीसरीति वाग् यन्नवनीतमिव पयसां, सौगन्ध्यमिव सुमनसां, माधुर्यमिवजाह्नवीप्रवाहसलिलानामध्यासनिरूपणं हार्दं सारं मूलं सर्वस्वमिवौपनिषदानां यत्र महीयान् संरम्भो विश्ववन्द्यचरणाना-माचार्यवर्याणामपरेषां च वृत्तिकारप्रमुखमहामहिम्नां तदिदमपि प्रथमसूत्रे संरब्धमेवेति मन्तव्यम्।

यदीयमिदं स्वरूपं पर्यष्कार्षुः :—पूर्वदृष्टान्यदेशनिष्ठविशेष्यता-कासन्निहितपूर्वदृष्टनिष्ठप्रकारताकज्ञानत्वम्। 'स्मृतिरूपः परत्र पूर्वदृष्टा-वभासः' इत्यस्य निष्कृष्टं स्वरूपम्। स्मृतावतिव्याप्तिनिराकृतये अन्य-देशेति। परन्त्विदं लक्षणं न व्याप्नोति 'इदं रजतं' इत्यध्यासमिति अतिव्याप्नोति च 'पर्वतो वह्निमान्' इत्याद्यनुमिति चेन्न, असन्निहित-पदेन असतो विवक्षणात्। तत्त्वं च अधिष्ठानासमसत्ताकत्वम्। एवं च रजतस्य शुक्तिसमसत्ताकत्वाभावात् वह्न्यादेश्च समसत्ताकत्वात् नारु-न्तुदता। ननु 'इदं रजतम्' इत्यस्मिन् रजतस्य आधुनिकतया पूर्वदृष्ट-त्वाभावेन लक्षणासङ्गतिः, न च पूर्वदृष्ट सजातीयत्वनिवेशे नासङ्गतिः, प्रत्यभिज्ञानेऽनुमितौ च तथाप्यतिव्याप्तेः। स्मृतिपदेन विशेष्यासदृश सत्ताकत्वविवक्षया च तद्दोषस्य वारितत्वेऽपि यत्र चैतन्येऽहङ्कृतिः प्रागध्यस्ता तत्रैव पुनरध्यस्यत इति परत्र पूर्वदृष्टत्वाभावेन अव्याप्तिः।

अपूर्वव्यक्ति भ्रान्तिभूमौ च पूर्वदृष्टसाजात्याभावेनासङ्गतिः। तिसृणां सत्तानां वेदान्तिमात्र प्रख्यातेः लक्षणस्यैतस्य लोकसिद्धत्वानु-पपत्तिश्चेति चेदत्र ब्रूमः—सत्ये अनृतावभासोऽध्यासः इत्येव पर्यवसितिः। 'इदं रजतमि'त्यादि संगृहीतं रजस्यानृतत्वात् प्रत्यभि-ज्ञानेऽनुमित्यां च द्वयोः सत्यत्वेन नातिव्याप्तिः। ब्रह्मणि च सर्व-प्रपञ्चस्य अनृतस्यैव आरोप्यतया समेषामध्यासानां संग्रहः। विस्त-रस्तु अन्यतोऽवगन्तव्यः। अस्तु! इमे संस्कृत्रिमभाषाटीकने समीचीने सरले वहूपकारिणी चेति बाढं व्याहर्तुमीश्महे। यथा यत्र निभाल्यते तथा तत्र सन्तुष्टिरेव समजनीतिशम्।

—❀❀—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"प्रतिश्रवः"

अद्वैत सिद्धान्त भारतीय संस्कृति-किरणों का पूर्ण सुधांशु-मण्डल है। अध्यात्मसाधनाओं की चरम उपलब्धि है। और असीम मानवीय विचार धाराओं की अन्तिम सीमा है। उपनिषदों ने इस सिद्धान्त को दही से नवनीत के समान वेदों से उद्धृत किया। अतएव उपनिषदों को वेदान्त कहा जाने लगा। वेदों का अन्तिम अंश, वेदों का अन्तिम सिद्धान्त, वेदों का परमतात्पर्य विषयीभूत अर्थ इत्यादि वेदान्त शब्द की व्याख्या है। उपनिषद् वेदों के सारार्थ प्रदर्शक ही नहीं अपितु स्वयं वेदरूप भी हैं, अतएव सनातन सिद्धान्तानुसार ये अपौरुषेय भी हैं। अर्थात् किसी मानव-बुद्धि का विकास रूप नहीं, अपितु स्वयं प्रकाश इतर प्रमाणनिरपेक्ष ज्ञानकलना मात्र है।

प्रायः हर-एक भाषा में कुछ विशेषताएँ होती हैं। जैसे कि पदों की अनेकार्थता, वाक्य रचना में भिन्न-भिन्न अभिप्रायाभिव्यक्ति, लाक्षणिक प्रयोग आदि आदि। ये कोई दोष नहीं, किन्तु विकसित भाषाओं का अनिवार्य सौन्दर्य है! परन्तु भाषा के जो विशेषज्ञ नहीं होते उनके लिये तो अभिशापस्वरूप भी है। संस्कृत-भाषा की तो यह एक निजी विशेषता है कि इसमें नानार्थ तथा लाक्षणिक प्रयोगों की भरमार है। उपनिषदों को तो उसने ऐसा घेर रखा है जैसे सरोवर के पानी को शेवाल। यही कारण हुआ कि जो भाषा के अतिशय विशेषज्ञ नहीं, उसके लिये उपनिषदें दुरवगाह दुर्गम प्रतीत होने लगीं, जिस कारणसे ही मीमांसा सूत्रोंकी रचना करनी पड़ी। उपनिषदोंसे सम्बन्धित होनेसे उन सूत्रोंका भी नाम वेदान्त पड़ा।

कालक्रमेण सूत्रार्थ परिज्ञान प्राप्त करना भी कठिन होने लगा। अतएव सूत्रों पर भाष्योंकी रचना प्रारम्भ हुई। वैसे तो वेदान्तसूत्रों पर मतावलम्बियोंने अपने अपने मतानुसार भाष्य किये हैं। परन्तु यह बात किसीसे भी छिपी नहीं है कि तारोंके बीचमें चन्द्रमाके समान देदीप्यमान भाष्य तो आद्यशंकराचार्य-विरचित शारीरक-भाष्य ही है। "भाष्यं प्रसन्नगम्भीरं तद्-व्याख्यां श्रद्धयारभे" यह पद्मपादिकाचार्यकी उक्ति और 'भाष्यं प्रसन्न-गम्भीरं तत्प्रयुक्तं विभज्यते" यह भामतीकारवाचस्पति मिश्रकी उक्ति तभी अक्षरशः सत्य प्रतीत होती है जब मूलभाष्य पढ़कर पद्मपादिका और भामती आदि व्याख्याओं पर दृष्टि डालते हैं। भाष्य पढ़ते समय उसकी प्रसन्नता—प्रसाद गुण स्पष्ट परिलक्षित होता है और टीकाओंको देखते समय भाष्यकी गम्भीरताका अनुमान लगता है।

यद्यपि परवर्ती कई आचार्योंने 'शांकरभाष्य' पर धूलिप्रक्षेप करनेका अथक प्रयास किया और उनके पीछे आये अनुयायियोंकी आँखें बन्द करनेमें आंशिक

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सफलता भी प्राप्त की। परन्तु धूलीप्रक्षेप करनेवाले या तो दार्शनिक शब्दोंका पारिभाषिक अर्थ नहीं समझते या फिर जानबूझकर दूसरोंको अन्धेरेमें डालना चाहते हैं। इतने मात्रसे अन्य आक्षेपोंकी भी निःसारता आसानीसे जानी जा सकती है। अस्तु—

शांकर भाष्यका गम्भीर अर्थ समझानेके लिये यद्यपि अनेक व्याख्या उपव्याख्यादि हैं। परन्तु सबसे प्रथम इस बातकी आवश्यकता है कि आपत-रूपसे सम्पूर्ण भाष्यार्थ एक बार मस्तिष्कमें आ जाए, जिसके आधारपर अग्रिम उहापोहादि सुगम हो। एतदर्थ प्रथम संक्षिप्त वृत्तियोंकी आवश्यकता पड़ती है, न कि विशालकाय-व्याख्या ग्रन्थोंकी। ऐसे तो ब्रह्मसूत्रपर अनेक वृत्तियाँ उपलब्ध हैं जिनमें सदाशिवेन्द्र सरस्वती विरचित वृत्ति तथा रामकिंकर पण्डित कृत वृत्ति विशेषरूपसे उल्लेखनीय हैं। संगति, विषय, संशय, पूर्वपक्ष और उत्तरपक्षरूपी पञ्चाङ्गयुक्त अधिकरणोंका विभाग इन दोनों ही वृत्तियोंमें बड़ी कुशलताके साथ दिखाया गया है। परन्तु बड़े-बड़े विद्वानोंको कलम उठाते समय यह भय होता है कि अन्य विद्वान् सीधी सादी भाषा देखकर साधारण समझकर उपेक्षा न करें। दूसरी बात यह कि वे स्वभावसे ही लाचार होते हैं कि भाषामें कुछ चमत्कार ला देते हैं। वह अन्य विद्वानोंका मनोमहिक अवश्य होता है किन्तु सामान्य विद्यार्थियोंके लिये वही कठिनाई खड़ी कर देता है जो व्याख्या बृहद्व्याख्याग्रन्थोंमें होती है। आज, जब कि संस्कृताध्ययनाध्याप-नादिमें अवांछनीय शिथिलता दृष्टिगोचर हो रही है, इस चीजकी मांग बढ़ती जा रही है कि लेख सरल सुबोध हो।

इस आवश्यकताकी पूर्त्ति प्रस्तुत अभिनववृत्तिसे संभव होगी ऐसी आशा करता हूँ। लेखक महोदयने भाषाका सौन्दर्य प्रौढता आदिकी अपेक्षा विषयका स्पष्टीकरण और सरलता आदिको ही मुख्य स्थान दिया है जिसके कारण जिज्ञासुओंको इसकी उपयोगिता थोड़े ही समयमें प्रतीत होने लगेगी। वृत्तिको अधिक उपयोगी बनानेके लिये भामतीकल्पतरु आदि ग्रन्थोंसे भी स्थान-स्थान पर जो सहायता ली है वह सराहनीय है। और अल्प पंक्तियोंमें ही आवश्यक भागका समावेश भी विशेष महत्त्व रखता है। इस वृत्तिको एकबार पढ़ लेनेसे शांकर भाष्यका पूरा नकशा मनमें उतर आता है। फिर उस नकशेके अनुसार जहाँ तहाँ भी वस्तु ढूंढ निकालना सरल हो जाता है।

श्री स्वामी विद्यानन्दगिरिजीका यह महान प्रयत्न सर्वथा प्रशंस्य है। जिज्ञासुजन इससे अधिकाधिक लाभान्वित हो यही मेरी मानसिक अभिकांक्षा है।

स्वामी काशिकानन्द

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

❋ प्राज्ञ-प्रहारणानि ❋

❋ १ ❋

शुभाशीराशिः

श्रीमत्परमहंस परिव्राजकाचार्य श्रोत्रियब्रह्मनिष्ठ महामण्डलेश्वर
श्री १००८ स्वामी चैतन्यगिरि जी महाराज,
कैलास आश्रम, ऋषिकेश

स्वामी श्री विद्यानन्द गिरिजी प्रणीत ब्रह्मसूत्रविद्यानन्दवृत्तिको मैंने देखा है। उन्होंने शंकराचार्यसम्मत अद्वैतसिद्धान्तका भलो प्रकार निरूपण किया है। श्री शङ्कराचार्यका ही नहीं, सम्पूर्ण अध्यात्मशास्त्रका भी तात्पर्य अद्वैतमें ही है; क्योंकि उपनिषद्, पुराण इतिहासादिमें सर्वत्र द्वैतदर्शनकी निन्दाकी है। "द्वितीयाद्वै भयं भवति।" "उदरमन्तरं कुरुते अथ तस्य भयं भवति" "अथान्यां देवतामुपास्ते, अन्योऽसावन्यमहमिति न स वेद, यथा पशुः स देवानाम्" "मृत्युः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादि श्रुतियाँ बाधित हो जाती हैं। यदि भेदवादको स्वीकार कर लिया जाय, तो "एकधैवानुद्रष्टव्यम्" "नेह नानास्ति किञ्चन" "अयमात्मा ब्रह्म" "अहं ब्रह्मास्मि" "तत्त्वमसि" "शिवोऽहम्" "सोऽहम्" इत्यादि अद्वैतवादकी श्रुतियाँ भी निरर्थक हो जाती हैं। अतः अद्वैतवाद ऋषियोंका सर्वसम्मत वाद है। परन्तु प्रतीयमान द्वैतके होते हुये अद्वैतमें निष्ठा होना अत्यन्त कठिन है। जबतक यह वाद बुद्धिमें आरोह न हो जाय कि द्वैतप्रतीति भ्रान्ति है, तबतक अद्वैतमें बुद्धि स्थिर नहीं हो सकती है। इसीलिये श्रीशङ्कराचार्यने द्वैतमिथ्यात्वका विस्तारसे वर्णन किया है और भेदको सत्य मानने वाले तार्किकोंका दृढ़तापूर्वक निराकरण किया है तथा द्वैतवादियों द्वारा उद्भावित शङ्काओंका भली प्रकार निराकरण किया है। इन सब बातोंका स्पष्टीकरण स्वामी श्री विद्यानन्दजीने स्वरचित वृत्तिमें बड़ी बुद्धिमत्ता पूर्वक किया है। स्वल्पाक्षरोंमें सम्पूर्ण शाङ्करसिद्धान्तको भरना लेखकके व्याख्यानकौशल और लेखनचातुर्यको प्रगट करता है।

यह रचना जैसे छात्रोंके लिये उपयोगी है, वैसे ही सम्पूर्ण ब्रह्मसूत्रकाभाव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाननेवालोंके लिये भी उपादेय है। हमारी परमात्मासे प्रार्थना है कि यह ग्रन्थ सर्वप्रिय होकर कल्याण पथका प्रदर्शक बनें

अधिक आषाढ़ शुक्ल
सं० २०२६ वि०

* २ *

शिवाशंसनम्

प्रत्नानि नूत्नानि विचाररत्नान्यन्वेष्य यत्नेन समन्वयन्ती।
अध्यन्त—सूत्रानुग—वृत्तिमाला वाग्देवतालंकृतये सदास्तु॥
श्रद्धास्नेहः शेमुपीपात्रमेषा वृत्तिर्वर्तिर्ज्योतिरात्मा प्ररूढः।
ध्वान्तोऽविद्या तन्निवृत्तिर्विमोक्षः साक्षी ब्रह्मेति वेदान्ततत्त्वम्॥
वेदान्तदुग्धोदधिमन्थनोत्था विशुद्धहृत्पद्मकृतप्रतिष्ठा।
ब्रह्मप्रमा श्रीरिव, वृत्तिनाम्नानन्दाय विश्वस्य चिरं चकास्तु॥
विद्यानन्दाभिधा वृत्तिर्विद्यानन्दाविनिर्मिता।
विद्यानन्दवतां भूयाद् विद्यानन्दसमृद्धये॥

'विपुल' अखण्डानन्दसरस्वतीस्वामिनः
२८।१३, रिजरोड, मलाबारहिल
वम्बई—६

* ३ *

बादरायणसूत्राणां तात्पर्यविषये विप्रतिपत्तयो वर्तन्ते। अद्वैते ब्रह्मणि तेषां तात्पर्यमिति श्रीशङ्करभगवत्पादानां समभिप्रायः। अपरे चाचार्याः ये वर्तन्ते ते ब्रह्मसूत्राणामन्यादृशं तात्पर्यं विवर्णयन्ति, किन्तु वेदान्तशब्देन "अद्वैतसिद्धान्त" एव सिध्यते बोध्यते च। अद्वैतवादस्यापि विवरणेऽर्वाचीनाः विप्रतिपद्यन्ते, एवञ्च जीवस्वरूपप्रतिपादने विवरणाचार्याणां भामतिकाराणां मते विरोधो विदुषामविरोहित एव। अतः श्रीशङ्करभगवत्पादवर्णिता "अद्वैतवाद"स्यापि विवेचनं सर्वथानपेक्षितमिति वक्तुं शक्यते। महदिदं प्रमोदस्थानं यत् साम्प्रतिकै श्रीविद्यानन्दगिरिमहोदयैः काचन नवीना टिका प्रस्तूयते। आशास्महे अनया सानुनादवृत्त्या

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"अद्वैतवाद" प्रति महान् उपकारो भविष्यति। एतेषां महाभागानां सूत्रव्याख्यान-परिपाटी सरलापि प्रकृतार्थोपयोगिनी वर्तते। अपरमानन्दस्थानं यत् तैरेव सरलया हिन्दीभाषया काचन स्ववृत्तिमर्मार्थप्रकाशिनी वृत्तिः प्रदत्ता। अतो येऽसंस्कृतज्ञाः तेषामपि भाषाविवृत्त्या ब्रह्मसूत्रतात्पर्यबोधे महत् सौकर्यमिति विश्वसिमि।

डॉ० गौरीनाथ शास्त्री
उपकुलपतिः
वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

* ४ *

उपक्रमादिभिः षड्भिः प्रमाणैः सर्वेषां वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यमवसीयते। अद्वैतमतानुसारेण जीवब्रह्मणोरैक्यमेव वेदान्तस्य विषयः। तस्य चैक्यस्य परमगहनस्य प्रतिपादकानां वेदान्तवाक्यानां बहुत्वाद् गम्भीरत्वाच्च साधारणैरनवगाह्यत्वात् परमकारुणिको भगवान् व्यासो वेदान्त सूत्राणि रचितवान्। अल्पाक्षरैरेव सूत्रैरेभिः सर्ववेदान्तप्रतिपाद्यानां विषयाणामर्थावबोधो भवति। प्रसादगुणसम्पन्नैः सद्यः श्रवणमात्रेणैव स्वार्थोपस्थानक्षमैः 'अथातोब्रह्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यन्तै वेदान्तसूत्रैः साधारणासाधारणोभयविधाधिकारिभिर्लब्धो लाभः। किन्तु भगवत्पादैः श्रीमच्छङ्कराचार्यैरन्यैश्च भाष्यकृद्भिरेषां सूत्राणामुपरि ब्रह्मभाष्यमभाषि। किन्तु यदर्थं सूत्राणि प्रणीतानि भगवता व्यासेन यल्लाघवेन सूत्रार्थावबोधमात्रेण तत्प्रतिपादितदिशा साधकाः साधनानि सम्पाद्यस्वरूप साक्षात्कारद्वारा निखिलानर्थं वीजभूताविधानि वर्तनेन कृतकृत्या भवेयुरिति तद्दूरोत्सादितम्। भाष्याणामनेकशास्त्रार्थग्रथितत्वादसाधारणाधिकारिमात्र ग्राह्यार्थत्वात्। परमशान्तैर्दान्तैर्ब्रह्ममतिभिः परमयतिभिरनवरतशास्त्रैकव्यसनिभिरस्मच्चिरपरिचितैःनामानुरूपगुणैःश्रीमद्विद्यानन्दस्वामिभिः सूत्रार्थसंयोजकं भाष्यार्थसंग्राहकं साधारणासाधारणाधिकारिभिः सर्वैरवगमयोग्यं योग्यं व्याख्यानं रचितम्। अवलोकितं मया व्याख्यानमेतदवधारितश्चैषां श्रमः। अहो! नितान्तं स्वान्तं प्रसादयिष्यति सर्वेषां वेदान्तपरिशीलनपराणां ग्रन्थान्तरकाठिन्याद्वेदान्तशास्त्रश्रवणाद्विरक्तानामिति मे दृढः प्रत्ययः। अस्य व्याख्यानस्य प्रचारेण जिज्ञासूनामन्तः सञ्चारेण च कल्याण जगतो भूयादिति प्रार्थये भगवन्तं ज्ञाननिधिं भवानीपतिम्।

देवस्वरूपमिश्रः
वेदान्तविभागाध्यक्षः
वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

* ९ *

स्वामिश्रीविद्यानन्दमहोदयैः प्रणीता ब्रह्मसूत्रवृत्तिर्विलोकिता। संस्कृतभाषया राष्ट्रभाषया च लिखिताभ्यां तदीयव्याख्यानुवादाभ्यां बहूनां जिज्ञासूनां मनस्तोषो महानुपकारश्च सम्पत्स्येते इत्यत्र नास्ति संदीतिलेशोऽपि। श्रीविद्यानन्दस्वामिनो वेदान्तशास्त्रस्य मर्मज्ञा मनीषिणः साधकधुरीणाश्च। तेषामयमाशयो नूनं स्तुत्यो यद् वर्तमाने वैज्ञानिके राजनीतिके च युगे विविधं विपर्यस्यतो लोकस्य कल्याण वेदान्तविद्याप्रचारणादेव सेद्धुमर्हति। खण्डनकारस्येयमुक्तिः सर्वथा सत्या यत् 'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्'। वस्तुतो मानवजात्या यदि श्रुतिशिरोगिरोगवेषणपरस्य ब्रह्मसूत्रस्याद्वैतसिद्धान्तः स्वीकृतोऽपि व्यवहारेऽवतारितः स्यात्तदाऽस्मिन्ने जगति जाज्वल्यमानस्य सर्वविधसङ्घर्षानलस्य त्वरितोपशमेन सर्वत्र प्रेमामृतान्विता विश्वबन्धुता सुप्रतिष्ठापिता स्यात्। अस्य लक्ष्यस्य पूर्तये श्रीविद्यानन्दस्वामिनामयं प्रयासः पूर्णमभिनन्दनीयः। एतस्मै लोककल्याणकर्मणे श्रीस्वामिमहाभागानभिन्दयन्नहं तानुत्साहयितुं कामये यत्तैरीदृशानामन्यग्रन्थानामपि रचनया मानवसमाजः सततमुपक्रियेतेति।

बद्रीनाथशुक्लः

सञ्चालकः—अनुसन्धान-संस्थान,

वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

* ६ *

श्रीमत्परमहंस परिव्राजक आचार्य महामंडलेश्वर अनन्त श्री स्वामी विद्यानन्द गिरिजी महाराज के प्रणीत विद्यानन्दवृत्ति का अवलोकन करके बड़ा हर्ष हुआ और गर्व भी। परमहंसों की परंपरा से ही भिक्षुसूत्रों का वास्तविक पोषण और विकास संभव है। वह कार्य अद्यावधि श्लाघनीय रूप से चल रहा है इस का यह ग्रन्थ ही स्पष्ट प्रमाण है। अतिगंभीर भाष्य सागर का मन्थन करके सारामृत निकालने के कई प्रयास हुये हैं और होते रहेंगे। क्योंकि यह अमरशास्त्र है। इसकी अवगति की आवश्यकता अन्तरिक्षयात्रा के इस युग में और अधिक हो गई है। संक्षेप में सरल संस्कृत भाषा के द्वारा वेदान्त शास्त्र के रहस्य का उद्घाटन करने में स्वामिपाद की सफलता ग्रन्थ के ऊपर आपात दृष्टि करने वालों को भी स्पष्टतया प्रतीत हो ही जाती है। श्रीस्वामीजी समस्त वेदान्त परंपरा के आश्रितों के धन्यवादार्ह हैं।

विनीत—ईश्वरानन्द गिरि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"आकूतम्"

विदाङ्कुर्वन्तु तत्र भवन्तो विपश्चित्पश्चिमाः ! यत्किल निखिले विश्वेऽस्मिन्ननादिकालतो वेदानां माहात्म्यमतिरोहितं, तत्र कर्मोपासनाज्ञानानि मनःस्थितानां मलविक्षेपावरणात्मकदोषाणां निवृत्तये विहितानि। कर्मोपासनानुष्ठानेन विशुद्धसत्त्वस्य ब्रह्मात्मैक्यावबोधाय श्रुतिशिखासूपनिषत्सु प्रवृत्तिर्भवतीति 'अथातो ब्रह्मजिज्ञासे'त्यनेन भगवता बादरायणेन निगदितम्। तत्र किं लक्षणलक्षितं ब्रह्म जिज्ञासितव्यमित्याकांक्षायां 'जन्माद्यस्य यतः' इति तटस्थलक्षणेन लक्षितं ब्रह्मेति निरुक्तम्।

नन्वेतल्लक्षणलक्षितं ब्रह्मेह जिज्ञासितव्यं चेत्तर्हि तत्रैव बादरायणसूत्राणां तात्पर्यमभ्युपेयम्। कथं निर्गुणं निर्विशेषब्रह्मैतत्प्रतिपाद्य स्यादिति चेन्न; एतेषां सूत्राणां श्रुत्यर्थग्रन्थायारम्भसम्भवात्। उपनिषद्वाक्यानां हि तात्पर्यनिर्णयाय भगवता बादरायणेन ब्रह्मसूत्राणि निर्मितानि। अतः उपनिषत्प्रतिपाद्येऽर्थे एव ब्रह्मसूत्राणां तात्पर्यमवधेयम्। सर्वेषां श्रुतिवाक्यानां साक्षात्परम्परया वाऽद्वैतब्रह्मावबोधने तात्पर्यमिति षड्विधैस्तात्पर्यनिर्णायकलिङ्गैरेतन्निर्णीतम्। तथा च 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि' (छा० ६।२।१) त्युपक्रम्य 'एतदात्म्यमिदं सर्वमि' (छा० ६।१६।३) त्युपसंहारः। 'तत्त्वमसीति पुनः पुनः नवकृत्व उपदेशोऽभ्यासः। अत्र वाव किल सत्सोम्य ! न निभालयसे, अत्रैव किलेति' (छा० ६।१३।२) इत्यपूर्वता। 'आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छा० ६।१४।२) इति फलम्। 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि' (छा० ६।१।१) त्यर्थवादः। 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि' (छा० ६।१।१) त्युपपत्तिः। यथा षड्विधलिङ्गैरनुसन्धीयमानानामेतच्छान्दोग्य षष्ठप्रपाठकवाक्यानामद्वैते तात्पर्यं, तथाऽन्येषां श्रुतिवाक्यानामपि तत्रैव ब्रह्मात्मैक्यावबोधने तात्पर्यमिति सर्वत्रैवानुसन्धेयम्। एवमुपनिषत्सारभूतानां भगवद्गीतानां ब्रह्मसूत्राणां चापि निर्विशेषब्रह्मावगमने तात्पर्यं विद्वद्भिरतिरोहितं बोध्यम्।

यद्यपि ब्रह्मसूत्राणां तात्पर्यावबोधनाय श्रीमच्छाङ्करभाष्यं तट्टीकाभामत्यादिनिबन्धा एवालम्, तथापि सरलतया संक्षेपेण तदभिप्रायमवगन्तुं नहि सर्वे जनाः प्रभवन्ति। अतो वृत्तिग्रन्थनिर्माणमत्यावश्यकम्। सन्ति खल्वितोऽपि पूर्वमनेके ब्रह्मतत्त्वप्रकाशिकाप्रभृतयो वृत्तिग्रन्थाः ! तेषु कतिचिदत्यल्पकायाः सूत्रतात्पर्यमवबोधयितुमसमर्थाः, कतिचिद् भाष्याद्यपेक्षयाऽपि कठिनभाषायां विलिखिताः सुकुमार

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तरबुद्धिमद्भिर्दुरवग्राह्याः । अतः शाङ्करभाष्यमनुसृत्यातिसरलतया ब्रह्मसूत्रतात्पर्यावबोधनायायं लघु प्रयत्नो मया व्यधायि । आशासे ब्रह्मजिज्ञासुभिरिमां विद्यानन्दाभिधां वृत्तिं समनुसृत्यावश्यं ब्रह्मसूत्रतात्पर्यमधिगंस्यते । ततः परं भाष्यादितात्पर्यावबोधनेऽपि सौकर्यं स्यात् । अत एतद्वृत्तेर्निर्माणं नानावश्यकम् । विशेषतः परीक्षाब्धितितीर्षूणां कृते विद्यानन्दवृत्तिरियं चतुःसूत्रीभामतीपरीक्षाब्धितरणी च परीक्षामहोदधिसन्तरणाय साहाय्यं दद्यादिति दृष्ट्यापि निर्माणमेतस्या आवश्यकम् ।

दिल्लीस्थश्रीविश्वनाथसंस्कृतमहाविद्यालयस्य सञ्चालने तत्रस्थानां कुशाग्रधियां छात्राणामध्यापने व्यस्तोऽप्यहमेतल्लेखनेऽनलसतया प्रयतनमकार्षम्, ब्रह्मतत्त्वप्रकाशिकावृत्तेर्भामतीकल्पतरोश्च साहाय्यं सूत्रसंगत्यादिलेखने लब्धवान्, तदर्थं तत्कर्तॄणामधमर्णोऽहम् । अनुवादलेखनावसरे तल्लिपिकर्त्राऽन्तेवासिना श्रीरामचन्द्रब्रह्मचारिणा साहाय्यं प्रदत्तं, शोध्यपत्रसंशोधने श्रीगोविन्दानन्दब्रह्मचारिणः पुस्तकसम्पादने श्रीलोकेशानन्दशास्त्रिणः श्रीबलदेवानन्दब्रह्मचारिणश्च पौरुषं श्लाघनीयमस्ति । तदर्थं तेभ्यो भूरिशो धन्यवादानाशीर्वचनानि च प्रयच्छामि, दीर्घायुष्यं च तेषां कामये । अनेके महानुभावाः स्वीयां बहुमूल्यां सम्मतिं ममोत्साहप्रवृद्धयेऽत्रविषये जनानां प्रवृत्तये च प्रादुः, तेभ्यो विद्वत्तल्लजेभ्यो भूरिशो धन्यवादान् वितरामि । एतत्प्रकाशनाय केचिन्महानुभावाः संस्कृतानुरागिणः सहर्षमर्थसाहाय्यं प्रदत्तवन्तस्तदर्थं तेषामहं मङ्गलं कामये । अन्तेऽहं गुणैकपक्षपातिभ्यः पाठकेभ्यो निवेदयामि, यत्किल सूक्ष्मान्वेषणदृष्ट्या परिशोध्यमानान् दोषानुद्भाव्य मां सूचयन्तु भवन्तः, येन द्वितीयसंस्करणे यथासमयं तान्परिशोध्य सुसंस्कृतं सम्पाद्य स्यादित्यों शम् ।

पुरुषोत्तममासः आषाढ़शुक्लः
सं० २०२६ वि० सन् १९६९

भगवत्पादीयः
विद्यानन्दगिरिः
कैलास आश्रमः, ऋषिकेशः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"विषयविटपः"



गुच्छः पर्णम्

अधि. क्र. सं. (प्रथमाध्याये प्रथमःपादः)

१. जिज्ञासाधिकरणम् २
सूत्र सं०-(१) अथातो ब्रह्मजिज्ञासा ।
२. जन्माद्यधिकरणम् ३
(२) जन्माद्यस्य यतः ।
३. शास्त्रयोनित्वाधिकरणम् ४
(३) शास्त्रयोनित्वात् ।
४. समन्वयाधिकरणम् ५
(४) तत्तु समन्वयात् ।
५. ईक्षत्यधिकरणम् ७
(५) ईक्षतेर्नाशब्दम् । (६) गौणश्चेन्नात्मशब्दात् । (७) तन्निष्ठस्य मोक्षोपदेशात् । (८) हेयत्वावचनाच्च । (९) स्वाप्ययात् । (१०) गतिसामान्यात् । (११) श्रुतत्वाच्च ।
६. आनन्दमयाधिकरणम् १०
(१२) आनन्दमयोऽभ्यासात् । (१३) विकारशब्दान्नेति चेन्न; प्राचुर्यात् । (१४) तद्धेतुव्यपदेशाच्च । (१५) मान्त्रवर्णिकमेव च गीयते । (१६) नेतरोऽनुपपत्तेः । (१७) भेदव्यपदेशाच्च । (१८) कामाच्च नानुमानापेक्षा । (१९) अस्मिन्नस्य च तद्योगं शास्ति ।
७. अन्तरधिकरणम् १४
(२०) अन्तस्तद्धर्मोपदेशात् । (२१) भेदव्यपदेशाच्चान्यः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छ पर्णम्

८. आकाशाधिकरणम् १४

(२२) आकाशस्तल्लिङ्गात् ।

९. प्राणाधिकरणम् १५

(२३) अत एव प्राणः ।

१०. ज्योतिश्चरणाधिकरणम् १६

(२४) ज्योतिश्चरणाभिधानात् । (२५) छन्दोऽभिधानान्नेति चेन्न; तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम् । (२६) भूतादिपादव्यपदेशोपपत्तेश्चैवम् । (२७) उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ।

११. प्रतर्दनाधिकरणम् १८

(२८) प्राणस्तथानुगमात् । (२९) न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् । (३०) शास्त्रदृष्ट्या तूपदेशो वामदेववत् (३१) जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ।

(प्रथमाध्याये द्वितीयः पादः)

१. सर्वत्रप्रसिद्ध्यधिकरणम् २०

(३२) सर्वत्र प्रसिद्धोपदेशात् । (३३) विवक्षितगुणोपपत्तेश्च । (३४) अनुपपत्तेस्तु न शारीरः । (३५) कर्मकर्तृव्यपदेशाच्च । (३६) शब्दविशेषात् । (३७) स्मृतेश्च । (३८) अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न; निचाय्यत्वादेवं व्योमवच्च । (३९) संभोगप्राप्तिरिति चेन्न; वैशेष्यात् ।

२. अत्रधिकरणम् २२

(४०) अत्ता चराचरग्रहणात् । (४१) प्रकरणाच्च ।

३. गुहाधिकरणम् २३

(४२) गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् । (४३) विशेषणाच्च ।

४. अन्तराधिकरणम् २४

(४४) अन्तर उपपत्तेः । (४५) स्थानादिव्यपदेशाच्च । (४६) सुखविशिष्टाभिधानादेव च (४७) श्रुतोपनिषत्कगत्यभिधानाच्च (४८) अनवस्थितेरसम्भवाच्च नेतरः ।

५. अन्तर्याम्यधिकरणम् २६

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(४९) अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्। (५०) न च स्मार्तमतद्धर्माभिलापात्। (५१) शारीरश्चोभयेऽपि हि भेदेनैनमधीयते।

६. अदृश्यत्वाधिकरणम् २७

(५२) अदृश्यत्वादिगुणको धर्मोक्तेः। (५३) विशेषणभेदव्यपदेशाभ्यां च नेतरौ (५४) रूपोपन्यासाच्च।

७. वैश्वानराधिकरणम् २८

(५५) वैश्वानरः साधारणशब्दविशेषात। (५६) स्मर्यमाणमनुमानं स्यादिति। (५७) शब्दादिभ्योऽन्तः प्रतिष्ठानाच्चनेति चेन्न; तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते- (५८) अतएव न देवता भूतं च। (५९) साक्षादप्यविरोधं जैमिनिः (६०) अभिव्यक्तेरित्याश्मरथ्यः। (६१) अनुस्मृतेर्बादरिः (६२) सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति। (६३) आमनन्ति चैनमस्मिन्।

(प्रथमाध्याये तृतीयः पादः)

१. द्युभ्वाद्यधिकरणम् ३२

(६४) द्युभ्वाद्यायतनं स्वशब्दात्।(६५) मुक्तोपसृप्य-व्यपदेशात्। (६६) नानुमानमतच्छब्दात्। (६७) प्राणभृच्च। (६८) भेदव्यपदेशात्। (६९) प्रकरणात्। (७०) स्थित्यदनाभ्यां च।

२. भूमाधिकरणम् ३३

(७१) भूमा संप्रसादादध्युपदेशात्। (७२) धर्मोपपत्तेश्च।

३. अक्षराधिकरणम् ३५

(७३) अक्षरमम्बरान्तधृतेः। (७४) सा च प्रशासनात्। (७५) अन्यभावव्यावृत्तेश्च।

४. ईक्षितकर्मव्यपदेशाधिकरणम् ३५

(७६) ईक्षतिकर्मव्यपदेशात्।

५. दहराधिकरणम् ३६

(७७) दहर उत्तरेभ्यः। (७८) गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गञ्च। (७९) धृतेश्चमहिम्नोऽस्यास्मिन्नुपलब्धेः। (८०) प्रसिद्धेश्च। (८१) इतरपरामर्शात्स इति चेन्नासम्भवात्। (८२) उत्तराच्चेदाविर्भूतस्वरूपस्तु। (८३) अन्यार्थश्च परा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

मर्शः। (८४) अल्पश्रुतेरिति चेत्तदुक्तम्।

६. अनुकृत्यधिकरणम् ३६

(८५) अनुकृतेस्तस्य च। (८६) अपि च स्मर्यते।

७. प्रमिताधिकरणम् ४०

(८७) शब्दादेव प्रमितः। (८८) हृद्यपेक्षया तु मनुष्याधिकारत्वात्।

८. देवताधिकरणम् ४०

(८९) तदुपर्यपि बादरायणः सम्भवात्। (९०) विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्। (९१) शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्। (९२) अत एव च नित्यत्वम्। (९३) समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च। (९४) मध्वादिष्वसम्भवादनधिकारं जैमिनिः। (९५) ज्योतिषिभावाच्च। (९६) भावं तु बादरायणोऽस्ति हि।

९. अपशूद्राधिकरणम् ४४

(९७) शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि। (९८) क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्। (९९) संस्कारपरामर्शात्तदभावाभिलापाच्च। (१००) तद्भावनिर्धारणे च प्रवृत्तेः। (१०१) श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च।

१०. कम्पनाधिकरणम् ४६

(१०२) कम्पनात्।

११. ज्योतिराधिकरणम् ४७

(१०३) ज्योतिर्दर्शनात्।

१२. अर्थान्तरत्वादिव्यपदेशाधिकरणम् ४७

(१०४) आकाशोऽर्थान्तरत्वादिव्यपदेशात्।

१३. सुषुप्त्युत्क्रान्तिरधिकरणम् ४८

(१०५) सुषुप्त्युत्क्रान्त्योर्भेदेन। (१०६) पत्यादिशब्देभ्यः।

(प्रथमाध्याये चतुर्थः पादः)

१. आनुमानिकाधिकरणम् ४९

(१०७) आनुमानिकमप्येकेषामिति चेन्न, शरीररूपकविन्यस्तगृहीतेर्दर्शयति च। (१०८) सूक्ष्मं तु तदर्हत्वात्। (१०९) तदधीनत्वादर्थवत्। (११०) ज्ञेयत्वावचनाच्च। (१११) वद-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छ पर्णम्

तीति चेन्न; प्राज्ञो हि प्रकरणात्। (११२) त्रयाणामेव चैवमुपन्यासः प्रश्नश्च। (११३) महद्वच्च।

२. चमसाधिकरणम् ५१

(११४) चमसवद्विशेषात्। (११५) ज्योतिरुपक्रमा तु तथा ह्यधीयत एके। (११६) कल्पनोपदेशाच्च मध्वादिवदविरोधः।

३. संख्योपसंग्रहाधिकरणम् ५३

(११७) न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च। (११८) प्राणादयो वाक्यशेषात्। (११९) ज्योतिषैकेषामसत्यन्ने।

४. कारणत्वाधिकरणम् ५४

(१२०) कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः। (१२१) समाकर्षात्।

५. बालाक्यधिकरणम् ५५

(१२२) जगद्वाचित्वात्। (१२३) जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् (१२४) अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।

६. वाक्यान्वयाधिकरणम् ५७

(१२५) वाक्यान्वयात्। (१२६) प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः। (१२७) उत्क्रमिष्यत एवं भावादित्यौडुलोमिः। (१२८) अवस्थितेरिति काशकृत्स्नः।

७. प्रकृत्यधिकरणम् ५८

(१२९) प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्। (१३०) अभिध्योपदेशाच्च। (१३१) साक्षाच्चोभयाम्नानात्। (१३२) आत्मकृतेः परिणामात्। (१३३) योनिश्च हि गीयते।

८. सर्वव्याख्यानाधिकरणम् ६०

(१३४) एतेन सर्वे व्याख्याताः।

(द्वितीयाध्याये प्रथमः पादः)

१. स्मृत्यधिकरणम् ६१

(१३५) स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्। (१३६) इतरेषां चानुपलब्धेः।

२. योगप्रत्युक्त्यधिकरणम् ६२

(१३७) एतेन योगः प्रत्युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

३. विलक्षणत्वाधिकरणम् ६२

१३८ न विलक्षणत्वादस्य तथात्वं च शब्दात्। (१३९) अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्। (१४०) दृश्यते तु। (१४१) असदिति चेन्न; प्रतिषेधमात्रत्वात्। (१४२) अपीतौ तद्वत् प्रसङ्गादसमञ्जसम्। (१४३) न तु दृष्टान्तभावात्। (१४४) स्वपक्षदोषाच्च। (१४५) तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः।

४. शिष्टापरिग्रहाधिकरणम् ६५

(१४६) एतेन शिष्टापरिग्रहा अपि व्याख्याताः।

५. भोक्त्रापत्त्यधिकरणम् ६६

(१४७) भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्।

६. आरम्भणाधिकरणम् ६६

(१४८) तदनन्यत्वमारम्भणशब्दादिभ्यः। (१४९) भावे चोपलब्धेः (१५०) सत्त्वाच्चावरस्य। (१५१) असद्व्यपदेशान्नेति चेन्न; धर्मान्तरेण वाक्यशेषात्। (१५२) युक्तेः शब्दान्तराच्च। (१५३) पटवच्च (१५४) तथा च प्राणादिः।

७. इतरव्यपदेशाधिकरणम् ६७

(१५५) इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः। (१५६) अधिकं तु भेदनिर्देशात्। (१५७) अश्मादिवच्च तदनुपपत्तिः।

८. उपसंहारदर्शनाधिकरणम् ७०

(१५८) उपसंहारदर्शनान्नेति चेन्न; क्षीरवद्धि। (१५९) देवादिवदपि लोके।

९. कृत्स्नप्रसक्त्यधिकरणम् ७१

(१६०) कृत्स्नप्रसक्तिर्निरवयवत्व शब्दकोपो वा। (१६१) श्रुतेस्तु शब्दमूलत्वात्। (१६२) आत्मनि चैवं चित्राश्च हि। (१६३) स्वपक्षदोषाच्च।

१०. सर्वोपेताधिकरणम् ७२

(१६४) सर्वोपेता च तद्दर्शनात्। (१६५) विकरणत्वान्नेति चेत्तदुक्तम्।

११. न प्रयोजनत्वाधिकरणम् ७३

(१६६) न प्रयोजनवत्त्वात्। (१६७) लोकवत्तु लीलाकैवल्यम्।

१२. वैषम्यनैर्घृण्याधिकरणम् ७४

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१६८) वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति । (१६९) न कर्माविभागादिति चेन्नानादित्वात् । (१७०) उपपद्यते चाप्युपलभ्यते च ।
१३. सर्वधर्मोपपत्त्यधिकरणम् ... : ... ७५
(१७१) सर्वधर्मोपपत्तेश्च ।

(द्वितीयाध्याये द्वितीयः पादः)

१. रचनानुपपत्त्यधिकरणम् ७६
(१७२) रचनानुपपत्तेश्च नानुमानम् । (१७३) प्रवृत्तेश्च । (१७४) पयोम्बुवच्चेत्तत्रापि । (१७५) व्यतिरेकानवस्थितेश्चानपेक्षत्वात् । (१७६) अन्यत्राभावाश्च न तृणादिवत् । (१७७) अभ्युपगमेऽप्यार्थाभावात् । (१७८) पुरुषाश्मवदिति चेत्तथापि । (१७९) अङ्गित्वानुपपत्तेश्च । (१८०) अन्यथानुमितौ च ज्ञशक्तिवियोगात् । (१८१) विप्रतिषेधाच्चासमञ्जसम् ।
२. महद्दीर्घाधिकरणम् ८०
(१८२) महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ।
३. परमाणुजगत्कारणत्वाधिकरणम् ८१
(१८३) उभयथापि न कर्मातस्तदभावः । (१८४) समवायाभ्युपगमाच्च साम्यादनवस्थितेः । (१८५) नित्यमेव च भावात् । (१८६) रूपादिमत्त्वाच्च विपर्ययो दर्शनात् । (१८७) उभयथा च दोषात् । (१८८) अपरिग्रहाच्चात्यन्तमनपेक्षा ।
४. समुदायाधिकरणम् ८३
(१८९) समुदाय उभयहेतुकेऽपि तदप्राप्तिः । (१९०) इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्र निमित्तत्वात् । (१९१) उत्तरोत्पादे च पूर्वनिरोधात् (१९२) असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा । (१९३) प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् । (१९४) उभथा च दोषात् । (१९५) आकाशे चाविशेषात् । (१९६) अनुस्मृतेश्च । १९७ नासतो दृष्टात् । (१९८: उदासीनानामपि चैवं सिद्धिः ।
५. अभावाधिकरणम् ८
(१९९) नाभाव उपलब्धेः । (२००) वैधर्म्याच्च न स्वप्नादिवत् । (२०१) न भावोऽनुपलब्धेः, (२०२) क्षणिकत्वाच्च ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(२०३) सर्वथानुपपत्तेश्च।

६. एकस्मिन्नसम्भवाधिकरणम् ८९

(२०४) नैकस्मिन्नसम्भवात्। (२०५) एवं चात्माऽकात्स्न्र्यम्। (२०६) न च पर्यायादप्यविरोधो विकारादिभ्यः। (२०७) अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः।

७. पत्यधिकरणम् ९०

(२०८) पत्युरसामञ्जस्यात्। (२०९) सम्बन्धानुपपत्तेश्च। (२१०) अधिष्ठानानुपपत्तेश्च। (२११) करणवच्चेन्न भोगादिभ्यः। (२१२) अन्तवत्त्वमसर्वज्ञता वा।

८. उत्पत्त्यसम्भवाधिकरणम् ९१

(२१३) उत्पत्त्यसम्भवात्। (२१४) न च कर्त्तुः करणम्। (२१५) विज्ञानादिभावे वा तदप्रतिषेधः। (२१६) विप्रतिषेधाच्च।

(द्वितीयाध्याये तृतीयः पादः)

१. वियदधिकरणम् ९३

(२१७) न वियदश्रुतेः। (२१८) अस्ति तु। (२१९) गौण्यसम्भवात्। (२२०) शब्दाच्च। (२२१) स्याच्चैकस्य ब्रह्मशब्दवत्। (२२२) प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः। (२२३) यावद्विकारं तु विभागो लोकवत्।

२. मातरिश्वाधिकरणम् ९६

२२४ एतेन मातरिश्वा व्याख्यातः।

३. असम्भवाधिकरणम् ९६

(२२५) असम्भवस्तु सतोऽनुपपत्तेः।

४. तेजोऽधिकरणम् ९७

(२२६) तेजोऽतस्तथा ह्याह।

५. अबधिकरणम् ९७

(२२७) आपः।

६. पृथिव्यधिकरणम् ९८

(२२८) पृथिव्यधिकाररूपशब्दान्तरेभ्यः।

७. तदभिध्यानाधिकरणम् ९८

(२२९) तदभिध्यानादेव तु तल्लिङ्गात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः … पर्णम्
८. विपर्ययाधिकरम् … … ९९
(२३०) विपर्ययेण तु क्रमोऽत उपपद्यते च ।
९. अन्तराविज्ञानाधिकरणम् … … ९९
(२३१) अन्तराविज्ञानमनसी क्रमेण तल्लिङ्गात् दिति चेन्नाविशेषात् ।
१०. चराचरव्यपाश्रयाधिकरणम् … … १००
(२३२) चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भाव-वित्वात् ।
११. आत्माधिकरणम् … … १००
(२३३) नात्मश्रुतेर्नित्यत्वाच्च ताभ्यः ।
१२. साधिकरणम् … … … १०१
(२३४) ज्ञोऽत एव ।
१३. उत्क्रान्त्यधिकरणम् … … १०२
(२३५) उत्क्रान्तिगत्यागतीनाम् । (२३६) स्वात्मना चोत्त-रयोः । (२३७) नाणुरतच्छ्रुतेरिति चेन्नतराधिकारात् । (२३८) स्वशब्दोन्मानाभ्यां च । (२३९) अविरोधश्चन्दन-वत् । (२४०) अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि-हि । (२४१) गुणाद्वा लोकवत् । (२४२) व्यतिरेकोगन्ध-वत् । (२४३) तथा च दर्शयति । (२४४) पृथगुपदेशात् । (२४५) तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् । (२४६) यावदात्मभावित्वाच्च नदोषस्तद्दर्शनात् । (२४७) पुंस्त्वादि-वत्त्वस्य सतोऽभिव्यक्तियोगाच्च । (२४८) नित्योपलब्ध्य-नुलब्धिप्रसङ्गोऽन्यतरनियमो नान्यथा ।
१४. कर्त्रधिकरणम् … … १०५
(२४९) कर्ताशास्त्रार्थवत्त्वात् । (२५०) विहारोपदेशात् । (२५१) उपादानात् । (२५२) व्यपदेशाच्च क्रियायां न चे-न्निर्देशविपर्ययः स्यात् । (२५३) उपलब्धिवदनियमः । (२५४) शक्तिविपर्ययात् । (२५५) समाध्यभावाच्च ।
१५. तक्षाधिकरणम् … … १०७
(२५६) यथा च तक्षोभयथा ।
१६. परायत्ताधिकरणम् … … १०७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(२५७) परात्तु तच्छ्रुतेः । (२५८) कृतप्रयत्नापेक्षस्तु विहित-प्रतिषिद्धावैयर्थ्यादिभ्यः ।

१७. अंशाधिकरणम् १०६

(२५९) अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्व-मभिधीयत एके । (२६०) मन्त्रवर्णाच्च । (२६१) अपि च स्मर्यते । (२६२) प्रकाशादिवन्नैवं परः । (२६३) स्मरन्ति च । (२६४) अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् । (२६५) असंततेश्चाव्यतिकरः । (२६६) आभास एव च । (२६७) अदृष्टानियमात् । (२६८) अभिसन्ध्यादिष्वपि चैवम् । (२६९) प्रदेशान्नेति चेन्नान्तर्भावात् ।

(द्वितीयाध्याये चतुर्थः पादः)

१. प्राणोत्पत्त्यधिकरणम् ११२

(२७०) तथा प्राणाः । (२७१) गौण्यसम्भवात् । (२७२) तत्प्राक्श्रुतेश्च । (२७३) तत्पूर्वकत्वाद्वाचः ।

२. सप्तगत्यधिकरणम् ११४

(२७४) सप्तगतेर्विशेषितत्वाच्च । (२७५) हस्तादयस्तु स्थितेऽतो नैवम् ।

३. प्राणाणुत्वाधिकरणम् ११५

(२७६) अणवश्च ।

४. प्राणश्रैष्ठ्याधिकरणम् ११५

(२७७) श्रेष्ठश्च ।

५. न वायुक्रियाधिकरणम् ११५

(२७८) न वायुक्रिये पृथगुपदेशात् । (२७९) चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः । (२८०) अकरणत्वाच्च न दोषस्तथा हि दर्शयति । (२८१) पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ।

६. श्रेष्ठाणुत्वाधिकरणम् ११७

(२८२) अणुश्च ।

७. ज्योतिराद्यधिकरणम् ११७

(२८३) ज्योतिराद्यधिष्ठानं तु तदामननात् । (२८४) प्राणवता शब्दात् । (२८५) तस्य च नित्यत्वात् ।

८. इन्द्रियाधिकरणम् ११८

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(२८६) त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्। (२८७) भेदश्रुतेः। (२८८) वैलक्षण्याच्च।

९. संज्ञामूर्तिक्लृप्त्यधिकरणम् ११९

(२८९) संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। (२९०) मांसादिभौमं यथाशब्दमितरयोश्च। (२९१) वैशेष्यात्तु तद्वादस्तद्वादः।

(तृतीयाध्याये प्रथमः पादः)

१. तदन्तरप्रतिपत्त्यधिकरणम् १२१

(२९२) तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्। (२९३) त्र्यात्मकत्वात्तु भूयस्त्वात्। (२९४) प्राणगतेश्च। (२९५) अग्न्यादिगतिश्रुतेरिति चेन्न, भाक्तत्वात्। (२९६) प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः। (२९७) अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः। (२९८) भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति।

२. कृतात्ययाधिकरणम् १२३

(२९९) कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च। (३००) चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः। (३०१) आनर्थक्यमिति चेन्न तदपेक्षत्वात्। (३०२) सुकृतदुष्कृते एवेति बादरिः।

३. अनिष्टादिकार्यधिकरणम् १२५

(३०३) अनिष्टादिकारिणामपि च श्रुतम्। (३०४) संयमने त्वनुभूयेतरेषामारोहावरोहौ, तद्गतिदर्शनात्। (३०५) स्मरन्ति च। (३०६) अपि च सप्त। (३०७) तत्रापि च तद्व्यापारादविरोधः। (३०८) विद्याकर्मणोरिति तु प्रकृतत्वात्। (३०९) न तृतीये तथोपलब्धेः। (३१०) स्मर्यतेऽपि च लोके। (३११) दर्शनाच्च। (३१२) तृतीयशब्दावरोधः संशोकजस्य।

४. साभाव्यापत्त्यधिकरणम् १२७

(३१३) तत्साभाव्यापत्तिरुपपत्तेः।

५. नातिचिराधिकरणम् १२७

(३१४) नातिचिरेण विशेषात्।

६. अन्याधिष्ठिताधिकरणम् १२८

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(३१५) अन्याधिष्ठितेषु पूर्ववदभिलापात्। (३१६) अशुद्धमिति चेन्न शब्दात्। (३१७) रेतस्सिग्योगोऽथ। (३१८) योनेश्शरीरम्।

तृतीयाध्याये द्वितीयः पादः

१. सन्ध्याधिकरणम् १३०

(३१९) सन्ध्ये सृष्टिराह हि। (३२०) निर्मातारं चैके पुत्रादयश्च। (३२१) मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्। (३२२) सूचकश्च हि श्रुतेराचक्षते च तद्विदः। (३२३) पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ। (३२४) देहयोगाद्वासोऽपि।

२. तदभावाधिकरणम् १३२

(३२५) तदभावो नाडीषु तच्छ्रुतेरात्मनि च। (३२६) अतः प्रबोधोऽस्मात्।

३. कर्मानुस्मृतिशब्दविध्यधिकरणम् १३३

(३२७) स एव तु कर्मानुस्मृतिशब्दविधिभ्यः।

४. मुग्धेऽर्धसम्पत्त्यधिकरणम् १३४

(३२८) मुग्धेऽर्धसम्पत्तिः परिशेषात्।

५. उभयलिङ्गाधिकरणम् १३४

(३२९) न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि। (३३०) न भेदादिति चेन्न; प्रत्येकमतद्वचनात्। ३३१ अपि चैवमेके। (३३२) अरूपवदेव हि तत्प्रधानत्वात्। (३३३) प्रकाशवच्चावैयर्थ्यात्। (३३४) आह च तन्मात्रम्। (३३५) दर्शयति चार्थोऽपि स्मर्यते। (३३६) अतएव चोपमा सूर्यकादिवत्। (३३७) अम्बुवदग्रहणात्तु न तथात्वम्। (३३८) वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्। (३३९) दर्शनाच्च।

६. प्रकृतैतावत्त्वाधिकरणम् १३७

(३४०) प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः। (३४१) तदव्यक्तमाह हि। (३४२) अपि च संराधने प्रत्यक्षानुमानाभ्याम्। (३४३) प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्। (३४४) अतोऽनन्तेन तथा हि लिङ्गम्। (३४५) उभयव्यपदेशात्त्वहिकुण्डलवत्। (३४६) प्रकाशाश्रयवद्वा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेजतत्त्वात् ((३४७) पूर्ववद्वा (३४८) प्रतिषेधाच्च ।
७. पराधिकरणम् १४०
(३४९) परमतस्सेतून्मानसन्बन्धभेदव्यपदेशेभ्यः । (३५०) सामान्यात्तु । (३५१) बुद्ध्यर्थः पादवत् । (३५२) स्थानविशेषात्प्रकाशादिवत् । (३५३) उपपत्तेश्च । (३५४) तथान्यप्रतिषेधात् । (३५५) अनेन सर्वगतत्वमायामशब्दादिभ्यः ।
८. फलाधिकरणम् १४२
(३५६) फलमत उपपत्तेः । (३५७) श्रुतत्वाच्च (३५८) धर्मं जैमिनिरत एव (३५९) पूर्वं तु बादरायणो हेतुव्यपदेशात् ।

[तृतीयाध्याये तृतीयः पादः]

१. सर्ववेदान्तप्रत्ययाधिकरणम् १४३
(३६०) सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । ३६१ भेदान्नेति चेन्नैकस्यापि । (३६२) स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः । (३६३) दर्शयति च ।
२. उपसंहाराधिकरणम् १४५
(३६४) उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ।
३. अन्यथात्वाधिकरणम् १४६
(३६५) अन्यथात्वं शब्दादिति चेन्नाविशेषात् । (३६६) नवा प्रकरणभेदात्परोवरीयस्त्वादिवत् । (३६७) संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ।
४. व्याप्त्यधिकरणम् १४७
(३६८) व्याप्तेश्च समञ्जसम् ।
५. सर्वाभेदाधिकरणम् १४८
(३६९) सर्वाभेदादन्यत्रेमे ।
६. आनन्दाद्यधिकरणम् १४८
(३७०) आनन्दादयः प्रधानस्य । (३७१) प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । (३७२) इतरे त्वर्थसामान्यात् ।
७. आध्यानाधिकरणम् १४९
(३७३) आध्यानाय प्रयोजनाभावात् । (३७४) आत्मशब्दाच्च ।
८. आत्मगृहीत्यधिकरणम् १५०
(३७५) आत्मगृहीतिरितरवदुत्तरात् । (३७६) अन्वयादिति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्.

चेत्स्यादवधारणात् ।

९. कार्याख्यानाधिकरणम् १५२

(३७७) कार्याख्यानादपूर्वम् ।

१०. समानाधिकरणम् १५२

(३७८) समान एवं चाभेदात् ।

११. सम्बन्धाधिकरणम् १५३

(३७९) सम्बन्धादेवमन्यत्रापि । (३८०) न वा विशेषात् ।
(३८१) दर्शयति च ।

१२. संभृत्यधिकरणम् १५४

(३८२) सम्भृतिद्युव्याप्त्यपि चातः ।

१३. पुरुषाद्याधिकरणम् १५५

(३८३) पुरुषविद्यायामिव चेतरेषामनाम्नानात् ।

१४. वेधाद्यधिकरणम १५५

(३८४) वेधाद्यर्थभेदात् ।

१५. हान्यधिकरणम् १५६

(३८५) हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्त-
दुक्तम् ।

१६. साम्परायाधिकरणम् १५८

(३८६) साम्पराये तर्तव्याभावात्तथा ह्यन्ये । (३८७) छन्दत
उभयाविरोधात् ।

१७. गतेरर्थवत्त्वाधिकरणम् १५६

(३८८) गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः । (३८९)
उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ।

१८. अनियमाधिकरणम् १५९

(३९०) अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ।

१९. यावदधिकाराधिकरणम् १६०

(३९१) यावदधिकारमवस्थितिराधिकारिकाणाम् ।

२०. अक्षरध्यधिकरणम् १६०

(३९२) अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदव-
त्तदुक्तम् ।

२१. इयदधिकरणम् १६१

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पत्रम्

(३६३) इयदामननात्।

२२. अन्तरत्वाधिकरणम् १६२

(३६४) अन्तरा भूतग्रामवत्स्वात्मनः। (३६५) अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्।

२३. व्यतिहाराधिकरणम् १६२

(३६६) व्यतिहारो विंशिषन्ति हीतरवत्।

२४. सत्याद्यधिकरणम् १६३

(३६७) सैव हि सत्यादयः।

२५. कामाद्यधिकरणम् १६३

(३६८) कामादीतरत्र तत्र चायतनादिभ्यः।

२६. आदराधिकरणम् १६४

(३६९) आदरादलोपः। (४००) उपस्थितेऽतस्तद्वचनात्।

२७. तन्निर्धारणाधिकरणम् १६५

(४०१) तन्निर्धारणानियमस्तद्दृष्टेः, पृथग्घ्यप्रतिबन्धः फलम्।

२८. प्रदानाधिकरणम् १६६

(४०२) प्रदानवदेव तदुक्तम्।

२९. लिङ्गभूयस्त्वाधिकरणम् १६६

(४०३) लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि। (४०४) पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत्। (४०५) अतिदेशाच्च। (४०६) विद्यैव तु निर्धारणात्। (४०७) दर्शनाच्च। (४०८) श्रुत्यादिबलीयस्त्वाच्च न बाधः। (४०९) अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्। ४१० न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः। ४११ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः।

३०. ऐकात्म्याधिकरणम् १६९

(४१२) एक आत्मनः शरीरे भावात्। (४१३) व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत्।

३१. अङ्गावबद्धाधिकरणम् १७०

(४१४) अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्। (४१५) मन्त्रादिवद्वाविरोधः।

३२. भूमज्यायस्त्वाधिकरणम् १७१

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(४१६) भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ।

३३. शब्दादिभेदाधिकरणम् १७२

(४१७) नाना शब्दादिभेदात् ।

३४. विकल्पाधिकरणम् १७२

(४१८) विकल्पोऽविशिष्टफलत्वात् ।

३५. काम्याधिकरणम् १७३

(४१९) काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ।

३६. यथाश्रयभावाधिकरणम् १७३

(४२०) अङ्गेषु यथाश्रयभावः । (४२१) शिष्टेश्च । (४२२) समाहारात् । (४२३) गुणसाधारण्यश्रुतेश्च । (४२४) न वा तत्सहभावाश्रुतेः । (४२५) दर्शनाच्च ।

(तृतीयाध्याये चतुर्थः पादः)

१. पुरुषार्थाधिकरणम् १७५

(४२६) पुरुषार्थोऽतश्शब्दादिति बादरायणः । (४२७) शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः । (४२८) आचारदर्शनात् । (४२९) तच्छ्रुतेः । (४३०) समन्वयारम्भणात् । (४३१) तद्वतो विधानात् । (४३२) नियमाच्च । (४३३) अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् । (४३४) तुल्यं तु दर्शनम् । (४३५) असार्वत्रिकी । (४३६) विभागः शतवत् । (४३७) अध्ययनमात्रवतः । (४३८) नाविशेषात् । (४३९) स्तुतयेऽनुमतिर्वा । (४४०) कामकारेणचैके । (४४१) उपमर्दं च । (४४२) ऊर्ध्वरेतस्सु च शब्दे हि ।

२. परामर्शाधिकरणम् १७८

(४४३) परामर्शं जैमिनिरचोदनाचापवदति हि । (४४४) अनुष्ठेयं बादरायणः साम्यश्रुतेः । (४४५) विधिर्वा धारणवत् ।

३. स्तुतिमात्राधिकरणम् १८०

४४६) स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् । (४४७) भावशब्दाच्च ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

४. पारिप्लवाधिकरणम् १८१

(४४८) पारिप्लवार्था इति चेन्न विशेषितत्वात्। (४४९) तथा चैकवाक्यतोपबन्धात्।

५. अग्नीन्धनाद्यधिकरणम् १८२

(४५०) अत एव चाग्नीन्धनाद्यनपेक्षा।

६. सर्वापेक्षाधिकरणम् १८२

(४५१) सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्। (४५२) शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्।

७. सर्वान्नानुमत्यधिकरणम् १८३

(४५३) सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। (४५४) अबाधाच्च। (४५५) अपि च स्मर्यते। (४५६) शब्दश्चातोऽकामकारे।

८. आश्रमकर्माधिकरणम् १८४

(४५७) विहितत्वाच्चाश्रमकर्मापि। (४५८) सहकारित्वेन च। (४५९) सर्वथाऽपि त एवोभयलिङ्गात्। (४६०) अनभिभवं च दर्शयति।

९. विधुराधिकरणम् १८५

(४६१) अन्तरा चापि तद्दृष्टेः। (४६२) अपि च स्मर्यते। (४६३) विशेषानुग्रहश्च। (४६४) अतस्त्वितरज्ज्यायो लिङ्गाच्च।

१०. तद्भूताधिकरणम १८६

(४६५) तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपभावेभ्यः।

११. अधिकाराधिकरणम् १८६

(४६६) न चाधिकारिकमपि पतनानुमानात्तदयोगात्। (४६७) उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम्।

१२. बहिरधिकरणम् १८७

(४६८) बहिस्तूभयथापि स्मृतेराचाराच्च।

१३. स्वाम्यधिकरणम् १८८

(४६९) स्वामिनः फलश्रुतेरित्यात्रेयः। (४७०) आर्त्विज्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूत्राङ्क: | | पत्राङ्क:
मित्यौडुलोमिस्तस्मै हि परिक्रीयते। (४७१) श्रुतेश्च।

१४. सहकार्यन्तरविध्यधिकरणम् १८८

(४७२) सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्। (४७३) कृत्स्नभावात्तु गृहिणोपसंहारः। (४७४) मौनवदितरेषामप्युपदेशात्।

१५. अनाविष्काराधिकरणम् १९०

(४७५) अनाविष्कुर्वन्नन्वयात्।

१६. ऐहिकाधिकरणम् १९०

(४७६) ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्।

१७. मुक्तिफलाधिकरणम् १९१

(४७७) एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः।

(चतुर्थाध्याये प्रथमः पादः)

१. आवृत्त्यधिकरणम् १९२

(४७८) आवृत्तिरसकृदुपदेशात्। (४७९) लिङ्गाच्च।

२. आत्मत्वोपासनाधिकरणम १९३

(४८०) आत्मेति तूपगच्छन्ति ग्राहयन्ति च।

३. प्रतीकाधिकरणम् १९३

(४८१) न प्रतीके न हि सः।

४. ब्रह्मदृष्ट्यधिकरणम् १९४

(४८२) ब्रह्मदृष्टिरुत्कर्षात्।

५. आदित्यादिमत्यधिकरणम् १९४

(४८३) आदित्यादिमतयश्चाङ्ग उपपत्तेः।

६. आसीनाधिकरणम् १९५

(४८४) आसीनः सम्भवात्। (४८५) ध्यानाच्च। (४८६) अचलत्वं चापेक्ष्य। (४८७) स्मरन्ति च।

७. एकाग्रताधिकरणम् १९६

(४८८) यत्रैकाग्रता तत्राविशेषात्।

८. आप्रायणाधिकरणम् १९६

(४८९) आप्रायणात्तत्रापि हि दृष्टम्।

९. तदधिगमाधिकरणम् १९६

(४९०) तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पत्रम्

१०. इतरासंश्लेषाधिकरणम् १९७
(४९१) इतरस्याप्येवमसंश्लेषः पाते तु ।
११. अनारब्धाधिकरणम् १९८
(४९२) अनारब्धकार्ये एव तु पूर्वे तदवधेः ।
१२. अग्निहोत्राद्यधिकरणम् १९८
(४९३) अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । (४९४) अतोऽन्यापि ह्येकेषामुभयोः ।
१३. विद्याज्ञान साधनाधिकरणम् १९९
(४९५) यदेव विद्ययेति हि ।
१४. इतरक्षपणाधिकरणम् २००
(४९६) भोगेन त्वितरे क्षपयित्वा सम्पद्यते ।

(चतुर्थाध्याये द्वितीयः पादः)

१. वागधिकरणम् २००
(४९७) वाङ्मनसि दर्शनाच्छब्दाच्च । (४९८) अतएव च सर्वाण्यनु ।
२. मनोधिकरणम् २०१
(४९९) तन्मनः प्राण उत्तरात् ।
३. अध्यक्षाधिकरणम् २०२
(५००) सोऽध्यक्षे तदुपगमादिभ्यः । (५०१) भूतेषु तच्छ्रुतेः । (५०२) नैकस्मिन्दर्शयतो हि ।
४. आसृत्युपक्रमाधिकरणम् २०२
(५०३) समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ।
५. संसारव्यपदेशाधिकरणम् २०३
(५०४) तदापीतेः संसारव्यपदेशात् । (५०५) सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । (५०६) नोपमर्देनात् । (५०७) अस्यैव चोपपत्तेरेष ऊष्मा ।
६. प्रतिषेधाधिकरणम् २०४
(५०८) प्रतिषेधादिति चेन्न शारीरात् । (५०९) स्पष्टोह्येकेषाम् । (५१०) स्मर्यते च ।
७. वागादिलयाधिकरणम् २०५
(५११) तानि परे तथा ह्याह ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

८. अविभागाधिकरणम् २०५
(५१२) अविभागो वचनात् ।
९. तदोकोऽधिकरणम् २०५
(५१३) तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ।
१०. रश्म्यधिकरणम् २०६
(५१४) रश्म्यनुसारी । (५१५) निशि नेति चेन्न; सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ।
११. दक्षिणायनाधिकरणम् २०७
(५१६) अतश्चायनेऽपि दक्षिणे । (५१७) योगिनः प्रति च स्मर्यते स्मार्ते चैते ।

(चतुर्थाध्याये तृतीयः पादः)

१. अर्चिराद्यधिकरणम् २०८
(५१८) अर्चिरादिना तत्प्रथितेः ।
२. वाय्वधिकरणम् २०९
(५१९) वायुमब्दादविशेषविशेषाभ्याम् ।
३. तडिदधिकरणम् ... ...
(५२०) तडितोऽधिवरुणः सम्बन्धात् ।
४. आतिवाहिकाधिकरणम् ... ...
(५२१) आतिवाहिकास्तल्लिङ्गात् । (५२२) उभयव्यामोहात्तत्सिद्धेः । (५२३) वैद्युतेनैव ततस्तच्छ्रुतेः ।
५. कार्याधिकरणम् २११
(५२४) कार्यं बादरिरस्य गत्युपपत्तेः । (५२५) विशेषितत्वाच्च । (५२६) सामीप्यात्तु तद्व्यपदेशः । (५२७) कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् । (५२८) स्मृतेश्च । (५२९) परं जैमिनिर्मुख्यत्वात् । (५३०) दर्शनाच्च । (५३१) न च कार्ये प्रतिपत्त्यभिसन्धिः ।
६. अप्रतीकालम्बनाधिकरणम् २१३
(५३२) अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च । (५३३) विशेषञ्च दर्शयति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुच्छः पर्णम्

(चतुर्थाध्याये चतुर्थः पादः)

१. सम्पद्याविर्भावाधिकरणम् २१४
(५३४) सम्पद्याविर्भावः स्वेन शब्दात् ।
(५३५) मुक्तः प्रतिज्ञानात् । (५३६) आत्मा प्रकरणात् ।
२. अविभागेन दृष्टत्वाधिकरणम् २१५
(५३७) अविभागेन दृष्टत्वात् ।
३. ब्राह्माधिकरणम् २१५
(५३८) ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । (५३९) चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः । (५४०) एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ।
४. संकल्पाधिकरणम् २१६
(५४१) सङ्कल्पादेव तु तच्छ्रुतेः । (५४२) अत एव चानन्याधिपतिः ।
५. अभावाधिकरणम् २१७
(५४३) अभावं बादरिराह ह्येवम् । (५४४) भावं जैमिनिर्विकल्पामननात् । (५४५) द्वादशाहवदुभयविधं बादरायणोऽतः । (५४६) तन्वभावे सन्ध्यवदुपपत्तेः । (५४७) भावे जाग्रद्वत् ।
६. प्रदीपाधिकरणम् २१८
(५४८ प्रदीपवदावेशस्तथा हि दर्शयति । (५४९) स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ।
७. जगद्व्यापाराधिकरणम् २१९
(५५०) जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । (५५१) प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः । (५५२) विकारावर्ति च तथा हि स्थितिमाह । (५५३) दर्शयतश्चैवं प्रत्यक्षानुमाने । (५५४) भोगमात्र साम्यलिङ्गाच्च । (५५५) अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

"सत्यं शिवं सुन्दरम्"

—:०:—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ

❀ श्री दक्षिणामूर्त्तये नमः ❀

ब्रह्मसूत्रम्

श्रीविद्यानन्दवृत्तियुतम् ।

—:❀:—

यस्माज्जातं जगत्सर्वं, यस्मिन्नेव विलीयते ।
येन प्राणिति तद्ब्रह्म, विज्ञानानन्दविग्रहम् ॥ १ ॥
शङ्करं शङ्कराचार्यं, केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे, भगवन्तौ पुनः पुनः ॥ २ ॥
ईश्वरो गुरुरात्मेति, मूर्त्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय, दक्षिणामूर्त्तये नमः ॥ ३ ॥
यत्कृपालेशमात्रेण, मलिनो निर्मलायते ।
देशिकं तमहं वन्दे, श्रीनृसिंहगिरीश्वरम् ॥ ४ ॥
नित्यं विज्ञानमानन्दं, महेशं यतिसेवितम् ।
प्रणौमि शिरसा देवं, ज्ञानविज्ञानमोक्षदम् ॥ ५ ॥
विप्रवंशे समुत्पन्नो, गीर्वाणीसमुपासकः ।
पदवाक्यप्रमाणज्ञो, यतिधर्मावलम्बकः ॥ ६ ॥
शाङ्करभाष्यमाश्रित्य, ब्रह्मसूत्रावलम्बिनीम् ।
विद्यानन्दाभिधां वृत्तिं, कुर्वेऽहं स्वात्मतुष्टये ॥ ७ ॥

❀ अथ प्रथमाऽध्याये प्रथमः पादः ❀

[अत्रपादे स्पष्टब्रह्मलिङ्गोपेतानां श्रुतिवाक्यानां विचारः]

इह खलु निखिलविश्वकल्याणाय चतुर्लक्षणीमुत्तरमीमांसामारभमाणो भगवान् बादरायणः पूर्वं जिज्ञासाधिकरणेनैतच्छास्त्रस्यानुबन्धचतुष्टयं प्रेक्षावत्प्रवृत्त्यङ्गभूतं दर्शयति । तत्राधिकरणं नाम—विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । संगतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम् ॥ एतच्च पञ्चाङ्गं सर्वेष्वधिकरणेषु योजनीयम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र शास्त्रे समन्वयो, विरोधपरिहारः, साधनं, फलं चेति चत्वारोऽध्याया वर्णिताः। तत्रापि प्रत्येकमध्यायः पादचतुष्टयेन विभक्तः। तत्र च प्रत्येकं पादेऽनेकान्यधिकरणानि सन्तीति। सर्वेषां श्रुतिवाक्यानां साक्षात्परम्परया वा प्रत्यगात्माभिन्नेऽद्वितीये ब्रह्मणि तात्पर्यमिति श्रुतिभिः सहैतच्छास्त्रस्य श्रुतिसंगतिः। संगतयश्चानेकधा भवन्ति, यथा श्रुतिसंगतिः, शास्त्रसंगतिरध्यायसंगतिः, पादसंगतिरधिकरणसंगतिः सूत्रसंगतिश्चेति। तेषु श्रुतिसंगतिरुपदर्शिता। परब्रह्मपराणां वाक्याना तात्पर्यनिर्णायकन्यायसूचकत्वेन ब्रह्मविचाररूपैतच्छास्त्रस्य शास्त्रसंगतिरभिमता। श्रुतिवाक्यानां ब्रह्मणि तात्पर्यादिति 'अथातो ब्रह्मजिज्ञासा' इत्यादिसूत्राणामध्यायसमाप्तियावत्समन्वयाध्यायसंगतिरुच्यते। तत्रापि प्रथमपादे स्पष्टब्रह्मलिङ्गोपेतानां श्रुतिवाक्यानां विचारविषयत्वादापादं पादसंगतिः। प्राथम्यान्नास्याधिकरणसंगतिः। विशेषाणामध्यायपादाधिकरणादिसंगतीनांवर्णनंयथासमयंविध्यास्यते इति तत्र तत्र द्रष्टव्यम्।

[१ जिज्ञासाधिकरणम् सू० १]

अत्रपूर्वपक्षे मोक्षार्थं वेदान्तविचारारम्भस्य निष्फलत्वसिद्धिः, सिद्धान्ते मोक्षस्य ज्ञानसाध्यत्वेन तदर्थं वेदान्तविचारारम्भस्य सफलत्वसिद्धिरितिफलभेदः। अत्र वेदान्तविचारो विषयः। स किं कर्तव्यो न वेति विषयप्रयोजनसम्भवासम्भवाभ्यां सन्दिह्यते। तत्र यदसन्दिग्धमप्रयोजनं चास्ति, न तद्विचारविषयो भवति; यथा स्फीतालोकमध्यवर्ती घटः काकदन्तो वा। अतः सन्दिग्धे सप्रयोजने च वस्तुनि विचारविषयत्वमापद्यते। ब्रह्मणस्तु स्फुटतराहंप्रत्ययालम्बनत्वेनासन्दिग्धत्वात्तज्ज्ञानान्मोक्षरूपप्रयोजनाभावाच्च विचारानर्हत्वम्। नह्यात्मन्यहं नाहं वेवि सन्देहः, नाहमेवेतिविपर्ययो वा। नाप्येतादृग्ज्ञानान्मोक्षरूपं प्रयोजनं सिध्यतिः, श्रुतब्रह्मणोऽपि यथापूर्वसंसारदर्शनात्। अतः संशयादिप्रयोजनाभावेनासम्भावितविषयादिमान् वेदान्तवाक्यविचारो न कर्तव्यः इति पूर्वः पक्षः। सिद्धान्तस्तु-आपाततोऽहंप्रत्ययालम्बनत्वेऽप्यात्मनि श्रुतिगम्यब्रह्मात्मतत्त्वस्याहं प्रत्ययानालम्बत्वेन सन्धिग्धत्वात्, तत्साक्षात्कारादनर्थनिवृत्तिपरमानन्दावाप्तिलक्षणमोक्षरूप-प्रयोजनवत्त्वाच्च। तथा च 'तरतिशोकमात्मवित्' 'ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः। अतः सम्भावितविषयप्रयोजनादिमान् वेदान्तविचारः कर्तव्यः। ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वमित्युक्तमितिचेन्न; देहाद्यात्माभि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मानेन दुःखभयादिमत्त्वसम्भवे वेदप्रमाणजन्यब्रह्मात्मैक्यज्ञानेन तदज्ञाननिवृत्तिपूर्वकं देहाद्यभिमाननिवृत्तौ पूर्ववत् तस्य दुःखादिमत्त्वं कल्पयितुमशक्यत्वात्। तदुक्तम् 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा० ८।१२।१) इति श्रुत्या। एवं च वेदान्तविचारमन्तरेण स्थूलसूक्ष्मदेहभिन्नं शुद्धमपापविद्धं ब्रह्मस्वरूपमात्मतत्त्वं न केनाप्यवगन्तुं शक्यते। अतो यथोक्तात्मस्वरूपावगमाय वेदान्तविचारो नितरामावश्यकः। तत्रेदं ब्रह्ममीमांसाया आदिमं सूत्रम्—

(१) अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अथ = साधनचतुष्टयानन्तरं (यस्मात्कारणाद्वेदे एवाग्निहोत्रादिकर्मणामनित्यफलतां 'तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा० ८।१।६) इत्यादिना, 'ब्रह्मविदाप्नोति परम्' (तै० २।१) तिवाक्येन ब्रह्मविज्ञानात्परं पुरुषार्थं च दर्शयति श्रुतिः। अतः तस्माद्यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा 'कर्तव्ये'ति शेषः। साधनचतुष्टयं च नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमोपरतितितिक्षाश्रद्धासमाधानमिति षट्सम्पत्, मुमुक्षुत्वं चेति। जिज्ञासाकर्मभूतं ब्रह्म 'जन्माद्यस्य यतः' इति वक्ष्यमाणलक्षणलक्षितम्। तत्र कर्मणि षष्ठी। यद्यप्यत्र न केवलं ब्रह्मणो विचारः, किन्तु तदपेक्षितानां सर्वेषां पदार्थानां विचारोऽस्तीति; तथापि ज्ञानेनाप्तुमिष्टतमत्वात्त् प्रधानं ब्रह्मैव। तस्मिन्परिगृहीते तदपेक्षिताः पदार्था अर्थादाक्षिप्यन्ते। ननु ज्ञातुमिच्छा जिज्ञासेत्यत्र प्रकृतिप्रत्ययार्थयोर्ज्ञानेच्छयोः कर्तव्यताया अनन्वयादित्यतः 'कर्तव्ये'ति पदाध्याहारस्य वैयर्थ्यमिति चेन्न; ज्ञाधातुरूपया प्रकृत्याऽजहल्लक्षणया ब्रह्मापरोक्षज्ञानस्य लक्षितत्वात्, सन्प्रत्ययेन जहल्लक्षणया इच्छासाध्यस्य विचारस्य लक्षितत्वाच्च। अतो ब्रह्मापरोक्षज्ञानस्य मोक्षसाधनत्वं श्रुतिवाक्यानां च विचारविषयत्वमर्थाल्लभ्यते। ब्रह्मापरोक्षज्ञानमेव निःशेषसंसारबीजाविद्याद्यनर्थजालनिवर्तकं न परोक्षज्ञानम्, तस्यापरोक्षभ्रमस्यानिवर्तकत्वादित्यर्थः। तस्मात्साधनचतुष्टयसम्पन्नस्याधिकारिणो मोक्षसाधनब्रह्मापरोक्षज्ञानाय वेदान्तविचारः कर्तव्य इति सन्प्रत्ययेन लक्षिते विचारे कर्तव्यताया अन्वयसम्भवादिति ॥१॥

[२ जन्माद्यधिकरणम्। सू० २]

ननु जिज्ञासितव्यस्य ब्रह्मणो लक्षणाभावेन स्वरूपस्यैवासिद्धेः कथं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य विचारविषयत्वमुक्तमित्याक्षेपसंगत्येदमाह—

(२) जन्माद्यस्य यतः ॥२॥

अत्र पूर्वपक्षे लक्षणाभावेन ब्रह्मस्वरूपासिद्ध्या मोक्षासिद्धिः, सिद्धान्ते लक्षणसत्त्वात् तत्सिद्धिरिति फलभेदः। अत्र 'यतो वा इमानि भूतानि जायन्ते……तद्विजिज्ञासस्व। तद्ब्रह्मेति' (तै० ३।१) इत्यादि वाक्यं विषयः। तत्र किं श्रूयमाणं जन्मादिकं ब्रह्मलक्षणं सम्भवति न वेति संशये; लक्षणस्य लक्ष्यवृत्त्यसाधारणधर्मत्वेन जन्मादेर्जगन्निष्ठतया ब्रह्मनिष्ठत्वाभावान्न तद्ब्रह्मणो लक्षणं सम्भवतीति पूर्वः पक्षः। सिद्धान्तस्तु—अस्य नामरूपाभ्यां व्याकृतस्य प्रत्यक्षाद्युपस्थापितस्य मनसाप्यचिन्त्यरचनारूपस्य जगतो जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति, तद्ब्रह्मेति। एतच्च ब्रह्मणस्तटस्थं लक्षणं 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ती' (तै० ३।१) त्यादिश्रुत्यनुगमेन प्रोक्तम्, नात्र 'जायते' इत्यादिषड्विकाराणाम् यास्कपरिपठितानां ग्रहणमुचितम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २।१) त्यादिश्रुतिनिगदितं च सत्यादिकं तस्य स्वरूपलक्षणम्। न च सत्यादिपदानां लोकसिद्धभिन्नार्थकानामेकस्य ब्रह्मणो लक्षणत्वाप्रसिद्धिरिति वाच्यम्; तेषामखण्डार्थत्वेनैकब्रह्मपर्यवसायितया तल्लक्षणत्वसम्भवात्। अतः स्वरूपतटस्थोभयलक्षणलक्षितस्य ब्रह्मणः स्वरूपसिद्ध्या तज्ज्ञानान्मोक्षसिद्धिरिति जिज्ञास्यं ब्रह्मेति भावः ॥२॥

[३ शास्त्रयोनित्वाधिकरणम्। सू० ३]

ननु निखिलजगत्कारणत्वेन ब्रह्मणः सर्वज्ञत्वं यदुक्तं; तदसंगतं, जगदन्तःपातिनो वेदस्य नित्यत्वेन तत्र निखिलजगत्कारणत्वायोगादित्याक्षेपसंगत्येदमाह—

(३) शास्त्रयोनित्वात् ॥३॥

अत्र पूर्वपक्षे ब्रह्मणः सर्वज्ञत्वानिर्धारणं, सिद्धान्ते तन्निर्धारणमिति फलभेदः। 'अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदः' (बृ० २-४-१०) इत्यादि वाक्यमत्र विचारविषयः। एतद्वाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं साधयति न वेति संशये; 'वाचा विरूपनित्यया' इत्यादिवाक्ये वेदस्य नित्यत्वश्रवणेन तत्कर्तृत्वेन तत्र सर्वज्ञत्वमसिद्धमिति पूर्वः पक्षः। सिद्धान्तस्तु महत ऋग्वेदादेः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म, तस्य भावस्तत्त्वं, तस्मात्–शास्त्रयोनित्वात् वेदकर्तृत्वात्तत्र सर्वज्ञत्वसिद्धिरिति। न च 'वाचा विरूपनित्यया' इत्यनेन वेदस्य नित्यत्वं श्रूयते इति वाच्यम्; अस्य महतो भूतस्य' इत्यादिश्रुतौ पुरुषनिःश्वासवल्लीलया वेदोत्पत्तिश्रुत्यनुरोधेन तन्नित्यत्वश्रुतेरर्थवादपरत्वात्। न चैवं वेदस्य कर्तृजन्यत्वे पौरुषेयत्वापत्तिरिति वाच्यम्; पूर्वसर्गसिद्धवेदानुपूर्वीकत्वेन परमेश्वर–रचितत्वाभ्युपगमादिति प्र० वर्णकम्।

अथवा पूर्वसूत्रोक्तेन निखिलजगत्कारणत्वेन लक्षिते ब्रह्मणि प्रमाणान्तरगम्यत्वमाशङ्क्याह—शास्त्रयोनित्वात्। लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति तयोर्ब्रह्मनिर्णयार्थत्वादेकफलत्वं संगतिः। अत्र पूर्वपक्षे केवलमनुमानस्यैव विचारविषयत्वं, सिद्धान्तेश्रुतिवाक्यानामिति फलभेदः। 'तं त्वौपनिषदं पुरुषं पृच्छामी' त्यादि वाक्यमत्र विषयः, तत्किं ब्रह्मणः शास्त्रैकसमधिगम्यत्वं समर्पयति न वेति सन्देहे; ब्रह्मणो घटादिवत्सिद्धवस्तुत्वेन न केवलं शब्दगम्यत्वम्, अपितु मानान्तरगम्यत्वमपि। अतस्तद्वाक्यं न ब्रह्मणः शास्त्रैकसमधिगम्यत्वं समर्पयतीति पूर्वःपक्षः। सिद्धान्तस्तु शास्त्रं यथोक्तमृग्वेदादिलक्षणं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे, तस्य भावस्तत्त्वम्, तस्माद्वेदैकप्रमाणकत्वंतदेकाधिगम्यत्वं समर्पयति। न चसिद्धवस्तुत्वेन ब्रह्मणो मानान्तरगम्यत्वमपीत्युक्तमिति वाच्यम्; तस्य रूपाद्यभावेन तथात्वासम्भवात्। रूपाद्यभावश्च 'अशब्दमस्पर्शमि' त्यादिश्रुतिसिद्धः। इति द्वि० वर्णकम्।

[४ समन्वयाधिकरणम्। सू० ४]

ननु कथं ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै० १।२।१) इति क्रियापरत्वं शास्त्रस्य दर्शितमित्याक्षिप्याह—

(४) तत्तु समन्वयात् ॥४॥

अस्य पूर्वाधिकरणेनाक्षेपसंगतिः। पूर्वपक्षे मुमुक्षोर्वेदान्तेषु प्रवृत्त्यसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र सर्वे वेदान्ता विचारविषयाः। ते किं कर्तृदेवतादिप्रकाशनार्थत्वेन क्रियाशेषा उत नित्यसिद्धब्रह्मप्रतिपादकत्वेन तादृग्ब्रह्मपरा इति सन्देहे; हेयोपादेयशून्यसिद्धवस्तुब्रह्मपरत्वे निष्प्रयोजनत्वसापेक्षत्वप्रसङ्गात्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं, समान-प्रकरणात् स्ववाक्यगतोपासनाविधिशेषत्वं वा वेदान्तानामभ्युपेय-मिति पूर्वः पक्षः। सिद्धान्तस्तु सौत्रस्तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः। तत् ब्रह्म सर्वज्ञं निखिलजगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रेणैवा-वगम्यते। कुतः ? समन्वयात् =सम्यक्तात्पर्येण तत्र ब्रह्मण्येवान्वयात्= सम्बन्धात्। निखिलवेदान्तवाक्यानि तात्पर्येणैतस्यैवार्थस्य प्रति-पादकत्वेन समनुगतानि। तथाहि 'सदेवसोम्येदमग्र आसीत् एकमेवाद्वितीयम्' (छा० ६।२।१) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० २।१।१) 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ० २।५।१६) इत्यादीनि। न च वेदान्तवाक्यानां निश्चितेऽपि ब्रह्मस्वरूपविषये समन्वयेऽर्थान्तर-कल्पना युक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न चात्रकर्तृस्वरूपप्रति पादनपरत्वमिति वाच्यम्, 'तत्केन कं पश्येत्' इत्यत्र क्रियाकारकफल निराकरणश्रवणात्। न च तेषां सिद्धवस्तुस्वरूपपरत्वे प्रत्यक्षादि-विषयत्वमिति वाच्यम्, 'तत्त्वमसि' इत्यादि महावाक्यमन्तरेण ब्रह्मात्मत्वस्यावगन्तुमशक्यत्वात्। न च हेयोपादेयशून्यसिद्धवस्तुस्व-रूपोपदेशे निष्प्रयोजनत्वमिति वाच्यम्; 'रज्जुरियं नायं सर्पः' इत्यादि-वत् ब्रह्मात्मैक्यावगमेन 'तत्र को मोहः कः शोकः' (ईशा० ७) इत्यत्र सर्वानर्थनिवृत्तिप्रयोजनस्य श्रवणात्। अतो वेदान्ताः सिद्धब्रह्मपराः, न तु कर्त्रादिपराः, प्रकरणान्तरस्थत्वात्। एवं रूपादिहीनस्य ब्रह्मणः श्रुतिभिन्नप्रमाणान्तरागम्यत्वेन तत्प्रतिपादकश्रुतिवाक्यानां सापेक्षत्व-मप्यसम्भवम्। तस्मादुपक्रमादिषड्भिर्लिङ्गैर्वेदान्तानां सिद्धब्रह्मपरत्व-मेवेति सिद्धम्। इति प्रथमं वर्णकम्।

अस्तु वा शास्त्रप्रमाणकं ब्रह्म, तथापि यूपादिवद् विधिशेषतयैव ब्रह्म शास्त्रेण समर्प्यते इत्येकदेशिमतं प्रसङ्गादाक्षिप्याह—तत्तुसमन्व-यात्। पूर्वाधिकरणेनास्य प्रसङ्गसंगतिः। अत्र पूर्वपक्षे ब्रह्मोपासनया मोक्षः, सिद्धान्ते तज्ज्ञानादिति फलभेदः। तत्र वेदान्ताः प्रतिपत्ति-विधिविषयत्वेन ब्रह्म प्रतिपादयन्ति, उत स्वातन्त्र्येणेति संशये; प्रवृ-त्त्यादिलिङ्गाभावेन सिद्धवस्तुनि शक्तिग्रहायोगात् पुरुषं कुत्रचिद्विषयवि-शेषे प्रवर्तयत्कुतश्चिन्निवर्तयच्च शास्त्रमर्थवद्भवतीति प्रवृत्त्यादिपरस्यैव शास्त्रत्वेन तेषां सिद्धपरत्वाभ्युपगमे शास्त्रत्वायोगाच्च विधिविषयतयैव शास्त्रं ब्रह्मसमर्पकमिति पूर्वः पक्षः ? सिद्धान्तस्तु तद् ब्रह्म स्वातन्त्र्येण वेदान्ताः समर्पयन्ति। कुतः समन्वयात् तात्पर्यवत्त्वेन तेषां तद्ब्रह्म-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एयेवान्वयात्। न च प्रवृत्त्यादिलिङ्गाभावेन सिद्धे वस्तुनि न शक्तिग्रह इति वाच्यम्, प्रवृत्तेः शक्तिग्रहे लिङ्गत्वे निर्बन्धाभावात्। यतो हि पुत्रस्ते जातः इत्यादौ हर्षादिलिङ्गेन सिद्धार्थेऽपि शक्तिग्रहसम्भवात्। ननु प्रवृत्त्यादिपरस्यैव शास्त्रत्वमुक्तमिति चेन्न हितं शास्तीति शास्त्रमित्यनेनहितशासनाद्वेदान्तानामपि शास्त्रत्वोपपत्तेः। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेननित्यमुक्तात्मसंस्थितिरूपमोक्षसमर्पणेन हितशासकत्वात् शास्त्रत्वं वेदान्तानामितिसिद्धं. वेदान्ताः सिद्धब्रह्मपरा इति द्वि०वर्णकम् ॥४

(५ ईक्षत्यधिकरणम् । ५—११)

इत्थं चतुर्भिः सूत्रैः साधनचतुष्टयसम्पन्नजिज्ञासुभिर्जिज्ञास्यं ब्रह्म सर्वजगज्जन्मस्थितिलयकारणं सर्वज्ञं सर्ववेदान्तप्रतिपाद्यमिति प्रतिपादितम्। तत्र सांख्याः मन्वते, यत्किल कूटस्थत्वेन क्रियाशक्त्यभावान्न ब्रह्म जगतः कारणं, किं तर्हि ? त्रिगुणात्मकत्वेन क्रियाशक्तियोगात् त्रिगुणात्मकमचेतनं प्रधानमेव जगतः कारणमिति मतं निराकर्तुमिदमाह—

(५) ईक्षतेर्नाशब्दम् ॥५॥

पूर्वेणास्याक्षेपसंगतिः। अत्र प्रधानैक्यसम्पदुपासनं पूर्वपक्षे फलं, सिद्धान्ते ब्रह्मैक्यज्ञानमिति ज्ञेयम्। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य 'तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत' (छा. ६।२।१—३) इत्यत्रेदं शब्दवाच्यं नामरूपव्याकृतं जगत्प्रागुत्पत्तेः सदात्मनावधार्य तस्यैव प्रकृतस्य सच्छब्दवाच्यस्येक्षणपूर्वकं तेजःप्रभृतेः स्रष्टृत्वं श्रूयते। तत्किंजगत्कारणं सच्छब्दवाच्यं प्रधानमुत ब्रह्मेति संशये; त्रिगुणात्मकत्वाज्जगतः कारणं प्रधानमेव भवितुमर्हति। तत्र हि रजोगुणात्मकत्वेन क्रियाशक्तिमत्त्वं निरतिशयसत्त्वोत्कर्षत्वेन सर्वज्ञत्वमपि प्रसिद्धमित्यतः प्रधानमेव निखिलजगत्कारणमिति पूर्वःपक्षः। सिद्धान्तस्तु ईक्षतेर्नाशब्दम्। न खलु सांख्यशास्त्रपरिकल्पितमचेतनं प्रधानं जगतः कारणं वेदान्तेष्वाश्रयितुं शक्यम्। कुतः ? अशब्दम् हेतुगर्भविशेषणत्वेन भावप्रधानतया चाशब्दत्वादप्रमाणकत्वात्। कथमशब्दत्वम् ? ईक्षतेः—जगत्कारणस्येक्षितृत्वश्रवणात्। नह्यचेतनस्य प्रधानस्येक्षितृत्वं सम्भवति, तस्य चेतनधर्मत्वात्। ननु कूटस्थत्वेन ब्रह्मणोऽपि ज्ञानक्रियाशक्त्यभावेन जगत्कारणत्वं न सम्भवतीति चेन्न; तत्र मायामहिम्ना सर्वस्यापि सम्भवात्। यत्तूक्तं सत्त्वगुणोत्कर्षेण प्रधानस्य सर्वज्ञत्वमिति, तन्नोपपद्यते; प्रधानावस्थायां गुणसाम्येऽपि सत्त्व-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुणव्यपाश्रयां ज्ञानशक्तिमाश्रित्य सर्वज्ञत्वमुच्येत, तर्हि रजस्तमोव्यपाश्रयां ज्ञानप्रतिबन्धकशक्तिमाश्रित्य तत्र किञ्चिज्ज्ञत्वमप्युच्यताम्। अतः सच्छब्दवाच्यमीक्षितृ चेतनं ब्रह्मैव जगदुपादानमिति । ॥ ५ ॥

ननु मा भवतु प्रधानेऽचेतनतया मुख्यमीक्षितृत्वम् 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छा० ६।२।३-४) इत्यचेतने गौणमीक्षितृत्वं यथा, तथाऽत्रापि गौणमीक्षितृत्वं कल्प्यतामित्याशङ्क्याह—

(६) गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

अप्तेजसोरिव प्रधाने ईक्षितृशब्दो गौण इति चेन्न; आत्मशब्दात्। 'सदेव' इत्युपक्रम्य 'तदैक्षत' (छा: ६।२।१, ३) इति च तेजोऽवन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदीक्षितृ 'सेयं देवता इति देवताशब्देन परामृश्य 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छा० ६।३।२) इत्यत्र सच्छब्दवाच्ये जगत्कारणे आत्मशब्दश्रवणात् । तत्राचेतनं प्रधानं गुणवृत्त्येक्षितृ कल्प्यते चेत्; तदेव प्रकृतत्वात् 'सेयं देवते'ति परामृश्येत । परामृश्यते हि जीवात्मना सा देवता । जीवो नाम चेतनः प्राणधारयिता शरीराध्यक्षः, तथाविधप्रसिद्धत्वान्निर्वचनाच्च। स कथमचेतनस्य प्रधानस्यात्मा भवेत् । तस्माज्जगत्कारणे सच्छब्दवाच्ये आत्मशब्दश्रवणाद् तत्र न गौणमीक्षितृत्वमिति ॥ ६ ॥

ननु राज्ञः सर्वार्थकारिणि भृत्ये ममात्मा भद्रसेन इतिप्रयोगवदचेतनेपि प्रधाने भवत्वात्मशब्दप्रयोगः, पुरुषभोगापवर्गसम्पादकस्य तस्य सर्वार्थकारित्वादित्याशङ्क्याह—

(७) तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

पूर्वसूत्रात् नेत्यनुवर्तते, न प्रधानमात्मशब्दालम्बनं भवितुमर्हति, 'स आत्मा' इति प्रकृतं सदणिमानमादाय 'तत्त्वमसि' (छा० ६।८।७) इति चेतनस्य श्वेतकेतोर्मोक्षयितव्यस्य तन्निष्ठामुपदिश्य 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये (छा० ६।१४।२ इति प्रारब्धक्षयानन्तरं—मोक्षोपदेशात् । अतश्चेतनस्य मुमुक्षोस्तन्निष्ठत्वानुपपत्तेः तथाविधोपदेशकशास्त्रस्याप्रामाण्यापत्तेश्च नात्मशब्दवाच्यं प्रधानम् । किञ्च कथञ्चित् शास्त्रप्रामाण्यमनुश्रित्य श्रद्धयाऽन्धलाङ्गूलन्यायेन तदात्मदृष्टिं परित्यज्य तद्भिन्नमात्मनं न प्रतिपद्यत, तथासति मोक्षासम्भवोऽनर्थप्राप्तिश्चस्याताम् । तस्मादात्मशब्दश्चेतनपर इति सिद्धम् ॥ ७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

'CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननुस्थूलारुन्धतीन्यायेनास्तुप्रधानोपदेशद्वाराऽयमात्मोपदेशइत्याशङ्कयाह-

(८) हेयत्वावचनाच्च ॥ ८ ॥

नेत्यनुवर्तते। यद्यनात्मैव प्रधानं सच्छब्दवाच्यं, तर्हि तदेव 'स आत्मा तत्त्वमसि' (छा० ६।८।७) इत्यत्रोपदिष्टं स्यात्, स तदुपदेशं श्रुत्वाऽनात्मज्ञतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षु शास्त्रं स्थूलारुन्धतीन्यायेनात्मतयोपदिष्टस्यप्रधानस्य हेयत्वं ब्रूयात्। नचैवमवोचत्, सन्मात्रात्मावगतिनिष्ठैव षष्ठप्रपाकपरिसमाप्तिर्दृश्यते। अतो हेयत्वावचनात् हेयत्वाकथनाच्च प्रधानं सच्छब्दवाच्यम्। किञ्च कारणविज्ञानात् सर्वं कार्यं विज्ञातंभवतीति प्रतिज्ञातम्, तच्च विरुध्येत सत्यपि हेयत्ववचने प्रधानस्य। अत एव सूत्रोक्तचकारशब्देनैकविज्ञानेन सर्वविज्ञानोपक्रमविरोधादपि न प्रधानं सच्छब्दवाच्यमिति ॥ ८ ॥

इत्थं चतुर्भिः सूत्रैः प्रधानस्येक्षितृत्वादिनिरासेन जगत्कारणत्वं निरस्तम्, संप्रति स्वतन्त्रहेतुभिस्तन्निरसितुं सूत्रद्वयमाह—

(९) स्वाप्ययात् ॥ ९ ॥

नेत्यनुवर्तते। न प्रधानं जगत्कारणं भवितुमर्हति। कुतः? स्वाप्ययात्, स्वस्मिन् प्रकृतसच्छब्दवाच्ये चिदात्मनि अप्ययात् 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' (छा० ६।८।१) इत्यत्र लयश्रवणात्। प्रकृतः सच्छब्दवाच्यः आत्मैव स्वशब्देनेहोच्यते। तमपीतोभवत्यपिगतो भवति। अपिपूर्वस्येतेर्लयार्थत्वात्। अतो यस्मिन् स्थूलसूक्ष्मोपाधिद्वयोपरमे तदुपाधिकृतविशेषाभावात्सुषुप्तौ सर्वेषां प्राणिनामप्ययो लयोभवति, तदेवचेतनं सच्छब्दवाच्यंजगतःकारणं, न प्रधानम् ॥९॥

(१०) गति सामान्यात् ॥ १९ ॥

नेत्यनुवर्तते। नाचेतनं प्रधानं जगतः कारणं। कुतः ? गतिसामान्यात् 'आत्मन आकाशः सम्भूतः' (तै० २।१) 'आत्मन एवेदं सर्वम्, 'आत्मन एष प्राणो जायते' (प्र० ३।३) इत्यादिषु सर्वेषु वेदान्तेषु गतेः चेतनकारणत्वावगतेः सामान्यात् समानत्वात्। अतो गतिसामान्यात् सर्वज्ञं ब्रह्मैव जगतः कारणमित्यवसेयम् ॥ १० ॥

(११) श्रुतत्वाच्च ॥ ११ ॥

नेत्यनुवर्त्य न सांख्यपरिकल्पितमचेतनं प्रधानं जगदुपादानं सम्भ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वति। कुतः ? श्रुतत्वाच्च। श्रूयते हि श्वेताश्वेतराणां मन्त्रोपनिषदि सर्वज्ञमीश्वरं प्रकृत्य 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' (श्वे० ६।६) इत्यत्र करणाधिपानां जीवानामधिपः सर्वज्ञः परमेश्वरः स्वशब्देन जगतः कारणमित्युक्तम्। तस्मात्सर्वज्ञं ब्रह्मैव जगतः कारणं, न प्रधानमन्यद्वेति सिद्धम् ॥११॥

(६ आनन्दमयाधिकरणम् ॥ १२-१६)

इत्थं 'जन्माद्यस्य यतः' इत्यारभ्य 'श्रुतत्वाच्च' इत्यन्तैः सूत्रैः सविशेषनिर्विशेषब्रह्मपराणां सर्वेषां वेदान्तानामुपासनाविधिद्वारा साक्षाच्च निर्विशेषब्रह्मपरत्वं व्यवस्थापितम्। अधुना सोपाधिकनिरूपाधिकभेदेन द्विरूपं हि ब्रह्मावगम्यमानमप्येकमेव, तदपेक्षितोपाधिविशिष्टं निरस्तोपाधिकं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते इत्येतत्प्रदर्शनाय परो ग्रन्थ आरभ्यते। तत्र निर्विशेषवाक्यविचारात्मकमधिकरणमिदमारभ्यते—

(१२) आनन्दमयोऽभ्यासात् ॥१२॥

ईक्षत्यधिकरणे 'तत्तेज ऐक्षत' इत्यत्र प्रायोऽमुख्यमीक्षणमुक्तम्, तद्यथा न जगत्कारणत्वनिश्चायकं, न तथा 'आत्माऽनन्दमय' इत्यत्र मयटो विकारार्थत्वे तदन्तःपातिपठितत्वादनिश्चायक इति पूर्वेणास्य प्रत्युदाहरणसंगतिः। अत्र जीवस्यानन्दमयत्वेनोपासनमिति पूर्वपक्षफलम्, निर्विशेषब्रह्मैक्यप्रमितिरिति सिद्धान्तफलम्, किन्तु एकदेशिमते उभयत्रोपासनमिति विवेकः। तैत्तिरीयकेऽन्नमयं, प्राणमयं, मनोमयं, विज्ञानमयं चानुक्रम्य 'अन्योऽन्तर आत्माऽनन्दमयः इति श्रूयते। तत्र किं 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २।१) इत्येतत् प्रकृतं परं ब्रह्मैवानन्दमयशब्देनोच्यतेऽर्थान्तरं वेति संशये ; ब्रह्मणोऽर्थान्तरममुख्य आनन्दमयपदवाच्यः। कुतः? अन्नमयाद्यमुख्यात्मप्रवाहपठितत्वादिति पूर्वः पक्षः। सिद्धान्तस्तु आनन्दमयोभ्यासात्। परमात्मैवानन्दमयो भवितुमर्हति। कुतः ? परमात्मन्येवानन्दशब्दस्य बहुकृत्वोऽभ्यासात्। आनन्दमयं प्रकृत्य 'रसं ह्येवायं लब्ध्वाऽनन्दी भवति' 'यदेष आकाश आनन्दो न स्यात्' 'एष ह्येवानन्दयाति' (तै० २।७) 'सैषानन्दस्य मीमांसा' 'एतमानन्दमयमात्मानमुपसंक्रामति' (तै० २।८) इत्येवमानन्दशब्दस्य बहुकृत्वोब्रह्मण्यभ्यासादानन्दमय आत्मा ब्रह्मेति गम्यते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नन्वमुख्यात्मप्रवाहपठितत्वादमुख्य आनन्दमय इति चेन्न; आनन्दमयस्य सर्वान्तरत्वात्। स्थूलारुन्धतीन्यायेन शास्त्रस्यान्नमयाद्यान्तरत्वेन सर्वान्तरस्य परमात्मनः तात्पर्यवत्त्वेन प्रतिपादनपरत्वात्। तस्मादानन्दमयः परमात्मैव ॥१२॥

नन्वानन्दमयस्य विकारार्थत्वादित्याशङ्क्याह—

(१३) विकारशब्दान्नेति चेन्न; प्राचुर्यात् ॥१३॥

नानन्दमयः परमात्मा भवितुमर्हति। कुतः? विकारशब्दात्। विकारार्थकमयट्प्रत्ययश्रवणात् ब्रह्मणश्चानन्दविकारत्वानुपपत्तेः। तस्मादन्नमयादिशब्दवद्विकारविषय एवानन्दमयशब्द इति चेन्न; प्राचुर्यात्। 'तत्प्रकृतवचने मयट्' (पा० ५।२।२१) इत्यत्र प्रचुरतायां मयट्प्रत्ययवत् आनन्दमय इत्यत्रापि प्रचुरतायामेव मयटः स्मरणात्। आनन्दप्रचुरत्वं च तत्र मानुषानन्दादारभ्योत्तरत्रशतगुणानन्दाधिक्येन ब्रह्मानन्दस्य निरतिशयत्वावधारणात्। अतः प्राचुर्यार्थेऽत्रमयट्प्रत्ययः॥१३॥

मयटः प्राचुर्यार्थे हेत्वन्तरमाह—

(१४) तद्धेतुव्यपदेशाच्च ॥१४॥

तमानन्दं प्रति 'एष ह्येवानन्दयाति' (तै० २।७) इत्यत्र ब्रह्मणो हेतुत्वव्यपदेशात् प्राचुर्यार्थेऽपि मयटः सम्भवादानन्दमयः परमात्मैव।१४।

इतश्चानन्दमयः परमात्मैवेत्याह—

(१५) मान्त्रवर्णिकमेव च गीयते ॥१५॥

'ब्रह्मविदाप्नोति परम्' इत्युपक्रम्य 'सत्यं ज्ञानमनन्तं ब्रह्म'(तै०२।१) तिमन्त्रे यत्प्रकृतं ब्रह्म सत्यादिविशेषणैर्निर्धारितम्, तत् मान्त्रवर्णिकमेव ब्रह्म 'अन्योऽन्तर आत्मानन्दमय इत्यत्र गीयते। मन्त्रब्राह्मणयोरेकार्थत्वं युक्तम्, अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गः स्यात् ॥१५॥

(१६) नेतरोऽनुपपत्तेः ॥१६॥

इतश्चानन्दमयः परमात्मैव, नेतरः = ईश्वरादन्यो जीवो नानन्दमयपदवाच्यः। कुतः? अनुपपत्तेः। आनन्दमयं प्रकृत्य 'सोऽकामयत बहुस्यां प्रजायेये' (तै० २।६) ति श्रूयमाणस्य सृष्टेः पूर्वं सृज्यमानानां विकाराणां स्रष्टुरभिन्नत्वकामयितृत्वादेरनुपपत्तेः। अतः सर्वविकारादेस्स्रष्टृत्वादिकं न परमात्मनोऽन्यत्रोपपद्यते ॥१६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१७) भेदव्यपदेशाच्च ॥१७॥

इतश्च नानन्दमयोजीवः। तत्रानन्दमयप्रकरणे 'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवती' (तै० २।७) ति जीवानन्दमययोर्लब्धृलब्धव्यत्वभेदेन व्यपदेशात्। नहि क्वापि लब्धैव लब्धव्यो दृष्टः। तत्रापि जीवब्रह्मणोरौपाधिकं भेदमाश्रित्य 'भेदव्यपदेशाच्चे' त्युक्तम्। अतो न तत्र पारमार्थिकं भिन्नत्वमाशङ्कनीयम् ॥१७॥

ननु तर्ह्यानन्दमयशब्देन प्रधानमुच्यतामित्याशङ्कयाह—

(१८) कामाच्च नानुमानापेक्षा ॥१८॥

आनन्दमयप्रकरणे 'सोऽकामयत' (तै० २।६) इति कामयितृत्वश्रवणान्नानुमानैकगम्यस्य प्रधानस्यापेक्षाऽनन्दमयत्वेन स्वीकारः। न चेदम् 'ईक्षतेर्नाशब्दमि'त्यत्र निराकृतमिति वाच्यम्; कामयितृत्वश्रवणेन पुनः तन्निराकरणप्रसङ्गस्यादोषादिति ॥१८॥

(१९) अस्मिन्नस्य च तद्योगं शास्ति ॥१९॥

इतश्च नानन्दमयशब्दः प्रधाने जीवे वा प्रयुज्यते। यतो ह्यस्मिन् प्रकृते आनन्दमये आत्मनि प्रतिबुद्धस्यास्य जीवस्य तद्योगं शास्ति 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते' (तै० २।७) इति शास्त्रम्। तदात्मना योगः तद्योगस्तद्भावापत्तिर्मुक्तिरित्यर्थः। सा च मुक्तिः परमात्मपरिग्रहे घटते, न प्रधानपरिग्रहे जीवपरिग्रहे वा। तस्मादानन्दमयः परमात्मैवेति स्थितम् ॥१९॥

इयं तावदेकदेशिमतेनैतदधिकरणस्थसूत्राणां वृत्तिरभिहिता। भगवत्पादीयमते त्वेवंसूत्राणां योजना बोध्या। पूर्वाधिकरणे मुख्येक्षणानुरोधेन ब्रह्मनिर्णये गौणप्रवाहपाठस्यानिश्चायकत्वं यथा, नैवमिहाधारत्वावयवत्वयोः पुच्छशब्दलक्षकत्वसाम्यादवयवप्रायपठितस्य निश्चायकत्वमिति पूर्वेणास्य प्रत्युदाहरणसंगतिः। 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र किमानन्दमयावयत्वेन ब्रह्म विवक्ष्यते, उत, स्वप्रधानत्वेनेति संशये; पुच्छशब्दादवयत्वेनेति पूर्वः पक्षः। सिद्धान्तस्तु आनन्दमयोऽभ्यासात्। आत्मानन्दमय इत्यत्र 'ब्रह्म पुच्छं प्रतिष्ठा' इति स्वप्रधानमेव ब्रह्मोपदिश्यते। कुतः ? अभ्यासात्। 'असन्नेव स भवती' त्यत्र निगमनश्लोके केवलस्य ब्रह्मणोऽभ्यस्यमानत्वात् ॥१२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु पुच्छशब्दस्यावयवपरत्वेन न ब्रह्मणः स्वप्रधानत्वमिति तत्राह—'विकारशब्दान्नेति चेन्न; प्राचुर्यात्'। विकारवाचकावयवशब्दात् तत्समानाधिकरणब्रह्मशब्दो न स्वप्रधानपर इति चेन्न; प्राचुर्यात्—अवयवप्रवाहपठितत्वेपि पुच्छशब्दस्यावयवविवक्षितत्वाभावात्। अतः 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र प्रतिष्ठाशब्दसमभिव्याहारात् पुच्छशब्दस्याधारतया स्वप्रधानत्वेन ब्रह्मोपदिष्टमित्यर्थः ॥१३॥

इतश्च पुच्छशब्दस्य नावयवोऽर्थः किन्त्वाधार इत्याह—तद्धेतुव्यपदेशाच्च। तस्य ब्रह्मणः 'इदं सर्वमसृजत' (तै० २।६) इति वाक्ये स्वविकाराणां हेतुत्वेन व्यपदेशात् ॥१४॥

इतश्च पुच्छवाक्ये ब्रह्म स्वप्रधानपरं, नत्वानन्दमयावयवपरमित्याह—मान्त्रवर्णिकमेव च गीयते। 'सत्यं ज्ञानमनन्तं ब्रह्मे' त्यत्रमन्त्रवाक्ये यद्ब्रह्म प्रतिपादितं, तदेव 'ब्रह्म पुच्छमिति ब्राह्मणवाक्ये स्वप्रधानतया गीयते। मन्त्रब्राह्मणयोरेकार्थत्वाभिधानादिति भावः।१५।

ननु पुच्छवाक्येस्वप्रधानत्वेनानन्दमयस्यैवप्रतिपाद्यत्वंकिं न स्वीक्रियते इत्याशङ्क्याह—नेतरोऽनुपपत्तेः। इतर आनन्दमयो नात्र प्रतिपाद्यः। कुतः? 'तस्यप्रियमेव शिरः' इत्यत्र प्रियादिमत्त्वस्यस्रष्टृत्वानुपपत्तेः ॥१६॥

इतोऽपि नानन्दमयोऽत्र प्रतिपाद्यः इत्याह—भेदव्यपदेशाच्च। 'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' इत्यत्रानन्दमयस्य लब्धृत्वं ब्रह्मणो लब्धव्यत्वं चेति रूपेण भेदव्यपदेशात् ॥१७॥

ननु 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३।६) इत्यत्र यथानन्दस्य ब्रह्मत्वं तथाऽऽनन्दमयस्यापि ब्रह्मत्वमनुमीयतामित्यत आह—कामाच्चनानुमानापेक्षा। काम्यते इति कामः आनन्दस्तस्य मयडश्रवणात् प्रियशिरस्त्वाद्यश्रवणाच्च ब्रह्मत्वेऽपि नानन्दमयस्याप्यनुमानेन ब्रह्मत्वमपेक्षितव्यम्, विकारार्थकस्य मयट्प्रत्ययस्य विधानादित्यर्थः ॥१८॥

इतोऽपि नानन्दमयस्य ब्रह्मत्वमित्याह—'अस्मिन्नस्य च तद्योगं शास्ति' अस्मिन् पुच्छवाक्याभिहिते ब्रह्मणि प्रतिबुद्धस्यास्यानन्दमयस्य 'यदाह्येवैष' (तै० २।७) इति शास्त्रं तद्योगं तदात्मना ब्रह्मभावापत्तिं शास्ति। अतोऽत्रानन्दमयस्याप्रतिपाद्यत्वात् पुच्छंब्रह्मैव निर्विशेषं स्वप्रधानं ज्ञेयमिति ॥१९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(७) अन्तरधिकरणम् ॥२०–२१॥

एवं पूर्वत्र निर्विशेषे ब्रह्मणि समन्वयः सिद्धस्तस्यापवादकत्वादिदमाह-

(२०) अन्तस्तद्धर्मोपदेशात् ॥२०॥

पूर्वत्र ब्रह्मपदम्, आनन्दमयपदम्, आनन्दाभ्यासश्चेति बहुप्रमाणवशात् यथा निर्विशेषस्य ब्रह्मणो निर्णयो जातः, तथाऽत्ररूपवत्त्वादिबहुप्रमाणैः कश्चित् संसारी हिरण्मयः पुरुषोऽस्त्विति पूर्वोक्तयुक्त्या पूर्वपक्षोत्थानात् तेनास्याधिकरणस्य दृष्टान्तसंगतिः। पूर्वपक्षसिद्धान्तपक्षयोरपरपरब्रह्मोपासनमेव फलं बोध्यम्। 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' (छा० १ ६।६) इत्यादिवाक्यं विचारविषयः। तत्र संशयः ; किं विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः सूर्यमण्डले चक्षुषिचोपास्यत्वेन कश्चित्संसारी श्रूयते, किंवा नित्यसिद्धः परमेश्वरः। तत्रपूर्वपक्षे साक्षादतिदेशेन चोभयत्र रूपवत्त्वश्रवणादाधारश्रवणाच्च कश्चित्संसारी ग्राह्यः। सिद्धान्तस्तु 'य एषोऽन्तरादित्ये' 'य एषोऽन्तरक्षिणि' इति च श्रूयमाणोऽन्तःपुरुषः परमेश्वरः एव, न संसारी। कुतः? तद्धर्मोपदेशात्। तस्य हि परमेश्वरस्य धर्माः सर्वपाप्मराहित्यादयोऽत्रोपदिष्टाः। तद्यथा 'तस्योदिति नाम' इति श्रवणानन्तरं 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इत्यत्रादित्यपुरुषस्य सर्वपाप्मराहित्यश्रवणात्। न च हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यते इति वाच्यम्; स्वेच्छया मायामहिम्ना लोकानुग्रहार्थं तस्य रूपवत्त्वोपपत्तेः। आधारोपदेशश्चोपासनार्थः परमेश्वरस्याविरुद्धः। तस्मादक्ष्यादित्ययोरन्तःपुरुषः परमेश्वर इति भावः ॥२०॥

(२१) भेदव्यपदेशाच्चान्यः ॥२१॥

अन्तरिति शब्दोऽनुवर्तते। अक्ष्यादित्ययोरन्तः श्रूयमाणः पुरुषः आदित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्योऽन्तर्यामीश्वरः। कुतः? भेदव्यपदेशात्—'य आदित्येतिष्ठन्नदित्यादन्तरो यमादित्यो न वेद' (बृ० ३।७।९) इति श्रुत्यन्तरे वेदितृवेदितव्ययोर्भेदव्यपदेशात्। एवमत्रापि अन्तरशब्दश्रुत्या तत्प्रत्यभिज्ञानेन श्रुतिसामान्यात् परमेश्वर एव तयोरन्तरुपास्य इति भावः ॥२१॥

(८) आकाशाधिकरणम् ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु पूर्वस्मिन्नधिकरणेऽव्यभिचरितसर्वपाप्मराहित्यादिलिङ्गेन-रूपवत्वादेरन्यथानयनं यथा, न तथात्र लिङ्गादाकाशश्रुतिरन्यथा नेतुं शक्यते, लिङ्गात् श्रुतेर्बलीयस्त्वादित्याशङ्कयाह—

(२२) आकाशस्तल्लिङ्गात् ॥२२॥

पूर्वाधिकरणेन सहास्य प्रत्युदाहरणसंगतिः। पूर्वपक्षे भूताकाश-दृष्ट्या सिद्धान्ते ब्रह्मदृष्ट्या चोद्गीथोपासनं फलमितिभेदः। 'अस्य लोकस्य का गतिरित्याकाश इति होवाच' (छा० १–९–१) इत्यादि-वाक्यमत्र विचारविषयः। तत्राकाशशब्देन किं परं ब्रह्मोपदिश्यते; उत भूताकाशमिति संशये; लोकप्रसिद्धया आकाशशब्देन भूताकाशमेव ग्राह्यं, 'यदेष आकाश आनन्दो न स्यादि' (तै० २।७) त्यत्र व्यापक-त्वादिसाधर्म्येणापि तच्छब्दस्य ब्रह्मणि प्रयोगोपपत्तेरनेकार्थस्यान्याय-त्वात् वाय्वादिक्रमेणाकाशस्याखिलजगत्कारणत्वोपपत्तेरिति पूर्वःपक्षः। सिद्धान्तस्तु-आकाशशब्देन ब्रह्मैव गृह्यते। कुतः? तल्लिङ्गात्—तस्य ब्रह्मणो यल्लिङ्गं समस्तमहाभूतादिसृष्ट्यादिकं, तस्य 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानि' (छा० १।९।१) ति वाक्ये दृष्टत्वात्। ननु लिङ्गा-च्छ्रुतेर्बलीयस्त्वमुक्तमिति चेन्न; भूयोब्रह्मलिङ्गश्रुत्यनुरोधेनैकस्या आका-शश्रुतेर्बाधस्यादोषत्वात्। भूताकाशार्थपरिग्रहे 'आकाशादेवे'त्यवधा-रणानुपपत्तेः 'सर्वाणी' त्यत्राकाशस्यापि सर्वान्तःपातितया भूता-काशस्य स्वस्मादेवोत्पत्त्ययोगाच्च। सर्वापेक्षया ज्यायस्त्वपरायणत्वादे-र्ब्रह्मण्येव सम्भवात्। एवं च स्थिते भूताकाशे प्रसिद्धिमात्रमकिञ्चि-त्करम्; ब्रह्मण्यपि तस्य प्रयोगबाहुल्यदर्शनात्। अतोऽत्राकाशपदवाच्यं ब्रह्मैवोद्गीथे उपास्यमिति सिद्धम् ॥२२॥

[९—प्राणाधिकरणम् । सू० २३]

आकाशन्यायोऽन्यत्रातिदिश्यते—

(२३) अत एव प्राणः ॥२३॥

अतिदेशत्वादत्रापि पूर्वोक्ता संगतिर्ज्ञेया। यद्वा पूर्वमव्यभिचरित-लिङ्गात्समस्तभूतादिसृष्ट्यादिरूपाद्यथाऽकाशश्रुतेर्बाधः, न तथात्र प्राणश्रुतेर्बाधो युक्तः; संवेशनादिलिङ्गस्य प्राणेऽपि सम्भवेन ब्रह्मणि व्यभिचरितत्वादिति प्रत्युदाहरणसंगतिः। पूर्वपक्षे प्राणदृष्ट्या सिद्धान्ते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मदृष्ट्या च प्रस्तावोपासनं फलम् । 'प्रस्तोतर्या देवता' (छा० १-१०-६) इति प्रस्तुत्य 'कतमा सा देवतेति प्राण इति होवाच' (छा० १।११।४) इत्यादिवाक्यमत्र विषयः । तत्र किं प्राणशब्देन ब्रह्मोपदिश्यते, उत वायुविकार इति संशये; 'यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति' (श० ब्रा० १०।३।३।६) इत्यादिश्रुत्या भूतसारभूतेन्द्रियप्रविलयस्य प्रत्यक्षसिद्धस्यानुवादेन प्राणे सर्वभूतविलयनाभिधानात्, उत्तरत्रादित्यादीनामब्रह्मणामुद्गीथादिदेवतात्वाभिधानेन तत्साहचर्याच्च प्राणो वायुविकार एव ग्राह्य इति पूर्वपक्षः । सिद्धान्तस्तु–प्राणशब्दो ब्रह्मपरः । कुतः ? पूर्वसूत्राभिहितलिङ्गादेव । केवलमिन्द्रियाणां प्राणे प्रविलयस्य श्रुत्या प्रत्यक्षेण च सिद्धत्वेऽपि सर्वभूतविलयस्याव्यभिचरिताद्ब्रह्मलिङ्गात्प्राणशब्देन ब्रह्मैवाभिधीयते । 'यदा सुप्तः न कञ्चन स्वप्नं पश्यति । अथास्मिन् प्राण एवैकधा भवति' (कौ० ३।३) इत्यादिश्रुत्यापि ब्रह्मैव तल्लिङ्गादवगम्यते । सान्निध्यस्य वाक्याद् दुर्बलत्वात् लोकप्रसिद्धेरकिञ्चित्करत्वाच्चेति प्राणशब्दितं ब्रह्मैव । 'प्राणस्य प्राणमि'(बृ०४।४।१८) त्यत्राद्यप्राणशब्दो वायुपरस्ततोऽन्यस्य ब्रह्मपरत्वेऽपि संशयाभावात् प्राणशब्दो ब्रह्मपर इति सिद्धम् ॥२३॥

[१० ज्योतिश्चरणाधिकरणम् । सू० २४–२७]

इत्थं ब्रह्मलिङ्गसद्भावेन प्राणशब्दस्य ब्रह्मपरत्वमिवात्र तदभावान्न ब्रह्मपरत्वमिति प्रत्युदाहरणसंगत्येदमाह—

(२४) ज्योतिश्चरणाभिधानात् ॥२४॥

अत्र पूर्वपक्षे अन्तर्ज्योतिषि कौक्षेये आदित्यादिदृष्ट्योपासनं, सिद्धान्ते ब्रह्मदृष्ट्येति फलभेदः । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते, विश्वतः पृष्ठेषु' (छा० ३।१३।७) इत्यादिवाक्यमत्र विचारणीयं । तत्रज्योतिःशब्दः आदित्यतेजोवाचकः, उत ब्रह्मपर इतिसंशये; 'दीप्यते' इति प्रसिद्धश्रुतेः 'अतोपरो दिवः' इति मर्यादाश्रवणात् 'विश्वतः पृष्ठेषु' इत्यधिकरणनिर्देशोपपत्तेश्चेति कौक्षेयेज्योतिषि समानधर्मतयोपासनार्थत्वमादित्यतेजोवाचको ज्योतिःशब्द इति पूर्वः पक्षः । सिद्धान्तस्तु —'दिवोज्योतिरि' त्यत्रज्योतिः शब्दो ब्रह्मपरः । कुतः ? चरणाभिधानात्–'तावानस्य ··· पादोऽस्येति त्रिपादस्यामृतं दिवि' (छा०३।१२।६) इत्यत्रपूर्वस्मिन्वाक्ये चतुष्पात्त्वाभिधानात् । अवभासकमात्रेऽपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बहुलं ज्योतिःशब्दस्य प्रयोगदर्शनेन ब्रह्मणि तत्प्रयोगोऽविरुद्धः। औपाधिकप्रदेशविशेषोपि ब्रह्मणि सुलभः। अधिकरणनिर्देशश्चोपासनार्थत्वेनोपयुज्यते। कौक्षेयप्रतीकत्वमपि नामादिप्रतीकत्ववदविरुद्धम्। अतो ब्रह्मैव ज्योतिःशब्दितम् ॥२४॥

ननु पूर्वस्मिन् वाक्ये 'गायत्री वा इदं सर्वमि' (छा० ३।१२।१) त्यादिना छन्द एव निर्दिष्टं, न ब्रह्मेत्याशङ्क्याह—

(२५) छन्दोऽभिधानान्नेति चेन्न; तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम् ॥२५॥

छन्दोऽभिधानात्—गायत्रीनामछन्दसः पूर्वस्मिन् वाक्येऽभिधानात् न ब्रह्मणः प्रकृतत्वमिति चेन्न; कुतः? अक्षरसंनिवेशविशेषरूपाया गायत्र्याः सर्वात्मकत्वासम्भवेन तथा=छन्दोद्वारेण तद्गते ब्रह्मणि चेतोऽर्पणस्य=चित्तसमाधानस्य निगदादभिधानात्। तथाहि दर्शन-दृष्टान्तः। अन्यत्रापि विकारद्वारेण 'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते' (ऐ० आ० ३।२।३।१२) इति पूर्वस्मिन् वाक्ये ब्रह्मैवोपास्यत्वेन निर्दिष्टं, न छन्द इति सिद्धम् ॥२५॥

(२६) भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥२६॥

इतश्च गायत्रीवाक्ये ब्रह्मैव प्रकृतमिति। 'सैषा चतुष्पदा गायत्री' इति श्रुत्या भूतपृथिवीशरीरहृदयैर्व्यपदेशस्य ब्रह्मण्येवोपपत्तेः, अक्षरसंनिवेशरूपाया गायत्र्या भूतादिपादव्यपदेशानुपपत्तेश्च। अतो गायत्रीवाक्ये ब्रह्मैव प्रतिपादितं, तदेव ब्रह्म ज्योतिर्वाक्ये द्युसम्बन्धात्प्रत्यभिज्ञायमानं परामृश्यते इति स्थितम्। तस्माद् भूतादीनां पादत्वनिर्देशः, 'तावानस्य महिमे'त्यादिश्रुतयः', 'विष्टभ्याहमिदम्' (गी० १०।४२) इति स्मृतिः', 'यद्वै तद्ब्रह्म'(छा० ३।१२।७) इति मुख्यनिर्देशश्च ज्योतिःशब्देन ब्रह्मोपादाने संघटन्ते इति भावः ॥२६॥

(२७) उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥२७॥

ननु पूर्वं 'दिवः परमि'ति पञ्चम्या द्यौरवधित्वेन 'त्रिपादस्यामृतं दिवी'ति सप्तम्या द्यौराधारत्वेनोपदिष्टा। तस्माद्विभक्तिभेदेनोपदेशभेदान्न तस्येह प्रत्यभिज्ञानं सम्भवतीति चेन्न; उभयस्मिन्नप्यविरोधात्। उभयस्मिन्नपि सप्तम्यन्ते पञ्चम्यन्ते चोपदेशे प्रधानप्रातिपदिकार्थेन प्रत्यभिज्ञाया अविरोधात्। यथा लोके वृक्षाग्रसम्बद्धोऽपि श्येनो वृक्षाग्रे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्येनो, वृक्षाग्रपरतः श्येन इत्युभयथोपदिश्यमानेऽविरोधः। एवं च दिवः परमपि सद्ब्रह्म दिवीत्युपदेशे न विरोधः। अतः पूर्वं निर्दिष्टस्यैव ब्रह्मणोऽत्र प्रत्यभिज्ञानाज्ज्योतिःशब्दितं परं ब्रह्मैवेति सिद्धम् ॥२७॥

(११ प्रतर्दनाधिकरणम्। सू० २८–३१)

नन्वेवं पूर्वस्मिन्नधिकरणे प्रकृतस्य त्रिपादो ब्रह्मणः परामर्शकेन यच्छब्देनसामानाधिकरण्याज्ज्योतिःशब्दस्य ब्रह्मपरत्वेऽपि 'प्राणोऽस्मी' त्यत्रासाधारणब्रह्मलिङ्गाभावान्न प्राणशब्दस्य ब्रह्मपरत्वमिति प्रत्युदाहरणसंगत्येदमाह—

(२८) प्राणस्तथाऽनुगमात् ॥२८॥

अत्र पूर्वपक्षे प्राणेन्द्रदेवताजीवानामन्यतमोपासनम्। सिद्धान्ते ब्रह्मधीरिति फलभेदः। अस्ति कौषीतकिब्राह्मणोपनिषदीन्द्रप्रतर्दनाख्यायिकायां 'स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्व' (कौ० ३।२) इतीदं वाक्यमत्र विचारविषयः। तत्र किं प्राणशब्देन वायुमात्रमुच्यते, इन्द्रदेवता, जीवो, परं ब्रह्म वेति संशयः। 'अत एव प्राण' इत्यत्र प्राण-शब्दस्य ब्रह्मपरत्वनिर्णायकलिङ्गमिव 'आनन्दोऽजरोऽमृतः' इत्यादिब्रह्मलिङ्गसत्त्वेऽपि 'मामेव विजानीहि' 'इदं शरीरं परिगृह्योत्थापयति' 'वक्तारं विद्यात्' (कौ० ३।१, २, ८) इत्याद्यनेकलिङ्गदर्शनेन संशयः। तत्र 'अथ खलु'''इत्यादिलिङ्गाद्वायुमात्रमिति पूर्वः पक्षः। सिद्धान्तस्तु प्राणः=प्राणशब्दितं ब्रह्मैव विज्ञेयम्। कुतः? तथानुगमात्। तथा ब्रह्मपरत्वे पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थसमन्वयस्य ब्रह्मप्रतिपादनपरत्वात्। तथाहि 'त्वमेव मे वरं वृणीष्व, यं त्वं मनुष्याय हिततमं मन्यसे' इति प्रार्थितं हिततमं ब्रह्मविज्ञानमन्तरेण न सम्भवति अतो ब्रह्मैव प्राणशब्दम्। 'यो मां वेद न ह वै तस्य केनचन कर्मणे'ति कर्मणाऽनवलेपश्रुतिः 'अजरोऽमृतः इति श्रुतिः 'स न साधुना कर्मणा भूयान् भवती' त्यादिश्रुतयश्च ब्रह्मपरिग्रहे संघटन्ते। अतोऽत्र प्राणशब्दितं ब्रह्मैवेत्यर्थः ॥२८॥

ननु 'मामेव विजानीहि' इत्युपक्रम्य 'प्राणोऽस्मि प्रज्ञात्मा' इत्यहंकारवादलिङ्गेनेन्द्रदेवताभिधानमेवास्तीत्याशङ्क्याह—

(२९) न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्ध-
भूमा ह्यस्मिन् ॥२९॥

न परं ब्रह्म प्राणशब्दं, कुतः? वक्तुरात्मोपदेशात्। वक्तुरिन्द्रस्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवताविशेषस्य 'मामेव विजानीहि' इतिश्रुत्यात्मत्वेनोपदिश्यमानत्वात्, 'अवागमना' (बृ० ३।८।८) इत्यादिश्रुत्या ब्रह्मणो वक्तृत्वायोगाच्च । 'प्राणो वै बलमि' तिश्रुतेः प्राणस्य बलरूपतया बलदेवतेन्द्रस्य प्राणशब्देनाऽभिधानेऽविरोधात् । प्रज्ञात्मत्वमप्यप्रतिहतज्ञानात्तत्र सम्भवत्येवेति चेत् ? अध्यात्मसम्बन्धभूमा ह्यस्मिन् । हि—यस्मादस्मिन्नध्याये 'यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः स एष प्राण एव प्रज्ञात्माऽनन्दोऽजरोऽमृतः' इत्यध्यात्मसम्बन्धस्य प्रत्यगात्मसम्बन्धस्य भूमा बाहुल्यमुपलभ्यते । तस्मादध्यात्मसम्बन्धबाहुल्यात्प्राणात्मकब्रह्मोपदेश एवायं, नेन्द्रदेवतात्मोपदेशः इति ॥२९॥

कथं तर्हि वक्तुरात्मोपदेश इति तत्राह—

(३०) शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥३०॥

वक्तुरिन्द्रस्य 'मामेव विजानीही'त्यात्मत्वेनोपदेशस्तु 'अहमेव परं ब्रह्मे'ति शास्त्रदृष्ट्या ब्रह्मात्मानं पश्यन्नेवोक्तम् । यथा 'अहं मनुरभवं सूर्यश्च' (बृ० १।४।१०) इति शास्त्रदृष्ट्या सर्वात्मानं पश्यन्नृषिर्वामदेवोऽवोचत्, तद्वदित्यर्थः । तस्माद् ब्रह्मपरमेवैतद्वाक्यमिति सिद्धम् ।३०।

नन्वध्यात्मसम्बन्धदर्शनात्पराचीनदेवतात्मोपदेशाभावेऽपि नैतद्वाक्यं ब्रह्मपरमित्याशङ्क्याह—

(३१) जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥३१॥

'वक्तारं विद्यात्' इत्यादिजीवलिङ्गात् 'इदं शरीरं परिगृह्योत्थापयति' इतिमुख्यप्राणलिङ्गाच्चेहोभयोरन्यतरो वोभौ वा ग्राह्यौ, न ब्रह्मेति चेन्न; कुतः ? उपासात्रैविध्यात् । एवं सति त्रिविधमुपासनं प्रसज्येत—जीवोपासनं, मुख्यप्राणोपासनं, ब्रह्मोपासनं चेति । न चैतदिष्टम्; 'मामेव विजानीहि' इत्युपक्रम्य 'प्राणोस्मि' इत्युक्त्वाऽन्ते 'स एष प्राण एव प्रज्ञात्माऽनन्दोऽजरोऽमृतः' इत्यादिश्रुत्योपक्रमोपसंहाराभ्यामेकवाक्यत्वं ब्रह्मार्थपरिग्रहे संघटते ।

किं चान्यत्र ब्रह्मलिङ्गानुरोधात् प्राणशब्दस्य यथा ब्रह्मणि वृतेराश्रितत्वं, तथेहापि तद्योगात् हिततमत्वाद्यसाधारणाव्यभिचरितब्रह्मलिङ्गयोगाद्ब्रह्मैवात्रोपदिष्टमिति सर्वमवदातम् ॥३१॥

इति ब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ प्रथमाध्यायस्य प्रथमःपादः ॥ १ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ

प्रथमाध्याये द्वितीयः पादः

[अत्रास्पष्टब्रह्मलिङ्गयुक्तश्रुतिवाक्यानामुपास्यब्रह्मविषयाणां विचारः]

(१ सर्वत्र प्रसिद्धयधिकरणम् । सू० १—८)

इत्थं प्रथमेपादेऽर्थान्तरप्रसिद्धानां केषाञ्चिच्छब्दानां ब्रह्मविषयत्व-हेतुप्रतिपादनेन कानिचिद्वाक्यानि स्पष्टब्रह्मलिङ्गानि सन्दिह्यमानानि ब्रह्मपरत्वेन निर्णीतानि । अधुनाऽस्पष्टब्रह्मलिङ्गानां समन्वयं साधयितुं द्वितीयतृतीयपादावारभ्येते । तत्र समस्तजगत्कारणस्य ब्रह्मणो व्यापकत्वादिकं प्रसिद्धम् । तदुपजीव्योत्तरपादद्वयस्योत्थानाद् हेतु हेतुमद्भावः संगतिरस्य पूर्वेण बोध्या । पूर्वस्मिन्नधिकरणे जीवादिलिङ्गानां बाधितत्वेनब्रह्मपरत्वमुक्तं यथा, न तथात्र मनोमयादिवाक्येऽव्यभिचरितं ब्रह्मलिङ्गमस्तीति प्रत्युदाहरणसंगत्येदमाह—

(३२) सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

पूर्वपक्षे जीवस्य सिद्धान्ते-ब्रह्मणश्चोपासनं फलमिति । छान्दोग्योपनिषदि शाण्डिल्यविद्यायामिदमाम्नायते—'सर्वं खल्विदं ब्रह्म ··· ··· ··· स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः' (छा० ३।१४।१—२) इत्यादि । तत्र किं मनोमयत्वादिधर्मैःशारीर आत्मोपास्यत्वेनोपदिश्यते ? किंवा परं ब्रह्मेति संशये; शारीर इति पूर्वः पक्षः । सिद्धान्तस्तु परमेव ब्रह्म मनोमयत्वादिधर्मैरुपास्यम् । कुतः ? सर्वत्र प्रसिद्धोपदेशात् । सर्वेषु वेदान्तेषु प्रसिद्धस्य ब्रह्मशब्दितस्य जगत्कारणस्येह 'सर्वं खल्विदं ब्रह्मे'ति वाक्योपक्रमे श्रुतस्य मनोमयत्वादिधर्मैरुपदिश्यमानत्वात् । एवं च प्रकृतहानाप्रकृतप्रक्रियाप्रसक्तिर्न स्यात् । वाक्योपक्रमे शमविधिविवक्षया निर्दिष्टस्यापि ब्रह्मणः सन्निहितत्वादुपास्यत्वं लभ्यते । तद्विपरीतत्वेन जीवो न सन्निहितो, नापि स्वशब्देनोपात्तइति ॥१॥

(३३) विवक्षितगुणोपपत्तेश्च ॥ २ ॥

इतश्च ब्रह्मैवात्रोपदिश्यते । ये विवक्षिता गुणा 'भारूपः सत्यसंकल्पः' इत्यादिनोपासनायामुपादेयत्वेनोपदिष्टाः, तेषां सत्यसंकल्पत्वादीनां सृष्ट्यादिष्वप्रतिबद्धशक्तित्वात्परमात्मन्येवोपपत्तेः । न च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'मनोमयः प्राणशरीरः' इत्यादिजीवलिङ्गं ब्रह्मणि नोपपद्यते इति वाच्यम्; जीवासाधारणस्यापि मनोमयत्वादेः सत्यसंकल्पत्वादिब्रह्मलिङ्गानुरोधात्सर्वात्मत्वाच्च तत्रोपपत्तेः। सर्वात्मत्वं च 'त्वं स्त्री त्वं पुमानसि' (श्वे० ४।३) इति श्रुतौ 'सर्वतः पाणिपादम्' (गी० १३।१३) तिस्मृतौ च प्रसिद्धम्। अतस्तद्गुणकं ब्रह्मैवोपास्यमिति सिद्धम् ॥२॥

ननु विपरीतं किं न स्यादि चेन्नेत्याह—

(३४) अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

सौत्रस्तु शब्दोऽवधारणार्थः। ब्रह्मैवोक्तन्यायेन मनोमयत्वादिगुणकं, न तु शारीरो जीवः। कुतः? 'सत्यसंकल्पः, आकाशात्मा, अवाकी, अनादरः, ज्यायान्पृथिव्याः' इत्येवं जातीयकानां गुणानां जीवे सामञ्जस्येनानुपपत्तेः ॥ ३ ॥

(३५) कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

इतश्च न शारीरो मनोमयादिगुणः, 'एतमितः प्रेत्याभिसम्भवितास्मि' (छा० ३।१४।४) इत्यनेन एतमिति प्रकृतस्य मनोमयत्वादिगुणकस्य ब्रह्मणः कर्मत्वेन प्राप्यत्वेन, 'अभिसम्भवितास्मि' इत्यनेन शारीरस्य कर्तृत्वेन प्रापकत्वेन व्यपदिश्यमानत्वात् ॥ ४ ॥

(३६) शब्दविशेषात् ॥ ५ ॥

इतश्च शारीरादन्यो मनोमयत्वादिगुणः। समानप्रकरणे श्रुत्यन्तरे 'अन्तरात्मन्पुरुषो हिरण्मयः' इति शारीरस्यात्मनो वाचकादन्तरात्मन्निति सप्तम्यन्तात् शब्दादन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टात्मवाचकः। तस्मात्तयोर्भेदादन्यः शारीरादुपास्य इत्यर्थः ॥ ५ ॥

(३७) स्मृतेश्च ॥ ६ ॥

किं च 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती' (गी० १८।६१) त्यादौ जीवपरमात्मनोर्भेदस्मरणान्न ब्रह्मणोऽन्यो जीव उपास्यः इति सिद्धम्। अनयोः काल्पनिकं भेदमादायैव शारीरस्योपास्यत्वं प्रतिषिद्धं भवति, नभसोऽपरिच्छिन्नत्वेऽपि घटाद्युपाधिभेदेनाकाशे भेदव्यवहारवदत्राप्यौपाधिकभेदाभ्युपगमादिति भावः ॥६॥ इत्थं शारीरस्योपास्यत्वं निरस्याधुना परमात्मन उपास्यत्वमाशङ्क्य परिहरति—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३८) अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न; निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

नन्वर्भकमल्पम् ओको नीडं स्थानं यस्य सोऽर्भकौकास्तस्य भावस्तत्त्वं तस्मात् 'एष मे आत्माऽन्तर्हृदये' (छा० ३।१४।३) इति परिच्छिन्नायतनत्वात्, 'अणीयान्व्रीहेर्वा यवाद्वा' इत्यादौ स्वशब्देनैव तस्याणीयस्त्वव्यपदेशाच्चाराग्रमात्रो जीव इहोपास्यत्वेनोपदिश्यते, न सर्वगतः परमात्मेति चेन्न; कुतः ? सर्वगतस्यापि परमात्मनोऽर्भकौकस्त्वाणीयस्त्वादिगुणविशिष्टरूपेणेह निचाय्यत्वादेवम्=द्रष्टव्यत्वादेवमिति ब्रूमः। एवमणीयस्त्वादिगुणगणोपेतः परमेश्वरः तत्र हृदयपुण्डरीके निचाय्यो द्रष्टव्यो व्यपदिश्यते, यथा शालग्रामे हरिः। सर्वगतोऽपि स तत्रोपास्यमानः प्रसीदति। अतः सर्वगतस्य परमात्मनोऽर्भकौकस्त्वादिगुण उपासनापेक्षयाऽविरुद्धः। न चैतावता तस्य सर्वगतत्वहानिः ? व्योमवच्चेति तत्सम्भवात्। यथा सर्वगतमपि व्योम सूचीपाशाद्यपेक्षयाऽर्भकौकोऽणीयश्च, एवं निचाय्यत्वापेक्षया ब्रह्मणोऽर्भकौकस्त्वमणीयस्त्वं च, न पारमार्थिकमित्यविरोधः ॥ ७ ॥

ननु ब्रह्मणः सर्वगतत्वाभ्युपगमे सर्वप्राणिहृदयसम्बन्धात् तद्गतसुखादेरपि ब्रह्मणि प्रसङ्गः स्यादित्याशङ्क्य परिहरति—

(३९) सम्भोगप्राप्तिरिति चेन्न; वैशेष्यात् ॥ ८ ॥

ननु व्योमवद् ब्रह्मणः सर्वगतत्वे सर्वजीवहृदयसम्बन्धाच्चेतनत्वाविशेषाच्च जीववद्ब्रह्मण्यपि सुखदुःखादिसम्भोगोऽविशिष्टः प्रसज्येतेति चेन्न; वैशेष्यात्। जीवब्रह्मणोर्भोक्तृत्वाभोक्तृत्वादिविशेषान्न जीवभोगेन ब्रह्मणि भोगप्रसक्तिः। न च 'नान्योऽतोऽस्ति द्रष्टा' (बृ०३।७।२३) 'तत्त्वमसि' इत्यादिश्रुतिभ्यस्तयोरेकत्वमवगम्यते इति, अतस्तत्प्रसङ्ग इति वाच्यम्; मिथ्याज्ञानकल्पितसुखादेः सम्यग्ज्ञानविषये ब्रह्मणि सम्बन्धायोगात्। नहि बालैस्तलमलिनतादिभिर्विकल्प्यमाने व्योम्नि परमार्थतो व्योम तैः सम्बध्यते। तस्मान्मिथ्याज्ञानकल्पितोपभोगगन्धोऽपि नेश्वरे कल्पयितुं शक्यः। अतो मनोमयत्वादिगुणकः परमेश्वर एवोपास्यो, न जीव इति सिद्धम् ॥ ८ ॥

(२ अत्त्रधिकरणम् । सू० ९—१०)

यथा परमात्मनो भोक्तृत्वाभावः पूर्वमुक्तः, तथेह कर्तृत्वाभावोऽपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मणोऽस्तीति पूर्वेणास्य दृष्टान्तसंगतिः।

(४०) अत्ता चराचरग्रहणात् ॥ ९ ॥

पूर्वपक्षेऽग्नेर्जीवस्य वोपासनं, सिद्धान्ते निर्विशेषब्रह्मणो ज्ञानमिति तयोःफलभेदः। 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः॥ (क० १।२।२४) इत्यत्रात्ता श्रूयते। स एव विचारविषयः। अत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयते। स किमग्निः, जीवः, परमात्मा वेति संशये; अग्निरत्ता-'अग्निरन्नादः' (बृ० १।४।६) इति श्रुतिप्रसिद्धिभ्याम्, जीवो वाऽत्ता, 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति दर्शनादिति पूर्वः पक्षः। सिद्धान्तस्तु अत्ताऽत्र परमात्मैव। कुतः? चराचरग्रहणात्। चराचरयोः स्थावरजङ्गमयोराद्यत्वेन ग्रहणात् श्रवणात्। नहि सर्वसंहर्तारं परमात्मानमन्तरेणान्यस्य कस्यचिच्चराचरात्तृत्वं सम्भवति। मृत्यूपसेचनत्वेन सर्वस्य प्राणिसमुदायस्याद्यत्वेन प्रतीयमानत्वात् ब्रह्मक्षत्रयोश्च प्राधान्यात्प्रदर्शनेऽविरोधात्। ननु 'अनश्नन्नन्योऽभिचाकशीती' (मु. ३।१।१) ति श्रुत्या परमात्मनो नात्तृत्वमिति चेन्न; तस्याः कर्मफलभोगस्य प्रतिषेधकत्वेन विकारसंहारप्रतिषेधकत्वाभावात्। अतः परमात्मैवात्रात्ता भवितुमर्हतीति ॥ ९ ॥

(४१) प्रकरणाच्च ॥१०॥

इतश्च परमात्मैवात्ता, नान्यः। 'न जायते म्रियते वा विपश्चिदि, (क० १।२।१८) ति परमात्मनः प्रकृतत्वात् चकारेण 'क इत्था वेद यत्र सः' इति तस्य दुर्विज्ञेयत्वरूपासाधारणलिङ्गाच्चेति भावः ॥१०॥

[३ गुहाधिकरणम्। सू० ११-१२]

पूर्वं यथा ब्रह्मक्षत्रपदस्योर्मृत्युपदसंनिहितत्वेनानित्यवस्तुपरत्वम्, एवमिहापि पिबच्छब्दस्य संनिहितगुहाप्रवेशादिना बुद्धिजीवपरत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

(४२) गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥११॥

अत्र बुद्धिभिन्नजीवज्ञानम्, जीवविलक्षणपरमात्मज्ञानमिति पूर्वपक्षसिद्धान्तयोः फलभेदः। 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति'... (क० १।३।१) इत्यादि वाक्यमत्र विचारविषयः। तत्र किमिह बुद्धिजीवौ निर्दिष्टौ, उत जीवपरमात्मानाविति संशये; बुद्धिजीवौ। कुतः? 'गुहां प्रविष्टाविति विशेषणादिति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वः पक्षः। सिद्धान्तस्तु जीवात्मपरमात्मानावेवात्र ग्राह्यौ। कुतः? आत्मानौ हि = यस्मादात्मानौ चेतनौ 'ऋतं पिबन्तौ' इति फलभोगश्रवणेनैकस्यात्मत्वे द्वितीयस्याप्यात्मत्वं न्याय्यम्। संख्याश्रवणे संख्यावतः समानस्वभावस्यैव लोके दर्शनात्। अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते द्वितीयस्य गोरन्वेषणवदिहापि ऋतपानेन लिङ्गेन निश्चिते विज्ञानात्मनि द्वितीयान्वेषणायां समानस्वभावश्चेतनः परमात्मैव प्रतीयते। 'गुहाहितं गह्वरेष्ठं पुराणम्' (क० १।२।१२) 'यो वेद निहितं गुहायां परमे व्योमन्' (तै० २।१) इत्यादिश्रुतिषु परमात्मनो गुहाहितत्वदर्शनेनात्रापि परमात्मनि गुहाहितत्वमविरुद्धम्। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थो देशविशेषोपदेशो न विरुद्धः। तस्माद्विज्ञानात्मपरमात्मानौ गुहां प्रविष्टौ गृह्येते ॥११॥

(४३) विशेषणाच्च ॥१२॥

इतश्च जीवपरमात्मानावेव गुहां प्रविष्टौ गृह्येते। कुतः? 'आत्मानं रथिनं विद्धि, शरीरं रथमेव तु।' (क० १।३।३) 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' (क० १।३।६) 'अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति' (क० १।२।१२) इत्यादिषु जीवपरमात्मनोरेव गन्तृगन्तव्यत्वेन मन्तृमन्तव्यत्वेन च विशेषणाच्चकारेण परमात्मप्रकरणादित्यर्थः। तस्माज्जीवपरमात्मानावेवात्र ग्राह्याविति भावः ॥१२॥

[४ अन्तराधिकरणम्। सू० १३–१७]

पूर्वस्मिन्नधिकरणे यथा प्रथमपिबन्ताविति द्वित्वश्रवणेन चेतनत्वेन सादृश्यं जीवपरयोरनुसृत्य चरमश्रुतानां गुहाप्रवेशादीनां जीवपरमात्मनोः परत्वं नीतं, तथेह 'दृश्यते' इति प्रथमप्रत्यक्षत्वकथनेन चक्षुषि प्रतिबिम्बावगमानुरोधाच्चरमश्रुतानाममृतत्वादीनां स्तावकत्वेन कथंचित्तत्परत्वं नेयमितिदृष्टान्तसंगत्येदमाह—

(४४) अन्तर उपपत्तेः ॥१३॥

पूर्वपक्षे प्रतिबिम्बोपासनं, सिद्धान्ते ब्रह्मोपासनमिति फलभेदः। उपकोशलविद्यायां छान्दोग्ये 'य एषोऽक्षिणिपुरुषो दृश्यते, एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति" (छा० ४।१५।१) इति विचारविषयोऽत्र। तत्र किमयमक्ष्यधिकरणे निर्दिश्यमानः प्रतिबिम्बादिः उत परमात्मेति संशये; प्रतिबिम्बादिरिति पूर्वःपक्षः। सिद्धान्तस्तु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्तरः = अक्षिण्यभ्यन्तरः पुरुषः परमात्मैवेहोपदिष्टः। कुतः ? उपपत्तेः। आत्मत्वामृतत्वाभयत्वादीनामिहोक्तधर्माणां परमात्मन्येवोपपत्तेः। तत्र 'स आत्मा तत्त्वमसि' इत्यादिश्रुत्याऽऽत्मत्वं परमात्मनि मुख्यवृत्त्योपपद्यते। अमृतत्वाभयत्वे तत्रासकृच्छ्रुतौ श्रूयेते। अक्षिस्थानं च सर्वदोषरहितत्वेनोपदिष्टम्। 'एतं संयद्वाम इत्याचक्षते', 'एतं हि सर्वाणि वामान्यभिसंयन्ति' (छा० ४।१२।२)—इत्यादिश्रुतौ निर्दिष्टसंयद्वामत्वादीनां परमात्मन्येवोपपत्तिर्नान्यत्र। अतोऽक्ष्यन्तरः पुरुषः परमात्मैव ॥१३॥

(४५) स्थानादिव्यपदेशाच्च ॥१४॥

कथमाकाशवत्सर्वगतस्य ब्रह्मणोऽल्पमक्षिस्थानमुपपद्यते इत्यत आह—'यः पृथिव्यां तिष्ठन्' (बृ० ३।७।३) इत्यादिनाऽस्य निर्दिष्टेषु पृथिव्यादिस्थानेषु 'यश्चक्षुषि तिष्ठन्" इत्यादिना चक्षुरपि स्थानं निर्दिष्टं, न तु केवलं चक्षुरेव स्थानम्। तथा "तस्योदिति नाम", "हिरण्यश्मश्रुः" (छा० १।६।७-६) इत्यादौ नाम रूपं चापि निर्दिष्टम्। अतोऽन्यत्र स्थाननामरूपाणामुपासनार्थत्वेन निर्देशवदिहापि सर्वगतस्य परमात्मनोऽक्षिस्थानादिव्यपदेशादुपलब्ध्यर्थं शालग्राम इव विष्णोरिति युक्तमेवेतिभावः ॥१४॥

(४६) सुखविशिष्टाभिधानादेव च ॥१५॥

इतश्चापि परमात्मैवेहोपदिष्टः। 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' तिवाक्योपक्रमे यत्प्रक्रान्तं सुखविशिष्टं ब्रह्म, तस्यैवेहाभिधानात् प्रकृतस्यैव ब्रह्मणोऽक्षिस्थानतां संयद्वामत्वादिगुणतां चाभिधायार्चिरादिकां तद्विदो गतिं वक्ष्यामीत्युपक्रमते 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यादिनेत्यर्थः॥१५॥

(४७) श्रुतोपनिषत्कगत्यभिधानाच्च ॥१६॥

लिङ्गादपि तस्य ब्रह्मत्वमाह—यस्माच्छ्रुतोपनिषत्कस्य श्रुता उपनिषद् रहस्यं ब्रह्मविज्ञानं यस्य, तथाविधस्य ब्रह्मविदो या गतिर्देवयानाख्या 'अथोत्तरेण तपसा ब्रह्मचर्येण" (प्र०१।१०) ति श्रुतौ "अग्निर्ज्योतिरहः" (गी० ८।२४) इति स्मृतौ च प्रसिद्धा, तस्या गतेरेवेहापि "आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतमि' (छा० ४।१५।५) त्यादावभिधानादक्षिस्थस्य ब्रह्मत्वं निश्चीयते ॥१६॥

(४८) अनवस्थितेरसम्भवाच्च नेतरः ॥१७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु छायात्मा, विज्ञानात्मा, देवतात्मा वा स्यादक्षिस्थान इति चेन्न; उपासकस्य सर्वत्राक्षिणि प्रतिबिम्बसम्पादकबिम्बभूतपुरुषान्तरस्यावस्थानाभावात्, तत्र छायात्मनि अमृतत्वादिगुणानामसम्भवाच्चाक्षिस्थपुरुषस्य छायात्मत्वं वक्तुमशक्यत्वात्। नापि विज्ञानात्माक्षिस्थः पुरुषः; तत्राप्यमृतत्वादिगुणानामसम्भवात्। नापि स देवतात्मा स्वीकार्यः, तस्य पराग्रूपत्वादमृतत्वाद्यसम्भवात् उत्पत्तिलयश्रवणाच्च। अमरत्वं च देवानां चिरकालावस्थानापेक्षम्, ऐश्वर्यमपि परमेश्वरायत्तं, न स्वाभाविकम्। तस्मात्परमेश्वर एवायमक्षिस्थानः प्रत्येतव्यो, नान्यः ॥१७॥

[५—अन्तर्याम्यधिकरणम्। सू० १८—२०]

पूर्वत्र 'यः पृथिव्यां तिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणस्थं 'यश्चक्षुषि तिष्ठन्' इत्यादि वाक्यमुदाहृत्य 'स्थानादिव्यपदेशाच्चे' ति सूत्रेऽन्तर्यामिणो ब्रह्मत्वं निर्णीतम्। इदानीं तदेवाक्षिप्य समाधत्ते इत्याक्षेप संगत्येदमाह—

(४९) अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥१८॥

पूर्वपक्षे प्रधानस्य योगिनो जीवस्य वोपासनम्, सिद्धान्ते परमेश्वरस्यैवेति तयोः फलभेदः। 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' (बृ० ३।७।२) इत्यादिवाक्यं विषयः। तत्रान्तर्यामी प्रधानं, प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी पुरुषः, परमात्मा वेति संशये; प्रधानजीवाविति पूर्वपक्षे सिद्धान्तमाह—अत्राधिदैवादिषु श्रूयमाणोऽन्तर्यामी परमात्मैव स्यान्नान्यः। कुतः? तद्धर्मव्यपदेशात्। तस्य परमात्मनः सर्वान्तर्यामित्वामृतत्वात्मत्वादीनां साधारणधर्माणामिह व्यपदेशात्। तथाहि पृथिव्यादिसमस्तविकारजातमन्तस्तिष्ठन्यमयतीति परमात्मनो यमयितृत्वधर्मोपपत्तिः। 'एष त आत्मान्तर्याम्यमृतः' इत्यात्मत्वामृतत्वयोश्च मुख्यतया तत्रैवोपपत्तिः। अतः परमात्मैवान्तर्यामीति ॥१८॥ ननु 'अदृष्टोऽश्रुतः' इत्यादिव्यपदेशस्य रूपादिहीनतया परमात्मवत् सांख्यस्मृतिपरिकल्पिते प्रधानेऽप्युपपत्तेः प्रधानमेवान्तर्यामिपदवाच्यं स्यादित्याशङ्क्याह—

(५०) न स्मार्त्तमतद्धर्माभिलापात् ॥१९॥

न च स्मार्त्तं सांख्यपरिकल्पितं प्रधानमन्तर्यामिपदवाच्यमिति; कुतः? अतद्धर्माभिलापात्। अतत्पदवाच्यप्रधानभिन्नस्य परमात्मनो 'अदृ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्रष्टाऽश्रुतः श्रोता' इत्यादिधर्माणां वाक्यशेषेऽभिलापादभिधानादित्यर्थः ॥१६॥ नन्वेवं चेतनत्वाद्द्रष्टा, श्रोता प्रत्यक्त्वादात्मा, धर्माधर्मफलभोक्तृत्वादमृतः शारीरो जीवो योगी स्यादन्तर्यामीत्यत आह—

(५१) शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥२०॥

नेति पूर्वास्मादनुवर्तते । शारीरो नान्तर्यामी भवितुमर्हति । कुतः ? उभयेऽपि 'यो विज्ञाने तिष्ठन्' इति काण्वशाखिनः 'य आत्मनि तिष्ठन्' इति माध्यन्दिनशाखिनः अन्तर्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदाधारत्वेन नियम्यत्वेन चाधीयते=आमनन्ति । न चैकस्मिन् देहे द्वौ द्रष्टारौ कथमुपपद्येते इति वाच्यम्; अविद्याप्रत्युपस्थापितकार्यकरणौपाधिकभेदाभ्युपगमेन पारमार्थिकभेदव्यपदेशाभावात् । एको हि प्रत्यगात्मा, न द्वौ, तस्यैव घटाकाशो मठाकाश इत्यौपाधिकभेदवद् भेदव्यवहारः । तथा च 'यत्र हि द्वैतमिव भवति' 'यत्र त्वस्य सर्वमात्मैवाभूत्' इत्यादिश्रुतिषु भेदाभेदव्यवहारो दृश्यते । तस्मादधिदैवादिषु परमात्मैवान्तर्यामीति सिद्धम् ॥२०॥

[६—अदृश्यत्वाधिकरणम । सू० २१–२३]

पूर्वं यथा प्रधानविरोधिद्रष्टृत्वादिधर्मानुरोधेन न प्रधानेऽन्तर्यामित्वं, न तथात्र प्रधानविरोधिधर्माणां श्रवणम् । अतः प्रधानमेवादृश्यत्वादिगुणको भूतयोनिः स्यादिति प्रत्युदाहरणसंगत्येदमाह—

(५२) अदृश्यत्वादिगुणको धर्मोक्तेः ॥२१॥

अत्र पूर्वपक्षे प्रधानस्य शारीरस्य वा ध्यानं, सिद्धान्ते निर्विशेष ब्रह्मणोज्ञानमिति तयोः फलभेदः । 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मु० १।१।६) इति वाक्यं विचारविषयः । तत्रादृश्यत्वादिगुणको भूतयोनिः प्रधानं, शारीरः, परमात्मा वेति सन्देहे—अचेतनानां कार्याणामुपादानत्वेनाचेतनं प्रधानं भूतयोनिः, योनिशब्दस्य निमित्तवाचित्वेन शारीरो वा भूतयोनिः स्यादिति पूर्वःपक्षः । सिद्धान्तस्तु 'यत्तदद्रेश्यमि' त्यादौ श्रुता अदृश्यत्वादयो गुणा यस्य सोऽदृश्यत्वादिगुणको भूतयोनिः परमात्मैव स्यान्नान्यः । कुतः ? धर्मोक्तेः । 'यः सर्वज्ञः सर्वविदि' त्यादिश्रुतस्य सर्वज्ञत्वादेः परमात्मधर्मस्य सर्वभूतयोनाविहोच्यमानत्वात् । नहि प्रधानस्याचेतनस्य शारीरस्य वोपाधिपरि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च्छिन्नदृष्टेः सर्वज्ञत्वं सर्वविन्त्वं वा सम्भवति, येन तयोरन्यतरस्य भूतयोनिता स्यात्। 'न च यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वमि ॥' (मु० १।१।७) त्यत्राचेतनपृथिव्यादीनां दृष्टान्तत्वेनोपादानात्तथाविधेन दार्ष्टान्तिकेनाचेतनेन भूतयोनिना भवितव्यमिति वाच्यम्; दृष्टान्तदार्ष्टान्तिकयोरत्यन्तसाम्ये नियमाभावात्। अन्यथा दृष्टान्ते स्थूलपृथिव्यादीनामुपादानाद् दार्ष्टान्तिकेऽपि भूतयोनौ स्थूलता स्यात्। तस्माददृश्यत्वादिगुणको भूतयोनिः परमात्मैवेत्यर्थः॥

(५३) विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥२२॥

इतोऽपि परमेश्वर एव भूतयोनिर्नेतरौ। कुतः? विशेषणभेदव्यपदेशाभ्यां च। विशेषणं तावत् 'दिव्यो ह्यमूर्तः पुरुषः' (मु० २।१।२) इत्यादिना शारीराद्विलक्षणत्वेन प्रकृतं भूतयोनिं विशिनष्टि। तथा 'अक्षरात्परतःपर' इत्यादौ प्रधानादपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति। तस्माच्छारीराद्विलक्षणत्वेनाव्याकृतान्नामरूपबीजादक्षरात्परमात्मनो भेदेन च व्यपदेशात्परमात्मैव भूतयोनिर्नेतरौ प्रधानशारीराविति ॥२२॥

(५४) रूपोपन्यासाच्च ॥२३॥

इतोऽपि परमेश्वरस्यैव भूतयोनिता, नेतरयोः। कुतः? 'एतस्माज्जायते प्राणः' इत्यादिना प्राणादिपृथिव्यन्तसृष्टिमुक्त्वा 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' (मु० २।१।४) इत्यत्र भूतयोनौ सर्वविकारात्मकरूपस्योपन्यासात्परमात्मैव भूतयोनिरिति वृत्तिकारमतम्। भगवत्पादीयमते तु नायं भूतयोनेरूपोपन्यासः, इहाग्रेऽपि च विकारजातस्य जायमानत्वेनोपन्यासात्। अतः 'पुरुष एवेदं विश्वं कर्म' (मु० २।१।१०) इत्यादिना सर्वात्मकरूपोपन्यासादेव परमात्मा भूतयोनिरिति ॥२३॥

[७ वैश्वानराधिकरणम्। सू० २४—३२]

पूर्वत्र रूपोपन्यासप्रसङ्गात् अदृश्यत्वादिगुणको भूतयोनिर्विचारितः, तद्वत्प्रसंगसङ्गत्याऽत्र त्रैलोक्यदेही वैश्वानरो विचार्यते। यद्वा पूर्वमुपक्रमस्थानामदृश्यत्वादिसाधारणधर्माणां वाक्यशेषस्थसर्वज्ञत्वादिलिङ्गेन यथा ब्रह्मपरत्वमुक्तम् तथाऽत्राप्युपक्रमस्थसाधारणवैश्वानरशब्दस्य 'वाक्यशेषस्थहोमाधिकरणत्वलिङ्गेन जाठराग्निपरत्वं स्यादिति दृष्टान्तसङ्गत्येदमाह—

(५५) वैश्वानरः साधारणशब्दविशेषात् ॥२४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वपक्षे जाठरादेरुपासनं, सिद्धान्ते परमात्मन इति तयोः फलभेदः। वैश्वानरविद्यायां 'को न आत्मा किं ब्रह्मे'ति 'आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि' (छा० ५।११।१-६) इति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया च वैश्वानरं प्रत्येषां मूर्धादिभावमुपदिश्याम्नायते 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' (छा० ५।१८।२) इत्यादिवाक्यमत्र विचारविषयः। तत्र किं वैश्वानरो जाठराग्निः, भूताग्निः, आदित्यादिदेवता, शारीरः, परमात्मा वेति संशये; जाठरादिरिति पूर्वःपक्षः। सिद्धान्तस्तु वैश्वानरः परमात्मैव भवितुमर्हति। कुतः? साधारणशब्दविशेषात्। साधारणशब्दयोर्विशेषात्। जाठराग्निभूताग्न्यादित्यादिदेवतासु साधारणो वैश्वानरशब्दः, जीवपरमात्मनोः साधारणः आत्मशब्दः। एवं च तत्र तत्र साधारणयोरुभयोर्वैश्वानरात्मशब्दयोः सत्त्वेऽपि परमात्मपरत्वे विशेषो दृश्यते। 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा' इत्यादौ पूर्वोक्तद्युमूर्धत्वादिविशेषः सर्वात्मकपरमात्मपरत्वे एवावगम्येत। 'को न आत्मा किं ब्रह्म' (छा० ५।११।१) त्युपक्रमे आत्मब्रह्मशब्दाभ्यासमपि पूर्वोक्तानि लिङ्गानि परमेश्वरावगमकानि। अतः परमात्मैव वैश्वानरः इति ॥२४॥

(५६) स्मर्यमाणमनुमानं स्यादिति ॥२५॥

इतश्च परमात्मैव वैश्वानरः। यस्मात् 'यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः। सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः॥' इत्येतत्स्मर्यमाणं त्रैलोकात्मकं रूपं तन्मूलभूतां श्रुतिमनुमापयदस्य वैश्वानरशब्दस्य परमेश्वरपरत्वेऽनुमानमनुमापकं स्यादित्यर्थः। सूत्रस्थः इति शब्दो हेत्वर्थः। यस्मादिदं गमकं, तस्मादपि वैश्वानरः परमात्मैवेति भावः ॥२५॥

प्रकारान्तरेणाक्षिप्य सिद्धान्तं प्रतिपादयितुमाह—

(५७) शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न; तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते ॥२६॥

शब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे सम्भवति तस्य जाठरादौ रूढत्वात्। आदिना 'हृदयं गार्हपत्यः' (छा० ५।१८।२) इत्याद्यग्नित्रेताप्रकल्पनम्, 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम् (छा० ५।१०।१) इत्यादिना प्राणाहुत्यधिकरणतासंकीर्त्तनं च गृह्यते। एतेभ्यो हेतुभ्यो जाठरो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वैश्वानरः प्रत्येतव्यः। तथान्तःप्रतिष्ठानात् 'पुरुषेऽन्तःप्रतिष्ठितं वेद' इत्यत्र वैश्वानरस्यान्तःप्रतिष्ठानश्रवणात् जाठर एव वैश्वानरः सम्भवति, न परमेश्वर इति चेन्न; कुतः ? तथादृष्ट्युपदेशात्। 'मनोब्रह्मेत्युपासीत' (छा० ३ १८।१) 'मनोमयः प्राणशरीरो भारूपः (छा० ३।१४।२) इत्यादिवत् तथा जाठररूपेण परमेश्वरस्य दृष्टेरुपास्तेरुपदेशात्। न च जाठरे एव वैश्वानरशब्दो मुख्यः स्यादिति वाच्यम्; असम्भवात्। 'मूर्धैव सुतेजा' इत्यादेर्विशेषस्य जाठरेऽसम्भवात्। किं च पुरुषेमपि चैनं वैश्वानरमधीयते वाजसनेयिनः 'स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषं पुरुषेऽन्तःप्रतिष्ठितं वेद" (श० ब्रा० १०।६।१।११) इति। अतः परमेश्वरस्य सर्वात्मत्वात्पुरुषत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं चोभयोपपत्तेर्वैश्वानरः परमात्मैवेति सिद्धम् ॥२६॥

ननु द्युमूर्धत्वादिविशेषस्य जाठराविषयत्वेऽपि देवतादिविषयत्वं स्यादित्यत आह—

(५८) अत एव न देवता भूतं च ॥२७॥

अत एवोक्तेभ्यो हेतुभ्यो न देवता वैश्वानरः, तथा भूताग्निरपि न वैश्वानरः। नहि भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्य द्युमूर्धत्वादिकल्पनोपपद्यते, विकारस्य विकारान्तरात्मत्वासम्भवात्। न चैश्वर्ययोगाद्देवतायां तथात्वं स्यादिति वाच्यम्; तस्या अकारणत्वात्परमेश्वराधीनैश्वर्यवत्त्वाच्च। अतो वैश्वानरः सर्वात्मकः परमात्मैवेत्यर्थः ॥२७॥

पूर्वं जाठराग्निप्रतीको जाठराग्न्युपाधिको वा परमात्मोपास्य इत्युक्तमन्तःप्रतिष्ठितत्वाद्यनुरोधेन। इदानीं तु विनैव प्रतीकोपाधिकल्पनाभ्यां साक्षादपि परमात्मोपासनापरिग्रहे विरोधाभावं जैमिनिराचार्यो मन्यते इत्याह—

(५९) साक्षादप्यविरोधं जैमिनिः ॥२८॥

पूर्वापरपर्यालोचनेन वैश्वानरस्य परमात्मपरिग्रहे सुनिश्चिते तद्विषये वैश्वानरशब्दो विश्वश्चासौ नरश्चेति, विश्वेषां वायं नरः, विश्वे वा नरा अस्येति विश्वानरः परमात्मा, सर्वात्मत्वात्। स एव वैश्वानरः स्वार्थे राक्षसवायसादिवत् तद्धितः, पूर्वपदस्य 'नरे सञ्ज्ञायामित्यनेन' दीर्घत्वमिति योगेन ब्रह्मपरतया नेयः। एवमग्रणीत्वादियोगेनाग्निशब्दः, सर्वात्मत्वात् गार्हपत्यादिकल्पनं प्राणाहुत्यधिकरणत्वं च परमेश्वरेऽप्युपपद्यते इति तात्पर्यार्थः ॥२८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ परमात्मपरिग्रहे प्रादेशमात्रश्रुतिं व्याख्यातुमारभते—

(६०) अभिव्यक्तेरित्याश्मरथ्यः ॥२६॥

सर्वगतस्यापिपरमात्मनः प्रादेशमात्रत्वमुपपद्यते। कुतः? अभिव्यक्तेः। अभिव्यज्यते खलु प्रादेशमात्रपरिमाणो हृदयादिषूपलब्धिस्थानेषु परमात्मोपासकानामनुग्रहायेत्याश्मरथ्य आचार्यो मन्यते इत्यर्थः ॥२६॥

अनुस्मृतिनिमित्ता परमात्मनि प्रादेशमात्रश्रुतिरिति मतान्तरमाह—

(६१) अनुस्मृतेर्बादरिः ॥३०॥

प्रादेशमात्रहृदयप्रतिष्ठितेन मनसाऽनुस्मृतेर्ध्यानादप्रादेशमात्रोऽपि प्रादेशमात्र इत्युपचर्यते इति बादरिराचार्यो मन्यते। यथा प्रस्थमिता यवाः प्रस्था इति तद्वत् प्रादेशमात्रत्वश्रुतितात्पर्यसिद्धयर्थमिति ॥३०॥

सम्पत्तिनिमित्ता प्रादेशमात्रश्रुतिरिति जैमिनिमतमाह—

(६२) सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥३१॥

मूर्धादिचुबुकान्तेषु देहावयवेषु प्रादेशमात्रेषु वैश्वानरस्योपास्यत्वप्रतिपादनात् परमेश्वरस्य प्रादेशमात्रत्वसम्पत्तेः प्रादेशमात्रश्रुतिरुपपद्यते इति जैमिनिराचार्यो मन्यते। तत्र श्रुत्यन्तरं दर्शयति—"प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसम्पन्नाः" इत्यादिवाजसनेयिब्राह्मणं समानप्रकरणं द्युप्रभृतीन् पृथिव्यन्तानवयवान् मूर्धादिचुबुकान्तेषु त्रैलोक्यात्मनो वैश्वानरस्य सम्पादयत्परमेश्वरस्य प्रादेशमात्रत्वसम्पत्तिं दर्शयतीति भावः ॥३१॥

(६३) आमनन्ति चैनमस्मिन् ॥३२॥

अस्मिन्प्रादेशमात्रपरिमाणे मूर्धचुबुकान्तराले चैनं परमेश्वरमामनन्ति जाबालाः—'य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः ...। वरणायां नास्यां च मध्ये प्रतिष्ठितः' (जा० १) इत्यादि। तस्मात्परमेश्वरे प्रादेशमात्रश्रुतिरुपपन्ना। अतः सर्वात्मकः परमात्मैव वैश्वानर इति सिद्धम् ॥३२॥

इति ब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ प्रथमाध्याय द्वितीयः पादः ॥२॥

प्रथमाध्याये तृतीयपादः

[अत्रास्पष्टब्रह्मलिङ्गानां प्रायो ज्ञेयब्रह्मविषयाणां विचारः]

इत्थमस्पष्टब्रह्मलिङ्गयुक्तवेदान्तवाक्यानामुपास्यब्रह्मविषयाणां प्राय-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श उपास्यत्वेन ब्रह्मणि समन्वयः प्रतिपादितः। सम्प्रति तादृशानां वाक्यानां प्रायशो ज्ञेयत्वेन ब्रह्मणि समन्वयं प्रतिपादयितुं पादोऽयमारभ्यते।

[१ द्युभ्वाद्यधिकरणम् । १—७]

पूर्वं त्रैलोक्यात्मा वैश्वानरः परमात्मैवेत्युक्तम्, तर्हि त्रैलोक्याय-तनमन्यत्स्यादित्याक्षिप्य समाधानात्पूर्वेणास्याक्षेपसंगत्या, यथोपक्रमस्थस्य वैश्वानरसाधारणशब्दस्य वाक्यशेषस्थद्युमूर्धत्वादिलिङ्गेन ब्रह्मपरत्वमुक्तम्, तथाऽत्रापि उपक्रमस्थस्य साधारणायतनत्वस्य "अमृतस्यैव सेतुः" इति वाक्यशेषस्थसेतुत्वलिङ्गेन परिच्छिन्नप्रधानादिपरत्वं स्यादिति दृष्टान्तसंगत्या वाऽधिकरणमिदमारभ्यते—

(६४) द्युभ्वाद्यायतनं स्वशब्दात् ॥१॥

अत्र पूर्वपक्षे प्रधानाद्युपासनं, सिद्धान्ते ब्रह्मप्रमेति तयोः फलभेदः। "यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुरि" (मु० २।२।५) त्यादिवाक्यमत्र विचारविषयः। तत्र यदेतद्द्युप्रभृतीनामोतत्वेन किञ्चिदायतनमवगम्यते, तत्किं प्रधानं, जीवः, परं ब्रह्म वेति संशये; स्मृतिप्रसिद्धं प्रधानं परिगृहीतव्यं, तस्य कारणत्वादायतनत्वोपपत्तेः। जीवो वा ग्राह्यः, तस्यापि भोक्तृत्वाद् भोग्यं प्रपञ्चं प्रत्यायतयत्वोपपत्तेरितिपूर्वः पक्षः। सिद्धान्तस्तु द्युभ्वाद्यायतनं, द्यौश्च भूश्च द्युभुवौ, द्युभुवावादी यस्य जगतस्तद्द्युभ्वादि, तस्यायतनं परं ब्रह्मैव भवितुमर्हति। कुतः ? स्वशब्दात्—स्वस्यपरब्रह्मणो वाचकादात्मशब्दादित्यर्थः। "तमेवैकं जानथ आत्मानमि"त्यत्रात्मशब्दः परमात्मविषयत्वे संघटते, नान्यत्र। न चोपाधिविशिष्टेऽपि जीवात्मनि आत्मशब्दः प्रसिद्ध इति वाच्यम्; तमेवैकं जानथ आत्मानमित्यत्र सावधारणात्मशब्दस्य परिग्रहेण कार्यविशिष्टचैतन्यस्याविज्ञेयतया निरूपाधिकस्य परब्रह्मणो विज्ञेयत्वाभ्युपगमात्। यस्मिन्नास्ते देवदत्तस्तदानयेत्युक्तौ आसनमेवानयति न देवदत्तं, तथैवायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते। अतः उपक्रमस्थसाधारणायतनत्वस्य गौणसेतुत्वलिङ्गात्प्रथमात्मश्रुत्या च परब्रह्मपरत्वमेव, न प्रधानादिपरत्वमिति भावः ॥१॥

(६५) मुक्तोपसृप्य-व्यपदेशात् ॥२॥

इतश्च परमेव ब्रह्म द्युभ्वाद्यायतनम। कुतः ? मुक्तैरुपसृप्यताव्यपदिश्यमानत्वात्। तत्र मुक्तैरुपसृप्यताऽर्थो भावप्रधानतया लभ्यते। तथा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च देहादिष्वनात्मस्वहमित्यात्मबुद्ध्याऽविद्यया तत्पूजनपरिभवादौ रागद्वेषादिदर्शनेन तद्विपरीताऽविद्यारागद्वेषादिदोषमुक्तैरुपसृप्यतां प्रक्रान्ते द्युभ्वाद्यायतने 'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' (मु० ३।२।८) तिश्रुतिर्व्यपदिशति। प्रधानादिषु क्वापि मुक्तोपसृप्यत्वं नास्ति प्रसिद्धम्। अतो द्युभ्वाद्यायतनं परं ब्रह्मैवेत्यर्थः ॥२॥

(६६) नानुमानमतच्छब्दात् ॥३॥

अनुमीयते इत्यनुमानं सांख्यपरिकल्पितं प्रधानमिह न द्युभ्वाद्यायतनत्वेन प्रतिपत्तव्यम्। कुतः ? अतच्छब्दात् = तस्याचेतनस्य प्रधानस्य प्रतिपादकः शब्दस्तच्छब्दः, न तच्छब्दोऽतच्छब्दः, तस्मात्। अतोऽचेतनप्रधानप्रतिपादकशब्दस्येह श्रवणाभावात् तद्विपरीतस्य चेतनस्य प्रतिपादकशब्दस्यात्र श्रवणाच्च न प्रधानं द्युभ्वाद्यायतनमिति भावः॥३॥

(६७) प्राणभृच्च ॥४॥

चकारेण द्युभ्वाद्यायतनम्, अतच्छब्दाच्चेत्यनुवर्तेते। योगविभाग उत्तरार्थः। प्राणभृतो विज्ञानात्मनः सत्यपि आत्मत्वे चेतनत्वे चोपाधिपरिच्छिन्नतया सर्वज्ञत्वाद्यसम्भवान्न तत्रापि द्युभ्वाद्यायतनत्वम्। तस्मात्तत्साधारण आत्मशब्दोऽतच्छब्द एवेत्यर्थः ॥४॥

अथ शारीरे द्युभ्वाद्यायतनत्वनिरासे त्रिभिः सूत्रैः हेत्वन्तरमाह—

(६८) भेदव्यपदेशात् ॥५॥

द्युभ्वाद्यायतनं, प्राणभृच्चोभयमुत्तरेषु त्रिषु सूत्रेषु अनुवर्तते। 'तमेवैकं जानथ आत्मानमि'त्यत्र मुमुक्षोः प्राणभृतो ज्ञातृत्वेनात्मपदवाच्यस्य ब्रह्मणो ज्ञेयत्वेन च भेदव्यपदेशान्न द्युभ्वाद्यायतनं शारीर इत्यर्थः॥५॥

(६९) प्रकरणात् ॥६॥

'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती' (मु. १।१।३) त्येकविज्ञानेन सर्वविज्ञानात् ब्रह्मप्रकरणादपि न द्युभ्वाद्यायतनं शारीरः॥६॥

(७०) स्थित्यदनाभ्यां च ॥७॥

'द्वा सुपर्णा' (मु० ३।१।१) इतिमन्त्रे 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति कर्मफलाशनम्', अनश्नन्नन्योऽभिचाकशीति' इत्यौदासीन्यं च निर्दिश्येते। ताभ्यां स्थित्यदनाभ्यां न शारीरो द्युभ्वाद्यायतनं, किन्तु परं ब्रह्मै वेतिसिद्धम् ॥७॥

[२ भूमाधिकरणम्। सू० ८–९]

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वं यदुक्तमात्मशब्दाद् द्युभ्वाद्यायतनं परं ब्रह्मेति । तदसंगतम्; 'तरति शोकमात्मवित्' (छा० ७।१।३) इत्यत्र प्रकरणे प्रश्नप्रतिवचनपरम्परायाः प्राणात्परम् अदर्शनेन प्राणेऽपि आत्मशब्दप्रयोगसम्भवादित्याक्षेपसंगत्येदमाह—

(७१) भूमा सम्प्रसादादध्युपदेशात् ॥८॥

अत्र पूर्वपक्षे प्राणोपासनं, सिद्धान्ते तु ब्रह्मज्ञानमिति फलभेदः 'भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छा० ७।२३,२४) इत्यादिवाक्यमत्र विचारविषयः। तत्र किं प्राणो भूमा स्यात् परमात्मा वेति संशये; प्राणो भूमा । कुतः ? नामादिभ्य आशान्तेभ्यः 'अस्ति भगवो नाम्नो भूयः' इति 'वाग्वाव नाम्नो भूयसी', प्राणो वा आशाया भूयान्' इत्यादिना भूयांसं सप्रपञ्चमुक्त्वा भूयः प्रश्नोत्तरपरम्पराऽदर्शनात्, प्राणदर्शिनश्चातिवादित्वकथनादिति पूर्वःपक्षः। सिद्धान्तस्तु भूमा परमात्मैवात्र भवितुमर्हति । कुतः ? सम्प्रसादादध्युपदेशात् सम्यक्प्रसीदत्यस्मिन् जीव इति सम्प्रसादः सुषुप्तिः, तस्यां सम्प्रसादावस्थायां प्राणो जागर्तीति सम्प्रसादशब्देन प्राणोऽभिधीयते; तस्मात् प्राणादधि=ऊर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः' न च प्राणोपदेशात्परं प्रश्नप्रतिवचनाऽदर्शनेन प्राणस्यैव भूमत्वमभ्युपेयमिति वाच्यम् प्राणान्तमुपदेशं श्रुत्वा तूष्णीभूतं नारदं प्रति स्वयमेव सनत्कुमारेण प्राणभिन्नस्य भूम्न उपदिश्यमानत्वात् । नापि प्राणविषयकमेवातिवादित्वमिति वाच्यम्; 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा० ७।१६) इत्यत्र 'तु' शब्देन प्राणस्यातिवादित्वं व्यावर्त्य सत्यपदवाच्यपरमात्मवादस्यातिवादित्वकथनेन प्राणभिन्नस्यैवभूमत्वोपदेशात् । एवं च 'तरति शोकमात्मवित्' इति प्रश्नवाक्ये आत्मज्ञाने शोकपदवाच्याविद्यातत्कार्यसंसारसन्तरणसाधनत्वकथनेन वैपुल्यात्मिका भूमरूपता परमात्मन्येव सूपपद्यते इति ॥८॥

(७२) धर्मोपपत्तेश्च ॥९॥

भूमेत्यनुवर्तते । भूमा परमात्मैव । कुतः ? 'यत्र नान्यत्पश्यति' इत्यादिनोक्तानां दर्शनादिसर्वव्यवहाराभावानां 'यो वै भूमा तत्सुखम्' 'यो वै भूमा तदमृतमि' त्यादिनोक्तानां सुखरूपत्वामृतत्वादीनां धर्माणां च परमात्मन्येवोपपत्तेरिति ॥९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[३ अक्षराधिकरणम् । सू० १०-१२]

पूर्वं यथा सत्यशब्दस्य ब्रह्मणि रूढत्वात् भूमा ब्रह्मेति, तथाऽत्राप्यक्षरशब्दस्य वर्णे रूढत्वाद् वर्ण एवाक्षरं स्यादिति दृष्टान्तसंगत्येदमाह—

(७३) अक्षरमम्बरान्तधृतेः ॥१०॥

अत्र पूर्वपक्षे ओङ्काररूपाक्षरोपासनं, सिद्धान्ते ब्रह्मज्ञानमिति फलभेदः। 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति। स होवाचैतद्वै तदक्षरं गार्गि ? ब्राह्मणा अभिवदन्त्यस्थूलमि' (बृ० ३।८।७-८) त्यादिवाक्यमत्र विचारविषयः। तत्र किमक्षरशब्देन वर्ण उच्यते, परमात्मा वेति संशये; 'अक्षरसमाम्नाय' इत्यादावक्षरशब्दस्य वर्णे रूढत्वात् 'ॐकार एवेदं सर्वमि' (छा० २।२३।३) त्यादिश्रुत्यन्तरे वर्णस्योपास्यत्वेन सर्वात्मत्वावधारणाच्चाक्षरशब्दो वर्ण एवेति पूर्वः पक्षः। सिद्धान्तस्तु न क्षरत्यश्नुते चेति नित्यत्वव्यापित्वाभ्यामक्षरं परमेव ब्रह्म। कुतः ? अम्बरान्तधृतेः। 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे' (बृ० ३।८।११) तिश्रुतौ पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणात्। न च ब्रह्मणोऽन्यत्र तत्सम्भवति। 'ॐकार एवेदं सर्वमि' त्यादौ ब्रह्मप्रतिपत्तिसाधनत्वेन स्तावकत्वमिति ॥१०॥

ननु कार्यस्य कारणाधीनतयाऽम्बरान्तधृतिः प्रधानेऽप्युपपद्यते इत्यत आह—

(७४) सा च प्रशासनात् ॥११॥

सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्म। कुतः ? प्रशासनात्। 'एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ० ३।८।९) इत्यादिना पारमेश्वरकर्मप्रशासनस्य श्रवणात्। नह्यचेतने प्रधाने जगद्विषयकं प्रशासनं सम्भवति, मृदादिषु घटादिविषयकप्रशासनाऽदर्शनादिति भावः ॥११॥

(७५) अन्यभावव्यावृत्तेश्च ॥१२॥

अन्यस्य प्रधानादेः भावो धर्मस्तस्य व्यावृत्तेश्च 'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ' (बृ० ३।८।११) इत्यत्रोक्ताददृष्टत्वादेर्धर्मस्य प्रधानेव्यपदेशसम्भवेऽपि द्रष्टृत्वादिधर्मस्याचेतनप्रधानेऽसम्भवादित्यर्थः। तस्मात्परमेव ब्रह्माक्षरमिति सिद्धम् ॥१२॥

[४ ईक्षतिकर्मव्यपदेशाधिकरणम् । सू० १३]

पूर्वं वर्णे रूढस्याक्षरशब्दस्याम्बरान्तजगद्धृतिरूपलिङ्गेन न क्षर-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्यश्नुते वेति योगवृत्त्या ब्रह्मपरत्वं निर्णीतम्, तद्वदत्रापि देशपरि-च्छिन्नफलश्रुतिलिङ्गेन परशब्दस्यापेक्षिकपरत्वविशिष्टहिरण्यगर्भपरत्व-नेयमिति दृष्टान्तसंगत्येदमाह—

(७६) ईक्षतिकर्मव्यपदेशात्सः ॥१३॥

अत्र पूर्वपक्षे कार्यब्रह्मोपासनं, सिद्धान्ते परब्रह्मोपासनमिति फल-भेदः। 'यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र० ५।५) इति वाक्यमत्र विचारविषयः। किमत्र परं ब्रह्माभिधेयमुत अपरं ब्रह्मेति विशये; अपरं ब्रह्मेति। कुतः ? 'स सामभिरुन्नीयते ब्रह्म-लोकमि' (प्र० ५।५) त्यत्र देशपरिच्छिन्नस्य फलस्योच्यमानत्वादिति पूर्व-पक्षः। सिद्धान्ते सः ध्यातव्यत्वेनोपदिश्यमानः परमेव ब्रह्म। कुतः ईक्षतिकर्मव्यपदेशात्। 'स एतस्माज्जीवघनात्परात् परं पुरिशयं पुरुष-मीक्षते' (प्र० ५।५) इति वाक्यशेषे ईक्षतिकर्मत्वेनास्याभिध्येयस्य पुरुषस्य व्यपदेशात्। तत्र ध्यानस्य कर्मातथाभूतमपि वस्तु भवति ईक्षतेस्तु कर्म तथा भूतमेव वस्तु। अतः परमेव ब्रह्म सम्यग्दर्शनविषय-भूतमीक्षतिकर्मत्वेन व्यपदिष्टमिति गम्यते। तच्चेह परपुरुषशब्दाभ्या-मभिध्यातव्यं प्रत्यभिज्ञायते। न च देशपरिच्छिन्नफलश्रुत्या कथम् परं ब्रह्माभिध्येयं युज्येतेति? त्रिमात्रोङ्कारालम्बनेन परं ब्रह्माभिध्यायतो ब्रह्मलोकप्राप्त्यनन्तरं सम्यग्दर्शनोत्पत्त्युपपत्तेः। अतः क्रममुक्त्यभि-प्रायमेतदविरुद्धमिति ॥१३॥

[५ दहराधिकरणम्। सू० १४–२१]

यथा पूर्वं परपुरुषशब्दस्य रूढ्या ब्रह्मपरत्वेन ब्रह्मैवोपास्यमभिहि-तद्वदिहाप्याकाशशब्दस्य भूताकाशे रूढत्वात्तस्यैवोपास्यत्वं कथं नाभ्यु-यते इति आक्षेपसंगत्येदमाह—

(७७) दहर उत्तरेभ्यः ॥१४॥

अत्र पूर्वपक्षे भूताकाशाद्युपासनं, सिद्धान्ते ब्रह्मोपासनमिति फल-भेदः। 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मि-न्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यमि' (छा० ८।१।१) तिवाक्यम-विचारविषयः। तत्र दहरपुण्डरीके श्रूयमाणो दहराकाशः किं भूता-काशो. जीवः, परमात्मा वेति संशये; भूताकाशे रूढत्वाद् भूताक-एव दहरशब्दः। जीवो वा मन उपाधिकश्च। तस्य हृदयेऽन्तरवस्थाने दहरत्वं ब्रह्माभेदविवक्षया चाकाशोपमितत्वमिति पूर्वः पक्षः। सिद्धा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्तस्तु दहराकाशः परमात्मैव। कुतः? उत्तरेभ्यो वाक्यशेषगतेभ्यो हेतुभ्यः। तथाहि 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदये आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते' 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोक' (छा० ८।१।३-४) इत्यादावाकाशोपमानत्वद्यावापृथिव्यधिष्ठानत्वात्मत्वापहतपाप्मत्वादिब्रह्मधर्माणां व्यपदेशान्न भूताकाशो न वा जीवोऽत्र दहरपदवाच्यः। न च रूढ्या भूताकाशः? एकस्मिन्नुपमानोपमेयत्वानुपपत्तेः। न च बाह्याभ्यन्तरत्वकल्पितभेदेनोपमानोपमेयभाव इति वाच्यम्; अगत्या काल्पनिकभेदाश्रयणात्। नन्वेवं तर्हि जीवे आत्मशब्दप्रयोगसम्भवेन ब्रह्माभेदविवक्षया सर्वगतत्वादिसम्भवेन च दहरशब्दो जीवपर इति चेन्न; पूर्वोक्तहेतुभ्यो ब्रह्मणि तत्रोक्तसर्वधर्मोपपत्तेः कथञ्चिज्जीवपरत्वस्वीकारानुपपत्तेरिति परमात्मैव दहराकाशः इति सिद्धम् ॥१४॥

उत्तरेभ्यो हेतुभ्यो दहराकाशस्य निर्णीते ब्रह्मपरत्वे हेत्वन्तरमाह—

(७८) गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥१५॥

इतश्च दहराकाशः परमात्मैव। कुतः? गतिशब्दाभ्याम्। 'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' (छा० ८।३।२) इत्यत्र दहरवाक्यशेषे प्रकृतं दहरं ब्रह्मशब्देनोक्त्वा तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानां प्रत्यहमुच्यमाना दहरस्य ब्रह्मतां गमयति। तस्मादुक्ता गतिर्ब्रह्मशब्दश्चेत्याभ्यां दहरस्य ब्रह्मत्वमिति। तथा हि 'सता सोम्य तदा सम्पन्नो भवती' (छा० ६।८।१) तिश्रुत्यन्तरेऽपि प्रत्यहं ब्रह्मविषयं गमनं दृष्टम्। एवं चैतदेव दृष्टं ब्रह्मैव लोकः ब्रह्मलोक इति सामानाधिकरण्यपरिग्रहे दहराकाशस्य ब्रह्मत्वे लिङ्गम्। नहि प्रत्यहं सुषुप्तावस्थायां जीवानां हिरण्यगर्भलोकगमनं सम्भवति। निषादस्थपतिन्यायाच्च षष्ठीसमासाद्वरं कर्मधारयसमासः इति ॥१५॥

(७९) धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥१६॥

'अथ य आत्मे'ति प्रकृतं दहराकाशं निर्दिश्य 'स सेतुर्विधृतिरेषां लोकानामसम्भेदाय' (छा० ८।४।१) इत्यत्र श्रुताया धृतेरपि हेतोर्ब्रह्मैव दहराकाशः। अस्य सर्ववर्णाश्रमविधारणलक्षणमहिम्नोऽस्मिन् परमात्मनि 'एष परमेश्वर एष भूताधिपतिरेष भूतपाल एषसेतुर्विधरण एषां लोकानामसम्भेदाय' इत्यादिश्रुत्यन्तरेऽप्युपलब्धेरित्यर्थः ॥१६॥

(८०) प्रसिद्धेश्च ॥१७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकरूढ्यपेक्षया 'आकाशो वै नाम नामरूपयोर्निर्वहिता' (छा० ८।१। 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' (छा० १।९। इत्यादौ श्रौतरूढेर्बलीयस्त्वेन दहराकाशस्यापि परमात्मन्येव प्रसिद्धे परमात्मैव दहराकाशो, न भूताकाश इति सिद्धम् ॥१७॥ एवं दहराका शस्य भूताकाशपरत्वं निरस्येदानीं तस्य प्रत्यगात्मत्वमाशङ्क्याह-

(८१) इतरपरामर्शात्स इति चेन्नासम्भवात् ॥१८॥

यथा वाक्यशेषबलेन दहरः परमात्मेत्युक्तम्, तद्वद्वाक्यशेषेण 'अ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाये' (छा० ८।३।४) इत्यादि सम्प्रसादशब्देनेतरस्य जीवस्यापि परामर्शात् स जीवो दहराका शक्यतेऽभ्युगन्तुमिति चेन्न; असम्भवात्। जीवे आकाशोपमेयत्वा हतपाप्मत्वादीनां परमात्मधर्माणामसम्भवादिति भावः ॥१८॥

अथोक्तस्यासम्भवस्य हेतोरसिद्धिरित्याशंक्य परिहरति—

(८२) उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥१९॥

उत्तरात् 'य आत्माऽपहतपाप्मा' इति प्रतिज्ञाय 'य एषोऽक्षि पुरुषो दृश्यते एष आत्मा' (छा० ८।७।४) इतिप्रजापतिवाक्याद् जा दाद्यवस्थापन्ने जीवेऽपहतपाप्मत्वादिगुणसम्भवाज्जीव एव दहराका पदवाच्य इति चेत् ? अत्रोच्यते, आविर्भूतस्वरूपस्तु। तुशब्दोऽत्र जी शंकाव्यावृत्त्यर्थः। यतो हि तत्राप्याविर्भूतं पारमार्थिकं परमात्मलक्ष स्वरूपमस्येत्याविभूतस्वरूपो जीवो विवक्षितः, न तु जीवत्वेन रूपे जीवो विवक्षितः; 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते (छा ८।१२।२) इत्युपसंहारदर्शनात्। अतोविवेकविज्ञानाभावादनाविर्भूतस्व रूपतया विवेकविज्ञानादाविर्भूतस्वरूपस्य जीवस्य ब्रह्मत्वेनापहतपाप त्वादिसम्भवेऽपि जीवत्वेन तदसम्भवान्न पूर्वसूत्रस्थहेतुरसिद्ध इति ॥१

अथ 'य एष सम्प्रसादः' (छा० ८।३।४) इत्यादिदहरवाक्ये जीवपरामर्शस्य वैयर्थ्यं स्यादित्यत आह—

(८३) अन्यार्थश्च परामर्शः ॥२०॥

जीवपरामर्शः 'स्वेन रूपेणाभिनिष्पद्यते' इत्यादावुपसंपत्तव्यः प मात्मैवापहतपाप्मत्वादिगुणक उपास्य इत्येवमर्थोऽयं परमात्मवादिनो प्युपपद्यते। अतो नजीवप्रतिपादनपरः पूर्वोक्तपरामर्श इति भावः ॥२

(८४) अल्पश्रुतेरिति चेत्तदुक्तम् ॥२१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु 'दहरोऽस्मिन्नन्तराकाशः' इत्यत्राकाशस्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते, जीवस्यत्वाराग्रोपमितस्याल्पत्वं सम्भवति। अतोऽल्पश्रुतेर्दहराकाशोजीवो, न परमेश्वर इति चेत्? तत्र 'अर्भकौकस्त्वात्तद्व्यपदेशाच्चे'ति सूत्रे समाधानमुक्तम्। अतो दहराकाशः परमात्मैवोपास्य इति सिद्धम् ॥२१॥

[६ अनुकृत्यधिकरणम्। सू० २२–२३]

पूर्वं 'परं ज्योतिरुपसम्पद्य' इतिवाक्यशेषेण दहराकाशस्य ब्रह्मत्वं निर्धारितम्। ज्योतिःप्रसंगादिदानीं 'न तत्र सूर्यो भाति' इत्यादिवाक्यं विचार्यते इति प्रसंगसंगत्येदमाह—

(८५) अनुकृतेस्तस्य च ॥२२॥

अत्र पूर्वपक्षेऽलौकिकतेजस उपासनं; सिद्धान्ते निर्विशेषब्रह्मणोज्ञानमिति फलभेदः। 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निरि' (मु० २।२।१०) त्यादिवाक्यमत्र विचारविषयः। तत्र सूर्यादिनिखिलजगद्भासकत्वेन प्रतीयमानं तेजः कश्चिद्धातुविशेषः, परमात्मा वेति संशये; प्रबलेन तेजसा दुर्बलस्याभिभवदर्शनात्तेजोधातुविशेष एव कश्चिदिति पूर्वः पक्षः। सिद्धान्तस्तु तत्र सूर्यादिजगद्भासकत्वेनावगम्यमानं ब्रह्मैव। कुतः? अनुकृतेः 'तमेव भान्तमनुभाति सर्वम्' (मु० २।२।१०) इत्यत्रानुकरणादनुभानादित्यर्थः। तथाहि 'भारूपः सत्यसंकल्पः' (छा० ३।१४।२) इतिश्रुत्यन्तरेऽपि प्राज्ञात्मनो भारूपत्वमभिहितम्। तमेव प्राज्ञमात्मानं सूर्यादयोऽनुभान्ति, न तेजो धातुं कञ्चिदिति प्रसिद्धम्। नहि प्रदीपः प्रदीपान्तरमनुभातीति दृष्टचरम्। अस्तु तर्हि सूर्यादीनां स्वतोभानमिति? तां मतिं व्यावर्तयति 'तस्य चे'त्यादिना। 'तस्य भासा सर्वमिदं विभाति' इति चतुर्थपादेन ब्रह्मभासा तेषां भास्यत्वावगमात्। तेजोऽन्तरेण धातुविशेषेण सूर्यादीनां विभानमसम्भवम्, प्रकृष्टतेजसाऽपकृष्टतेजसां प्रतिघातदर्शनात्। किं चोक्तमन्त्रोक्ततत्रेतिपदेन द्युभ्वाद्यायतनत्वेन निर्णीतं प्रकृतं ब्रह्मैव परामृश्यते, तस्यैव सत्तया स्फूर्त्या च 'सर्वमिदं' नामरूपक्रियाकारकफलजातमभिव्यज्यते। अतः स्वयं ज्योतिः सूर्यादिनिखिलजगदवभासकं ब्रह्मैव, न तु लौकिकं तेजः इति सिद्धम् ॥२२॥

(८६) अपि च स्मर्यते ॥२३॥

अपि च 'न तद्भासयते सूर्यो न शशाङ्को न पावकः' (गी० १५।६)इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदादित्यगतं तेजो जगद्भासयतेऽखिलमि' (गी० १५।१२) ति चात्र प्राज्ञस्यैवात्मनः सूर्यादिभिरनवभास्यत्वे सति तद्भासकत्वं स्मर्यते इत्यर्थः॥२

[७ प्रमिताधिकरणम् । सू० २४–२५]

पूर्वं सूर्याद्यनुभानादिना लिङ्गेन 'तत्रे'ति विषयसप्तमीं मत्वा न भातीत्यादौ यथा णिजध्याहारेण न तद्भासयतीत्यर्थो निर्णीतः । तथेहापि 'अङ्गुष्ठमात्रः' इति परिमाणलिङ्गेन जीवमादाय तत्रेशानोऽस्मीति भावयेदिति विध्यध्याहारेणोपासनापरत्वमङ्गुष्ठवाक्यस्याभ्युपेयमिति दृष्टान्तसंगत्येदमाह—

(८७) शब्दादेव प्रमितः ॥२४॥

अत्र पूर्वपक्षे जीवोपासनं फलं, सिद्धान्ते परमात्मधीः फलमिति तयोर्भेदः । 'अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति' 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः ॥' (क० २।४।१२।१३) इत्यादिवाक्यमत्र विचारविषयः । तत्राङ्गुष्ठमात्रः पुरुषो जीवः, परमात्मा वेति सन्देहे; सोपाधिकत्वाज्जीव इति पूर्वपक्षः । सिद्धान्तस्तु-प्रमितोऽङ्गुष्ठमात्रप्रमितोऽयं पुरुषः परमात्मैव भवितुमर्हति । कुतः ? शब्दात् । 'ईशानो भूतभव्यस्ये' त्यादौ निरङ्कुशैश्वर्यश्रवणात् । न चाङ्गुष्ठमात्रत्वं जीवलिङ्गमस्तीति वाच्यं; लिङ्गश्रुत्योः श्रुतेरेव बलीयस्त्वात् । एवं च अङ्गुष्ठमात्रजीवमनूद्य ब्रह्माभेदबोधनाय परमात्मनोऽप्यङ्गुष्ठमात्रत्वमुपपद्यते । किं च 'अन्यत्र धर्मादन्यत्राऽधर्मादन्यत्राऽस्मात्कृताकृतात्' (क० १।२।१४) इति प्रकृतस्यैव पृष्टस्य ब्रह्मण 'एतद्वै तत्' इत्यत्रानुसन्धानादपि परमात्मैव प्रमित इति ॥२४॥

(८८) हृद्यपेक्षया तु मनुष्याधिकारात् ॥२५॥

ननु जीवस्य परमार्थतः सर्वगतब्रह्मस्वरूपत्वेन कथमङ्गुष्ठमात्रत्वमिति शङ्काव्यावृत्त्यर्थं सौत्रस्तुशब्दः । सर्वगतस्यापि परमात्मनो हृदयेऽवस्थानमपेक्ष्याकाशस्य वंशपर्वापेक्षमरत्निमात्रत्वमिवाङ्गुष्ठमात्रत्वमुपपद्यते । मनुष्याधिकारात् । शास्त्रेषु मनुष्याणामधिकारात्तद्धृदयस्याङ्गुष्ठमात्रत्वात्तदपेक्षयाङ्गुष्ठमात्रत्वं ब्रह्मणोऽविरुद्धम् । अतोऽङ्गुष्ठमात्रवाक्यप्रतिपाद्यः परमात्मैवेति सिद्धम् ॥२५॥

[८ देवताधिकरणम् । सू० २६–३३]

पूर्वं शास्त्रे मनुष्याधिकारोऽभिहितश्चेत्तर्हि मनुष्याणां देवादीनां तत्राधिकारो न स्यादित्याक्षिप्य समाधातुमित्याक्षेपसंगत्या प्रसंगसंगत्या वेदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(८९) तदुपर्यपि बादरायणः सम्भवात् ॥२६॥

पूर्वपक्षेऽत्र मन्त्रादीनामप्रामाण्यादुपगमनादीनां वाक्यानामपि स्वार्थे प्रामाण्याभावात्तत्त्वमस्यादेरपि नैक्यनिष्ठत्वं फलं, सिद्धान्ते तत्सर्वसम्भवादैक्यनिष्ठत्वं फलमितिभेदः। 'इन्द्रो ह वै देवानामभिप्रवव्राज' (छा० ८।७।२) 'तद्यो यो देवानां प्रत्यबुध्यत स एव तद्भवदि (बृ० १।४।१०) त्यादिविचारविषयः। तत्र किं देवादीनां ब्रह्मविद्यायामधिकारोऽस्ति न वेति संशये; नास्तीति पूर्वः पक्षः। सिद्धान्तस्तु–तदुपर्यपि तेषां मनुष्याणामुपरिष्टाद्ये देवादयस्तेषामपि ब्रह्मविद्यायामधिकारोऽस्तीति बादरायणाचार्योऽमन्यत। कुतः ? सम्भवात्। तेषामप्यर्थित्वसामर्थ्याद्यधिकारकारणस्य सम्भवात्। तत्रार्थित्वं तावन्मोक्षविषयं विकारविषयविभूत्यालोचनादिनिमित्तं देवादीनामपि सम्भवति। तथा सामर्थ्यमपि तेषामस्त्येव, मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात्। स्वयं प्रतिभातवेदत्वाद्, विद्याग्रहणार्थं 'एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास' (छा० ८।११।३) इत्यादौ ब्रह्मचर्यवासदर्शनाच्च नोपनयनाभावो विद्याधिकारनिवर्तकः। तस्माद्देवादीनामपि विद्यास्वधिकारेऽङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठापेक्षया न विरुध्यते ॥२६॥

(९०) विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥२७॥

ननु देवादीनां विग्रहवत्त्वाद्यभ्युपगमेन विद्यास्वधिकारो वर्णितः। एवं च विग्रहवत्त्वादृत्विगादिवदिन्द्रादीनामपि स्वरूपसन्निधानेन कर्माङ्गत्वमभ्युपेयम्। तदा च कर्मणि विरोधः स्यात्; तेषां स्वरूपसन्निधानेन यागाङ्गत्वादर्शनात्, बहुषु यागेषु युगपदेकस्येन्द्रस्य स्वरूपसन्निधानताऽसम्भवाच्चेति चेन्न; अनेकप्रतिपत्तेर्दर्शनात्। एकस्यापीन्द्रादिदेवस्यानेकेषां शरीराणां युगपत्प्राप्तेर्दर्शनात्। तथाहि 'कति देवाः' इत्युपक्रम्य 'त्रयश्च त्री च शता, त्रयश्च त्री च सहस्रा' इति निरुच्य 'कतमे ते' इति प्रश्ने महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवाः' (बृ० ३।९।१-२) इत्यादिश्रुतिरेकस्यैव देवस्यानेकरूपतां तत्रापि क्रमेणान्तर्भाव्य प्राणैकरूपतां देवानां च दर्शयति। एवं चानेकरूपप्रतिपत्तिसम्भवादेकैका देवता बहुरूपैरात्मानं विभज्य बहुषु यागेषु युगपदङ्गभावं यातीति। परैश्च न दृश्यतेऽन्तर्धानादिक्रियायोगादितिभावः। यद्वाऽनेकत्र कर्मणि एकस्य प्रतिपत्तेरङ्गभावस्य लोके दर्शनात्। यथा बहुभिर्नमस्कुर्वाणैर्युग-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदेको ब्राह्मणो नमस्क्रियते। तथेहोद्देशपरित्यागात्मकत्वाद्यागस्य विग्रहवतीमप्येकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत् परित्यजन्तीति विग्रहवत्त्वेऽपि देवानां न कर्मणि किञ्चिद्विरुध्यते ॥२७॥

(६१) शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥२८॥

ननु मास्तु देवादीनां विग्रहवत्त्वे कर्मणि कश्चिद्विरोधः, शब्दे तु विरोधः प्रसज्येत? तथाहि देवादीनामस्मदादिवदनित्यविग्रहवत्त्वे नित्यवेदार्थत्वाभ्युपगमे नित्यवेदात्मकशब्दस्यानित्यविग्रहवता देवेन सह नित्यसम्बन्धाभावान्नित्यानित्ययोः सम्बन्धे विरोधः। 'नित्ये शब्दार्थसम्बन्धे' इत्यादिना नित्यः शब्दोऽर्थस्तत्सम्बन्धश्चेत्यभ्युपेत्य वैदिके शब्दे प्रामाण्यं स्थितं, तत्र विरोधः स्यादिति चेन्न; अतः प्रभवात्। अत एव वैदिकाच्छब्दात् देवादिजगतः प्रभवादुत्पत्तेः। ननु 'जन्माद्यस्य यतः' इत्यत्र ब्रह्मप्रभवत्वे जगतोऽवधारिते कथं पुनः शब्दप्रभवत्वमुच्यते। किं चोच्यमानेऽपि शब्दप्रभवत्वे वस्वादिदेवानामुत्पत्तिमत्त्वेनाऽनित्यत्वात्तद्वाचकवस्वादिशब्दानामनित्यत्वप्रसङ्गाच्छब्दे विरोधस्तदवस्थ एवेति चेन्न; आकृतिभिः सह शब्दानां सम्बन्धाभ्युपगमात्, व्यक्तीनामानन्त्यात्सम्बन्धग्रहणानुपपत्तेश्च। गवादिव्यक्तीनामुत्पत्तिमत्त्वेऽपि तदाकृतीनामुत्पत्त्यभावात्तैः सह तद्वाचकानां नित्यशब्दानां नित्यसम्बन्धाभ्युपगमे शब्दे त्वदुक्तविरोधाभावात्। शब्दप्रभवत्वं च जगतो ब्रह्मप्रभवत्ववन्नोपादानकारणाभिप्रायेणाभिमतं किं तर्हि, स्थिते वाचकात्मना नित्ये शब्दे नित्यार्थसम्बन्धे शब्दव्यवहारयोग्यार्थव्यक्तिनिष्पत्तिः। ननु शब्दप्रभवत्वं देवादिजगतः कथमवगम्यते? प्रत्यक्षानुमानाभ्याम्। प्रत्यक्षं श्रुतिः, स्वप्रामाण्यं प्रत्यनपेक्षत्वात्। अनुमानं स्मृतिः, स्वप्रामाण्यं प्रति सापेक्षत्वात्। 'एत इति वै प्रजापतिर्देवानसृजत' इत्यादिश्रुतिः 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः।' उत्सर्गत्वं चात्र सम्प्रदायप्रवर्तनात्मकत्वं द्रष्टव्यम्। एवं 'वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः' (मनु० १।२१) इत्यादिस्मृतिः। अतः शब्दप्रभवत्वस्य देवादिव्यक्तीनां सम्भवात् तदाकृत्या सह सम्बन्धस्य नित्यत्वाच्च विग्रहवत्वेऽपि देवादीनां न शब्दे कश्चिद्विरोधः इति सिद्धम् ॥२८॥

ननु स्वतन्त्रस्य कर्त्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वे तद्दार्ढ्याय 'अतः प्रभवात्' इति देवादीनां वेदप्रभवत्वाभिधानेन तदुत्पत्ति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कवेदस्यापि प्रभवप्रसङ्गादनित्यत्वमाशङ्क्याह—

(६२) अत एव च नित्यत्वम् ॥२९॥

अत एव = नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद्वेदशब्दे नित्यत्वमपि प्रत्येतव्यमिति ॥२९॥

ननु महाप्रलये त्रैलोक्यस्य प्रलीनतयाऽऽकृतेरपिप्रलीनत्वाच्छब्दार्थसम्बन्धस्यानित्यत्वविरोधस्तदवस्थ एवेत्याशङ्क्याह—

(६३) समाननामरूपत्वाच्चावृतावप्यविरोधो दर्शनात्स्मृतेश्च ॥३०॥

महाप्रलयाभ्युपगमेऽपि स्वापप्रबोधयोरिवानादिसंसारे प्रलयप्रभवयोरावृत्तावपि प्रलये प्रपञ्चस्य संस्कारात्मना स्वोपादानाविद्यायां सत्त्वेन पूर्वस्मिन् कल्पे यथा प्रपञ्चस्य नामरूपे, तद्वदुत्तरकल्पप्रपञ्चस्य नामरूपत्वादाकृतेर्नित्यत्वेन न शब्दार्थसम्बन्धस्यानित्यत्वविरोधः शङ्कनीयः। तथा च समाननामरूपत्वं श्रुतिस्मृतिभ्यां सिद्धमित्याह—दर्शनात्स्मृतेश्चेति। 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयदि' (ऋ. सं. १०।१९०।३) तिश्रुतेः 'यथर्तुष्वृतुलिङ्गानि नामरूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥' इत्यादिस्मृतेश्चेति भावः ॥३०॥

ननु देवादीनामपि ब्रह्मविद्यायामस्त्यधिकार इति यत्प्रविज्ञातं,तत्राह—

(६४) मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥३१॥

देवादीनां ब्रह्मविद्यायामनधिकारं जैमिनिराचार्यो मन्यते। कुतः? मध्वादिष्वसम्भवात् = 'असौ वाव आदित्यो देवमधु' (छा० ३।१।१) 'आदित्यो ब्रह्मत्यादेशः' (छा० ३।१९।१) 'वायुर्वाव संवर्गः' (४।३।१) इत्यादिषु मधुब्रह्मसंवर्गाध्यासेनादित्यादिदेवतोपासनेषु मनुष्याधिकारकेषु तेषामेवादित्यादिदेवानामधिकारासम्भवात्। यतो हि भेदनिष्ठत्वेनोपासनाया एकस्योपास्योपासकभावोऽसम्भवः। तस्मादत्र ब्रह्मविद्यायां देवादीनामनधिकारो, विद्यात्वाविशेषात्, मध्वादिविद्यास्वनधिकारवदिति प्रयोगोऽपि सम्भवतीति भावः ॥३१॥

(६५) ज्योतिषि भावाच्च ॥३२॥

अनधिकारमित्यनुवर्तते। कुतश्च देवादीनामनधिकारं मन्यते? ज्योतिषि द्युस्थानमहोरात्राभ्यां बंभ्रमज्जगदवभासकं ज्योतिर्मण्डलं लोके प्रसिद्धम्। तत्रैवादित्यादयो देवतावाचकाः शब्दाः प्रयुज्यन्ते; लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च। तस्मान्मृदादिवदचेतनत्वावगमेन विग्रहादिमतो ज्योतिर्मण्डलस्य प्रत्यक्षाद्यगोचरत्वात् न तत्रार्थित्वादिकं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्भवति । देवविग्रहादिप्रतिपादकमन्त्रार्थवादेतिहासपुराणलोकानामन्यपरत्वेन स्वार्थे तात्पर्याभावान्न देवादीनां ब्रह्मविद्यायामधिकारः ॥३२

(९६) भावं तु बादरायणोऽस्ति हि ॥३३॥

सौत्रस्तु शब्दः सूत्रद्वयोक्तपूर्वपक्षव्यावर्तकः । बादरायणस्त्वाचार्यो मधुविद्यादिष्वधिकाराभावेऽपि देवादीनां विग्रहवत्त्वेन ब्रह्मविद्यायामधिकारस्य भावं मन्यते । कुतः ? तेष्वप्यर्थित्वसामर्थ्याद्यधिकारकारणमस्त्येव । नहि क्वचिदधिकारोऽसम्भव इत्येतावता सम्भवाधिकारोऽप्यपोद्येत ? ब्राह्मणस्य राजसूयेऽनधिकारेऽपि बृहस्पतिसवेऽधिकारदर्शनात् । न च तेषां विग्रहवत्त्वाभाव इति वाच्यम्; तत्प्रतिपादकमन्त्रादीनां मानान्तरविरोधाभावेन प्रमाणत्वादिति । तस्मान्मन्त्रादिभ्यो विग्रहवत्त्वावगमादर्थित्वादिसम्भवाच्च देवादीनामपि ब्रह्मविद्यायामुपपन्नोऽधिकारः ॥३३॥

[९ अपशूद्राधिकरणम् । सू० ३४–३८]

पूर्वं यथा 'तद्यो यो देवानाम्'''' ''''इति देवादिशब्दश्रुत्या मनुष्याधिकारनियममपोह्य ब्रह्मविद्यायां देवादीनामप्यधिकारोऽभिहितः, तथेहाऽस्तु शूद्रशब्दश्रवणेन द्विजात्यधिकारनियममपोह्य शूद्रस्यापि तत्राधिकार इति दृष्टान्तसंगत्येदमाह—

(९७) शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥३४॥

अत्र पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायामधिकारः, सिद्धान्ते नाधिकारः इति तयोः फलभेदः । संवर्गविद्यायाम्—'अहहारे त्वा शूद्र ? तवैव सह गोभिरस्तु' (छा० ४।२।३) इत्यादिवाक्यं विचारविषयः । तत्रोक्तशूद्रस्य ब्रह्मविद्यायामधिकारोऽस्ति न वेति संशये; अधिकारकारणार्थित्वसामर्थ्ययोः सम्भवात् 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः (तै० सं० ७।१।१।६) इतिवत् 'शूद्रो विद्यायामसमर्थः' इति निषेधाश्रवणाच्च शूद्रस्यापि ब्रह्मविद्यायामधिकारोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु—पूर्वस्मादनधिकारमिति पदमनुवर्त्य प्रथमान्तत्वेन विपरिणेयम् । शूद्रस्य ब्रह्मविद्यायामनधिकारः । कुतः ? अस्य तदनादरश्रवणात् । 'कम्वर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थ' (छा० ४।१।३) इत्यस्माद्धंसवाक्यादात्मनोऽनादरश्रवणादस्य-जानश्रुतेः पौत्रायणस्य क्षत्रियस्य या शुगुत्पेदे, सा हि रैक्वेण स्वस्य सर्वज्ञत्वख्यापनार्थं शूद्रशब्देन सूच्यते । योगवृत्याऽपि शूद्रशब्दस्य क्षत्रियपरत्वमाह—तदा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्रवणात्। तच्छब्देन शुग्, जानश्रुतिः, रैक्वो वा परामृश्यते। तथाहि तं शुचमभिदुद्राव प्राप्तवानित्यर्थः। शुचा वा जानश्रुतिरभिदुद्रुवे प्राप्त इत्यर्थः। शुचा वा रैक्वं जानश्रुतिर्दुद्राव गतवानित्यर्थः। तस्मात्तदाद्रवणादिति भावः। एवं च शूद्रेऽर्थित्वसम्भवेऽपि वर्णत्रयविषयकोपनयनपूर्वकाध्ययनाभावान्न तस्य विद्यायामधिकारः। 'शूद्रो यज्ञेऽनवक्लृप्तः' इति न्यायस्य साधारणतया ब्रह्मविद्यायामपि शूद्रस्यासामर्थ्यं द्योतयतीति बोध्यम् ॥३४॥

(९८) क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥३५॥

इतश्च न जानश्रुतिर्जातिशूद्रः। उत्तरत्र=संवर्गविद्यावाक्यशेषे चैत्ररथेन प्रसिद्धक्षत्रियेणाभिप्रतारिणा सह समानायां विद्यायां संकीर्तनलिङ्गात् जानश्रुतेरपि क्षत्रियत्वावगतेरित्यर्थः। समानजातीयानामेव प्रायेण सहचारदर्शनेन जानश्रुतेः क्षत्रियत्वावगतिः। अतो न जातिशूद्रस्य ब्रह्मविद्यायामधिकार इति भावः ॥३५॥

(९९) संस्कारपरामर्शात्तदभावाभिलापाच्च ॥३६॥

इतश्च न विद्यायां जातिशूद्रस्याधिकारः, यद्विद्याप्रदेशेषु 'तं होपनिन्ये' (श० ब्रा० ११।५।३।१३) 'अधीहि भगव इति होपससाद' (छा० ७।१।१) 'ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः' (प्र० १।१) इत्यादिपूपनयनादिसंस्काराणां परामर्शात्। नन्वेवं तर्हि शूद्रस्योपनयनं कल्पनीयमिति चेन्न; तदभावाभिलापाच्च। 'न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति' (म० १०।१२।६) इत्यादिना तस्य शूद्रस्योपनयनादिसंस्काराभावकथनादित्यर्थः ॥३६॥

(१००) तदभावनिर्धारणे च प्रवृत्तेः ॥३७॥

इतो न शूद्रस्याधिकारः। यत्किल तस्य जाबालस्य 'साऽहमेतन्न वेद यद्गोत्रस्त्वमसि, जाबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि, स सत्यकाम एव जाबालो ब्रुवीथा इति' (छा० ४।४।२) इतिश्रुत्या सत्यवचनेन शूद्रत्वाभावे निर्धारिते 'नैतदब्राह्मणो विवक्तुमर्हति' (छा०४।४।५) इत्यनेन गौतमस्य जाबालमुपनेतुमनुशासितुं च प्रवृत्तेरितिभावः ॥३७॥

(१०१) श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥३८॥

इतश्च न जातिशूद्रस्य विद्यायामधिकारः। यत्खलु स्मृतेः 'अथ वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रं परिपूरणम्' 'तस्माच्छूद्रसमीपे नाध्ये-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तव्यम्' 'न शूद्राय मतिं दद्यात्' 'द्विजातीनामध्ययनमिज्यादानमि' त्यादिस्मृतितो वेदश्रवणस्य तदध्ययनस्य तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधात्। पूर्वकृतसंस्कारवशाद्विदुरधर्मव्याधादीनां ज्ञानोत्पत्त्या न शक्यते फलप्राप्तिः प्रतिषेद्धुम्। 'श्रावयेच्चतुरो वर्णान्' इति पुराणेतिहासाधिगमे चातुर्वर्ण्याधिकारश्रवणाच्च वेदपूर्वको नास्त्यधिकारः शूद्राणामिति तात्पर्यम्।

[१० कम्पनाधिकरणम्। सू० ३९]

अवसितः प्रासङ्गिकोऽधिकारविचारः। प्रकृतमेवाधुना वाक्यार्थविचारं प्रवर्तयिष्यामः। प्रासङ्गिकत्वान्नास्याव्यवहितेन संगत्यपेक्षा। 'शब्दादेव प्रमितः' इत्यत्राधिकरणे ब्रह्मवाक्ये यथा ब्रह्मज्ञानाय जीवानुवादोऽभिहितः। न तथात्र 'यदिदम्' इति वाक्ये प्राणानुवादो युक्तः, तस्य कल्पितत्वेन स्वरूपतो ब्रह्मैक्यायोगादिति प्रत्युदाहरणसंगत्येदमाह—

(१०२) कम्पनात् ॥३९॥

अत्र पूर्वपक्षे प्राणोपासनं फलं; सिद्धान्ते निर्विशेषब्रह्मज्ञानं फलमिति तयोर्भेदः। 'यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ती' (क० २।६।२) ति वाक्यमत्रविचारविषयः। तत्रास्मिन्वाक्ये 'एजृ कम्पने' इति धातोः कम्पनार्थकतया सर्वजगत्कम्पनभयकारणस्य वज्रशब्दितस्य विज्ञानादमृतत्वप्राप्तिः श्रूयते, स किं वायुविकारः परमात्मा वेति संशये; पञ्चवृत्तौ वायुविकारे प्राणे सर्वं जगत्प्रतिष्ठायैजति, वायुनिमित्तमेव महद्भयानकं वज्रमुद्यते, 'वायुरेव व्यष्टिर्वायुः समष्टिरपपुनर्मृत्युं जयति य एवं वेद' इति श्रुत्यन्तरे वायुविज्ञानादेवामृतत्वमिति हेतोरेव प्रतिपत्तव्यमिति पूर्वः पक्षः। सिद्धान्तस्तु वाक्येऽस्मिन् प्राणशब्देन ब्रह्मैवोच्यते; न वायुविकारः। कुतः ? सवायुकस्य सर्वप्रपञ्चस्य ब्रह्माज्ञया कम्पनात्। तथाहि—'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन' (का० २।६।१) 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ'॥ (२।५।५) इत्यादिग्रन्थपर्यालोचनेन परमात्मन्येव सर्वैजयितृत्वमुपपद्यते, न वायुविकारे। 'भयादग्निस्तपती' (क० २।६।२) त्यत्र परमात्मनो भयहेतुत्वोक्तेस्तस्यैव 'महद्भयं वज्रमुद्यत' इत्यत्रापि संनिधानतया भयहेतुत्वप्रत्यभिज्ञानात्, 'तमेव विदित्वातिमृत्युमेति' इत्यादौ ब्रह्मविज्ञानादमृतत्वश्रवणाच्च क्वचिद्वायुविज्ञानादमृतत्वश्रवणमापेक्षिकामृतत्वविषयकमिति बोध्यम् ॥३९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[११ ज्योतिरधिकरणम् । सू० ४०]

पूर्वं सर्वं शब्दश्रुतिसंकोचानुपपत्त्या प्रकरणवशात्प्राणशब्दस्य ब्रह्मपरत्वमभिहितं यथा, न तथेह सम्प्रसादवाक्ये प्रकरणानुग्राहकं किञ्चिदस्ति प्रमाणं, येन ब्रह्मज्योतिःशब्दवाच्यं स्यादिति प्रत्युदाहरणसंगत्येदमाह—

(१०३) ज्योतिर्दर्शनात् ॥४०॥

अत्र पूर्वपक्षे आदित्योपासनया क्रममुक्तिः, सिद्धान्ते ब्रह्मज्ञानात्सद्यो मुक्तिरितिफलभेदः । 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते' (छा० ८।१२।३) इत्यादिवाक्यमत्र विचारणीयम् । तत्र किं ज्योतिः शब्दवाच्यमादित्यादितेजः, किंवा परं ब्रह्मेति सन्देहे ; रूढत्वाज्ज्योतिः शब्दवाच्यमादित्यादितेजः इति पूर्वः पक्षः । सिद्धान्तस्तु परमेव ब्रह्मात्र ज्योतिशब्दितम् । कुतः ? दर्शनात् । 'य आत्माऽपहतपाप्मे' (छा० ८।७।१) त्यपहतपाप्मत्वादिगुणकस्यात्मनोऽत्र प्रकरणादावन्वेष्टव्यत्वेन विजिज्ञासितव्यत्वेन च प्रतिज्ञानतयाऽनुवृत्तिदर्शनात् । 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छा० ८।६।६) इत्यनुसन्धानात् 'परं ज्योतिः' 'स उत्तमः पुरुषः (छा० ८।१२।३) इति विशेषणाच्च ज्योतिः परंब्रह्मैव, नादित्यादितेजः इति भावः ॥४०॥

[१२ अर्थान्तरत्वादिव्यपदेशाधिकरणम् । सू० ४१]

पूर्वं यथोपक्रमादिवशादर्थान्तरे प्रसिद्धस्यापि ज्योतिःशब्दस्य परब्रह्मपरत्वं, तथाकाशोपक्रमादिवशाद्ब्रह्मादिशब्दोऽपि स्वार्थादन्यपरः स्यादितिदृष्टान्तसंगत्येदमाह—

(१०४) आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥४१॥

अत्र पूर्वपक्षे भूताकाशात्मकब्रह्मोपासनया क्रममुक्तिः, सिद्धान्ते ब्रह्मज्ञानेन सद्यो मुक्तिरिति फलभेदः ।'आकाशो वै नाम नामरूपयोर्निर्वहिता, ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा' (छा० ८।१४।१) इति वाक्यं विचारविषयः । किमत्राकाशशब्दो भूताकाशः, परं ब्रह्म वेति संशये; रूढत्वात्' नामरूपनिर्वहणस्यावकाशदानेन तत्र सामर्थ्यात् स्रष्टृत्वादेश्च स्पष्टब्रह्मलिङ्गस्याश्रवणाच्चाकाशशब्दो भूताकाशपर इति पूर्वः पक्षः । सिद्धान्तस्तु परमेव ब्रह्माकाशशब्दं भवितुमर्हति । कुतः ? अर्थान्तरत्वादिव्यपदेशात् । 'ते यदन्तरा तद्ब्रह्मे' त्याकाशस्य नामरूपाभ्यामर्थान्तरत्वेन व्यपदेशात्, आदिना 'तद्ब्रह्म तदमृतं' स आत्मा ।' (छा० ८।१४) इति ब्रह्मलिङ्गदर्शनाच्च परमात्मैवाकाशशब्दः । एवं च भूताकाशे तस्य रूढत्वमकिञ्चित्करम्, नामरूपयोर्निर्वहणं निरंकुशं, ब्रह्मणो-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽन्यत्रासम्भवम् स्रष्टृत्वादिब्रह्मलिङ्गमभिहितं चेति तस्य ब्रह्मपरत्व भ्युपगमे कारणमिति भावः ॥४१॥

[१३ सुषुप्त्युत्क्रान्त्यधिकरणम् । सू० ४२-४३]

पूर्वं नामरूपाभ्यां भिन्नत्वकथनादाकाशशब्दो न भूताकाशपः किन्तु ब्रह्मपरः इत्युक्तं, तन्न; प्राज्ञेनात्मना सम्परिष्वक्तः, इत्यत्राभिन्ने ऽपि जीवे भेदोपचारादित्याक्षिप्य समाधानादाक्षेपसंगत्येदमाह—

(१०५) सुषुप्त्युत्क्रान्त्योर्भेदेन ॥४२॥

अत्र पूर्वपक्षे जीवानुवादेन कर्मशेषकर्तृस्तुतिः फलं, सिद्धान्ते ब्रह्म तादात्म्यज्ञानं फलमिति भेदः। 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्यो तिः पुरुषः' (बृ० ४।३।७) इत्यादिवाक्यमत्र विचारविषयः। तत्किं जीव नुवादपरं किंवा तदनुवादेनासंसारिब्रह्मस्वरूपप्रतिपादनपरमिति संशं संसारिस्वरूपमात्रविषयमेव। कुतः? 'योऽयंविज्ञानमयः प्राणेषु' (बृ ४।३।७) 'स वा एष महानज' आत्मा योऽयं विज्ञानमयः प्राणे (बृ० ४।४।२२) इत्युपक्रमोपसंहाराभ्यामिति पूर्वः पक्षः। सिद्धान्तस्तु परमेश्वरोपदेशपरमेवेदं वाक्यम्। कुतः? सुषुप्त्युत्क्रान्त्योः शारीराद् देन परमेश्वरस्य व्यपदेशात्। सुषुप्तौ 'अयं पुरुषः प्राज्ञेनात्मना सम रिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि' (बृ० ४।३।२१) ति, उत्क्रान्तौ अयं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति' (बृ० ४।३।३५) इति च जीवाद्भेदेन परमेश्वरं व्यदिशति। उपक्रमेऽपि जीवमनूद्यपरे ब्रह्मणाऽस्यैक्यं विवक्षति', 'ध्यायतीव लेलायतीव' इति जीवधर्मनिरा करणश्रुतिदर्शनात्। तथोपसंहारेऽपि 'स एष महानज आत्मा' इत्य प्राणेषु लक्ष्यमाणो जीवात्मैष महानज आत्मा परमेश्वर एवास्माभि प्रतिपादितः। तस्मात्परमेवेदं वाक्यमिति ॥४२॥

(१०६) पत्यादिशब्देभ्यः ॥४३॥

इतश्च ब्रह्माभेदप्रतिपादकमिदं वाक्यमित्यवगन्तव्यम्। 'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः, इति पत्यादिशब्दा असंसारित्व प्रतिपादकाः। 'स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' इत्येवंरूपा = संसारित्वनिषेधकाः। तेभ्योऽसंसारिब्रह्मात्मप्रतिपादक मिदं वाक्यमिति सुसंगतम् ॥४३॥

इति ब्रह्मसूत्र शाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ प्रथमाध्यायस्य तृतीयः पादः ॥३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रथमाध्याये चतुर्थः पादः ।

[अत्र प्रधानविषयत्वेन सन्दिह्यमानानामव्यक्ताजादिपदानां चिन्तनम्]

पूर्वमीक्षत्यधिकरणे गतिसामान्यमशब्दत्वं च प्रतिज्ञातम् । तत्र वेदान्तानां ब्रह्मणिगतिसामान्यंपादत्रयेणप्रतिपादितम् । सम्प्रति प्रधानस्याशब्दत्वमाक्षिप्यसमाधातुमारभ्यमाणेन चतुर्थपादेनसह पूर्वस्याक्षेपसंगतिः ।

[१ आनुमानिकाधिकरणम् । सू० १–७]

पूर्वस्मिन्नधिकरणे प्रसिद्धजीवोक्तिभङ्गेनाप्रसिद्धब्रह्मोक्तिवदप्रसिद्धप्रधानपरमेव 'महतः परमव्यक्तमि' त्यादिकाठक वाक्यं स्यादिति दृष्टान्तसंगत्येदमारभ्यते—

(१०७) आनुमानिकमप्येकेषामिति चेन्न; शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥१॥

अत्र पूर्वपक्षे ब्रह्मण्येव वेदान्तानां समन्वये नियमाभावः, सिद्धान्ते तादृङ्नियमः इति फलभेदः । 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः' (क० १।३।११) इत्यादिवाक्यमत्रविषयः । तत्र किमव्यक्तशब्देन प्रधानमभिधीयते शरीरं वेति संशये; सांख्यस्मृतौ यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः प्रसिद्धास्ते एवात्र प्रत्यभिज्ञायन्ते । अतः स्मृतिप्रसिद्धत्वात्, शब्दादिहीनत्वात्, न व्यक्तमव्यक्तमिति व्युत्पत्तिसम्भवाच्च आनुमानिकम-नुमानगम्यं सांख्यस्मृतिप्रसिद्धं प्रधानमप्येकेषां शाखिनां प्रत्यक्षमव्यक्तशब्देन पठ्यते इति तस्याशब्दत्वमसिद्धमिति चेन्न; प्रधानं नाव्यक्तपदवाच्यम् । कुतः ? शरीररूपकविन्यस्तगृहीतेः । शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन गृह्यते. प्रकरणात्परिशेषाच्च । तथाहि तत्र प्रकरणे आत्मशरीरादीनां रथिरथादिरूपककल्पनां दर्शयति 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।' (क० १।३।३) इत्यादौ । तस्यासंयतैरिन्द्रियैः संयतैरिन्द्रियैश्च संसाराधिगमनं विष्णुपदप्राप्तिं च दर्शयति । ततः 'इन्द्रियेभ्यः परा ह्यर्थाः' ... ... पुरुषान्न पर किञ्चित् सा काष्ठा सा परा गतिः (क० १।३।१०–११) इत्यादौ पूर्वोक्तानां रथादिरूपेण कल्प्यमानानामिन्द्रियादीनामुपादानसमानत्वेऽपि केवलं परिशेषादव्यक्तपदवाच्यं शरीरमेव ग्राह्यम् । अतः पूर्वापरालोचनायां परकल्पितस्य प्रधानस्य नास्त्यत्र ग्रहणावकाशः ॥१॥

ननु स्थूलशरीरस्य व्यक्तशब्दार्हस्य कथमव्यक्तपदवाच्यत्वमित्यतआह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१०८) सूक्ष्मं तु तदर्हत्वात् ॥२॥

सौत्रस्तुशब्दः शङ्कानिरासार्थः। सूक्ष्मं त्विह कारणात्मना श विवक्ष्यते। शरीरस्यारम्भकं भूतसूक्ष्ममव्यक्तशब्दार्हं भवितुमर्ह प्रकृतिविकारयोरभिन्नत्वेन प्रकृतिशब्दस्य विकारे 'गोभिः श्री मत्सरम्' (ऋ० सं० ६।४६।४) (गोविकारैः सोमं मिश्रितं कुर्या तदर्थः) इत्यादौ प्रयुज्यमानत्वात्। तद्वदत्रापि प्रकृतिवाचकस्याव्य शब्दस्य तद्विकारे शरीरे प्रयोगोऽविरुद्धः इति भावः ॥२॥

नन्वेवं तर्हि शरीरकारणस्य भूतसूक्ष्मस्याव्यक्तपदवाच्यत्वाङ्गी तस्य प्रधानत्वेन सांख्यैः स्वीकृतस्य त्वन्मतेऽप्यभ्युपगतिप्रसङ्गः इ आह—

(१०९) तदधीनत्वादर्थवत् ॥३॥

न वयं स्वतन्त्रप्रधानकारणवादमङ्गीकुर्मः। कुतः? तदधीनत्व परमेश्वराधीनत्वादव्यक्तस्य स्वातन्त्र्येण हि तस्य जगत्कारणत्वा पगमात्। न चेश्वरस्य जगत्कारणत्वस्वीकारे प्रधानस्य वैयर्थ्या वाच्यम्, 'मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्' (श्वे० ४। इति मन्त्रवर्णे मायापरनाम्नोऽव्यक्तस्य परमेश्वरसहकारित्वेनार्थव भ्युपगमादित्यर्थः ॥३॥

(११०) ज्ञेयत्वावचनाच्च ॥४॥

अव्यक्तस्याप्रधानत्वे हेत्वन्तरमाह। प्रधानपुरुषयोर्विवेक त्कैवल्यं वदद्भिः सांख्यैर्ज्ञेयत्वेन प्रधानं स्मर्यते। नचेह प्रधानं ज्ञे स्मर्यते। अव्यक्तपदमात्रश्रुत्या ज्ञेयत्वेनानुपदिष्टत्वान्न सांख्यपरिक प्रधानमव्यक्तशब्दार्हमभ्युपेयम्। रथरूपकशरीराद्यनुसरणेन विष परमं पदं दर्शयितुमुपन्यास इत्यनवद्यम् ॥४॥

(१११) वदतीति चेन्न; प्राज्ञो हि प्रकरणात् ॥५॥

ननु ज्ञेयत्वावचनादिति हेतुरसिद्धः। कथम्? 'अशब्दम्... अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते' १।३।१५) इत्यत्रापि महतः परमव्यक्तशब्दवाच्यं प्रधानं शब्दा ज्ञेयत्वेन वदतीति चेन्न; हि = यस्मात् प्रकरणात्प्राप्तः परमात्मा ज्ञेयत्वेनोपदिष्टः, न प्रधानम्। कुतः? 'पुरुषान्न परं किञ्चिदि' प्राज्ञस्य परमात्मनः प्रकरणस्य विद्यमानत्वात्। किं च प्रधान ज्ञानान्मृत्युमुखप्रमोक्षणफलं सांख्यैर्नेष्यते, किन्तु चेतनात्मविज्ञा अतो न प्रधानस्यात्र ज्ञेयत्वमव्यक्तशब्दनिर्दिष्टत्वं वाभ्युपेयमिति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(११२) त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥६॥

इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा। यस्मात्त्रयाणामेवाग्निजीवपरमात्मनां ग्रन्थेऽस्मिन् वरप्रदानसामर्थ्योद्वक्तव्यतयोपन्यासः तद्विषये प्रश्नोपि दृश्यते। नातोऽन्यस्य प्रश्न उपन्यासो वास्ति। तथाहि—'स त्वमग्निं स्वर्ग्यम्' (क० १।१।१३) इत्यग्निप्रश्नः। 'येयं प्रेतेविचिकित्सा मनुष्ये' (क० १।१।२०) इति जीवप्रश्नः। 'अन्यत्रधर्मादन्यत्राधर्मादि' (क० १।२।१४) ति परमात्मविषयः प्रश्नः। प्रतिवचनमपि 'लोकादिमग्निमि (क० १।१।१५) त्यग्निविषयम्, 'योनिमन्ये प्रपद्यन्ते' (क० २।५।७) इति जीवविषयम, 'न जायते म्रियते वा विपश्चित्' (क० १।२।१८) इत्यादिबहुप्रपञ्चं परमात्मविषयं च श्रूयते। प्रधानविषये नास्ति प्रश्नः। अपृष्टस्य प्रतिवचनमप्रासङ्गिकं स्यादिति नाव्यक्तं प्रधानमिति ॥६॥

(११३) महद्वच्च ॥७॥

श्रुत्युक्तोऽप्यव्यक्तशब्दो न सांख्याभिमतप्रथमजसत्तामात्रवाचको, वैदिकशब्दत्वात् महच्छब्दवदिति प्रयोगः सम्भवति। तथाहि यथा सांख्यैः सत्तामात्रे प्रथमजे प्रयुज्यमानो महच्छब्दो न वैदिकैः प्रयुज्यते, 'बुद्धेरात्मा महान्परः' (क० १।३।१०) महान्तं विभुमात्मानं (क० १।२।२२) इत्यादावात्मशब्दप्रयोगात्। तथाव्यक्तशब्दोऽपि न वैदिके प्रयोगे प्रधानमभिधातुमर्हति। तस्मान्नास्त्यानुमानिकस्य प्रधानस्य शब्दवत्त्वमिति सिद्धम् ॥७॥

[२ चमसाधिकरणम्। सू० ८–१०]

पूर्वमव्यक्तशब्दमात्रेण माभूत् प्रधानस्य प्रत्यभिज्ञानं, किन्त्वत्र त्रिगुणत्वादिलिङ्गोपेतादजाशब्दात्तस्य प्रत्यभिज्ञानं स्यादिति प्रत्युदाहरणसङ्गत्येदमाह—

(११४) चमसवदविशेषात् ॥८॥

अत्र पूर्वपक्षे ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। 'अजामेकां लोहितशुक्लकृष्णामि' (श्वे० ४।५) त्यादिवाक्यमत्र विचारविषयः। तत्रकिमजाशब्दः प्रधानवाचकः, तेजोऽबन्नात्मकावान्तरप्रकृतिवाचको वेति संशये; न जायते इत्यजेति व्युत्पत्त्या 'मूलप्रकृतिरविकृतिरिति' सांख्याभ्युपगत्या च त्रिगुणसाम्यावस्थाप्रकृतिरेवअजाशब्दवाच्येति पूर्वः पक्षः। सिद्धान्तस्तु नैतेन मन्त्रेण

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सांख्यवादस्य श्रुतिमत्त्वमाश्रयितुं शक्यं, सर्वत्रापि यया कयाचि नयाजात्वादिसम्पादनोपपत्तेः। तथाहि न जायते इत्यजाशन्न्यत्रापि साधारण्यादत्र निर्धारणाभावे दृष्टान्तः, चमसवत्। य 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' (बृ० २।२।३) इति मन्त्रे स्वातन्त्र्या चमस इत्यवधारयितुमशक्यम्। यथा कथञ्चिदर्वाग्बिलत्वादेः सन्सम्भवात्। एवमिहाप्यविशेषात् 'अजामेकामि'ति मन्त्रे प्रधानमे शब्दार्थ इति नियन्तुमशक्यमिति भावः ॥८॥

ननु तत्र 'इदं तच्छिरः एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' इति शेषाच्चमसविशेषबोधो भवति। इह केयमजा प्रतिपत्तव्येत्यत्राह—

(११५) ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥९॥

तुशब्दोऽवधारणार्थकः। ब्रह्मणो ज्योतिस्तेज उपक्रमे यस्याः ते वन्नलक्षणायाः सैव ज्योतिरुपक्रमा निर्धारणीया, न प्रधानम्। तथा ह्येके शाखिनस्तेजोऽवन्नानां परमेश्वरादुत्पत्तिमाम्नाय ते रोहितादिरूपतां 'यदग्ने रोहितं रूपं तेजसस्तद्रूपमि' त्याम्ना तान्येवेह रोहितादिशब्दसामान्यात्तेजोऽवन्नानि प्रत्यभिज्ञायन्ते। तादिशब्दानां च रूपविशेषु मुख्यत्वाद्भाक्तत्वाच्च गुणविषयत संदिग्धेन सन्दिग्धस्य निगमनं न्याय्यमिति ॥९॥

ननु तेजोऽवन्नात्मना त्रैरूप्येण त्रिरूपाजा प्रतिपत्तुमशक्या, जाऽऽकृतित्वविरहात् जातिश्रवणाच्चेत्यत आह—

(११६) कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥१०॥

च-शब्दःशङ्कानिरासार्थः। नायमजाऽऽकृतिनिमित्तोऽजाशब्दः, यौगिकः, किन्तु कल्पनोपदशात्तेजोऽवन्नात्मप्रकृतौ नाजात्वानुपप यथा हि लोके यदृच्छया काचिदजा लोहितादिवर्णा सरूपबहुश जनयित्री भवति। तां कश्चिदजो जुषमाणोऽनुवर्तते कश्चिच्चैनां भोगां त्यजति। एवमिहापि तेजोऽवन्नरूपा भूतप्रकृतिस्त्रिवर्णा स बहुविकारजनयित्री क्षेत्रज्ञेनाविदुषोपभुज्यते विदुषा च परित्यज न चैवं क्षेत्रज्ञभेदस्य पारमार्थिकत्वमाशङ्कनीयम्? प्रसिद्धभेदम पाधिकभेदं चादाय शास्त्रस्य बन्धमोक्षव्यवस्थाप्रतिपादनपरत्वात्। मधुभिन्नादित्यस्य 'असौ वादित्यो देवमधु' इति मधुत्वोपदेशः, वा वाचश्चाधेनोर्धेनुत्वोपदेशः। एवमनजाया अजात्वोपदेशे न क रोधः। तस्मान्नास्ति प्रधानग्रहणावकाशोऽत्रेत्यजशब्दत्वं प्रधानस्ये।त

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[३ संख्योपसंग्रहाधिकरणम् । सू० ११–१३]

पूर्वमाध्यात्मिकाधिकारे प्रसिद्धच्छागग्रहणायोगादजाशब्दस्तेजोऽ-न्नादिपरः । तथा 'यस्मिन् पञ्चपञ्चजनाः' इति मन्त्रे पञ्चजनशब्देन संख्यादिग्रहणायोगात्सांख्याभिमतपञ्चविंशतितत्त्वग्रहणं स्यादिति दृष्टान्तसंगत्येदमाह—

(११७) न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥११॥

अत्र पूर्वपक्षे ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । 'यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः । तमेव मन्ये आत्मानं विद्वान्ब्रह्मामृतोऽमृतम्' (बृ० ४।४।१७) इत्यादिवाक्यमत्र विचारविषयः । तत्र पञ्चजनशब्देन सांख्यनये प्रसिद्धानि मूलप्रकृत्यादीनि पञ्चविंशतितत्त्वान्युच्यन्ते, उत वाक्यशेषगतप्राणादय इति संशये; पञ्चशब्दद्वयदर्शनेन 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥' इति सांख्यस्मृतिप्रसिद्धानि पञ्चविंशतितत्त्वानि श्रुतिमत्त्वेन संग्राह्याणीति पूर्वः पक्षः । सिद्धान्तस्तु नास्मिन्मन्त्रे पञ्चशब्दद्वयश्रवणेन संख्योपसंग्रहादपि सांख्यस्मृतिप्रसिद्धानां पञ्चविंशतितत्त्वानां श्रुतिमत्त्वं प्रत्याशा कर्तव्या । नानाभावात्, नाना ह्येतानि पञ्चविंशतिः तत्त्वानि । नैषां पञ्चशः पञ्चशः साधारणधर्मोऽस्ति, तत्कथं सांख्यस्मृतिप्रसिद्धैः पञ्चविंशतेरन्तराले पञ्चपञ्चसंख्या निविशेरन् ? किं चात्र परः पञ्चशब्दो जनशब्देन समस्तः पञ्चजनाः इति पारिभाषिकेण स्वरेणैकपदत्वनिश्चयात् समस्तत्वाच्च न वीप्सा 'पञ्च पञ्च' इति । तस्मात्पञ्च पञ्चजना इति न पञ्चविंशतितत्त्वाभिप्रायम् । अतिरेकाच्च न पञ्चविंशतितत्त्वाभिप्रायम् । अत्रेऽस्मिन् पञ्चविंशतितत्त्वातिरिक्तत्वेनात्माकाशयोः श्रवणेन सप्तविंशतितत्त्वप्राप्तावपसिद्धान्तापत्तिः । तस्मान्नात्र सांख्यनयप्रसिद्धपञ्चविंशतितत्त्वग्रहणमुचितमिति ॥११॥

ननु के पुनस्ते पञ्चजना नामेत्यत आह—

(११८) प्राणादयो वाक्यशेषात् ॥१२॥

प्राण एवादिर्येषां प्राणचक्षुःश्रोत्रान्नमनसां ते प्राणादयः पञ्चजनशब्देन ग्राह्याः । कुतः ? वाक्यशेषात् । उत्तरत्र वाक्यशेषे 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुतश्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः' (बृ० ४–४–१८) इत्यत्र सन्निहिते तेषां विद्यमानत्वात् । ननु कथं प्राणादिषु जनशब्दप्रयोगः इति चेन्न; तत्त्वेषु जनशब्दस्य प्रयोगेऽपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसिद्धयतिक्रमणे समाने वाक्यशेषेण तथावधारणाज्जनसम्बन्धाद्ग्र
देवपितृगन्धर्वासुररक्षसां, सनिषादानां चतुर्वर्णानां वा पञ्चजनशब्देनो
ग्रहणेऽपि न विरोधः, किन्तु पञ्चविंशतितत्त्वानां नात्र परिग्रह इत्याचा
चार्याणां तात्पर्यमिति भावः ॥१२॥

(११६) ज्योतिषैकेषामसत्यन्ने ॥१३॥

ननु माध्यन्दिनीनां प्राणादिष्वन्नस्य पाठादस्तु पञ्चसंख्यापूरणम्;
काण्वानां तु तत्रान्नशब्दपाठाभावात् कथं प्राणादयः पञ्चजनाः स्युरिति
चेन्न; एकेषां काण्वानामसत्यन्नशब्दपाठे पूर्वमन्त्रोक्तेन ज्योतिषा पञ्चसं
ख्यापूरणेऽविरोधात्। अस्ति हि तत्र पूर्वस्मिन्मन्त्रे 'तद्देवा ज्योतिषां ज्यो
तिरि' ति शब्दस्य पाठः। समानेऽपि मन्त्रे ज्योतिषोऽपेक्षाभेदादेकत्रग्र
हणमन्यत्राग्रहणमित्यप्यविरोधः। अतःप्रधानमशब्दमिति सिद्धम्॥१३॥

[४ कारणत्वाधिकरणम्। सू० १४-१५]

पूर्वमधिकरणत्रयेण प्रधानस्याशब्दत्वसाधनेन वेदान्तानां ब्रह्मणि स
मन्वयमभिधाय सम्प्रति तेषां मिथो विरुद्धार्थप्रतिपादकत्वेन निर्णेतुम
शक्यत्वादानुमानिकप्रधानपरः पूर्वोक्तः समन्वयोऽभ्युपेय इत्याक्षेपसंग
तिः। अव्यवहिते च पूर्वत्र विरोधपरिहारेऽपि प्रकृते विरोधे सति वाक्या
नामप्रामाण्यमिति प्रत्युदाहरण रूपावान्तरसंगतिश्चास्तीत्यत आह—

(१२०) कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥१४॥

अत्र पूर्वपक्षे समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः।
अत्र जगज्जन्मादिकारणत्वादिवाक्यानि ब्रह्मणि प्रमाणं न वेति विशये
तेषां मिथोविरोधदर्शनान्न तत्र मानमिति पूर्वः पक्षः। सिद्धान्तस्तु च
कारः पूर्वशङ्काव्यावृत्त्यर्थः। सत्यपि प्रतिवेदान्तं सृज्यमानेष्वाकाशादि
क्रमादिविरोधे न कारणे स्रष्टरि कश्चन विरोधोऽस्ति। कुतः? यथा
व्यपदिष्टोक्तेः। यथाह्येकस्मिन् वेदान्ते यथाभूतः सर्वज्ञः सर्वेश्वरः
सर्वात्मैकोऽद्वितीयो जगत्कारणत्वेन व्यपदिष्टस्तथाभूतस्यैवेश्वरस्य
वेदान्तरेष्वपि जगत्कारणत्वेन व्यपदिष्टोक्तेः। तथाहि—'इदं सर्वम
सृजत। यदिदं किञ्च' (तै० २।६) 'सदेव सोम्येदमग्र आसीदेकमेवा
द्वितीयम्' (छा० ६।२।१) 'आत्मा वा इदमेक एवाग्र आसीन्नान्य
त्किञ्चनमिषत्' (ऐ० ४।१।१) इत्येवंजातीयकानां वाक्यानामविरुद्धार्थ
कत्वात्। 'न वियदश्रुतेरि' त्यत्र कार्यविषयं विरोधं समाधास्यति सू
कारः। अस्तु वा कार्यविषये विरोधः, तस्याप्रतिपाद्यत्वान्नदोषः। त

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्प्रदायविदः 'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन' (मा० का० ३।१५) इति वदन्ति । अतः श्रुतिप्रतिपाद्येऽद्वितीये ब्रह्मणि विरोधाभाव इत्यभिप्रायः ॥१४॥

(१२१) समाकर्षात् ॥१५॥

ननु 'असद्वा इदमग्र आसीत्' (तै० २।७) 'असदेवेदमग्र आसीत्' (छा० ३।१९।१) इत्यादौ क्वचिदसतः 'सदेव सोम्येदमग्र आसीत्'(छा० ६।२।१) इत्यत्र क्वचित्सतश्चोत्पत्तिश्रवणात्कारणविषये विगानं श्रूयते इति चेन्न; तत्र तत्रानभिव्यक्तनामरूपवाचकेनासच्छब्देन सतःकारणस्यैव समाकर्षात् । नामरूपव्याकृतवस्तुविषये प्रायेण सच्छब्दः प्रयुज्यते । प्रागुत्पत्तेस्तदभावात सदेव ब्रह्मासदिवासीदित्युपचर्यते इति नासच्छब्देन कारणस्यात्यन्ताभावोऽभ्युपगन्तव्यः । अतो जगत्कारणत्ववादिवेदान्तवाक्यानां ब्रह्मणि समन्वयाभ्युपगमे न विरोध इति सिद्धम् ॥१५

[५ बालाक्यधिकरणम् । सू० १६–१८]

पूर्वं समानवाक्यस्थत्वेनासच्छब्दोऽपि सच्छब्दार्थपर इत्युक्तम् । अत्र तु कौषीतकि-ब्राह्मणे वाक्यभेदात् 'ब्रह्म ते ब्रवाणीतिबालाकिवाक्यस्थब्रह्मशब्देन न प्राणादिशब्दो ब्रह्मपरत्वं नेतुं शक्यः इति प्रत्युदाहरणसङ्गत्येदमाह—

(१२२) जगद्वाचित्वात् ॥१६॥

अत्र पूर्वपक्षेऽस्य वाक्यस्य प्राणाद्युपासनापरत्वाद्ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । 'यो वै बालाक ! एतेषां पुरुषाणां कर्त्ता यस्य वैतत्कर्म स वै वेदितव्यः' (कौ० ब्रा० ४।१८) इत्यादि वाक्यमत्रविचारविषयः । तत्र वेदितव्यः कर्त्ता किं प्राणो, जीवो, ब्रह्म वेति संशये; 'यस्य वैतत्कर्मे' ति चलनात्मककर्मणः प्राणाश्रयत्वात् मुख्यः प्राणो ग्राह्यः । 'एवमेवैष 'प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते' (कौ०ब्रा०४।२०) इति जीवलिङ्गात् जीवो वा ग्राह्यः । अतो जीवमुख्यप्राणयोरन्यतर एवात्र ग्राह्यो, न परमात्मेति पूर्वः पक्षः । सिद्धान्तस्तु एषां पुरुषाणां कर्त्ता परमात्मैव स्यात् । कुतः ? 'ब्रह्म ते ब्रवाणी' (कौ० ४।१) ति परमात्मन एवोपक्रमात् । अन्यस्य ग्रहे उपक्रमो बाध्येत । 'न च 'यस्य वैतत्कर्मे' त्यत्र कर्मपदेन परिस्पन्दनरूपस्य धर्माधर्मलक्षणस्य वा कर्मणः परमात्मनि असम्भवितत्वमिति वाच्यम्; तयोरन्यतरस्याप्रकृतत्वादसंशब्दितत्वाच्च । 'एतत्कर्म' क्रियते इति कर्म सर्वनाम्नैतच्छब्देन प्रत्यक्ष-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन्निहितं जगदेव ग्राह्यमिति एतत्कर्मशब्दस्य प्रत्यक्षाद्यपस्थापितजगद्वाचित्वात् परमात्मैवात्र कर्तृपदेनोपादेयः। न च जगदन्तःपातित्वेन पुरुषाणामपि परमात्मकर्तृकत्वं सिद्धमेव, किमर्थमेतत्पृथग्विशेषणमिति वाच्यम्; बालाकिना ब्रह्मत्वेनोक्तपुरुषाणामब्रह्मत्वख्यापनाय ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगत्कर्तृपरमेश्वरस्य वेदितव्यत्वेनोपदेशार्थत्वादिति भावः ॥१६॥

(१२३) जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥१७॥

ननु 'यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति' (कौ० ब्रा० ४।१९) इति वाक्यशेषे मुख्यप्राणे प्रसिद्धस्य प्राणशब्दस्य दर्शनेन 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते'''''''एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते' (कौ० ब्रा० ४।२०) इत्यत्र जीववाचकप्रज्ञात्मशब्दस्य च दर्शनेन वाक्यशेषगताज्जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च तयोरन्यतरस्यैवेह ग्रहणं न्याय्यं, न परमेश्वरस्येति चेत्तद्व्याख्यातम् प्रतर्दनाधिकरणे 'नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादिति सूत्रे। तथाविधाभ्युपगमेऽत्र जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति त्रिविधमुपासनं प्रसज्येत। तच्चैतद्वाक्यस्योपक्रमोपसंहाराभ्यां ब्रह्मविषयत्वसम्भवेऽन्याय्यम्। 'ब्रह्म ते ब्रवाणि' (कौ० ब्रा० ४।१) इत्युपक्रम्य 'सर्वान्पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद' (कौ० ब्रा० ४।२०) त्युपसंहारात्। न च तेनैवैतस्य गतार्थत्वमिति वाच्यम्; तत्र 'यस्य वैतत्कर्म' त्यस्य ब्रह्मविषयत्वेनानिर्धारणादिति भावः ॥१७॥

(१२४) अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥१८॥

किं चात्र प्रकरणे जीवपरामर्शमन्यार्थं ब्रह्मप्रतिपत्त्यर्थं जैमिनिराचार्यो मन्यते। अतो ब्रह्मप्रधानमेवेदं वाक्यं, न जीवप्रधानम्। कुतः? प्रश्नव्याख्यानाभ्याम्। सुप्तपुरुषप्रतिबोधनेन प्राणादिभिन्नं प्रतिबोध्य जीवव्यतिरिक्तविषयः प्रश्नः 'क्वैष एतद्बालाके! पुरुषोऽशयिष्ट, क्व वा एतदभूत्कुत एतदागादि' (कौ० ४।१९) त्यत्र दृश्यते। तथा "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति" (कौ० ४।१९) इति प्रतिवचनमपि तत्र दृश्यते। अतस्ताभ्यां सुषुप्तिकाले परमात्मन्येव जीवस्य स्वापः ततश्चैवागमनं भवतीति स एवात्र वेदितव्यतया श्रावितः। अपि चैके वाजसनेयिनो बालाक्यजातशत्रुसम्वादे 'य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदगात्' (बृ०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२।१।१६) इति प्रश्ने "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते" (बृ० २।१।१७) इत्यत्राकाशशब्दिते परमात्मन्येव जीवस्य स्वापं 'सर्व एते आत्मनो व्युच्चरन्ति' (बृ० २।१।२०) इति ततो व्युच्चरणं चामनन्तः तमेव कारणत्वेनावगमयन्ति । तस्मात्कौषीतकिवाक्यमपि परमात्मानमेव जगत्कारणमवगमयत्तत्रैव समन्वितमिति ॥१८॥

[६ वाक्यान्वयाधिकरणम् । सू० १९-२२]

पूर्वं 'ब्रह्म ते ब्रवाणी' त्युपक्रमबलाद्ब्रह्म परत्वं सन्दिग्धवाक्यस्याभिहितम् । एवं तर्हि "न वा अरे पत्युः कामाय" इत्यादिजीवोपक्रमबलान्मैत्रेयीब्राह्मणस्यजीवपरत्वमभ्युपेयमिति दृष्टान्त संगत्येदमाह—

(१२५) वाक्यान्वयात् ॥१९॥

अत्र पूर्वपक्षेऽस्य वाक्यस्य विज्ञानात्मपरत्वाद्ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । बृहदारण्यके 'न वा अरे पत्युः कामाय…'इत्युक्रस्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादि श्रूयते । तत्र किं द्रष्टव्यत्वादिना जीवोऽत्रोपदिश्यते, परमात्मा वेति संशये; पतिजायादिकं भोग्यभूतं सर्वं जगज्जीवार्थतया प्रियं भवतीति प्रियसंसूचितेनात्मना भोक्त्रोपक्रमसामर्थ्याज्जीवात्मोपदेशः प्रतिभातीति पूर्वः पक्षः । सिद्धान्तस्तु परमात्मैवात्र द्रष्टव्यत्वादिनोपदिष्टो ग्राह्यः । कुतः ? उपक्रमादिपर्यालोचनयाऽस्य वाक्यस्य परमात्मन्येवान्वयात् । तथाहि 'येनाहं नामृता स्यां किमहं तेन कुर्याम् यदेव भगवान् वेद तदेव मे ब्रूहीति, (बृ० २।४।३) इति अमृतत्वाशासानया मैत्रेय्या प्रार्थितो याज्ञवल्क्यः 'नान्यः पन्थाः' 'न कर्मणा' इत्यादिश्रुत्यन्तरे 'ज्ञानादेव तु कैवल्यमि' ति स्मृत्यन्तरे च प्रसिद्धममृतत्वसाधनमात्मविज्ञानमुपदिशति । आत्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' (बृ० २।४।६) इत्यनेन तदेवोपपादयति । 'दुन्दुभेर्हन्यमानस्य'(बृ० २।४।७) इति दुन्दुभ्यादिदृष्टान्तैस्तमेवाऽव्यतिरेकं द्रढमति । ऋग्वेदादिकारणत्वोपदेशेन तस्यैव नामरूपकर्मप्रपञ्चकारणतां प्रतिपादयन् एकायनप्रक्रियया चैनं परमात्मानमेव गमयति । अतः परमात्मैवात्र द्रष्टव्यत्वादिनोपदिष्टः इति गम्यते ॥१९॥

(१२६) प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥२०॥

नन्वेवं सति प्रियसंसूचितोपक्रमाद्विज्ञानात्मनो द्रष्टव्यत्वादिनो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन्निहितं जगदेव ग्राह्यमिति एतत्कर्मशब्दस्य प्रत्यक्षाद्यपस्थापितजगद्वाचित्वात् परमात्मैवात्र कर्तृपदेनोपादेयः। न च जगदन्तःपातित्वेन पुरुषाणामपि परमात्मकर्तृकत्वं सिद्धमेव, किमर्थमेतत्पृथग्विशेषणमिति वाच्यम्; बालाकिना ब्रह्मत्वेनोक्तपुरुषाणामब्रह्मत्वख्यापनाय ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगत्कर्तृपरमेश्वरस्य वेदितव्यत्वेनोपदेशार्थत्वादिति भावः ॥१६॥

(१२३) जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥१७॥

ननु 'यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति' (कौ० ब्रा० ४।१९) इति वाक्यशेषे मुख्यप्राणे प्रसिद्धस्य प्राणशब्दस्य दर्शनेन 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते'''''एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते' (कौ० ब्रा० ४।२०) इत्यत्र जीववाचकप्रज्ञात्मशब्दस्य च दर्शनेन वाक्यशेषगताज्जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च तयोरन्यतरस्यैवेह ग्रहणं न्याय्यं, न परमेश्वरस्येति चेत्तद्व्याख्यातम् प्रतर्दनाधिकरणे 'नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादिति सूत्रे। तथाविधाभ्युपगमेऽत्र जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति त्रिविधमुपासनं प्रसज्येत। तच्चैतद्वाक्यस्योपक्रमोपसंहाराभ्यां ब्रह्मविषयत्वसम्भवेऽन्याय्यम्। 'ब्रह्म ते ब्रवाणि' (कौ० ब्रा० ४।१) इत्युपक्रम्य 'सर्वान्पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद' (कौ० ब्रा० ४।२०) त्युपसंहारात्। न च तेनैवैतस्य गतार्थत्वमिति वाच्यम्; तत्र 'यस्य वैतत्कर्म' त्यस्य ब्रह्मविषयत्वेनानिर्धारणादिति भावः ॥१७॥

(१२४) अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥१८॥

किं चात्र प्रकरणे जीवपरामर्शमन्यार्थं ब्रह्मप्रतिपत्त्यर्थं जैमिनिराचार्यो मन्यते। अतो ब्रह्मप्रधानमेवेदं वाक्यं, न जीवप्रधानम्। कुतः? प्रश्नव्याख्यानाभ्याम्। सुप्तपुरुषप्रतिबोधनेन प्राणादिभिन्नं प्रतिबोध्य जीवव्यतिरिक्तविषयः प्रश्नः 'क्वैष एतद्बालाके! पुरुषोऽशयिष्ट, क्व वा एतदभूत्कुत एतदागादि' (कौ० ४।१९) त्यत्र दृश्यते। तथा "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति" (कौ० ४।१९) इति प्रतिवचनमपि तत्र दृश्यते। अतस्ताभ्यां सुषुप्तिकाले परमात्मन्येव जीवस्य स्वापः ततश्चैवागमनं भवतीति स एवात्र वेदितव्यतया श्रावितः। अपि चैके वाजसनेयिनो बालाक्यजातशत्रुसम्वादे 'य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदगात्' (बृ०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२।१।१६) इति प्रश्ने "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते" (बृ० २।१।१७) इत्यत्राकाशशब्दिते परमात्मन्येव जीवस्य स्वापं 'सर्व एते आत्मनो व्युच्चरन्ति' (बृ० २।१।२०) इति ततो व्युच्चरणं चामनन्तः तमेव कारणत्वेनावगमयन्ति। तस्मात्कौषीतकिवाक्यमपि परमात्मानमेव जगत्कारणमवगमयत्तत्रैव समन्वितमिति ॥१८॥

[६ वाक्यान्वयाधिकरणम् । सू० १९-२२]

पूर्वं 'ब्रह्म ते ब्रवाणी' त्युपक्रमबलाद्ब्रह्म परत्वं सन्दिग्धवाक्यस्याभिहितम् । एवं तर्हि "न वा अरे पत्युः कामाय" इत्यादिजीवोपक्रमबलान्मैत्रेयीब्राह्मणस्यजीवपरत्वमभ्युपेयमिति दृष्टान्त संगत्येदमाह—

(१२५) वाक्यान्वयात् ॥१९॥

अत्र पूर्वपक्षेऽस्य वाक्यस्य विज्ञानात्मपरत्वाद्ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। बृहदारण्यके 'न वा अरे पत्युः कामाय…' इत्युक्त्वस्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादि श्रूयते। तत्र किं द्रष्टव्यत्वादिना जीवोऽत्रोपदिश्यते, परमात्मा वेति संशये; पतिजायादिकं भोग्यभूतं सर्वं जगज्जीवार्थतया प्रियं भवतीति प्रियसंसूचितेनात्मना भोक्त्रोपक्रमसामर्थ्याज्जीवात्मोपदेशः प्रतिभातीति पूर्वः पक्षः। सिद्धान्तस्तु परमात्मैवात्र द्रष्टव्यत्वादिनोपदिष्टो ग्राह्यः। कुतः ? उपक्रमादिपर्यालोचनयाऽस्य वाक्यस्य परमात्मन्येवान्वयात्। तथाहि 'येनाहं नामृता स्यां किमहं तेन कुर्याम् यदेव भगवान् वेद तदेव मे ब्रूहीति, (बृ० २।४।३) इति अमृतत्वाशासानया मैत्रेय्या प्रार्थितो याज्ञवल्क्यः 'नान्यः पन्थाः' 'न कर्मणा' इत्यादिश्रुत्यन्तरे 'ज्ञानादेव तु कैवल्यमि' ति स्मृत्यन्तरे च प्रसिद्धममृतत्वसाधनमात्मविज्ञानमुपदिशति। आत्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' (बृ० २।४।६) इत्यनेन तदेवोपपादयति। 'दुन्दुभेर्हन्यमानस्य'(बृ० २।४।७) इति दुन्दुभ्यादिदृष्टान्तैस्तमेवाऽव्यतिरेकं द्रढयति। ऋग्वेदादिकारणत्वोपदेशेन तस्यैव नामरूपकर्मप्रपञ्चकारणतां प्रतिपादयन् एकायनप्रक्रियया चैनं परमात्मानमेव गमयति। अतः परमात्मैवात्र द्रष्टव्यत्वादिनोपदिष्टः इति गम्यते ॥१९॥

(१२६) प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥२०॥

नन्वेवं सति प्रियसंसूचितोपक्रमाद्विज्ञानात्मनो द्रष्टव्यत्वादिनो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदेशः कथमुपपद्येतेति ? अत्र ब्रूमः—"आत्मनि विज्ञाते सर्वं विज्ञातं भवति" (बृ० २।४।६) इति श्रुत्युक्तायाः प्रतिज्ञायाः सिद्धेर्लिङ्गमेतद्, यत्प्रियसंसूचितस्य विज्ञानात्मनो द्रष्टव्यत्वादिसंकीर्तनमित्याश्मरथ्य आचार्यो मन्यते। जीवब्रह्मणोरत्यन्तभिन्नत्वे परमात्मविज्ञाने जीवात्मनो विज्ञातत्वाभावेनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा हीयेत। अतः प्रतिज्ञासिद्ध्यर्थं जीवब्रह्मणोरभेदांशमादायोपक्रमणमिति भावः ॥२०॥

(१२७) उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥२१॥

अज्ञानदशायां देहादिसंघातोपहितस्य जीवस्य ब्रह्मणो भिन्नस्य "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" (छा० ८।१२।३) इति श्रुतिप्रतिपादितस्य देहादि कार्यकरणसंघातादुत्क्रमिष्यतः एवंभावात्=परमात्मैक्यभावाद्भविष्यद्भेदमादायेदमभेदेनोपक्रमणमिति औडुलोमिराचार्यो मन्यते ॥२१॥

ननु पूर्वमाश्मरथ्यमते जीवस्य परमात्मनोऽभिन्नत्वं कार्यकारण भावाभिप्रायकम्, औडुलोमिपक्षे तु संसारदशायां भेदो मुक्तिदशायां चाभेद इत्युक्तम्। तत्र क्वचिदपि तयोः पारमार्थिकभेदाभ्युपगमेऽवस्थान्तरेऽभेदायोगादिति चरमं समाधानमाह—

(१२८) अवस्थितेरिति काशकृत्स्नः ॥

विशुद्धस्यैव ब्रह्मणोऽविद्याकल्पितेन जीवभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति श्रुतितात्पर्यज्ञः काशकृत्स्नः आचार्यो मन्यते। अतो द्रष्टव्ये परब्रह्मणि मैत्रेयीब्राह्मणवाक्यं समन्वितमिति सिद्धम् ॥२

[७ प्रकृत्यधिकरणम्। सू० २३–२७]

पूर्वं 'जन्माद्यस्य यतः' इति सूत्रे जगत्कारणत्वादिना लक्षितं ब्रह्म। तत् किं घटादीनां मृदादिवदुपादानं, कुलालादिवन्निमित्तकारणमुभयकारणं वेति विशेषविचारं प्रति सामान्यज्ञानस्य हेतुत्वेन हेतुहेतुमद्भावसंगत्येदमाह—

(१२९) प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥२३॥

अत्र पूर्वपक्षे एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाया गौणत्वं, सिद्धान्ते तन्मुख्यत्वमिति फलभेदः। ब्रह्मणो जगत्कारणताऽत्र विचारविषयः तत्किं ब्रह्मणः केवलं निमित्तकारणत्वमेव, उतोपादानकारणत्वमपीति संशये; 'स ईक्षांचक्रे' (प्र० ६।३) 'स प्राणमसृजत' (प्र० ६।४) इत्यादिश्रुत्या ईक्षापूर्वकं जगत्कर्तृत्वश्रवणेन केवलं तत्र निमित्तकार

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वमेव प्रतिभाति, निमित्तकारणेषु कुलालादिषु तथादर्शनादिति पूर्वः पक्षः। सिद्धान्तस्तु प्रकृतिश्च—उपादानकारणं चकारान्निमित्तकारणं च ब्रह्माभ्युपगन्तव्यम्। कुतः ? प्रतिज्ञादृष्टान्तानुपरोधात्। एवं चाभ्युपगमे श्रौतौ प्रतिज्ञादृष्टान्तौ नोपरुध्येते। 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं' (छा० ६।१।२) 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मु० १।१।२) 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्" (बृ० ४।५।६) इत्यादिश्रुतिष्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा प्रतीयते। दृष्टान्तोऽपि "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं" (छा० ६।१।४) "यथा पृथिव्यामोषधयः सम्भवन्ति" (मु० १।१।७) "स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्शक्नुयाद् ग्रहणाय" (बृ० ४।५।८) इत्यादिश्रुतिषु दृश्यते। एतौ प्रतिज्ञादृष्टान्तौ ब्रह्मणो जगत्प्रकृतित्वसाधकौ यथासम्भवं प्रतिवेदान्तं प्रत्येतव्यौ। न ह्युपादानकारणेऽविज्ञाते सर्वविज्ञानसम्भवः, किन्तु तद्विपरीतम्, उपादानाभिन्नत्वात्कार्यस्य। अतः प्रतिज्ञादृष्टान्तानुपरोधादुभयकारणत्वं ब्रह्मणि सिद्धमिति भावः ॥२३॥

(१३०) अभिध्योपदेशाच्च ॥२४॥

किं च 'सोऽकामयत' 'तदैक्षत' इत्यादिना अभिध्योपदेशात्तत्रोभयकारणत्वमवगम्यते। तत्रापि कामनाश्रवणेन कर्तृत्वं 'बहुस्यामिति प्रत्यगात्मविषयकबहुभवनाभिध्यानेन प्रकृतित्वमिति विवेचनीयमिति॥२४

प्रकृतित्वे हेत्वन्तरमाह—

(१३१) साक्षाच्चोभयाम्नानात् ॥२५॥

इतश्च जगदुपादानं ब्रह्म। कुतः ? साक्षाद्ब्रह्मैव कारणमभ्युपेत्योभयोः प्रभवाप्यययोराम्नानात् 'सर्वाणि ह वा इमानि' भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति" (छा० १।९।१) इत्यादिश्रुतिषु। यतः प्रभवति, यत्र च लीयते तत्तस्योपादानं प्रसिद्धम्। यथा यवादीनां पृथिवीत्यर्थः ॥२५॥

(१३२) आत्मकृतेः परिणामात् ॥२६॥

इतोऽपि ब्रह्म जगदुपादानम्। कुतः ? "तदात्मानं स्वयमकुरुत" (तै० २।७) इत्यात्मानमिति द्वितीयया तत्र कर्मत्वं स्वयमकुरुत इत्यनेन कर्तृत्वं चाम्नायते।तथा चैकस्मिन् ब्रह्मणि कर्मत्वं कर्तृत्वं चाविरुद्धम्। ननु पूर्वं सिद्धस्य कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वात्मकं कर्मत्वं दुः-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पाद्यमिति चेन्न; परिणामात्। परिणामोऽत्र विवर्त्तः। तथा च सिद्धस्यापि शुक्तिरजतादिवद् विवर्तात्मना साध्यत्वात्कर्मत्वं संगच्छतेइत्यर्थः॥

(१३३) योनिश्च हि गीयते ॥२७॥

इतश्च ब्रह्म जगदुपादानम्, यत्किल—'यद्भूतयोनिं परिपश्यन्ति धीराः'(मु०१।१।६) 'कर्त्तारमीशं पुरुषं ब्रह्म योनिमि' (मु०३।१।३)इत्यादिश्रुतिषु प्रकृतिवाचकेन योनिशब्देनात्मा हि गीयते। पृथिवीयोनिरोषधवनस्पतीनामिति लोकोक्त्या योनिशब्दः प्रकृतिवाचकः समधिगम्यते। अतो ब्रह्मणः प्रकृतित्वं कर्तृत्वं च सिद्धमिति ॥२७॥

[८ सर्वव्याख्यानाधिकरणम्। सू० २८]

पूवम् 'ईक्षतेर्नाशब्दमि' त्यारभ्यपुनःपुनरशब्दत्वादिहेतुभिः सूत्रैरेव प्रधानकारणवादो निराकृतो यथा, न तथाऽण्वादिकारणवादो निराकृतः। तेषामपि जगत्कारणत्वबोधकशब्दानां श्रुतत्वादिति प्रत्युदाहरणसंगत्येदमाह—

(१३४) एतेन सर्वे व्याख्याता व्याख्याताः।

अत्रापि पूर्वपक्षे ब्रह्मणि वेदान्तानां समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र सामान्यतया सर्वे वेदान्ताः विचार विषयः। तत्र ब्रह्मण इव परमाणुशून्यादीनामपि क्वचित्कारणत्वं श्रूयते न वेति संशये; 'तं होवाच यं वै सोम्येतमणिमानं न निभालयसे एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति' (छा० ६।१२।२) 'असदेवेदमग्र आसीत्' (छा० ६।२।१) इत्यत्राण्वादीनामपि कारणत्वश्रवणात्तत्रापि कारणत्वमभ्युपेयमिति पूर्वः पक्षः। सिद्धान्तस्तु एतेन प्रधानकारणवादनिरासेन तत्रोक्तानामशब्दत्वाचेतनत्वैकविज्ञानप्रतिज्ञानुपपत्तीनां हेतूनामण्वादिकारणवादेऽपि साम्यात्सर्वे परमाण्वादिकारणवादा निराकृतत्वेन वेदितव्याः। न चात्राण्वादिशब्द विरोध इति वाच्यम्; सूक्ष्मत्वाभिप्रायेणात्मन्यणुशब्दप्रयोगादनभिव्यक्तनामरूपाभिप्रायेण तत्रासच्छब्दप्रयोगाच्च। व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्त्यर्थः। अतो जगत्कारणे सर्वज्ञे जिज्ञास्ये परमात्मन्येव श्रुतीनां समन्वयो, नान्यत्रेति सिद्धम् ॥२८॥

इतिश्रीब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥४॥

॥ इतिप्रथमोऽध्यायः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ द्वितीयाऽध्याये प्रथमः पादः ।

[अत्राविरोधाख्याध्यायस्य प्रथमपादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादिप्रयुक्ततर्कैश्च वेदान्तसमन्वयविरोधस्य परिहारः ।]

[१ स्मृत्यधिकरणम् । सू० १–२]

इत्थं प्रथमाध्याये प्रतिपादितस्य वेदान्तसमन्वयस्य स्मृत्यादिभिः प्रसक्तो विरोधोऽनेन परिहार्य इति विषयविषयिभावसंगत्याऽध्यायोऽयमारभ्यते । पूर्वस्मिन्नधिकरणे प्रधानवदण्वादिकारणवादेऽप्यशब्दत्वादिकमभिहितम् । अत्र प्रधानादिषु वैदिकशब्दवत्त्वाभावेऽपि कापिलादिस्मृतिरूपशब्दवत्त्वमाक्षिप्य परिह्रियते इत्याक्षेप संगत्येदमाह—

(१३५) स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥१॥

अत्र पूर्वपक्षे कापिलादिस्मृतिविरोधे पूर्वोक्तसमन्वयासिद्धिः सिद्धान्ते तदविरोधे तत्सिद्धिरिति फलभेदः । किमुक्तसमन्वयः सांख्यस्मृत्या विरुध्यते न वेति सन्देहे; परमर्षिप्रणीतानां शिष्टपरिगृहीतानां प्रधानकारणवादिसांख्यस्मृतीनामनवकाशदोषप्रसङ्गात्समन्वयो विरुध्यत इत्यतः सांख्यस्मृतिप्रसिद्धप्रधानाद्यनुरोधेन श्रुतयो नेया इति पूर्वः पक्षः । सिद्धान्तः-पूर्वोक्तरीत्या समन्वयविरोधो न युक्तः । कुतः? अन्यस्मृत्यनवकाशदोषप्रसङ्गात । तथाहि 'यत्तत्सूक्ष्ममविज्ञेयमि'ति परं ब्रह्म प्रकृत्य 'स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते' इति चोक्त्वा 'तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम !' इति । 'अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते' 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (भ० गी० ७।६) इत्यादिकानामीश्वरकारणवादिनीनां स्मृतीनामनवकाशदोषः प्रसज्यते । न च स्मृतिद्वयविरोधेऽन्यतरप्रामाण्यं कथं निर्धारणीयमिति वाच्यम्; 'विरोधेत्वनपेक्षं स्यादसति ह्यनुमानम्' (जै० १।३।३) इति नियमेन श्रुत्यविरुद्धानां स्मृतीनामेव प्रामाण्याभ्युपगमात् । अतोऽप्रामाण्यसांख्यस्मृत्या समन्वयो न विरुध्यते इति भावः ॥ १ ॥

इतश्च सांख्यस्मृत्यनवकाशप्रसङ्गो न दोष इत्याह—

(१३६) इतरेषां चानुपलब्धेः ॥२॥

इतरेषां सांख्यस्मृतिप्रसिद्धानां महदादितत्त्वानां लोके वेदे चानुपलब्धेः=अनुपलम्भान्न सांख्यस्मृत्यादौ प्रामाण्यमिति । तत्रापि भूतेन्द्रि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

याणां लोकवेदयोः प्रसिद्धत्वेऽप्यवशिष्टानां महदादीनामलोकवेदप्रसिद्ध-त्वात् स्मृत्यनवकाशप्रसङ्गो न युक्त इत्यर्थः ॥२॥

[२ योगप्रत्युक्त्यधिकरणम् । सू० ३]

पूर्वाधिकरणोक्तन्यायस्यैवात्राधिकरणेऽतिदेशत्वान्न पृथक्संगत्यपेक्षास्ति

(१३७) एतेन योगः प्रत्युक्तः ॥३॥

अत्र पूर्वपक्षे योगस्मृतिविरोधे समन्वयासिद्धिः। सिद्धान्ते तद-विरोधे तत्सिद्धिरिति फलभेदः। किमत्र पूर्वोक्तसमन्वयो योगस्मृत्या विरुध्यते न वेति विशये; 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २।४।५) 'तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्' (का० २।३।११) 'विद्यामेतां योगविधिं च कृत्स्नमि' (का० २।३।१८) त्यादिश्रुतिसिद्धस्य परमपुरुषार्थसाधनत्वेन लोके प्रसिद्धस्य शिष्टैः परिगृहीतस्य च योगस्य प्रतिपादकत्वेन प्रामाण्यात्तया स्मृत्या समन्वयो विरुध्यते इति पूर्व-पक्षः। सिद्धान्तस्तु—एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्युक्ता बोध्येत्यतिदेशः। श्रुत्यविरुद्धाष्टाङ्गयोगे प्रामाण्येऽपि श्रुति-विरुद्धे स्वतन्त्रप्रधानकारणवादे महदादिकार्यविषये च तात्पर्याभावाद-प्रामाण्यमिति भावः। एवमन्यासामपि स्मृतीनां यथाकथञ्चित् तत्त्व-ज्ञानोपकारकत्वेऽपि वेदान्तवाक्यमन्तरेण तत्त्वज्ञानस्यासम्भवितत्वा-त्तत्र तत्र निराकृतत्वं बोध्यम् ॥३॥

[३ विलक्षणत्वाधिकरणम् । सू० ४–१२]

पूर्वं श्रुतिविरुद्धसांख्यादिस्मृतौ मूलाभावादप्रामाण्यमभिहितम्, किन्तु तर्कस्य व्याप्तिपक्षधर्मतादिमूलकत्वेन लोकसिद्धत्वात्तेनास्त्येव विरोध इति प्रत्युदाहरणसङ्गत्येदमारभ्यते—

(१३८) न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥४॥

अत्र पूर्वपक्षे तर्कविरोधे समन्वयासिद्धिः, सिद्धान्ते तदविरोधे तत्सिद्धिरिति फलभेदः। आकाशादिकं न चेतनोपादानकं, कार्यत्वात् घटवदिति तर्केण ब्रह्मणि वेदान्तसमन्वयो विरुध्यते न वेति विशये पूर्वपक्षसूत्रमाह—जगच्चेतनोपादानकं नोपपद्यते। कुतः? अस्य विका-रस्य प्रकृतेर्विलक्षणत्वात्। ब्रह्मकार्यत्वेनाभिप्रेतं जगद् ब्रह्मविलक्षणम-चेतनमशुद्धं च दृश्यते। ब्रह्म च जगद्विलक्षणं चेतनं शुद्धं च श्रूयते। न च कार्यकारणयोर्विलक्षणत्वे प्रकृतिविकारभावो दृष्टः। नहि तन्तु-विलक्षणो घटः तन्तुप्रकृतिको दृश्यते। तस्मादचेतनत्वादिगुणकं जगत् चेतनत्वादिगुणवत्प्रकृतिकमभ्युपेयम्। ननु ब्रह्मजगतो र्विलक्षणत्वे हि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रमाणमित्यत आह—तथात्वं च शब्दात्। शब्दादपि तथात्वं प्रकृतिविलक्षणत्वमवगम्यते। 'विज्ञानं चाविज्ञानं च' (तै० २।६) इति शब्दः कस्यचिद्विभागस्याचेतनत्वं श्रावयँश्चेतनाद्ब्रह्मणोविलक्षणमचेतनं जगदवबोधयतीत्यर्थः ॥४॥

ननु 'मृदब्रवीत्' 'आपोऽब्रुवन्' (श० प० ब्रा० ६।१।३।२,४) 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छा० ६।२।३-४) 'ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुरि' (बृ० ६।१।७) त्यादिश्रुतिभिर्भूतेन्द्रियाणामपि चेतनत्वमवगम्यते इत्यत आह—

(१३९) अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥५॥

तु शब्दः शङ्कानिरासार्थः। पूर्वोक्तश्रुतिभिर्न भूतेन्द्रियाणां चेतनत्वमाशङ्कनीयम्। यतो मृदाद्यभिमानिनीनां देवतानां तत्र तत्र चेतनोचितेषु व्यवहारेष्वेष व्यपदेशः, न भूतेन्द्रियमात्रस्य। कुतः? विशेषानुगतिभ्याम्। 'विज्ञानं चाविज्ञानं चे' त्यादिश्रुत्या भोक्तॄणां भूतेन्द्रियाणां च चेतनाचेतनप्रविभागात्मको विशेषः पूर्वमभिहितः। नासौ सर्वचेतनतायामुपपद्येत। किं च "ता वा एता सर्वा देवता प्राणे निःश्रेयसं विदित्वा" (कौ० २।१४) इत्यत्र प्राणसंवादे देवताशब्देन चेतनवाचकेन तेषां विशेषः श्रूयते। एवम् 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' (ऐ० आ० २।४) इत्यादिश्रुतिः करणानुग्राहिकां देवतामनुगतां दर्शयति। अतो विशेषश्रवणान्मन्त्रार्थवादेतिहासपुराणादिभ्योऽनुगतिश्रवणाच्च तदभिमानिदेवतानामेव तत्र तत्र ग्रहणेनाचेतनस्य जगतो वैलक्षण्यान्न चेतनब्रह्मोपादानकत्वमिति ॥५॥

एवं सति पूर्वपक्षे सिद्धान्तमाह—

(१४०) दृश्यते तु ॥६॥

तुशब्दः पूर्वपक्षं व्यावर्तयति। यदुक्तं विलक्षणत्वान्नेदं जगद् ब्रह्मप्रकृतिकमिति? तन्न; दृश्यते हि लोकेचेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामचेतनत्वेन प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनां चोत्पत्तिः। ननूक्तस्थले प्रकृतिविकारयोः सादृश्याभावे कार्यकारणभावानुपपत्तिरिति चेन्न; अत्यन्तसादृश्येऽपि कार्यकारणत्वानुपपत्तेः समानत्वात्। न चैवं किञ्चित्सादृश्यमावश्यकमिति वाच्यम्; पुरुषादीनां गोमयादीनां च पार्थिवत्वस्य केशनखादिषु वृश्चिकादिषु चानुवृत्तिदर्शनेन किञ्चित्साम्यमिव ब्रह्मणः सत्तालक्षणस्य स्वभावस्या-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

काशादिष्वनुवर्तमानेनात्रापि किञ्चित्सादृश्यस्य विद्यमानत्वात्। तत्र
शेषलक्षणमननुवर्तमानं न दोषावहम्, अन्यथा समस्तप्रकृतिविका
भावोच्छेदप्रसङ्गः ॥६॥ सम्प्रति असत्कार्यवादमाक्षिप्य निराकुरुते—

(१४१) असदिति चेन्न; प्रतिषेधमात्रत्वात् ॥७॥

ननु चेतनं शब्दादिहीनं शुद्धं ब्रह्माशुद्धस्याचेतनस्य शब्दादिम
कार्यस्य कारणमिष्यते चेत्तर्हि प्रागुत्पत्तेरसत्कार्यवादोऽनिष्टस्तववेदा
न्तिनः प्रसज्येत इति चेन्न; प्रतिषेधमात्रत्वात्। प्रागुत्पत्तेः कार्यमसत्स्या
दिति त्वदुक्तप्रतिषेधस्य प्रतिषेध्याभावादित्यर्थः। कार्यस्थितिकाले
यथा कार्यं कारणात्मना सत्, तथा प्रागुत्पत्तेरपीति गम्यते। 'सर्वं
परादाद्योऽन्यत्रात्मनः सर्वं वेद' (बृ० २।४।६) तिश्रुत्याऽनुभूत्या
कार्यसत्तायाः कारणाव्यतिरेकोऽभ्युपेयते। अतो नासत्कार्यवादप्रस
क्तिरिति भावः ॥७॥ जगद्ब्रह्मणोः पूर्वोक्तं कार्यकारणभावमाक्षिपति—

(१४२) अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥८॥

ननु स्थौल्यादिधर्मकं जगत्कार्यं ब्रह्मोपादानकमित्यौपनिषदं दर्शन
मसमञ्जसम्। कुतः? अपीतौ तद्वत्प्रसङ्गात्। प्रलये लीयमानं का
स्वधर्मेण कारणं दूषयेदिति चेत्? तदा कारणस्य ब्रह्मणः कार्यवदशुद्ध
त्वादिदोषप्रसङ्गःस्यात्। किं चाविभागं गतस्य समस्तस्य कार्यस्य पुन
रुत्पत्तौ नियमाभावाद्भोक्तृभोग्यादिविभागानुत्पत्तिप्रसक्तेरपि त्वद्दर्शन
मसमञ्जसमिति बहुधाकल्पनीयम् ॥८॥ अत्रोच्यते—

(१४३) न तु दृष्टान्तभावात् ॥९॥

तुशब्दोऽवधारणार्थकः। नैवास्मद्दर्शने कारणे लीयमानं का
स्वधर्मेण कारणं दूषयेदित्यसमञ्जसमस्ति। कुतः? दृष्टान्तभावात्।
घटादिकार्यं हि स्वकारणे मृदि लीयमानं नात्मीयेन धर्मेण मृदं दूषयति
नापि सुवर्णविकारा रुचकादयोऽपीतौ सुवर्णमात्मीयेन दोषेण
संसृजन्तीति शतशो दृष्टान्तानां सद्भावात्। किं बहुना, यदि का
कारणे स्वधर्मेणाऽवतिष्ठेत, तर्हि अपीतिरेव न सम्भवेदिति। कार्य
कारणयोरनन्यत्वेऽपि कार्यस्य कारणात्मत्वं न कारणस्य कार्यात्मत्व
मित्यारम्भणाधिकरणे वक्ष्यमाणत्वादिति भावः ॥ ९ ॥ एवं स्वपक्षे
प्रतिवादिनोक्तान् दोषान्परिहृत्य तानेव प्रतिवादिपक्षे योजयति—

(१४४) स्वपक्षदोषाच्च ॥१०॥

प्रतिवादिना सांख्येनोद्भाविता दोषाः सांख्यपक्षेऽपि समानाः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कथम् ? विलक्षणत्वान्नेदं जगद्ब्रह्मोपादानकमिति दोषस्य शब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमे समानत्वात्। अत एव विलक्षणकार्योत्पत्त्यभ्युपगमे प्रागुत्पत्तेरसत्कार्यवादप्रसङ्गः प्रलये कार्यकारणाविभागाभ्युपगमे कारणे कार्यगतदोषप्रसङ्गश्च प्रधानकारणवादपक्षेऽपि समानः। वस्तुतस्तु प्रपञ्चसत्यत्ववादिनः सांख्यस्यैवैते दोषाः; नानिर्वचनीयवादिनो वेदान्तिनः, मम मते सृष्टिकाले इव प्रलयेऽपि कारणस्य निर्दुष्टत्वादिति भावः ॥१०॥

(१४५) तर्काऽप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥११॥

इतोऽपि नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यम् ? निरागमानां पुरुषोत्प्रेक्षामात्रनिबन्धनानां तर्काणां निरङ्कुशत्वेनाऽप्रतिष्ठानात्। एकेन तार्किकेण यत्नतोऽनुमितोऽप्यर्थोऽन्येन ततोऽपि श्रेष्ठतरेणान्यथानयनात्तर्कस्य प्रतिष्ठितत्वाभावान्न तेन समन्वयविरोधः शङ्कनीयः। नन्वन्यथाऽनुमेयम्-अप्रतिष्ठिततर्कादन्येन प्रतिष्ठिततर्केण समन्वयविरोधादिकमनुमेयमिति चेत् ? सर्वे तर्काः अप्रतिष्ठिताः, तर्कत्वात्सम्मतवदिति केषाञ्चित्तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तादृशां तर्काणामप्रतिष्ठितत्वकल्पनात्। किं चान्यत्र तर्कस्य प्रतिष्ठितत्वेऽपि प्रकृते लिङ्गादिहीने निर्विशेषे ब्रह्मणि तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षप्रसङ्गस्तदवस्थः। नहीदमागमातिरेकमानाऽयोग्यंसच्चिदानन्दघनमागममन्तरेणोत्प्रेक्षितुमपि शक्यम् ? रूपाद्यभावाद्धि प्रत्यक्षागोचरम्, लिङ्गाद्यभावाच्चानुमानाद्यविषयम् इत्यागमविरोधितर्कोऽप्रमाणमिति, तेन न समन्वयो विरुध्यते। तस्मादागमेन तदनुकूलतर्केण च चेतनं ब्रह्म जगतो निमित्तकारणं प्रकृतिश्चेति सिद्धम् ॥११॥

[४ शिष्टापरिग्रहाधिकरणम्। सू० १२]

अस्यातिदेशात्मकत्वात्पृथक् संगतिर्नापेक्ष्यते। अतोऽत्र प्रधानमल्लनिबर्हणन्यायेनोक्तन्यायस्यैवातिदेशः—

(१४६) एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥१२॥

अत्रापि पूर्वपक्षे तर्कविरोधात्समन्वयासिद्धिः, सिद्धान्ते तदविरोधात्तत्सिद्धिरिति फलभेदः। अत्र परमाण्वादिकारणवादव्यपाश्रिततर्कनिमित्तः समन्वयविरोधो विषयः। तत्र ब्रह्मोपादानत्वबोधकः समन्वयो वैशेषिकादितर्कनिमित्तन्यायेन विरुध्यते न वेति संशये; ब्रह्म, न

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगदुपादानं, विभुत्वादाकाशवदिति न्यायविरोधोऽस्तीति पूर्वः पक्ष
सिद्धान्तस्तु एतेन मन्वादिशिष्टैः सत्कार्यवादाद्यंशतः परिगृहीतप्रधानवादस्य निराकरणेन शिष्टापरिग्रहाः शिष्टैर्मन्वादिभिः केनचिदप्यंशेन परिगृहीताः परमाण्वादिकारणवादाः प्रतिषिद्धत्वेन व्याख्याता द्रष्टव्याः कुतः ? निराकरणकारणस्य तुल्यत्वात्। अत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं, तर्काणामप्रतिष्ठितत्वम्, अन्यथानुमानेऽप्यनिर्मोक्षः, आगमविरोधश्चेत्येवंजातीयकं तुल्यं निराकरणकारणमित्यर्थः। अतस्तार्किकन्यायेन विरोधो नास्तीति सिद्धम् ॥१२॥

[५ भोक्त्रापत्त्यधिकरणम्। सू० १३]

अस्तु ब्रह्मणि तर्कस्याप्रतिष्ठितत्वं, तथापि भोक्त्रादिजगद्भेदे प्रवृत्तप्रमाणस्य प्रतिष्ठितत्वात्समन्वयो विरुध्यते इति प्रत्युदाहरणसंगत्येदमाह—

(१४७) भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥१३॥

अत्र पूर्वपक्षे प्रत्यक्षविरोधात्समन्वयासिद्धिः. सिद्धान्ते तदविरोधात्तत्सिद्धिरितिफलभेदः। अत्र समन्वये प्रत्यक्षविरोधो विषयः। तत्राद्वितीयब्रह्मणो जगत्सर्गं प्रतिपादयन्समन्वयो विरुध्यते न वेति सन्देहे; जगतोऽद्वितीयब्रह्मोपादानत्वे भोक्त्रादिप्रपञ्चजातस्य ब्रह्मानन्यतया भोक्तुर्भोग्यात्मत्वापत्तिः भोग्यविषयादेर्भोक्त्रात्मत्वापत्तिरिति हेतोर्भोक्त्रादेः प्रत्यक्षसिद्धो मिथो विभागो न स्यादिति पूर्वः पक्षः सिद्धान्तस्तु स्याल्लोकवत्। जगतोऽद्वितीयब्रह्मोपादानकत्वेऽपि भोक्तृभोग्यादिप्रपञ्चस्य मिथो विभागः स्यात्, तथा लोके दृष्टत्वात्। यथा समुद्रात्मना तद्विकाराणां वीचीतरङ्गादीनामभिन्नत्वेऽपि वीचीत्वादिना परस्परं विभागोऽस्ति, तद्वत् तयोः कल्पितभेदसत्वाभ्युपगमेनाऽविभागापत्तिरूपः प्रत्यक्षविरोधो नास्तीति सिद्धम् ॥१३॥

[६ आरम्भणाधिकरणम्। सू० १४-२०]

पूर्वं परिणामवादाश्रयणेन 'स्याल्लोकवदित्यनेनावान्तरसमाधानमुक्तं, सम्प्रतिविवर्तवादाश्रितं परमं समाधानमुच्यते इत्येकफलसंगत्येदमाह—

(१४८) तदनन्यत्वमारम्भणशब्दादिभ्यः ॥१४॥

अत्र पूर्वपक्षे प्रत्यक्षसिद्धभेदस्य पारमार्थिकत्वे समन्वयासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्रापि समन्वये प्रत्यक्षादिविरोधो विषयः। अद्वैतब्रह्मवादिसमन्वयो भेदग्राहिप्रत्यक्षेण विरुध्यते न वेति विशये; विरुध्यते इति पूर्वः पक्षः। सिद्धान्तस्तु-कार्यमाकाश

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कारणं परं ब्रह्म, तस्मात्कारणात्परमार्थतोऽनन्यत्वं कार्यस्यावगम्यते। कुतः ? आरम्भणशब्दादिभ्यः। तथाहि—एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायां 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा० ६।१।१) "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" (छा० ६।८।७) "इदं सर्वं यदयमात्मा' (बृ० २।४।६) "ब्रह्मैवेदं सर्वमि' (मु० २।२।११) इत्यादीन्यात्मैकत्वपराणि वचनानि सन्ति। अन्यथैकविज्ञानेन सर्वविज्ञानं न सम्पद्येत। तस्माद् घटाकाशादीनां महाकाशानन्यत्वमिव भोक्तृभोग्यादिप्रपञ्चजातस्य ब्रह्मानन्यत्वं द्रष्टव्यम। न च वृक्षस्य वृक्षत्वेनैकत्वं शाखात्वेन नानात्वमिव ब्रह्मण्यप्युभयं स्यादितिवाच्यम्; दृष्टान्ते प्रकृतिमात्रस्य सत्यत्वावधारणेन विकारजातस्यानृतत्वावधारणेन च दार्ष्टान्तिकेऽपि तथात्वं स्यादिति भावः ॥१४॥

(१४६) भावे चोपलब्धेः ॥१५॥

इतश्च कारणादनन्यत्वं कार्यस्य, यत्किल मृदि सत्यां घटस्योपलब्धिवत्कारणस्य ब्रह्मणो भावे सत्त्वे कार्यस्य जगत उपलब्धेः। मृत्सत्त्वे घटसत्त्वं मृदभावे घटाभावः इत्यन्वयव्यतिरेकाभ्यां नहि मृद्व्यतिरेकेण घटो नाम कश्चिदुपलभ्यते। अतः कारणव्यतिरेकेण कार्यासत्त्वाद्ब्रह्मणोऽनन्यत्वं जगतः सिद्धमित्यर्थः ॥१५॥

इत्थं शब्दप्रत्यक्षप्रमाणाभ्यां जगतो ब्रह्मानन्यत्वं प्रसाध्य श्रुतार्थापत्त्या तत्साधयति—

(१५०) सत्त्वाच्चावरस्य ॥१६॥

इतोऽपि कारणात्कार्यस्यानन्यत्वं, यतः प्रागुत्पत्तेः "सदेव सोम्येदमग्र आसीत्" (छा० ६।२।१) इत्यत्रावरस्य कार्यस्य कारणात्मना कारणे सत्त्वं श्रूयते। अतः प्रागुत्पत्तेः कार्यस्य कारणानन्यत्वश्रवणान्यथानुपपत्त्योत्पत्त्यनन्तरमपि कार्यस्य कारणादनन्यत्वं सिद्धमिति ॥१६॥

प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्त्वमाक्षिप्य समाधातुमाह—

(१५१) असद्व्यपदेशान्नेति चेन्न; धर्मान्तरेण वाक्यशेषात् ॥१७॥

ननु "असद्वा इदमग्र आसीत्" (तै० २।७।१) "असदेवेदमग्र आसीत्" (छा० ३।१९।१) इत्यादौ क्वचित् प्रागुत्पत्तेः कार्यस्यासत्त्वव्यपदेशान्न तस्य कारणात्मना सत्त्वं सम्भवतीति चेन्न; नायमत्यन्तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासत्त्वव्यपदेशः, किं तर्हि ? व्याकृत-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नामरूपधर्मापेक्षयाऽव्याकृतनामरूपात्मकेन धर्मान्तरेण तदा कार्यस्यैवासत्त्वव्यपदेशः श्रूयते। कुतः? वाक्यशेषात्। अ सच्छब्देन निर्दिष्टस्यैव 'तत्सदासीदि' त्यत्र तच्छब्देन परामृश्य विशेषणात्। अतो वाक्यशेषादवगम्यते यत्किल धर्मान्तरे कार्यस्यासद्व्यपदेशात्कारणात्कार्यस्यानन्यत्वं सिद्धमिति भावः

(१५२) युक्तेः शब्दान्तराच्च ॥१८॥

किं च प्रागुत्पत्तेः कारणात्मना कार्यस्यासत्त्वे कुतो दधिघ भिः प्रतिनियतानि क्षीरमृदादीनि कारणान्युपादीयन्ते, न त तानि? असत्त्वाविशेषात्किञ्चिदेवोपादीयतामित्यादियुक्तेः, स्थस्यासद्व्यपदेशिनः शब्दस्योदाहृतत्वादन्यस्मात् 'सदेव सोम्य आसीत्' (छा० ६।२।१) इत्येवमादौ विद्यमानार्थकसच्छब्द हेतो प्रागुत्पत्तेः कार्यस्य कारणादनन्यत्वं सत्त्वं चेति सिद्धम्।

ननु मृद्घटौ मिथो भिन्नौ, मृदियं घटोऽयमित्येवंरूपेण भिन्न प्रतीतिविषयत्वादित्यादिनोक्तहेतौ व्यभिचरितत्वप्रदर्शनायाह-

(१५३) पटवच्च ॥१९॥

यथा संवेष्टितः पटो व्यक्तं न गृह्यते किमयं पटो वाऽन्यो वेति प्रसारणेनाभिव्यक्तो गृह्यते पट एवेति। एवं च यथा संवेष्टित पटस्य विलक्षणप्रतीतिविषयत्वेऽपि न तत्र भेदस्तथा मृद्घटयो प्रतीतिविषयत्वेऽपि न तयोर्भेदोऽवधारणीयः। अतः पूर्वोक्त नैव कारणात्कार्यमनन्यदित्यर्थः ॥१९॥

नन्वस्माभिः कार्यकारणभेदवादिभिः कार्यं कारणाद्भिन्नं साधकत्वात्तन्तुपटवदित्यनुमीयते। तत्र हेतोर्व्यभिचारमाह-

(१५४) यथा च प्राणादिः ॥२०॥

यथा च लोके प्राणायामादिना निरुद्धः प्राणापानादिः जीवनमात्रं कार्यं निर्वर्तयति, नाधिकं, प्रवृत्तस्तु प्राणादिर्जीवन माकुञ्चनप्रसारणादिकार्यमपि। नैतेन तत्र भेदोऽभ्युपेयते; स्वभावाविशेषात्। अतः कार्यकारणयोरनन्यत्वात् कृत्स्नस्य ब्रह्मकार्यत्वाच्चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा श्रौती सिद्धा भवति

[७ इतरव्यपदेशाधिकरणम्। सू० २१-२३]

पूर्वमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये कार्यकारणयो येन न्यायेन समर्थितम्, सम्प्रति तेनैव न्यायेन जीवब्रह्मणो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करणादयो जीवधर्मास्तत्रब्रह्मणिप्रसज्येरन्निति त्याक्षेपसंगत्येदमाह—

(१५५) इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥२१॥

अत्र पूर्वपक्षे जीवब्रह्मणोः पारमार्थिके भेदसिद्धे समन्वयासिद्धिः द्धान्ते तत्सिद्धिरिति फलभेदः। न ब्रह्म जगज्जन्मादि कारणम् यथा स्वानिष्टं कुतो जनयेदिति तर्केण जीवाभिन्नं ब्रह्म जगदुपादान- त समन्वये विरोधोऽस्ति न वेति सन्देहे; पूर्वपक्षमाह—

इतरव्यपदेशात् = इतरस्य जीवस्य 'स आत्मा तत्त्वमसि श्वेत ' (छा० ६।८।७) इतिश्रुत्या ब्रह्मत्वव्यपदेशात्, यद्वा इतरस्य ब्रह्मणः स्रष्टुरेवाविकृतस्य 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै० २।६) श्रुत्या कार्यानुप्रवेशेन शारीरात्मत्वव्यपदेशात् जीवाभिन्नस्य ब्रह्मणः त्वे जीवस्यैव सृष्टिजनकत्वाद् हिताकरणादिदोषप्रसक्तिः = नञ्व्य- सेनाहितजन्मजरामरणादिबहुविधानर्थदोषास्तत्र प्रसज्येरन्। अतः न्नः कर्ता सन् जीवो हितमेवात्मनः सौमनस्यकरं कुर्यान्नाहितं नजरामरणरोगाद्यनेकानर्थजालम्, तथा लोके दृष्टत्वात्। तस्माद- चेतनस्य जीवाभिन्नस्य ब्रह्मणोऽनिष्टजगज्जनकत्वायोगादुक्त- न्वयो विरुध्यते इति ॥२१॥ एवं सति पूर्वपक्षे सिद्धान्तमाह—

(१५६) अधिकं तु भेदनिर्देशात् ॥२२॥

तुशब्दः पूर्वपक्षव्यावर्तकः। यतः सर्वज्ञं सर्वशक्तियुतं नित्यशुद्धबुद्ध- स्वभावं ब्रह्म शारीरादधिकमन्यत् जगदुपादानं स्रष्टृ चेति वयं ; नातस्तत्र हिताकरणादिदोषाः प्रसज्यन्ते। कुतः? भेदनिर्देशात्। त्मा वा अरे द्रष्टव्यः' (बृ० २।४।५) 'सोऽन्वेष्टव्यः स विजिज्ञासि- ः' (छा० ८।७।१) इत्यादिना जीवब्रह्मणोः कल्पितस्य कर्तृकर्मादि- स्य प्रतिबोधनात्। 'तत्त्वमसि' इत्यादिनाऽभेदनिर्देशस्तु पारमा- ः। तदा जीवस्य संसारित्वं ब्रह्मणः स्रष्टृत्वं चेत्युभयमपगच्छति। स्तस्य मिथ्याज्ञानविलसितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन तत्वात्। अतोऽभेदस्य पारमार्थिकत्वे सति तत्र कल्पितभेदमादा- सर्वेषां हिताकरणादिदोषाणांप्रसक्तेर्वारणं समुपपद्यते इति भावः।२२।

(१५७) अश्मादिवच्च तदनुपपत्तिः ॥२३॥

यथा च लोके पृथिवीत्व सामान्यान्वितानामप्यश्मनां वज्रवैडूर्या- देन वैचित्र्यं, यथा चैकपृथिवीव्यपाश्रितानामपि चन्दनादीनां ष्पफलगन्धादिवैचित्र्यं, यथा चैकस्याप्यन्नस्य रक्तकेशनखादिकार्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वैचित्र्यं दृश्यते, एवमेकस्यैव ब्रह्मणः कार्यवैचित्र्यजनकत्वं युक्त इत्यतस्तदनुपपत्तिः परस्य ब्रह्मणो वैचित्र्यकार्याजनकत्वादिपरकल्पि दोषाणामनुपपत्तिरित्यभिप्रायः ॥२३॥

[८ उपसंहारदर्शनाधिकरणम् । सू० २४-२५]

पूर्वं जीवब्रह्मणोरौपाधिकं भेदमादाय तस्य जगत्स्रष्टृत्वे हि करणादिदोषः प्रत्युक्तः। अधुनोपाधितोऽपि ब्रह्मणो विभक्तं करणं नास्ति, तत्र नानात्वाभावादिति प्रत्युदाहरणसंगत्येदमाह—

(१५८) उपसंहारदर्शनान्नेति चेन्न; क्षीरवद्धि ॥२४॥

अत्र पूर्वपक्षे निम्नाङ्कितविरोधात्समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः।

एकमसहायं चेतनं ब्रह्म जगत उपादानं कर्तृ वा न सम्भवति असहायत्वात्सम्मतवदिति न्यायेनासहायाद्ब्रह्मणो जगत्सृष्टिं ब्रुवन् समन्वयो विरुध्यते न वेति सन्देहे; उपसंहारदर्शनात्=लोके कुलालादीनां घटपटादिकर्तॄणां घटादिनिर्माणाय मृद्दण्डचक्रसूत्रसलिलाद्यनेकसाधनोपसंहारदर्शनाद्, मृदो वोपादानकारणस्य स्वभिन्नकुलालादिसहायदर्शनात्तदुभयविलक्षणं तवाभिप्रेतं ब्रह्म साधनान्तरं विना जगत्कर्तृ कथं भवितुमर्हति ? अतः समन्वयो विरुध्यते एवेति चेत् पूर्वः पक्षः। सिद्धान्तस्तु नैष दोषः; हि यस्मात् क्षीरवत्=यथा क्षीरं जलं वाऽनपेक्ष्य बाह्यसाधनं स्वयमेव दधिहिमकरकादि परिणमते, तद्वद्ब्रह्मापि बाह्यसाधनमनपेक्ष्यैव जगद्रूपेण विव कथञ्चित् दध्यादिभावेन परिणममाने क्षीरादौ नियतौष्ण्यादीनाम कत्वेऽपि परिपूर्णशक्तिकं ब्रह्म न पूर्णतासम्पादनाय किमप्यपेक्षते च 'न तस्य कार्यं करणं च विद्यते' (श्वे० ६।८) इत्यादिश्रुतिरपि ऽसहायस्य निखिलजगत्कार्यकारित्वं दर्शयति। तस्मादेकस्य विचित्रशक्तियोगात्क्षीरादिवद्विचित्रपरिणाम उपपद्यते इतिभावः।

ननु न ब्रह्मोपादानं कर्तृ वा जगतो भवितुमर्हति, चेतनत्वे असहायत्वात्सम्मतवदित्याशङ्कायां चेतनदृष्टान्तेन तत्र व्यभिचार

(१५९) देवादिवदपि लोके ॥२५॥

लोक्यते ज्ञायतेऽर्थोऽनेनेति लोको मन्त्रार्थवादादिशास्त्रं वृद्धव्यवहारश्च। तत्र यथा देवाः पितर ऋषय इत्येवमादयो महाप्रभावाः अपि सन्तोऽनपेक्ष्यैव किञ्चिद्बाह्यं साधनमैश्वर्यविशेषयोगात्स्व ...त्रण नाना संस्थानानि शरीराणि, प्रासादादीनि, रथादीनि च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माणा उपलभ्यन्ते, मन्त्रार्थवादादिप्रामाण्यात्। तन्तुनाभश्च स्वत एव तन्तून् सृजति बलाका चान्तरेणैव शुक्रं गर्भं धत्ते। एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यसाधनं स्वत एव जगत्स्रक्ष्यतीत्यत्र को दोषः। कुलालादीनां देवादीनां च समानेऽपि चेतनत्वे न कुलालादिवद्देवादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते इति कुलालादिदृष्टान्तमात्रस्यात्र विवक्षितत्वादिति भावः ॥२५॥

[६ कृत्स्नप्रसक्त्यधिकरणम्। सू० २६–२९]

पूर्वं क्षीरादिवद्देवादिवच्चानपेक्ष्य बाह्यसाधनं ब्रह्म स्वयं परिणममानं जगतः कारणमित्युक्तौ ब्रह्मणः परिणामित्वभ्रमोत्पत्तिः, तन्निरसनमनेन क्रियते इति पूर्वाधिकरणस्य भ्रमोत्पादकत्वं कारणत्वमेतस्य च कार्यत्वमिति कार्यकारणभावसंगत्येदमाह—

(१६०) कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥२६॥

अत्र पूर्वपक्षे निम्नाङ्किततर्कविरोधात्समन्वयासिद्धिः, सिद्धान्ते तु तत्सिद्धिरिति फलभेदः। ब्रह्म जगदाकारेण न परिणमते, निरवयवत्वात्, सावयवस्यैव नानाकारेण परिणामदर्शनाच्चेति न्यायेन निरवयवाद्ब्रह्मणो जगत्सृष्टिं ब्रुवन्समन्वयो विरुध्यते न वेति विशये; सिद्धान्ती प्रष्टव्यः, किं ब्रह्म निरवयवं परिणमते सावयवं वा? आद्ये कृत्स्नस्य ब्रह्मणः कार्याकारेण परिणामप्रसक्तिः। तथा च निरवयवस्यैकदेशपरिणामासम्भवात्कृत्स्नपरिणामप्रसक्तौ मूलोच्छेदः प्रसज्येत। द्वितीये पूर्वोक्तदोषाभावेऽप्येकांशपरिणामेऽपरांशावस्थितिसम्भवेन 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं' (श्वे० ६।१९) 'दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः' (मु० २।१।२) इत्यादीनां ब्रह्मणो निरवयवत्वप्रतिपादकश्रौतशब्दानां व्याकोपो वा स्यात्, सावयवत्वेऽनित्यत्वप्रसङ्गश्चेति सर्वथाऽयं पक्षो घटयितुं न शक्यते। अतो ब्रह्मण उपादानत्ववादिसमन्वयो विरुध्यते इति पूर्वपक्षः ॥२६॥

(१६१) श्रुतेस्तु शब्दमूलत्वात् ॥२७॥

तुशब्दः पूर्वपक्षव्यावर्तकः। न तावदस्मत्पक्षे कृत्स्नप्रसक्तिर्दोषोऽस्ति। कुतः? श्रुतेः। ब्रह्मणो जगदुत्पत्तिश्रवणवत् "तावानस्य महिमा ततो ज्यायांश्च पुरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" (छा० ३।१२।६) इत्यादिश्रुतौ विकारव्यतिरेकेणाप्यवस्थानश्रवणात्। नापि निरवयवत्वशब्दव्याकोपोऽस्ति; उक्तश्रुत्या निरवयवत्वस्याप्यभ्यु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पगम्यमानत्वात्। न चास्य निरवयवत्वं कृत्स्नप्रसक्त्यभावश्चेत्युभयमेकत्र सम्भवतीति वाच्यम्; शब्दमूलत्वात्। शब्दप्रमाणकं हि ब्रह्म, नेन्द्रियप्रमाणकम्। शब्दश्चोभयम्प्रतिपादयति निरवयवत्वमकृत्स्नप्रसक्तिं च। न चोक्तो विरुद्धोऽर्थः शब्देनापि प्रत्यायितुं शक्यः; अविद्याकल्पितरूपभेदाभ्युपगमात्। तत्रैवाविद्याकल्पिताभ्यां नामरूपाभ्यां परिणामादिसर्वव्यवहारास्पदत्वं, स्वेन पारमार्थिकेन च रूपेण सर्वव्यवहारातीतत्वं च संगच्छते। वस्तुतस्तु परिणामोऽत्र विवर्तः, तेन न कश्चन दोषः। अतो यथाशब्दं कार्योपादानत्वं तद्व्यतिरेकेण सत्त्वं च ब्रह्मणोऽविरुद्धमिति भावः ॥२७॥

किं च जगतो ब्रह्मविवर्तत्त्वे स्वप्नप्रपञ्चवन्मायिकत्वात्तदुपादानत्वेऽपि ब्रह्मणः स्वप्नद्रष्टुरिव न कृत्स्नप्रसक्त्यादिदोषः स्यादित्याह—

(१६२) आत्मनि चैवं विचित्राश्च हि ॥२८॥

हि यतः एकस्मिन्नप्यात्मनि स्वप्नद्रष्टरि निरवयवे स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः 'न तत्र रथाः न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ० ४।३।१०) इतिश्रुत्याऽभिधीयते। लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते, तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैव विविधसृष्टिरित्यर्थः ॥२८॥

(१६३) स्वपक्षदोषाच्च ॥२९॥

किं च 'यश्चोभयोः समो दोषः' इति न्यायेन सांख्यादीनां निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमभ्युपगच्छतां पक्षेऽपि कृत्स्नप्रसक्त्यादिदोषः समानः। सत्त्वरजस्तमसां गुणानामवयवत्वेन सावयवत्वस्वीकारेऽनित्यत्वादिदोषप्रसक्तिः। परमाणुकारणवादिपक्षेऽपि परमाणुद्वयसंयोगेन क्रमशः द्व्यणुकादिसर्गाभ्युपगमे संयोगस्य व्याप्यवृत्तित्वे दृष्टविरोधः, अव्याप्यवृत्तित्वे सावयवत्वप्रसक्तिर्निरवयवत्वव्याकोपादिदोषश्च समान एव। अनाद्यनिर्वचनीयमायाशक्तियोगान्निरवयवस्य ब्रह्मणः सावयवस्य प्रपञ्चस्योपादानत्वेन न ब्रह्मवादे कश्चन दोष इत्युपपन्नो ब्रह्मकारणवादः॥२९

[१० सर्वोपेताधिकरणम्। ३०–३१]

पूर्वमेकस्यापि ब्रह्मणो विचित्रशक्तियोगाद्विचित्रविकारप्रपञ्चोपादानत्वे शङ्का परिहृता। साम्प्रतं विचित्रशक्तियुक्तत्वं समर्थयितुं पूर्वोत्तरयोर्विषयविषयिभावसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१६४) सर्वोपेता च तद्दर्शनात् ॥३०॥

अत्र पूर्वपक्षे ब्रह्मणि विचित्रप्रपञ्चजननशक्तियोगाभावे समन्वयासिद्धिः, सिद्धान्ते तत्सत्त्वे समन्वयसिद्धिरिति फलभेदः। अशरीरस्य न मायेति न्यायेन मायाशक्तियुक्तात्परमेश्वरात् जगत्सर्गं ब्रुवन्समन्वयो विरुध्यते न वेति विशये; विरुध्यते इति पूर्वपक्षे सिद्धान्तमाह—सर्वोपेता च तद्दर्शनात्। सर्वशक्तियुक्ता परा देवतेत्युभ्युपेयम्। कुतः? 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' (छा० ३।१४।४) इत्यादिश्रुतौ शरीरेन्द्रियादिरहितस्य तस्य सर्वशक्तियोगश्रवणादित्यर्थः ॥३०॥

(१६५) विकरणत्वान्नेति चेत्तदुक्तम् ॥३१॥

सर्वशक्तियुक्ता अपि देवादयः कार्यकरणसम्पन्ना एव तत्तत्कार्याय प्रभवन्तीति दर्शनात् 'अचक्षुष्कमश्रोत्रमवागमनः' (बृ० ३।८।८) इत्यादिना परदेवतायाः विकरणत्वावगमान्न तस्या जगत्कर्तृत्वं सम्भवतीति चेत्तदुक्तम्, यदत्र वक्तव्यम्, तत् 'न विलक्षणत्वात्...' 'देवादिवदपि लोके' इत्यादौ पूर्वमेवोक्तम्। श्रुत्येकसमधिगम्यमिदं ब्रह्म, न तु तर्कावगम्यम्। न च सर्वविशेषरहितस्य कथं सर्वशक्तियोगः सम्भवतीति वाच्यम्; अविद्याकल्पितभेदरूपोपन्यासेनाविरोधात्। तथा च 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' (श्वे० ३।१९) इतिश्रुतिरकरणस्यापि ब्रह्मणो मायाकल्पितं सर्वसामर्थ्ययोगं दर्शयति ॥३१॥

[११ नप्रयोजनवत्त्वाधिकरणम्। सू० ३२–३३]

पूर्वं श्रुतिबलात्सर्वशक्तिविशिष्टस्य परमेश्वरस्य जगत्कर्तृत्वमुक्तम्। अधुना तदाक्षिप्य समाधातुमाक्षेपसंगत्येदमाह—

(१६६) न प्रयोजनवत्त्वात् ॥३२॥

अत्र पूर्वपक्षे प्रयोजनाभावेन ब्रह्मणि जगत्कर्तृत्वाभावे समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्तते इति नियमात् अवाप्तकामात्सर्वज्ञाद्ब्रह्मणो जगत्सृष्टिरित्युक्तौ पूर्वोक्तसमन्वये विरोधोऽस्ति न वेति संशये; पूर्वः पक्षः—न ब्रह्मणो जगत्कर्तृत्वं सम्भवति, प्रयोजनवत्त्वात्। प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्त्वाभ्युपगमेन नित्याप्तकामस्य तस्य प्रपञ्चविरचने प्रयोजनाभावात्। नहि मन्दोपक्रमणमपि प्रवर्तनमात्मप्रयोजनमन्तरेण लोके क्वापि दृष्टम्। न च परमेश्वरस्य स्वीयं प्रयोजनं कल्पयितुं युक्तम्?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य नित्याप्तकामत्वश्रवणात्। अतश्चेतनाज्जगत्सृष्टिस्वीकारे समन्वय-विरोधोऽस्त्येवेति पूर्वः पक्षः ॥३२॥

(१६७) लोकवत्तु लीलाकैवल्यम् ॥३३॥

तुशब्दः पूर्वपक्षनिरासार्थः। यथा लोके कस्यचिदाप्तकामस्य राज्ञस्तदमात्यस्य वा लीलाया व्यतिरिक्तं प्रयोजनं विनैव केवलं लीलारूपाः प्रवृत्तयो दृश्यन्ते, यथा चोच्छ्वासनिःश्वासादयः प्रवृत्तयो बाह्यप्रयोजनमन्तरेणैव स्वभावाद्भवन्ति, तथा ब्रह्मणोऽपि विचित्रकार्यरचनायां प्रयोजनं विनैव केवलं लीलारूपा प्रवृत्तिर्भविष्यति। यद्यप्यस्माकमियं जगद्रचना गुरुतरसंरम्भेवाभाति, तथापि परमेश्वरस्य केवलमियं लीलैव। यदि नाम लोके लीलास्वपि किञ्चित्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत, तदपि नात्रोत्प्रेक्षितुं युक्तम्; आप्तकामत्वश्रुतेः। सृष्टिश्रुतिश्चाविद्याकल्पितनामरूपव्यवहारगोचरा, न परमार्थविषयेति नैव विस्मरणीयम् ॥३३॥

[१२–वैषम्यनैर्घृण्याधिकरणम्। सू० ३४–३६]

पूर्वं मायाशक्तियुक्तस्य ब्रह्मणो लीलया स्रष्टृत्वमुक्तम्, तदप्याक्षिप्य समाधातुमाक्षेप संगत्येदमाह—

(१६८) वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥३४॥

अत्र पूर्वपक्षे ब्रह्मणो विषमजगद्रचनायां हेतुत्वाभावे समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। लोके विषमसृष्टिकर्तुः सदोषत्वदर्शनेन निर्दोषाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विरुध्यते न वेति संशये; पूर्वपक्षमाह—किं ब्रह्म जीवकर्मसापेक्षं जगत्सृजति, निरपेक्षं वा? नाद्यः; अनीश्वरत्वप्रसङ्गात्। नापि द्वितीयः; वैषम्यनैर्घृण्यदोषप्रसक्तेः। तथाहि काँश्चिदत्यन्तसुखभाजो देवादीन् कुरुते, काँश्चिदत्यन्तदुःखिनः पश्वादीन्, काँश्चिन्मध्यमभोगभाजो मनुष्यादीनिति वैषम्यम्। तथा दुःखयोगविधानात्सर्वप्रजोपसंहाराच्च खलजनैरपि जुगुप्सितं नैर्घृण्यमिति तस्य सावद्यत्वप्रसक्त्या न निर्दुष्टस्य ब्रह्मणो जगत्कर्तृत्वमित्युक्तौ सिद्धान्तमाह—वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते। कुतः? सापेक्षत्वात्। प्राणिनां धर्माधर्मयोः सापेक्षत्वात्, प्राणिकर्मनिरपेक्षस्य तस्य जगन्निर्मातृत्वस्वीकारे वैषम्यादिदोषः स्यात्। यथा लोके व्रीहियवादिसृष्टौ पर्जन्यस्य साधारणकारणत्वेऽपि तत्र तत्र वैषम्यकारणं तत्तद्बीजगतमसाधारणं सामर्थ्यमेव। एवमीश्वरस्य देवादिसृष्टौ साधारणकारणत्वं, देवमनुष्यादिवैषम्यकारण

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तु तत्तज्जीवगतान्येवासाधारणानि कर्माणीति न तत्र वैषम्यनैर्घृण्यदोष-प्रसक्तिः। न चोक्तः सापेक्षत्वेऽनीश्वरत्वप्रसङ्ग इति वाच्यम्; भृत्यादि-सेवासापेक्षस्य राज्ञः फलदातृ राजत्वदर्शनात्। ननु कथमवगम्यते सापेक्षः परमेश्वरो विषमं संसारं निर्मिमीते इत्यत आह—तथाहि दर्शयति श्रुतिः—एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते ... ...(कौ० ब्रा० ३।८) "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" (बृ० ३।२।१३) 'ये यथा मां प्रपद्यन्ते ताँस्तथैव भजाम्यहम्' (गी० ४।११) इत्येवं जातीयका स्मृतिरपि ॥३४॥

(१६९) न कर्माविभागादिति चेन्नानादित्वात् ॥३५॥

ननु 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि' (छा० ६।२।१) त्यादिश्रुत्या प्राक्सृष्टेरविभागावधारणान्नास्ति तदानीं कर्म, यदपेक्ष्य विषमा सृष्टिः स्यात्। अतः प्राग्विभागाद्वैचित्र्यनिमित्तस्य कर्मणोऽभावात्तुल्यैव सृष्टिराद्या प्राप्नोतीति चेन्न; अनादित्वात् संसारस्य बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तेरविरोधादिति भावः ॥३५॥ ननु कथं संसारस्यानादित्वमभ्युपेयमित्यत आह—

(१७०) उपपद्यते चाप्युपलभ्यते च ॥३६॥

उपपद्यते च संसारस्यानादित्वम्। अन्यथाऽकस्मात्संसारस्योत्पत्तेर्मुक्तानामपिपुनर्जन्मादिप्रसङ्गादकृताभ्यागमप्रसङ्गाच्च। ईश्वरः केवलाऽविद्या वा सुखदुःखादिवैषम्यकारणमित्यभिधानमसङ्गतम्; तयोरेकरूपत्वात्। उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतिस्तावत् "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" (ऋ० सं० १०।१९०।३) इत्यादिना सर्गस्य पूर्वकल्पसद्भावं दर्शयति। "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा" (गी० १५।३) इत्यादि स्मृतावपि संसारस्यानादित्वमुपलभ्यते। एवं पुराणेतिहासादिष्वपि अतीतानागतानां च कल्पानां परिमाणाभावः प्रतिष्ठापितः इत्यर्थः॥३६॥

[१३ सर्वधर्मोपपत्त्यधिकरणम्। सू० ३७]

पूर्वं यथा विषमसृष्टिप्रयोजकप्राणिकर्मसहकृतस्य ब्रह्मणो विषमसृष्टिकारणत्वमुक्तं; न तथोपादानत्वप्रयोजका गुणाः सन्तीति। अतो ब्रह्मणस्तादृशगुणवत्त्वाभावान्न जगत्कारणत्वं तत्रास्तीति प्रत्युदाहरणसंगत्येदमाह—

(१७१) सर्वधर्मोपपत्तेश्च ॥३७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र पूर्वपक्षे ब्रह्मणो जगदुपादानत्वप्रयोजकगुणवत्त्वाभावे समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। ब्रह्म न जगदुपादानं, निर्गुणत्वात्, यथा गन्धः इति न्यायेन निर्गुणाद्‌ब्रह्मणो जगत्सृष्टिप्रतिपादकस्य समन्वयस्य विरोधोऽस्ति न वेति संशये; विरोधोऽस्तीति पूर्वः पक्षः। सिद्धान्तस्तु-जगत्कारणत्वप्रयोजका ये सर्वज्ञत्वादयः कारण धर्माः, तेषां सर्वधर्माणां पूर्वोक्तरीत्या तत्र ब्रह्मण्येवोपपत्तेरस्ति ब्रह्मैव निखिलजगत्कारणमित्यर्थः। निर्गुणस्य ब्रह्मणः परिणामित्वोपादानत्वाभावेऽपि विवर्त्तोपादानत्वाभ्युपगमे नोक्तन्यायविरोधः। 'सर्वज्ञं सर्वशक्ति महामायं च ब्रह्मे' ति निर्धारितं पूर्वम्। तस्मादनतिशङ्कनीयमौपनिषदं दर्शनमिति ॥३७॥

इतिब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरि विरचितायां विद्यानन्दवृत्तौ द्वितीयाध्यायस्य प्रथमः पादः ॥१॥

द्वितीयाध्याये द्वितीयः पादः।

[अत्रपादे सांख्यादिमतानां दुष्टत्वप्रदर्शनम्]

इत्थं सम्यग्ज्ञानोत्पादके वेदान्तवाक्यानां समन्वये प्रतिवादिपरिकल्पितान्दोषान्निरस्य स्वपक्षः स्थापितः। सम्प्रति निर्दोषे ब्रह्मात्मैक्यज्ञाने मुमुक्षूणां निःसन्दिग्धप्रवृत्तिसिद्धयर्थं सांख्यादिमतनिराकरणप्रधानोऽयं पादः प्रारभ्यते। तत्र यद्यपि मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तं, कृतं परपक्षनिराकरणेन परद्वेषकरेण ? तथापि महाजनपरिगृहीतानि सांख्यादिदर्शनानि सम्यग्दर्शनोपायत्वेन प्रवृत्तानीति स्यात्केषाञ्चिन्मन्दमतीनां भ्रमः, तथा युक्तिगाढत्वसम्भवेन सर्वज्ञभाषितत्वाच्च तेषु श्रद्धा स्यादित्यतस्तदसारतोपपादनाय प्रयतामहे। एवं च समन्वयविरोधनिरासेन सहस्वपक्षस्थापनपरेण प्रथमपादेन सह परमतनिराकरणपरस्यास्य द्वितीयपादस्योपजीव्योपजीवकभावसंगत्येदमाह—

[१ रचनानुपपत्त्यधिकरणम् । सू० १–१०]

'सर्वधर्मोपपत्तेश्चे (ब्र० २।१।३७) त्यनेन सर्वधर्मोपपत्त्यधिकरणेन ब्रह्मणि जगत्कारणसर्वज्ञत्वादीनां कारणधर्माणामुपपत्तिरभिहिता; तेषामुपपत्तिः प्रधान एव किं न स्यादित्याक्षिप्यत्र समाधीयते इत्याक्षेपरूपावान्तरसंगत्याऽधिकरणमिदमारभते—

(१७२) रचनानुपपत्तेश्च नानुमानम् ॥१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र पूर्वपक्षे सांख्ययुक्तिविरोधात्प्रथमाध्यायोक्तसमन्वयासिद्धिः सिद्धान्ते तदविरोधात्समन्वयसिद्धिरिति पूर्वपक्षसिद्धान्तयोः फलभेदः। सांख्यशास्त्रपरिकल्पितमचेतनं त्रिगुणात्मकं प्रधानं जगदुपादानमिति सांख्यसिद्धान्तोऽत्र विचारविषयः। स किं प्रमाणमूलो भ्रान्तिमूलो वेति संशये; सर्वं जगत्, सुखदुःखमोहात्मकवस्तूपादानकं, सुखाद्यन्वितत्वात्, मृदन्वितघटादिवत्। यथा घटादिकार्यभेदा मृदात्मनान्वीयमाना मृत्कार्या लोके दृष्टाः, तथा सर्वे एव बाह्याध्यात्मिककार्यविशेषाः सुखदुःखमोहात्मनान्वीयमानाः सुखाद्यात्मककारणपूर्वका भवितुमर्हन्ति, इत्यनुमानेन यत्सुखाद्यात्मकं प्रसिद्धं, तदेव त्रिगुणात्मकमचेतनं प्रधानमित्यतः सांख्यसिद्धान्तःप्रमाणमूलक इति पूर्वपक्षः। सिद्धान्तस्तु—न सांख्योक्तानुमानसिद्धं प्रधानं जगदुपादानं भवितुमर्हति। कुतः? रचनानुपपत्तेः, चशब्देनान्वयाद्यनुपपत्तेरिति हेतोः समुच्चयः। तथाहि स्रष्टव्यज्ञानशून्यादचेतनात् प्रधानादनेकविधविचित्ररचना नोपपद्यते, लोके गेहप्रासादशयनासनादिरचनाः प्रेक्षावद्भिः कुशलशिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्याः निर्मिताः दृश्यन्ते। तथा सुखाद्यन्वितत्वमपि जगतो नास्ति, सुखादीनामान्तरत्वप्रतीतेः शब्दादीनां बाह्यत्वप्रतीतेश्च। शब्दाद्यविशेषेऽपि भावनाभेदात्सुखादिविशेषोपलब्धेः। अतो न प्रामाणिकः सांख्यसिद्धान्तः ॥१॥

ननु 'भेदानां परिमाणात्, समन्वयाच्छक्तितः, प्रवृत्तेश्च। कारणकार्यविभागादविभागाद्वैश्वरूपस्य ॥' (सां०का० १५) इत्यत्र शक्तितः प्रधानस्य महदादिजगद्रूपेण प्रवृत्तिः सम्भवतीति चेत्तत्राह—

(१७३) प्रवृत्तेश्च ॥२॥

पूर्वसूत्रात् नानुमानमनुपपत्तेश्चेत्यनुवर्तते। प्रधानस्याचेतनस्य साम्यावस्थातः प्रच्युतिरूपप्रवृत्तेश्चेतनप्रेरणमन्तरेणानुपपत्तेर्न प्रधानं जगत्कारणत्वेनानुमेयम्। लोके ह्यचेतनरथादीनां प्रवृत्तेः चेतनाधीनत्वदर्शनात्। न च त्वन्मतेऽपि केवलस्य चेतनस्याप्रवर्तकत्वदर्शनेन प्रवृत्त्याश्रयदेहादियुक्तस्यैव रथादिप्रवर्तकत्वदर्शनेन चाचेतनस्यैव देहस्य रथादिप्रवर्तकत्वमिति वाच्यम्; काष्ठादिसमाश्रितवह्नेर्दाहप्रकाशरूपकार्यदर्शनेऽपि अन्वयव्यतिरेकाभ्यां वह्नेरेव दाहकत्वादिस्वीकारात्। न च देहादिसंयुक्तस्याप्यात्मनो विज्ञानमात्रस्वरूपतया प्रवर्तकत्वमनुपपन्नमिति वाच्यम्; अयस्कान्तवद्रूपादिवच्च प्रवृत्तिशून्यस्यापि प्रवर्तकत्वोपपत्तेः। न चैकत्वात्प्रवर्त्याभावे प्रवर्तकत्वानुपपत्तिरिति वाच्यम्;

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्राविद्याप्रत्युपस्थापितनामरूपमायावेशवशेन प्रवर्तकत्वोपपत्तेः। तस्मात्सर्वज्ञकारणत्वे प्रवृत्तिः सम्भवति न त्वचेतन कारणत्वे ॥२॥

अन्यत्र व्यभिचारशङ्कां परिहरति—

(१७४) पयोऽम्बुवच्चेत्तत्रापि ॥३॥

ननु "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य" (सां० का० ५७) त्यत्र यथा क्षीरमचेतनं स्वभावतो वत्सविवृद्ध्यर्थं प्रवर्तते, यथा वा जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते; एवमचेतनं प्रधानमपि पुरुषभोगापवर्गसाधनाय स्वयमेव प्रवर्तिष्यते इति चेत्? तत्रापि परमात्मैव प्रेरकः श्रूयते, 'योऽप्सु तिष्ठन् योऽपोऽन्तरो यमयति' (बृ० ३।७।४) इत्यादिना। तथोभयवादिप्रसिद्धे रथादावचेतने केवले प्रवृत्त्यदर्शनेन पयोऽम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्त्यनुमाने न व्यभिचारशङ्कास्तीति भावः। तस्मात्साध्यकोटिनिक्षिप्तत्वात्पयोऽम्बुवदित्यादि न विचार विषयः, चेतनधेन्वाः वत्सस्नेहेच्छया पयसः प्रवर्तकत्वोपपत्तेः. वत्सचोषणेन पयसश्चाकृष्यमाणत्वात्, अम्बुस्यन्दनस्य निम्नभूम्याद्यपेक्षत्वाच्चाचेतनप्रवृत्तौ सर्वत्रैव चेतनापेक्षत्वमभ्युपेयम् ॥ ३ ॥ ननु प्रधानप्रवृत्तौ चेतनानपेक्षत्वेऽपि धर्माद्यपेक्षया तस्य प्रवृत्तिः स्यादित्याशङ्क्याह—

(१७५) व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥४॥

सांख्यमते गुणाः साम्येनावस्थिताः प्रधानं, तद्व्यतिरेकेण प्रधानस्य प्रवृत्तिनिवृत्त्योः सहकारिकारणान्तरस्यानवस्थितेः। पुरुषस्यासङ्गोदासीनतया प्रधानप्रवृत्तिनिवृत्त्योरनपेक्षत्वाभ्युपगमात्। ईश्वरस्य तु सर्वज्ञत्वात्सर्वशक्तिमत्वान्महामायत्वाच्च प्रवृत्तिनिवृत्ती न विरुध्येते ॥४॥

ननु सहकार्यभावेऽपि तृणादेः स्वाभाविकदुग्धादि परिणामवत् प्रधानस्यापि महदाद्याकारेण परिणामः स्वाभाविकः स्यादित्यत आह—

(१७६) अन्यत्राभावाच्च न तृणादिवत् ॥५॥

यथा तृणादिकं निमित्तान्तर मनपेक्ष्यमेव क्षीराकारेण परिणमते, तद्वत् प्रधानमपि महदादिरूपेण परिणमतामिति चेन्न; अन्यत्राभावात्। धेन्वादेरन्यत्र वलीवर्दादौ क्षीरभावस्याभावात्। तस्माद् धेन्वादिसापेक्षमेव तृणादिकं क्षीरं भवति, न निरपेक्षम्। अन्यथा तस्य वलीवर्दादावपि क्षीरभाव प्रसङ्गात्। अतो न तृणादिवत्प्रधानस्य महदादिपरिणामः॥५॥

अस्तु वा प्रधानस्य स्वाभाविकी प्रवृत्तिस्तथापि दोष इत्याह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१७७) अभ्युपगमेऽप्यर्थाभावात् ॥६॥

प्रधानस्य किञ्चिद्बाह्यमनपेक्ष्य स्वतः प्रवृत्त्यभ्युपगमेऽपि पुरुषप्रयोजनस्याभावप्रसङ्गात्। न चेष्टापत्तिः ? प्रधानमचेतनं चेतनस्य भोगापवर्गात्मकं पुरुषार्थं साधयितुमेव प्रवर्तते इति स्वसिद्धान्तविरोधादिति भावः। न च सहकारिणोऽनपेक्षत्वेऽपि तत्प्रवृत्तौ प्रयोजनमपेक्ष्यते एवेति वाच्यं; प्रधानप्रवृत्तिनिमित्तस्य प्रयोजनस्य विवेक्तुमशक्यत्वात्। असङ्गनिर्विकारपुरुषस्य भोगश्चेत् ? अनिर्मोक्षप्रसङ्गः। अपवर्गश्चेत् ? प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात्प्रवृत्तिरनर्थिका स्यात्। उभयार्थताभ्युपगमेऽपि भोक्तव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसङ्गस्तदवस्थः। प्रधानस्याचेतनत्वात्पुरुषस्य निर्मलत्वनिष्कलत्वाभ्यां न तयोरौत्सुक्यमस्ति, यन्निवृत्तये तत्प्रवृत्तिः स्यादिति भावः ॥६॥

ननु "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" (सां० का० २१) इति पङ्ग्वन्धन्यायेन स्वयमप्रवर्तमानोऽपि पुरुषः प्रधानप्रवर्तकः स्यादित्याशङ्क्याह—

(१७८) पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥

लोके यथा कश्चिद्दृक्शक्तिसम्पन्नः प्रवृत्तिशक्तिविहीनः पङ्गुरन्यमन्धं प्रवृत्तिशक्तिमन्तं प्रवर्तयति, यथा वाऽयस्कान्तोऽश्मा स्वयमप्रवर्तमानोऽपि सन्निधिमात्रेणायः प्रवर्तयति, तथैव पुरुषः प्रधानप्रवर्तकः स्यादिति चेत् ? तथापि प्रधानस्य पुरुषप्रेर्यत्वे तत्प्रवृत्तौ स्वातन्त्र्याभ्युपगमविरोधः, पुरुषस्य प्रवर्तकत्वे कौटस्थ्यौदासीन्यहानिप्रसङ्गश्चेत्यादिदोषाणामनिर्मोक्षः स्यात्। किञ्च प्रधानस्याचैतन्यात्पुरुषस्य चौदासीन्यादन्यस्य तयोः सम्बन्धयितुरभावात् सम्बन्धानुपपत्तिः। तत्सम्बन्धनिमित्तयोग्यतास्वीकारे तदनुच्छेदादनिर्मोक्षप्रसङ्गः। न च परमात्मनोऽपि प्रवर्तकत्वे पूर्वोक्तदोषः स्यादिति वाच्यम्; तस्य स्वरूपतयौदासीन्यं मायाश्रयतया च प्रवर्तकत्वमित्यदोषात् ॥७॥ किं च—

(१७९) अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

गुणत्रयसाम्यावस्थाकस्य प्रधानस्याङ्गाङ्गिभावानुपपत्तेरपि न तस्य महदादिरूपेण प्रवृत्तिः। अतो गुणानां साम्यावस्थातः प्रच्युतिमन्तरेणाङ्गाङ्गिभावानुपपत्त्या कार्यानुदयप्रसङ्गः ॥८॥

ननु गुणानामनपेक्षस्वभावत्वान्न प्रच्युतिरित्यत्रासिद्धिमाशङ्क्य परिहरति—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१८०) अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

न मयाऽनपेक्षस्वभावाः कूटस्था गुणा अनुमीयन्ते; प्रमाणाभाव अन्यथा प्रकारान्तरेण तु कार्यवशेन गुणानां स्वभावोऽभ्युपेयते। तस् त्साम्यावस्थायामपि वैषम्योपगमयोग्याः सन्त्येव गुणा इत्येवमनुमि न प्रागुक्तदोषप्रसङ्ग इति चेन्न; ज्ञशक्तिवियोगात्। गुणानां ज्ञानशक्तिरा त्वात् रचनानुपपत्यादयः पूर्वोक्तदोषास्तदवस्था एव। तत्र ज्ञानशक्त नुमाने प्रतिवादित्वाभावप्रसङ्गो ब्रह्मवादप्रसङ्गश्च स्यादिति भावः॥

इतश्चासङ्गतं सांख्यमतमित्याह—

(१८१) विप्रतिषेधाच्चासमञ्जसम् ॥१०॥

सांख्याः क्वचित् त्वङ्मात्रमेव ज्ञानेन्द्रियमेकमनेकरूपादिग्रहणसम कर्मेन्द्रियाणि पञ्च, सप्तमं च मन इति सप्तेन्द्रियाणि, क्वचिदेकाद क्वचिन्महतस्तन्मात्रसर्गमुपदिशन्ति, क्वचिदहंकारात्, क्वचित्त्रीण्यन्त करणानि संगिरन्ते, क्वचिद्बुद्धिरेवैकमिति मिथो विप्रतिषेधादसमञ्ज सांख्यमतम्। ईश्वरकारणवादिश्रुतिस्मृत्यादिविरोधः प्रसिद्ध एव। अ सांख्यसिद्धान्तो भ्रान्तिमूलकत्वादेव मुमुक्षुभिरुपेक्षणीय इति ॥१०॥

[२ महद्दीर्घाधिकरणम् ११]

पूर्वं प्रधाननिष्ठाऽशब्दत्वादिगुणानां प्रपञ्चेऽन्वयादर्शनेन प्रधा कारणवादो निराकृतः। सम्प्रति चेतनत्वादिब्रह्मगुणानां प्रपञ्चेऽनन्व तत्र ब्रह्मोपादानकत्वं न स्यादिति दृष्टान्तसंगत्येदमाह—

(१८२) महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥११॥

अत्र पूर्वपक्षे वैशेषिकनयविरोधात्प्रथमाध्यायोक्तसमन्वयासि सिद्धान्तेऽविरोधात्तत्सिद्धिरिति फलभेदः। चेतनाद्ब्रह्मणो जगत्सर्गो समन्वयोऽत्राधिकरणे विचारविषयः। तत्र वैशेषिकाणामेषा प्रक्रि यत्किल कारणद्रव्यसमवायिणो गुणाः कार्यद्रव्यनिष्ठं स्वसमानजा गुणान्तरमारभन्ते, यथा शुक्लेभ्यस्तन्तुभ्यः शुक्लपटोत्पत्तिर्दृ तद्विपरीतं च न दृश्यते। अतश्चेतनस्य ब्रह्मणो जगत्कारणत्वस्वीक तत्कार्येऽपि जगति चैतन्यं दृश्येत, न तु तथा दृश्यते। तस्मान्न चे ब्रह्म जगत्कारणमिति न्यायेन पूर्वोक्तः समन्वयो विरुध्यते न वे सन्देहे; विरुध्यते इति पूर्वःपक्षः। सिद्धान्ते न विरुध्यते। कुतः ? ह्र परिमण्डलाभ्यां ह्रस्वत्वपारिमाण्डल्यपरिमाणविशिष्टाभ्यां द्व्यणु परमाणुभ्यां यथा महत्त्वदीर्घत्वपरिमाणविशिष्टस्य त्र्यणुकस्य, ह्र

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वाणुत्वविशिष्टस्य च द्व्यणुकस्योत्पत्तिर्दृश्यते, एवं चेतनाद्ब्रह्मणो जगदुत्पत्तिस्वीकारेऽविरोध इत्यर्थः। अयमत्राभिप्रायो वैशेषिकाः ह्रस्वत्वाणुत्वविशिष्टेभ्यो द्व्यणुकेभ्यो जायमानेषु त्र्यणुकेषु ह्रस्वत्वाणुत्वे न जायेते, किन्तु द्व्यणुकगतत्रित्वसंख्यातस्तत्र महत्त्वादिकमारभ्यते। एवं पारिमाण्डल्यविशिष्टात्परमाणोर्जायमानस्य द्व्यणुकस्य पारिमाण्डल्यं नारभ्यते, किन्तु तत्रापि द्व्यणुकारम्भकद्विपरमाणुगतद्वित्वसंख्यातो द्व्यणुके ह्रस्वत्वादिकमारभ्यत इत्यादिप्रक्रियां प्रदर्शयन्तो वैशेषिकाः कारणगुणाः स्वकार्ये स्वसमानजातीयगुणारम्भका भवन्तीति न्यायाभासं वदन्तो न कथं त्रपन्ते ? यदा तत्प्रक्रियायामेव तन्न्यायस्य व्यभिचारः स्फुटः, तदा तेन कथं तदन्यः सिद्धान्तः कार्यकारणभावे नियन्तुं शक्येत। तस्मात्समन्वयो न विरुध्यत इति सिद्धम्। इत्थं च "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" इत्यस्यैवायं प्रपञ्चो न पौनरुक्त्यमिति बोध्यम् ॥११॥

[३ परमाणुजगत्कारणत्वाधिकरणम्। सू० १२-१७]

पूर्वं प्रधानस्य चेतनानधिष्ठितत्वेन जगत्कारणत्वाभावः प्रतिपादितः तर्हि नित्यज्ञानादिगुणविशिष्टेश्वराधिष्ठिताः परमाणवो जगतः कारणमस्त्विति प्रत्युदाहरणसंगत्येदमाह—

(१८३) उभयथापि न कर्मातस्तदभावः ॥१२॥

अत्र पूर्वपक्षे वैशेषिकराद्धान्तविरोधात्समन्वयासिद्धिः, सिद्धान्ते तदविरोधात्तत्सिद्धिरिति फलभेदः। परमाणुकारणवादो वैशेषिकराद्धान्तोऽत्र विषयः। स किं प्रमाणमूलो भ्रान्तिमूलो वेति संशये; पूर्वपक्षे प्रमाणमूलः स इति। तथाहि लोके पटादिसावयवानि कार्यद्रव्याणि संयोगसहकृतैः स्वानुगतैस्तन्त्वादिभिरेवारभ्यमाणानि दृष्टानि, तत्सामान्यात् सर्वं सावयवं कार्यं स्वकारणगतसंयोगसहकृतद्रव्यैरेवारब्धमिति मन्तव्यम्। पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनःसु नवद्रव्येषु भूम्यादीनि चत्वारि भूतानि सावयवानि दृष्ट्वा तेषां चतुर्विधाः परमाणवः परिकल्पनीयाः। परमाणुत्वं नाम प्रलयकाले विभज्यमानानां सावयवद्रव्याणामपकर्षपर्यन्तगतत्वेन विभागायोग्यत्वमिति। ततः सर्गारम्भेऽणुष्वदृष्टापेक्षं कर्मोत्पद्यते, तेन कर्मणा पार्थिवादिपरमाणूनां संयोगेन द्व्यणुकादिक्रमेण पृथिव्यादि भूतानि जायन्ते। परमाणुगतरूपादिभ्यश्च द्व्यणुकादिगतरूपादीनि जायन्ते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तन्तुपटन्यायेनेति काणादराद्धान्तः प्रामाणिकः । सिद्धान्तस्तु सर्गा निश्चलयोः परमाण्वोः संयोगजनकस्य कर्मणः किञ्चिन्निमित्तम वा ? आद्ये जीवप्रयत्नाभिघातादि, तददृष्टं वा ? उभयथापि न सम्भवति । न खलु सर्गारम्भे शरीरापेक्षस्य जीवप्रयत्नस्य सम्भ शरीरप्रतिष्ठिते हि मनस्यात्ममनःसंयोगे ज्ञानादिक्रमेण जीवात्म प्रयत्नो जायते । एतेनाभिघातादिदृष्टं तत्कर्मनिमित्तं प्रत्युक्तम्, सर्गोत्तरकालीनत्वात् । अदृष्टस्याचेतनस्य स्वतः कर्माभिमुख्यायोग द्वितीये कर्मोत्पत्तिनिमित्ताभावात्तदनुत्पत्तौ सर्गाभावप्रसङ्गः । कर्माभावात्, तदभावः द्व्यणुकादिक्रमेण सृष्ट्युत्पादस्या इत्यनुपपन्नोऽयं परमाणु कारणवादो भ्रान्तिमूलक इति दिक् ॥१२॥

(१८४) समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥१३॥

किं च तदभाव इत्यनुवर्तते । तस्य द्व्यणुकादिसृष्ट्युत्पा भावः । कुतः ? समवायाभ्युपगमात् । द्वाभ्यामणुभ्यामुत्पन्न द्व्यणुकमत्यन्तं भिन्नं सत्समवायेन सम्बध्यत इति भवतोऽ गमः । एवं चाभ्युपगच्छता न शक्यतेऽणुकारणवादः समर्थयि कुतः ? साम्यादनवस्थितेः । यथैवाणुभ्यामत्यन्तं भिन्नं सद्द्व ताभ्यां समवायलक्षणेन सम्बन्धेन सम्बध्यते, एवं समवा स्वसमवायिभ्योऽत्यन्तभिन्नः सन्समवायलक्षणेनान्येन सम्ब सम्बध्येत; अत्यन्तभेदस्योभयत्रापि साम्यात् । ततश्च तस्याऽन्यो समवायः कल्पनीय इत्यनवस्थैव प्रसज्ज्येत । प्रसज्यमानायां नवस्थायामेकासिद्धौ सर्वासिद्धेः द्व्यणुकं द्वाभ्यामणुभ्यां नै द्येत । तस्मादप्यनुपपन्नः परमाणुकारणवादः ॥१३॥

(१८५) नित्यमेव च भावात् ॥१४॥

अपि च परमाणुनां प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात्प्र भावप्रसङ्गः । निवृत्तिस्वभावत्वे नित्यमेव निवृत्तेः सर्गाभावप्रस्य उभयस्वभावत्वं विरोधादसमञ्जसम् । अनुभयस्वभावत्वे तत्प्र निमित्तस्यादृष्टादेः स्वीकारे तस्यनित्यसन्निधानासन्निधानयोः प्र दोषप्रसङ्ग इत्यनुपपन्नः परमाणुवादः ॥१४॥

(१८६) रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥१५॥

किं च, न केवलं परमाणूनां जगत्कारणत्वं नास्ति, अपि निरवयत्वमपि नास्ति । यतो हि वैशेषिकाः सावयवद्रव्याणा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शो विभज्यमानानां चरमावयवपरमाणूनां रूपादिमत्त्वमभ्युपगच्छन्ति। रूपादिमतां घटपटादीनां सावयवत्वादिदर्शनेन रूपादिमत्त्वात्परमाणूनां निरवयवत्त्वाणुत्वनित्यत्वविपर्ययः सावयवत्वादिः प्रसज्येत। तस्मादभिप्रेतविपर्ययप्रसक्त्या परमाणुकारणवादोऽनुपपन्न इति ॥१५॥

(१८७) उभयथा च दोषात् ॥१६॥

किं च चतुर्विधभूतपरमाणूनां पार्थिवादीनामुपचितापचितगुणात्मकत्वं वैशेषिकनये कल्प्यते, न वा ? आद्ये तेषामन्यतमेऽणुत्वव्याघातः, गन्धरसरूपस्पर्शवत्याः पृथिव्याः स्वरूपोपचितत्वदर्शनेन तदृत्तया जलाग्निवायूनामपचितत्वदर्शनेन च दोषानुसङ्गोऽपरिहार्यः। द्वितीये सर्वेषामेकैकगुणात्मकत्त्वे तत्कार्यपृथिव्यादिषु रूपाद्यनुपलम्भप्रसङ्ग इत्युभयथापि दोषात् परमाणुकारणवादोऽनुपपन्नः ॥१६॥

(१८८) अपरिग्रहाच्चात्यन्तमनपेक्षा ॥१७॥

अपि च प्रधानकारणवादो वेदविद्भिरपि कैश्चिन्मन्वादिभिः सत्कार्यत्वाद्यंशपरिगृहीतत्वेनोपनिबद्धः। अस्य तु परमाणुकारणवादस्य कैश्चिदपि शिष्टैः केनचिदप्यंशेनापरिगृहीतत्वादत्यन्तमेवानपेक्षाऽनादरणीयः श्रेयोर्थिभिर्वेदवादिभिः। तस्माद्वैशेषिकराद्धान्तोऽप्रामाणिक इति सिद्धम्।

किं च द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां शकुशपलाशादिवदत्यन्तभिन्नत्वे द्रव्याधीनत्वं गुणादीनां न सम्भवति, किन्तु द्रव्यस्यैव संस्थानभेदाद्गुणादिशब्द प्रत्ययभाक्त्वसम्भवेन गुणादीनां द्रव्यात्मकत्वमेवाभ्युपेयम। ननु भिन्नत्वेऽपि वह्न्यधीनधूमस्येव गुणादीनां द्रव्याधीनत्वमविरुद्धमिति चेन्न; शुक्लः कम्बलो लमुत्पन्नमिति सामानाधिकरण्यदर्शनेनाग्निधूमयोरिव द्रव्यगुणयोरत्यन्तं भिन्नत्वस्य वक्तुमशक्यत्वात्। तस्मादसारतरतर्कयुक्तादीश्वरकारणश्रुतिविरोधाच्छ्रुतिप्रवीणैश्च शिष्टैर्मन्वादिभिरपरिगृहीतत्वादत्यन्तमेवोपेक्षणीयः परमाणुकारणवाद इति दिक् ॥१७॥

[४ समुदायाधिकरणम्। सू० १८-२७]

इत्थमर्धवैनाशिकवैशेषिकमतं निरस्य वैनाशिकत्वसाम्याद्बुद्धिस्थं सर्ववैनाशिकराद्धान्तो निरसनीय इत्यवान्तरसंगत्येदमाह—

(१८९) समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥१८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वपक्ष सिद्धान्तयोः फलं पूर्ववदेवावसेयम्। तत्र मुनेर्व
चत्वारो विनेयाः सन्तीति सौत्रान्तिकवैभाषिकौ बाह्यार्थ
भ्युपगमसाम्याद् बाह्यास्तित्ववादिनौ स्तः। योगाचारा श्
नास्तित्ववादिनो, माध्यमिकाः सर्वशून्यत्ववादिनश्चेति। त
बाह्यास्तित्ववादिमतं किं प्रमाणमूलं वेति सन्देहे; त
स्तित्ववादिमते बाह्यं पृथिव्यादिभूतचतुष्टयं रसस्नेहो
स्वभावपार्थिवादिपरमाणुहेतुकम्। भौतिकं रूपादयश्चक्षुरादय
तत्रापि बाह्यः पृथिव्यादिसमुदायः परमाणुहेतुक एव, आध्या
रूपादिसमुदाया रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकपञ्चस्कन्धी
इति मतं प्रमाणमूलमिति पूर्वपक्षः। सिद्धान्तस्तु—उभयहेतुके
समुदाये परमाणुहेतुके बाह्यसमुदाये पञ्चस्कन्धहेतुके आध्यात्मिकस
दाये चाभ्युपगमेऽपि तदप्राप्तिः=समुदायस्याप्राप्तिः। कुतः? स
दायिनां परमाणूनां स्कन्धानामचेतनत्वेन स्वतः समुदायायो
अन्यस्य कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य समुदाय
भ्युपगमात्। निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसङ्गात्
दायासिद्धौ च तदाश्रया लोकयात्रा लुप्यते। अतस्तन्मतं भ्रा
मिति ज्ञेयम् ॥१८॥

(१९०) इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥१

ननु माभूत् कश्चन भोक्ता प्रशासिता वा स्थिरश्चेतनः समुद
तथाप्यविद्या संस्कारो, विज्ञानमित्येवं जातीयकानामविद्यादी
रेतरकारणत्वाद् घटीयन्त्रवदनिशमावर्तमानानामर्थादाक्षिप्तः
इति लोकयात्रोपपद्यते इति चेन्न; उत्पत्तिमात्रनिमित्तत्वात्। अ
दीनामितरेतरकारणत्वेऽपि पूर्वपूर्वमुत्तरोत्तरस्योत्पत्तिमात्र
मस्ति, न तु संघोत्पत्तेः किञ्चिन्निमित्तं सम्भवति। अपि च
भोगार्थः संघातः, स च स्थिरस्तवनाभिमतः। ततश्च भोगो
मोक्षो मोक्षार्थश्चैव न त्वन्यार्थः। अन्यार्थस्वीकारे तस्य भोगमो
योरवस्थायित्वप्रसङ्गेन क्षणिकत्वाभ्युपगमविरोध इति दिक् ॥१

(१९१) उत्तरोत्पादे च पूर्वनिरोधात् ॥२०॥

पूर्वमविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्न संघातसिद्धिरि
सम्प्रति तदपि न सम्भवतीत्युपपाद्यते। क्षणभङ्गवादिभिर
यत्किल—उत्तरोत्पादे उत्तरपरमाणूत्पत्तिकाले पूर्वं परमाणूनां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति । एवमभ्युपगच्छद्भिस्तैः कथं पूर्वोत्तरक्षणयोर्हेतुफलभावः सम्पादयितुं शक्येत । कार्यकाले विद्यमानस्यैव मृदादेर्घटादिकार्यस्य कारणत्वं दृश्यते न तु नष्टस्य । अतो निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वादुत्तरक्षणवृत्तिकार्यस्य हेतुत्वानुपपत्तेरसंगतं सौगतं मतमिति ॥२०॥

(१६२) असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥२१॥

अथासत्येव हेतौ कार्योत्पत्तिं ब्रूयात्, ततः प्रतिज्ञोपरोधः स्यात् । ...नचक्षुरालोकविषयान् चतुर्विधान्हेतून्प्रतीत्य चित्तचैत्ता जायन्ते ...ीयं प्रतिज्ञा हीयेत । अन्यथा—कार्यस्य सहेतुकत्वस्वीकारे कार्य...र्यन्तं कारणमवतिष्ठते इति ब्रूयात्तर्हि हेतुफलयोर्यौगपद्यं समानकालेऽवस्थानप्रसङ्गः स्यात् । सर्वे संस्काराः क्षणिका इति ते प्रतिज्ञोपरुध्येत । तस्मादुभयथा प्रतिज्ञोपरोधप्रसङ्गादसंगतं तन्मतमिति भावः ॥२१॥

(१६३) प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥२२॥

किं च वैनाशिकैर्बुद्धिगम्यं त्रयाद्भिन्नं सर्वं संस्कृतं क्षणिकं चेत्युच्यते । तत् त्रयं च भावानां प्रतिसंख्यानिरोधः=बुद्धिपूर्वकविनाशः, अप्रतिसंख्यानिरोधः=अबुद्धिपूर्वको विनाशः आवरणाभावमात्रमाकाशं चेत्येतन्निःस्वभावं मन्यते । तत्राकाशं परस्तात् प्रत्याख्यास्यति । सम्प्रति निरोधद्वयं प्रत्याचष्टे । प्रतिसंख्याप्रतिसंख्यानिरोधयोरप्राप्तिः ...योः सन्तानसन्तानिषु असम्भव इत्यर्थः । कुतः ? अविच्छेदात् । न ...वृत्तौ सन्तानगोचरौ सम्भवतः; सन्तानेषु सन्तानिनामविच्छिन्नेन हेतुफलभावेन वर्त्तमानतया सन्तानस्याविच्छेदात् । नापि सन्तानिगोचरौ तौ सम्भवतः; सन्तानिनां घटादीनां सर्वदा प्रत्यभिज्ञानबले...न्वयविच्छेददर्शनेन निरन्वयविनाशासम्भवात् क्षणिकत्वेन बुद्धिपूर्वकनाशायोगाच्च । तस्मात्परकल्पितस्य निरोधद्वयस्यानुपपत्तिरित्यर्थः ॥२२॥

(१६४) उभयथा च दोषात् ॥२३॥

किं च प्रतिसंख्यानिरोधान्तःपातिनः परकल्पितस्य क्षणिकेषु स्थिरत्वादिभ्रान्तिरूपाविद्यायाश्च निरोधस्य यमनियमादिसहितसम्यग्ज्ञानात्साध्यत्वे निर्हेतुकविनाशाभ्युपगमहानिप्रसङ्गः, स्वतो वा स्वीकारे सर्वं क्षणिकं दुःखमिति मार्गोपदेशानर्थक्यप्रसङ्ग इत्युभयथापि दोषप्रसङ्गादसंगतमिदं सौगतदर्शनम् ॥२३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१६५) आकाशे चाविशेषात् ॥२४॥

तत्र निरोधद्वयस्य निरुपाख्यत्वं निरस्तं, साम्प्रतमाकाशस्य नि
भावत्वं निरस्यते—आकाशे निरूपाख्यत्वाभ्युपगमोऽयुक्तः; प्रतिसं
प्रतिसंख्यानिरोधवदस्यापि वस्तुत्वप्रतिपत्तेरविशेषात्। 'आ
आकाशः सम्भूतः' (तै०२।१) इति श्रुतिप्रामाण्यात् शब्दगुणानु
त्वाच्चाकाशस्य पृथिव्यादिवद्वस्तुत्पसिद्धेः। किं च "वायुः किं
श्रयः" 'वायुराकाशसंनिश्रयः' इति प्रश्नप्रतिवचनयोः सौगत
वायुसंनिश्रयत्वेनाकाशस्य प्रतिपादनान्न तस्याकरणाभावमात्रत्व
स्तुत्वं च संगच्छते। अपि चोक्तंत्रयमप्यवस्तु नित्यं निरुपाख्यं
विप्रतिषिद्धम्। न ह्यवस्तुनो नित्यत्वमनित्यत्वं वा सम्भवति।
धर्मिभावे हि घटादिवद्वस्तुत्वमेव स्यान्न निरुपाख्यत्वमितिभावः॥

(१६६) अनुस्मृतेश्च ॥२५॥

किं च सर्वस्य वस्तुनः क्षणिकत्वमभ्युपगच्छन्वैनाशिकः आत्मा
पि क्षणिकत्वमभ्युपेयात्। तच्चासम्भवम्। कुतः? अनुस्मृतेः—
भवमुपलब्धिमनु—उत्पद्यमाना स्मृतिरनुस्मृतिस्तद्बलादित्यर्थः।
पुरुषान्तरेणानुभूतमर्थं पुरुषोऽन्यः स्मरति। अनुभवस्मरणं
कर्तृकत्वदर्शनात्। किं चाहमदोऽद्राक्षमिदं पश्यामिति प्रत्यभि
आत्मनोऽक्षणिकत्वे प्रमाणम्। तथाऽत्मनः क्षणिकत्वे स्वपक्ष
परपक्षनिराकरणं चेत्युभयमपि न सिध्येत। तस्मादनुपपन्नो वैना
समयः ॥२५॥

(१६७) नासतो दृष्टात् ॥२६॥

इतश्चानुपन्नः सौगतसमयः। यतो 'नानुपमृद्य प्रादुर्भावात्'
नेनासतोऽभावाद् विनष्टाद्बीजादङ्कुरोत्पत्तिदर्शनात् कूटस्थात्का
त्कार्योत्पत्त्यदर्शनाच्चाभावात्कार्योत्पत्तिस्तदभ्युपगतिर्नयुक्ता। इ
अदृष्टत्वात्। निरूपाख्यात् नरविषाणादेः कार्योत्पत्त्यदृष्टत्वात्
मानादेव मृत्पिण्डादेश्च घटादिकार्योत्पत्तिदर्शनाच्च। नहि
कारणानामनन्वयः। कटककुण्डलादिषु सुवर्णादे र्घटादिषु च
रन्वयदर्शनात्। अतोऽसंगतो वैनाशिकसमयः ॥२६॥

(१६८) उदासीनानामपि चैवं सिद्धिः ॥२७॥

किं चाभावाद्भावोत्पत्तिस्वीकारे उदासीनानां प्रयत्नशून्या
जनानां स्वस्वाभिमतकार्यसिद्धिः स्यात्। अभावस्य सर्वस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुलभत्वात् । लौकिके शास्त्रीये च कर्मण्यप्रयतमानामपि स्वकार्यसिद्धिप्रसङ्गाद्वैभाषिकसौत्रान्तिकयोर्मतं भ्रान्तिमूलमत्यन्तमेवोपेक्षणीयमिति भावः ॥२७॥

[५ अभावाधिकरणम् । सू० २८-३२]

पूर्वं क्षणिक बाह्यार्थवादिमतं निराकृतं, सम्प्रति तदुपजीव्य क्षणिकविज्ञानवादी सौगतः प्रत्यवतिष्ठते । अत उपजीव्योपजीवकभावसंगत्येदमाह—

(१९९) नाभाव उपलब्धेः ॥२८॥

अत्र पूर्वपक्षे क्षणिकविज्ञानवादिसिद्धान्तविरोधे समन्वयासिद्धिः, सिद्धान्ते तदविरोधे समन्वयसिद्धिरिति फलभेदः । केषाञ्चिद् विनेयानां बाह्य वस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन विरचितायामपि बाह्यार्थवादप्रक्रियायां न तत्र सुगताभिप्रायः, तस्य विज्ञानातिरिक्त बाह्यपदार्थानामभावाभ्युपगतत्वादिति विज्ञानवादि सिद्धान्तोऽत्र विषयः । स किं प्रामाणिकोऽप्रामाणिको वेति विशये, प्रामाणिक इति पूर्वः पक्षः । सिद्धान्तस्तु विज्ञानव्यतिरिक्तानां बाह्यार्थानामभावोऽत्राध्यवसातुमशक्यः कुतः ? घटः पट इत्यादिप्रतिप्रत्ययं तदुपलब्धेः । उपलब्धावनुभूयमानाः पदार्था अपलपितुमशक्याः । न चोपलब्धिव्यतिरिक्तत्वेन तेषामभावोऽस्माभिरुच्यते इति वाच्यम् ; अर्थज्ञानयोर्ग्राह्यग्राहकयोर्भिन्नत्वेन सर्वैरनुभूयमानत्वात् । नह्येकत्रैकदा ग्राह्यग्राहकभावः क्वापि दृष्टः । अतो विज्ञानातिरिक्तपदार्थसद्भावात्तन्मतमसंगतमिति ॥ २८ ॥

(२००) वैधर्म्याच्च न स्वप्नादिवत् ॥२९॥

ननु जागरणकाले जायमानाः सर्वे घटपटादिविषयकाः प्रत्यया निरालम्बनाः, प्रत्ययत्वात्, स्वप्नादिप्रत्ययवदिति चेन्न; स्वप्नजागरणकालीनप्रत्यययोर्बाधितविषयत्वाबाधितविषयत्वरूपवैधर्म्यात् । अतस्त्वदुक्तानुमाने बाधितविषयत्वमुपाधिः । तथा हि यत्र स्वप्नादौ दृष्टान्ते निरालम्बनत्वं साध्यं तत्र बाधितविषयत्वमिति साध्यव्यापकत्वं यत्र च पक्षे जागृतप्रत्ययेप्रत्ययत्वं हेतुस्तत्र बाधितविषयत्वं नास्तीति साधनाव्यापकत्वमिति साध्यव्यापकत्वेसति साधनाव्यापकत्वस्यैवोपाधित्वादिति नोक्तानुमानेन जाग्रतप्रत्ययेषु निरालम्बनत्वं साधयितुं शक्यम् । अपि च न केवलमत्रोक्तोपाधिः, किन्तु दृष्टान्ते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१६५) आकाशे चाविशेषात् ॥२४॥

तत्र निरोधद्वयस्य निरुपाख्यत्वं निरस्तं, साम्प्रतमाकाशस्य नि भावत्वं निरस्यते—आकाशे निरूपाख्यत्वाभ्युपगमोऽयुक्तः; प्रतिसं प्रतिसंख्यानिरोधवदस्यापि वस्तुत्वप्रतिपत्तेरविशेषात्। 'आ आकाशः सम्भूतः' (तै०२।१) इति श्रुतिप्रामाण्यात् शब्दगुणानुमे त्वाच्चाकाशस्य पृथिव्यादिवद्वस्तुत्पसिद्धेः। किं च "वायुः किं सं श्रयः" 'वायुराकाशसंनिश्रयः' इति प्रश्नप्रतिवचनयोः सौगतसम वायुसंनिश्रयत्वेनाकाशस्य प्रतिपादनान्न तस्याकरणाभावमात्रत्वम स्तुत्वं च संगच्छते। अपि चोक्तंत्रयमप्यवस्तु नित्यं निरुपाख्यं चे विप्रतिषिद्धम्। न ह्यवस्तुनो नित्यत्वमनित्यत्वं वा सम्भवति। ध धर्मिभावे हि घटादिवद्वस्तुत्वमेव स्यान्न निरुपाख्यत्वमितिभावः॥२

(१६६) अनुस्मृतेश्च ॥२५॥

किं च सर्वस्य वस्तुनः क्षणिकत्वमभ्युपगच्छन्वैनाशिकः आत्मनो पि क्षणिकत्वमभ्युपेयात्। तच्चासम्भवम्। कुतः ? अनुस्मृतेः-अ भवमुपलब्धिमनु—उत्पद्यमाना स्मृतिरनुस्मृतिस्तद्बलादित्यर्थः। न पुरुषान्तरेणानुभूतमर्थं पुरुषोऽन्यः स्मरति। अनुभवस्मरणयो कर्तृकत्वदर्शनात्। किं चाहमदोऽद्राक्षमिदं पश्यामिति प्रत्यभिज्ञा आत्मनोऽक्षणिकत्वे प्रमाणम्। तथाऽत्मनः क्षणिकत्वे स्वपक्षसि परपक्षनिराकरणं चेत्युभयमपि न सिध्येत। तस्मादनुपपन्नो वैनाशि समयः ॥२५॥

(१६७) नासतो दृष्टात् ॥२६॥

इतश्चानुपन्नः सौगतसमयः। यतो 'नानुपमृद्य प्रादुर्भावात्' इ नेनासतोऽभावाद् विनष्टाद्बीजादङ्कुरोत्पत्तिदर्शनात् कूटस्थात्कार त्कार्योत्पत्त्यदर्शनाच्चाभावात्कार्योत्पत्तिस्तदभ्युपगतिर्नयुक्ता। कुत अदृष्टत्वात्। निरूपाख्यात् नरविषाणादेः कार्योत्पत्त्यदृष्टत्वात्ः वि मानादेव मृत्पिण्डादेश्च घटादिकार्योत्पत्तिदर्शनाच्च। नहि का कारणानामनन्वयः। कटककुण्डलादिषु सुवर्णादे घटादिषु च मृ रन्वयदर्शनात्। अतोऽसंगतो वैनाशिकसमयः ॥२६॥

(१६८) उदासीनानामपि चैवं सिद्धिः ॥२७॥

किं चाभावाद्भावोत्पत्तिस्वीकारे उदासीनानां प्रयत्नशून्याना जनानां स्वस्वाभिमतकार्यसिद्धिः स्यात्। अभावस्य सर्वस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुलभत्वात्। लौकिके शास्त्रीये च कर्मण्यप्रयतमानामपि स्वकार्यसिद्धिप्रसङ्गाद्वैभाधिकसौत्रान्तिकयोर्मतं भ्रान्तिमूलमत्यन्तमेवोपेक्षणीयमिति भावः ॥२७॥

[५ अभावाधिकरणम्। सू० २८-३२]

पूर्वं क्षणिक वाह्यार्थवादिमतं निराकृतं, सम्प्रति तदुपजीव्य क्षणिकविज्ञानवादी सौगतः प्रत्यवतिष्ठते। अत उपजीव्योपजीवकभावसंगत्येदमाह—

(१९९) नाभाव उपलब्धेः ॥२८॥

अत्र पूर्वपक्षे क्षणिकविज्ञानवादिसिद्धान्तविरोधे समन्वयासिद्धिः, सिद्धान्ते तदविरोधे समन्वयसिद्धिरिति फलभेदः। केषाञ्चिद् विनेयानां बाह्य वस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन विरचितायामपि बाह्यार्थवादप्रक्रियायां न तत्र सुगताभिप्रायः, तस्यविज्ञानातिरिक्त बाह्यपदार्थानामभावाभ्युपगतत्वादिति विज्ञानवादि सिद्धान्तोऽत्र विषयः। स किं प्रामाणिकोऽप्रामाणिको वेति विशये, प्रामाणिक इति पूर्वः पक्षः। सिद्धान्तस्तुविज्ञानव्यतिरिक्तानां बाह्यार्थानामभावोऽत्राध्यवसातुमशक्यः कुतः? घटः पट इत्यादिप्रतिप्रत्ययं तदुपलब्धेः। उपलब्ध्यावनुभूयमानाः पदार्था अपलपितुमशक्याः। न चोपलब्धिव्यतिरिक्तत्वेन तेषामभावोऽस्माभिरुच्यते इति वाच्यम्; अर्थज्ञानयोर्ग्राह्यग्राहकयोर्भिन्नत्वेन सर्वैरनुभूयमानत्वात्। नह्येकत्रैकदा ग्राह्यग्राहकभावः क्वापि दृष्टः। अतोविज्ञानातिरिक्तपदार्थसद्भावात्तन्मतमसंगतमिति ॥ २८ ॥

(२००) वैधर्म्याच्च न स्वप्नादिवत् ॥२९॥

ननु जागरणकाले जायमानाः सर्वे घटपटादिविषयकाः प्रत्यया निरालम्बनाः, प्रत्ययत्वात्, स्वप्नादिप्रत्ययवदिति चेन्न; स्वप्नजागरणकालीनप्रत्यययोर्बाधितविषयत्वाबाधितविषयत्वरूपवैधर्म्यात्। अतस्त्वदुक्तानुमाने बाधितविषयत्वमुपाधिः। तथा हि यत्र स्वप्नादौ दृष्टान्ते निरालम्बनत्वं साध्यं तत्र बाधितविषयत्वमिति साध्यव्यापकत्वं यत्र च पक्षे जागृतप्रत्ययेप्रत्ययत्वं हेतुस्तत्र बाधितविषयत्वं नास्तीति साधनाव्यापकत्वमिति साध्यव्यापकत्वेसति साधनाव्यापकत्वस्यैवोपाधित्वादिति नोक्तानुमानेन जाग्रतप्रत्ययेषु निरालम्बनत्वं साधयितुं शक्यम्। अपि च न केवलमत्रोक्तोपाधिः, किन्तु दृष्टान्ते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साध्यवैकल्यमिति सूत्रस्थचकारेण सूचितम्। तथा च स्वप्नेऽनुभूयमानानां विषयाणां प्रातिभासिकसत्ताभ्युपेयतेऽस्माभिः। अन्यथा स्वप्नेऽपि बाह्यार्थानामभावे घटज्ञानं पटज्ञानमिति ज्ञाने वैचित्र्यं न स्यादिति भावः ॥२९॥

ननु विनाप्यर्थेन वासनावैचित्र्याद् ज्ञानवैचित्र्यमवकल्पते इत्यत आह—

(२०१) न भावोऽनुपलब्धेः ॥३०॥

बाह्यार्थाभावे वासनानां भावः सत्तानोपपद्यते। कुतः ? त्वत्पक्षे बाह्यार्थानामनुपलब्धेः। बाह्यार्थोपलब्धिर्हि तदीयवासनां प्रतिकारणम्। कारणाभावे कार्याभावः सार्वजनीनानुभवसिद्धिः। अपि च विनाप्यर्थं वासनामर्थोपलब्धिः, किन्त्वर्थोपलब्धिं विना न वासनेत्यन्वयव्यतिरेकाभ्यामर्थसद्भावसिद्धिः। संस्काराभिधानानां वासनानामाश्रयमन्तरेण कथं कल्पनोपपद्येत, लोके तथाऽदृष्टत्वात्। न च त्वन्मते वासनाश्रयः कश्चिदस्ति, प्रत्यक्षादिनाऽनुपलब्धेः ॥३०॥

(२०२) क्षणिकत्वाच्च ॥३१॥

नेत्यनुवर्तते। नन्वहमित्यालयविज्ञानं वासनाश्रयत्वेन परिकल्प्यते इति चेन्न, तस्यापि क्षणिकत्वाभ्युपगमात्। नह्यनवस्थितं सत्प्रवृत्तिविज्ञानवदालयविज्ञानमपि वासनानामधिकरणं भवितुमर्हति। किं चालयविज्ञानस्यैकस्य कालत्रयसम्बन्धित्वानभ्युपगमे देशकालनिमित्तापेक्षवासनाधीनस्मृत्याद्यसम्भवः, स्थिरत्वस्वीकारे च तस्य सिद्धान्तहानिः। अपि च 'उत्तरोत्पादे च पूर्वनिरोधाद्' इत्यादिना पूर्वोक्तानि दूषणानिबाह्यार्थवत्समानत्वात् क्षणिकविज्ञानवादेऽप्यनुसन्धातव्यानि एवं पूर्वोक्तौ वैनाशिकपक्षौ निराकृतौ कण्ठतः। शून्यवादस्य सर्वप्रमाणविरुद्धत्वेन तन्निराकरणाय सूत्रान्तराणि न रचितानि। अभावाधिकरणोक्तानि सूत्राणि तु शून्यवादपक्षेऽपि यथायथं योजयितव्यानि ॥३१॥

(२०३) सर्वथानुपपत्तेश्च ॥३२॥

किं च 'यथायथा विचार्यन्ते, विशीर्यन्ते तथा तथा' इति नियमानुसारेण सौगतसमय उपपत्तिमत्त्वाय यथायथा परीक्ष्यते, तथा तथायं सिकताकूपवद्विदीर्यते। न काञ्चिदत्रोपपत्तिं पश्यामः। अतो बाह्यार्थविज्ञानशून्यवादत्रयमितरेतरविरुद्धमुपदिशता सुगतेनात्मनोऽ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्बद्धप्रलापः ख्यापित इति सर्वथानुपपत्तेः सुगतसमयो भ्रान्तिमूलकः श्रेयस्कामैर्नादरणीय इति भावः ॥३२॥

[६ एकस्मिन्नसम्भवाधिकरणम् । सू० ३३-३६]

पूर्वं निरस्तं सौगतं मतं, सम्प्रति बुद्धिस्थं विवसनमतं निरस्यते इति बुद्धिसंनिधिलक्षणसगत्येदमारभ्यते—

(२०४) नैकस्मिन्नसम्भवात् ॥३३॥

अत्र पूर्वपक्षे मुक्ताम्बरमतविरोधात्समन्वयासिद्धिः सिद्धान्ते तदविरोधात्तत्सिद्धिरिति फलभेदः। मुक्ताम्बरमतं प्रमाणमूलं भ्रान्तिमूलं वेति विशये; स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति सर्वत्र सप्तभङ्गीनयं योजयतां मुक्ताम्बराणां पदार्थमात्रस्यानेकात्मकोऽनेकान्तवादः प्रामाणिक इति पूर्वः पक्षः। सिद्धान्तस्त्वेकस्मिन् धर्मिणि युगपद्विरुद्धसदसत्वादिधर्माणामसम्भवाद् वस्तुनोऽनेकात्मकत्वं नास्तीत्यर्थः। यदस्ति तदस्त्येव न नास्ति, यन्नित्यं तन्नित्यमेव नानित्यम्। तस्मादेकत्र विरुद्धधर्मावेशासम्भवादिनिर्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्। नन्वनेकात्मकमेव वस्त्विति नः सिद्धान्तः; कुत्रचिदपि प्रवृत्त्यसम्भवापत्तेः। स्यादस्तीति निर्धारणसमये स्यान्नास्तीत्यस्यापितत्र त्वन्मतेऽभ्युपगमेन कथं निःसन्दिग्धाप्रवृत्तिः सम्भवेत्। क्वाप्यैकान्तिकफलत्वं निर्धार्यैव तत्साधनानुष्ठानाय जनः निःसन्दिग्धः प्रवर्तते, नान्यथा। अतोऽनिधारितार्थं शास्त्रं प्रणयन् तवतीर्थकरो मत्तोन्मत्तवदनुपादेयवचनः स्यादिति भावः ॥३३॥

अथ मुक्ताम्बराणां मते शरीरपरिमाणो जीवोऽभ्युपगतस्तं दूषयति -

(२०५) एवं चात्माऽकात्स्न्र्यम् ॥३४॥

एकत्र धर्मिणि विरुद्धधर्मासम्भवदोषप्रसक्तिवज्जीवात्मनोऽकात्स्न्र्यरूपोऽपरोऽपि दोषःप्रसज्यते। तन्मते जीवस्य शरीरपरिमाणत्वेऽकात्स्न्र्यं परिच्छिन्नत्वमसर्वगतत्वमभ्युपगतं स्यात्, तेन घटादिवदनित्यत्वप्रसक्तिः। किं च शरीराणामनवस्थितपरिमाणत्वेन मनुष्यः कर्मविपाकाद् हस्तिजन्मगतः कृत्स्नं हस्तिशरीरं न व्याप्नुयात्, पुत्तिकाशरीरे वा तस्य प्रवेशो न स्यात्। एकस्मिन्नपि जन्मनि कौमारादिषु समानो दोष इत्यादिबहुविधदोषसम्भवादुपेक्षणीयोऽयं वादः ॥३४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२०६) न च पर्यायादप्यविरोधो विकारादिभ्यः ॥३५॥

ननु जीवात्मनः सावयवत्वाभ्युपगमात्स्थूलसूक्ष्मशरीरेषु पर्यायेणाप्यवयवोपगमापगमाभ्यां पूर्वोक्तविरोधपरिहारः सम्भवेदिति चेन्न; विकारादिदोषप्रसङ्गात्। आत्मनः सावयवत्वेन तत्तच्छरीरप्राप्तिकालेऽवयववृद्धिह्रस्वत्वाभ्युपगमे विक्रियावत्त्वप्रसक्त्या चर्मादिवदनित्यत्वं प्रसज्येत। अतः कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत्संसारसागरेनिमग्नस्य बन्धनोच्छेदादूर्ध्वगामित्वं भवतीति त्वदीयो बन्धमोक्षाभ्युपगमो बाध्येत इति भावः ॥३५॥

(२०७) अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥३६॥

किं चान्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वेनावस्थितिरिष्टामुक्ताम्बराणाम्, तर्हि तद्वदेवाद्यमध्ययोरप्युभयपरिमाणयोर्नित्यत्वप्रसङ्गादविशेषप्रसङ्गः स्यात्। अतोऽन्त्यस्य जीवपरिमाणस्यावस्थितत्वात्पूर्वावस्थयोरपि जीवपरिमाणयोरवस्थितत्त्वेन सदाऽणुर्वामहान्वा जीवोऽभ्युपेयो न शरीरपरिमाणः। अतः सौगतवदार्हतमपि मतमसंगतमिति सिद्धम् ॥३६॥

[७—पत्यधिकरणम्। सू० ३७-४१]

पूर्वमनेकान्तवादनिराकरणे सत्त्वासत्त्वादीनां मिथो विरुद्धधर्माणामेकत्रविरोधादसम्भवोक्तिः, तद्वदेकस्मिन्नीश्वरे निखिलजगदुपादानकर्तृत्वयोर्विरोधादसम्भवोऽस्तीति दृष्टान्तसंगत्येदमाह—

(२०८) पत्युरसामञ्जस्यात् ॥३७॥

अत्र पूर्वपक्षे जगदुपादानत्वकर्तृत्वयोरेकत्र विरोधात्समन्वयासिद्धिः सिद्धान्तेतदविरोधात्समन्वयसिद्धिरिति फलभेदः। तटस्थेश्वरकारणवादो माहेश्वरराद्धान्तोऽत्रविषयः। केवलमधिष्ठाता ईश्वरो जगतो नोपादनमिति माहेश्वरराद्धान्तः किं प्रमाणमूलः भ्रान्तिमूलो चेति संशये; लोके कुलालादेर्घटादिकार्यं प्रति केवलमधिष्ठातृत्वदर्शनेन जगदुत्पत्तौ महेश्वरेऽपि केवलं कर्तृत्वमुपादानत्वं च प्रधानस्येति माहेश्वरराद्धान्तः प्रामाणिकः इति पूर्वपक्षः। सिद्धान्तस्तु पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते। कुतः ? असामञ्जस्यात्=हीनमध्यमोत्तमभावभिन्नानां प्राणिनां कर्त्तुरीश्वरस्य तटस्थस्य रागादिदोषप्रसक्त्याऽस्मदादिवदनित्यत्वप्रसक्त्या चासामञ्जस्यात्। रागादिपूर्वकत्वेनैव लोके प्रवृत्तिदर्शनात्। न च प्राणि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर्मापेक्षितत्वाददोष इति वाच्यम्; कर्मेश्वरयोः प्रवर्त्यप्रवर्त्तकत्वेऽन्योन्याश्रयदोषप्रसङ्गादिति ॥३७॥

(२०९) सम्बन्धानुपपत्तेश्च ॥३८॥

किं च प्रधानपुरुषव्यतिरिक्तस्येश्वरस्य ताभ्यां सम्बन्धं विना प्रेरकत्वं नोपपद्यते। न चात्र संयोगलक्षणः सम्बन्धः सम्भवति; प्रधानपुरुषेश्वराणां विभुत्वान्निरवयवत्वाच्च, नापि समवायः सम्बन्धः; अयुतसिद्धत्वाभावात्। अस्माकं तु मतेऽविद्यादिप्रेरकत्वं कल्पिततादात्म्येनोपपद्यत इति सम्बन्धानुपपत्तेस्तटस्थेश्वरकारणवादेऽसामञ्जस्यमिति भावः ॥३८॥

(२१०) अधिष्ठानानुपपत्तेश्च ॥३९॥

किं च लोके कुलालस्य मृदादिप्रेरकत्वदर्शनेनेश्वरेऽपि प्रधानादिप्रेरकत्वकल्पनं न युक्तम्; प्रधानस्य रूपादिहीनत्वेन तद्विषयकस्याधिष्ठानस्य=प्रेरणाया अनुपपत्तेः। नहि रूपादिहीनमप्रत्यक्षं प्रधानमीश्वरस्याधिष्ठेयं प्रेर्यं भवितुमर्हति; मृदादिविलक्षणत्वात्। सिद्धान्ते तु श्रुत्येकशरणत्वान्न दृष्टान्तापेक्षेत्यदोषः ॥३९॥

(२११) करणवच्चेन्न भोगादिभ्यः ॥४०॥

नन्वप्रत्यक्षाण्यपि चक्षुरादिकरणानि रूपादिविरहितानि यथा जीवैः प्रेर्यन्ते, एवमप्रत्यक्षमपि प्रधानमीश्वरेण प्रेर्यतामिति चेन्न; भोगादिभ्यो दोषेभ्यः। सुखदुःखात्मकभोगाद्यर्थं जीवस्य चक्षुरादिकरणप्रेरकत्वं दृश्यते, तद्वदीश्वरस्य प्रेरकत्वे करणग्रामे चाभ्युपगम्यमाने तत्रापि भोगादिप्रसक्तिरिति भावः ॥४०॥

(२१२) अन्तवत्त्वमसर्वज्ञता वा ॥४१॥

किं च प्रधानजीवेश्वराणामानन्त्यं मिथो भिन्नत्वं चाभ्युपगम्यते तटस्थेश्वरवादिभिः। तत्रेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता (संख्या परिमाणं वा) परिच्छिद्यते न वा? आद्येऽन्तवत्त्वं स्यात्। लोके घटादीनां तथाविधत्वात्। अन्त्ये ईश्वरस्यासर्वज्ञत्वप्रसक्तिः स्यात्। तस्मादपि माहेश्वरराद्धान्तो भ्रान्तिमूलोऽभ्युपगन्तव्य इति सिद्धम् ॥४१॥

[८ उत्पत्त्यसम्भवाधिकरणम्। सू० ४२-४५]

इत्थं पूर्वं तटस्थेश्वरकारणवादो निरस्तः। सम्प्रति प्रकृतिश्चाधिष्ठाता चेत्युभयात्मकं कारणमीश्वर इति भागवतराद्धान्तस्य जीवोत्पत्त्यंशोऽपि प्रमाणमूलत्वं स्यादितिप्रत्युदाहरणसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२१३) उत्पत्त्यसम्भवात् ॥४२॥

अत्र पूर्वपक्षे भागवतमतविरोधात्समन्वयासिद्धिः सिद्धान्ते तद्विरोधात्समन्वयसिद्धिरिति फलभेदः। भगवानेको वासुदेवः परमात्मा परमार्थतत्त्वं जगदधिष्ठाता प्रकृतिश्च। तस्मात्संकर्षणाख्यो जीवो जायते, तस्माज्जीवात्प्रद्युम्नाख्यं मनः, तस्माच्च मनसोऽनिरुद्धाख्योऽहंकरो जायते इति भागवतराद्धान्तोऽत्र विचारविषयः। स किं प्रामाणिकोऽप्रामाणिको वेति संशये 'स एकधा भवति त्रिधा भवति' (छा० ७।२६।२) इति श्रुत्या परमात्मनोऽनेकधाभावस्याधिगतत्वेन श्रुतिसम्मतत्वादभिगमनादिलक्षणस्यानन्यचित्ततयाराधानस्यभगवत्प्राप्तिसाधकत्वाच्च भागवतसिद्धान्तः प्रामाणिक इति पूर्वपक्षः। सिद्धान्तस्तु तद्भागवतराद्धान्तस्य वेदाविरुद्धांशे प्रामाणिकत्वेऽपि न वेदविरुद्धजीवोत्पत्त्यंशे प्रामाणिकत्वम्। न खलु वासुदेवसंज्ञकात्परमात्मनः संकर्षणसंज्ञकस्य जीवस्योत्पत्तिः सम्भवति। तथा सत्यनित्यत्वादिदोषाः प्रसज्येरन् लोके घटादीनामुत्पत्तिमतामनित्यत्वदर्शनेन तथाविधस्यजीवस्यानित्यत्वप्रसक्त्या भगवत्प्राप्तिरूपमोक्षस्त्वदभिमतः कस्य स्यादिति भागवतसिद्धान्तोऽप्रामाणिक इति ॥४२॥

(२१४) न च कर्त्तुः करणम् ॥४३॥

इतश्चासंगतैषा कल्पना, नहि लोके कर्त्तुर्देवदत्तादेः सकाशात्करणं कुठाराद्युत्पद्यमानं दृश्यते। अतः संकर्षणसंज्ञकाज्जीवात्कर्त्तुः प्रद्युन्नसंज्ञकं मनः करणं जन्यते इत्यत्र श्रुत्यादिप्रमाणाभावादयुक्तमेतादिति भावः ॥४३॥

(२१५) विज्ञानादिभावे वा तदप्रतिषेधः ॥४४॥

अथ नैते संकर्षणादयो जीवादिभावेनाभिप्रेताः, किं तर्हि सर्वे ज्ञानैश्वर्यादिभिरीश्वरधर्मैरन्विता अभ्युगम्यन्ते। अतो नोत्पत्त्यसम्भवो दोष इति चेत्; अत्रोच्यते; संकर्षणादीनां प्रमाणां वासुदेववद्बलवीर्यनिर्दोषनिरधिष्ठाननिरवद्यत्वादिस्वीकारेपितदप्रतिषेधः=तस्योत्पत्त्यसम्भवस्याप्रतिषेधः प्रकारान्तरेण। तथा हि वासुदेवादीनां चतुर्णामीश्वरतुल्यधर्मत्वेऽनेकेश्वरकल्पनानर्थक्यप्रसक्तिः एकेनैवेश्वरेण कार्यसिद्धेः। भगवानेको वासुदेव इति सिद्धान्तभङ्गप्रसङ्गः। न च भगवतो वासुदेवस्यैव संकर्षणाद्यो व्यूहाः सन्तीति वाच्यम्; कार्यकारणयोरति शयाभावे उत्पत्त्यसम्भवदोषस्य तादवस्थ्यात् ब्रह्मादिस्त-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्वपर्यन्तस्य निखिलस्य जगतो भगवद्व्यूहत्वावगमाच्चेतिभावः ॥४४॥

(२१६) विप्रतिषेधाच्च ॥४५॥

किं च ज्ञानैश्वर्यशक्तिबलवीर्यतेजसां वासुदेवस्य क्वचिद्गुणत्वेन क्वचिद्गुणित्वेन कल्पनया परस्परं विप्रतिषेधादप्रामाणिकमिदं भागवतमतमिति भावः। चतुर्षु वेदेषु परंश्रेयोऽलब्ध्वा शाण्डिल्यः शास्त्रमिदमधिगतवानित्यादिवेदनिन्दादर्शनादसंगतैषा कल्पनेति सिद्धम्। अतो भ्रान्तिमूलकैः सांख्यवैशेषिकसौगतार्हतमाहेश्वरभागवतमतैरनवद्याद्द्वैतब्रह्मणो जगदुत्पत्तिं वदन् समन्वयः प्रथमाध्यायोक्तो न विरुध्यते इति निरवद्यम् ॥४५॥

शाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरि विरचितायां इति ब्रह्मसूत्रविद्यानन्दवृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः ॥२॥

—:००:—

अथ द्वितीयाध्याये तृतीयपादः

अत्रपादे महाभूतजीवादिश्रुतीनां विरोधपरिहारः

[१ वियदधिकरणम् १-७]

पूर्वस्मिन्पादे विप्रतिषेधात्परपक्षाणामसामञ्जस्यं ख्यापितम् तद्वत्स्वपक्षे श्रुतिनामपि विप्रतिषेधाद्ब्रह्मकारणवादस्याप्यसामञ्जस्यं स्यादिति श्रुत्यर्थशङ्कानिरासाय परं पादद्वयमारभ्यते। तथा च शङ्काव्याजेन पूर्वपादेनास्य पादद्वयस्य दृष्टान्तसंगतिः प्रदर्शिता। पादभेदात् पूर्वाधिकरणेनास्याधिकरणस्य संगतिर्नापेक्ष्यते—

(२१७) न वियदश्रुतेः ॥१॥

अत्रपूर्वपक्षे श्रुतीनां मिथोविरोधादप्रामाण्यं, सिद्धान्तेऽविरोधात् प्रामाण्यमिति फलभेदः। अत्र सृष्टिश्रुतीनामविरोधप्रतिपादनायादावाकाशमाश्रित्य चिन्त्यते, किमाकाशस्योत्पत्तिरस्ति न वेति सन्देहे; अस्ति चेत्तर्हि कथं छान्दोग्ये नभोवायूत्पत्तिमन्तरेण सच्छब्दवाच्यं ब्रह्मप्रकृत्य 'तत्तेजोऽसृजत' (छा० ६।२।१) इत्यत्र तेजसः प्रथममुत्पत्तिः श्रूयते। नभो नोत्पद्यते चेत्तर्हि कथं तैत्तिरीयके 'आत्मन आकाशः सम्भूतः' (तै० २।१) इत्यत्राकाशस्योत्पत्तिः श्रूयते। तस्मादुक्तयोः श्रुत्योर्मिथोविरोधोऽस्तीति पूर्वपक्षः। तत्र सिद्धान्तैकदेशिमते 'न वियदश्रुतेः' इति। न खल्वाकाशमुत्पद्यते। कुतः? अश्रुतेः। जग-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुत्पत्तिप्रसङ्गे आकाशोत्पत्तिवाक्यस्याश्रवणात्। श्रुतिश्चास्माकमतीन्द्रियार्थज्ञानोत्पत्तौ प्रमाणम्। तस्मादुत्पत्त्यश्रवणादाकाशं नोत्पद्यते इति ॥ १ ॥

(२१८) अस्ति तु ॥२॥

तु शब्दः पक्षान्तरपरिग्रहार्थः। अस्तु तावच्छान्दोग्ये आकाशोत्पत्त्यश्रवणं, श्रुत्यन्तरे त्वस्ति। तथाहि 'सत्यं ज्ञानमनन्तं ब्रह्म'ति प्रकृत्य 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः' (तै० २।१) इति। एवं च क्वचित्तेजःप्रमुखा सृष्टिः, क्वचिदाकाशप्रमुखेति श्रुत्योर्विरोधस्तदवस्थ एवेति ॥२॥

अस्मिन्विप्रतिषेधे कश्चिदेकदेशी स्वाभिप्रायमाह—

(२१९) गौण्यसम्भवात् ॥३॥

पूर्वं योदाहृता वियदुत्पत्तिश्रुतिः सा गौणी न तु मुख्या। कुतः? असम्भवात्। सत्सु कणभुगादिषु तत्समवायिकारणादिसामग्र्यभावेनाकाशोत्पत्तेरसम्भवात्। समवाय्यसमवायिनिमित्तकारणेभ्यः खलु सर्वमुत्पद्यमानमुत्पद्यते। न चात्रोक्तकारणानि सन्ति, येनाकाशस्योत्पत्तिः सम्भावयितुं शक्यते। नभो नित्यं, विभुत्वादात्मवदित्यनुमानेनाकाशे नित्यत्वसिद्धेस्तदुत्पत्तिश्रुतिर्गौणीत्यर्थः ॥३॥ किं च—

(२२०) शब्दाच्च ॥४॥

न खलु केवलमनुमानेनाकाशस्य नित्यत्वमिति। किं तर्हि— शब्दात् चकारोऽप्यर्थे। शब्दादपि नभसि नित्यत्वं सिध्यति। तथा च 'वायुश्चान्तरिक्षं चैतदमृतम्' (बृ० २।३।३) 'आकाशवत्सर्वगतश्च नित्यः' (छा० ३।१४।३) इत्यादौ तस्य नित्यत्वश्रवणादुपमानाच्च नोत्पद्यते नभ इति ॥४॥

ननु 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुर्वायोरग्निरि' त्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्तमानस्यैकस्यैव सम्भूतशब्दस्य मुख्यत्वमाकाशे च गौणत्वं कथमुपपद्यत इत्यत आह—

(२२१) स्याच्चैकस्य ब्रह्मशब्दवत् ॥५॥

स्याच्चैकस्यापि सम्भूतशब्दस्य समानप्रकरणे विषयभेदाद्गौणत्वं मुख्यत्वं च। यथैकस्मिन्नेव प्रकरणे ब्रह्मशब्दस्यैकस्यापि 'तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्म' (तै० ३।२) इत्यत्रान्नादिषु गौणःप्रयोगः आनन्दो ब्रह्मेत्यत्रानन्दे मुख्यश्चेति तद्वत्। इत्थं च क्षीरोदकवत्संसृ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ष्टयो र्ब्रह्माकाशयोर्व्यापित्वामूर्तत्वादिधर्मसामान्येनाभेदोपचारान्नैक विज्ञानेन सर्वविज्ञानप्रतिज्ञा हीयेत। अतोभाक्तं नभसः सम्भवश्रवणमिति ॥५॥

इदमेकदेशिमतं निराकुर्वन्नाह सिद्धान्ती—

(२२२) प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥६॥

विज्ञेयाद्ब्रह्मणः समस्तस्य वस्तुजातस्याव्यतिरेकात् 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मु० १।१।३) 'येनाश्रुतं भवत्यमत मतम् (छा० ६।१।१) 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्' (बृ० ४।५।६) इति प्रतिवेदान्तमेकविज्ञानेन सर्वविज्ञानस्य प्रतिज्ञाया अहानिः स्यात्। अन्यथाऽऽकाशस्योत्पत्त्यनभ्युपगमे पूर्वोक्ता प्रतिज्ञा हीयेत। अतस्तत्सिद्धये आकाशस्योत्पत्तिरभ्युपेया। शब्देभ्योऽपि कार्यकारणाव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते। तथाहि—'येनाश्रुतं श्रुतंभवतीति' प्रतिज्ञाय कार्यकारणाभेदप्रतिपादकैर्मृदादिदृष्टान्तैस्तां समर्थ्य तत्साधनाय 'सदेव सोम्येदमग्र आसीत्' (छा० ६।२।१) ऐतदात्म्यमिदं सर्वम् (छा० ६।८।७) इत्यारभ्याप्रपाठकसमाप्तेः शब्दाः प्रवर्तन्ते। तस्मादग्न्यादिवदेवनभोप्युत्पद्यते। न चाकाशस्योत्पत्तौ छान्दोग्यश्रुतिविरोधस्तदवस्थ एवेति वाच्यम्, 'आत्मन आकाशः सम्भूतः' इति तैत्तिरीयश्रुत्यनुरोधेन आकाशं वायुं सृष्ट्वा 'तत्तेजोऽसृजत' इति छान्दोग्यश्रुतेर्विपरिणममानेऽविरोधात्। श्रौतस्यैव ब्रह्मणो वियदुत्पत्तिसामग्रीत्वेन समवायिकारणादिसामाग्र्यभावकथनमपातरमणीयमित्यपि द्रष्टव्यम् ॥६॥

नन्वसम्भवादाकाशोत्पत्तिश्रुतिर्गौणीत्युक्तमित्यत आह—

(२२३) यावद्विकारन्तु विभागो लोकवत् ॥७॥

सौत्रस्तुशब्दोऽसम्भवाशङ्काव्यावृत्यर्थः। न तावदाकाशोत्पत्तावसम्भवाशङ्का कर्तव्या। यतो घटादियावद्विकारजातं दृश्यते, तावानेव विभागो लोके लक्ष्यते, न त्वविकारे ब्रह्मणि। लोके घटादेर्विकारस्यैव विभागदर्शनात्। विभागश्चाकाशस्य पृथिव्यादिभ्योऽत्रगम्यते। तस्मात्सोऽपि विकारो युक्तः। नचात्माप्याकाशादिभ्योविभक्त इति कल्पनीयम्, आकाशादीनां निरात्मकत्वप्रसङ्गात्। आत्मनोऽन्यस्याकाशादिकारणस्याश्रवणात्। आकाशेऽमृतशब्दप्रयोगस्तु आपेक्षिकः, तस्योत्पत्यादेरुपपादितत्वात्। आकाशवत्सर्वगतश्च नित्यः इत्यपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसिद्धमहत्त्वेनाकाशेन ब्रह्मणो निरतिशयमहत्त्वप्रतिपादनायोपमानं क्रियते नाकाशसमत्वाय। अत्रादौ ब्रह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसम्भवश्रुत्यनुमानाभ्यां परिहृतं वेदितव्यम्। तस्माद् ब्रह्मकार्यं वियदिति सिद्धम् ॥७॥

(२ मातरिश्वाधिकरणम् । सू० ८)

उक्तन्यायमन्यत्रातिदिशति । अस्यातिदेशत्वान्न फल पृथक्संगत्यपेक्षा ।

(२२४) एतेन मातरिश्वा व्याख्यातः ॥८॥

वायुरुत्पद्यते न वेति सन्देहे, छान्दोग्ये वायोरुत्पत्तिर्न श्रूयते तैत्तिरीयके च श्रूयते । तथा चाकाशोत्पत्तिश्रुतिवदनयोः श्रुतिवाक्ययोर्विरोधपरिहारायोत्पत्तिश्रुतिर्गौणी वक्तव्या । वायोरुत्पत्तिरितोऽपि न सम्भवति 'सैषाऽनस्तमिता देवता यद्वायुः (बृ० १।५।२२) इत्यस्तमयप्रतिषेधात् । तस्माद्वायोरुत्पत्तिर्नास्तीति पूर्वपक्षः । सिद्धान्तस्तु— एतेन = वियदुत्पत्तिमत्त्वव्याख्यानेन मातरिश्वापि=वायुरपि वियदवच्छिन्नब्रह्मचैतन्यजन्यतया व्याख्यातः । अस्तमयप्रतिषेधोऽपरविद्याविषय आपेक्षिक । लोकेऽग्न्यादीनामिव वायोरस्तमयादर्शनात्। अन्यथा प्रतिज्ञाहान्यादेः समानत्वात् । न चासति विशेषे वायोरुत्पत्तिमत्त्वप्रतिपादनाय भिन्नाधिकरणत्वारम्भो निरर्थक इति वाच्यम्, संवर्गविद्यादिषु वायोरुपास्यतया महाभागत्वश्रवणात् अस्तमयप्रतिषेधादिभ्यश्च तत्र जायमानाया नित्यत्वशंकाया निवृत्त्यर्थमेतदधिकरणस्यावश्यकत्वादिति ॥८॥

[३ असम्भवाधिकरणम् । सू० ९]

पूर्वं वियत्पवनयोरसम्भावितजन्मनोरप्युत्पत्तिश्रुतिमनुरुध्य यथोत्पत्तिमत्त्वं समर्थितम्, तद्वच्छ्रुतिबलादेव ब्रह्मान्तराद्ब्रह्मोत्पत्तिरभ्युपेयेति दृष्टान्तसंगत्येदमाह—

(२२५) असम्भवस्तु सतोऽनुपपत्तेः ॥९॥

अत्र पूर्वपक्षे श्रुतिबलाद्ब्रह्मोत्पत्तिबोधः, सिद्धान्ते ब्रह्मोत्पत्तिश्रुतेरौपाधिकविषयतया ब्रह्मणोनित्यत्वमिति फलभेदः । 'न चास्य कश्चिज्जनिता न चाधिपः' (श्वे० ६।९) इत्यादीनां ब्रह्मणोनित्यत्वादिप्रतिपादकश्रुतीनां 'त्वं जातो भवसि विश्वतोमुखः' इति श्रुत्याविरोधोऽस्ति न वेति सन्देहे; विरोधोऽस्तीति पूर्वःपक्षः । सिद्धान्तस्तु सतः सदात्म-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कस्य ब्रह्मणः कुतश्चिदन्यतो नोत्पत्तिराशङ्कयितव्या। कुतः ? अनुपपत्तेः। सत्सामान्यात् सत्सामान्यस्योत्पत्तेरसम्भवात्, विशेषस्यैव घटादेर्मृत्सामान्यादुत्पत्तिदर्शनात्। नापि विशेषेभ्यः सामान्यस्योत्पत्तिः; तथा लोकेऽदर्शनात्। नाप्यसतः, निरात्मकत्वप्रसंगात्। एवं च वियदादिसमस्तजगदुत्पत्तिकारणत्वेन सतो ब्रह्मणोऽनभ्युपगमेऽनवस्थाप्रसंगः। यन्मूलकारणं तदेव नोजित्स्यं ब्रह्मेत्यविरोधः॥६॥

[४ तेजोऽधिकरणम्। सू० १०]

अथ माभूत् सामान्यात् सामान्यस्योत्पत्तिः, अस्तु तर्हि सामान्याद्ब्रह्मणस्तेजसो विशेषस्योत्पत्तिरिति प्रत्युदाहरणसंगत्येदमाह—

(२२६) तेजोऽतस्तथा ह्याह ॥१०॥

अत्र पूर्वपक्षे तेजसः साक्षाद्ब्रह्मकार्यत्वाकार्यत्वप्रतिपादकश्रुत्योर्विरोधः सिद्धान्तेऽविरोध इति फलभेदः। 'तत्तेजोऽसृजत' (छा० ६।२।३) इति तेजसः सन्मूलकत्वप्रतिपादकश्रुतेः 'वायोरग्निः' (तै० २।१) इति तस्यैव वायुमूलकत्वप्रतिपादकश्रुत्या विरोधोऽस्ति नवेति सन्देहे; विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु तेज अतोमातरिश्वनो जायते। कस्मात् ? तथा ह्याह=यतो वायुजन्यत्वं 'वायोरग्निरिति श्रुतिराह। असति वायुजत्वे पूर्वोक्ता श्रुतिः पीडिता स्यात्। ननु तेजसो ब्रह्मजन्यत्वप्रतिपादकछान्दोग्यश्रुत्या सहैतस्या विरोधस्तदवस्थ इति चेन्न; आकाशं वायुं च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजत इति कल्प्यमाने तस्याः पारम्पर्यजत्वेऽप्यविरोधात्। यथा तस्याः शृतं तस्या दधि तस्या आमिक्षेत्यादौ धेन्वाः शृतं=तप्तं क्षीरं साक्षात्कार्यम् दध्यादिकं तु पारम्पर्यजमिति तद्वत्। एतेनाक्रमवत्सृष्टिवादिन्यः श्रुतयो व्याख्याताः। तासां सर्वथोपपत्तेः। क्रमवत्सृष्टिवादिनीनां त्वन्यथानुपपत्तेः। अतः सद्वंश्यस्त्रसात्रमपेक्ष्यते नान्यब्रह्मिसजन्यत्वमिति सर्वत्राविरोधः॥१०॥

[५ अबधिकरणम्। सू० ११]

अथ तेजसो वायुजन्यत्वकथनानन्तरं क्रमेणाप्पृथिव्योर्बुद्धिस्थत्वाद्बुद्धिसन्निधानलक्षणसंगत्योत्तरमधिकरणद्वयमाह—

(२२७) आपः ॥११॥

अतस्तथा ह्याह इत्यनुवर्तते। पूर्ववदपां सन्मूलकत्वामूलकत्वश्रुत्योर्मिथोविरोधाविरोधौ पूर्वपक्षसिद्धान्तयोः फलमितिभेदः। 'अग्नेरापः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[१३ उत्क्रान्त्यधिकरणम्]

पूर्वं जीवस्य ब्रह्माभिन्नत्वसम्पादनाय स्वयंज्योतिष्ट्वं नित्यत्वं च यथासाधितं, तद्वदधुनाणुत्वनिरासेन विभुत्वं साधयतीत्यान्तरवहि- र्भावसंगत्येदमाह—

(२३५) उत्क्रान्तिगत्यागतीनाम् ॥१९॥

अत्र पूर्वपक्षे जीवाणुत्वबोधः, सिद्धान्ते विभुत्वनिश्चय इति फलभेदः। अत्र 'सर्वव्यापी' (श्वे० ६।११) इत्यादिसर्वगतत्वश्रुतेः 'एषोऽणुरात्मा' (मु० ३।१।९) इत्यणुत्वश्रुत्या विरोधोऽस्ति नवेति संशये, अस्तीति पूर्वःपक्षः। कुतः? तस्य उत्क्रान्तिगत्यागतीनां श्रवणात्। तथाहि—'अस्माच्छरीरादुत्क्रामति' (कौ० ३।३) 'ये वै के चास्माल्लोकात्प्रयन्ति चान्द्रमसमेव ते सर्वे गच्छन्ति' (कौ० १।२) 'तस्माल्लोकात्पुनरेति' (बृ० ४।४।६) इत्यादिश्रुतय उत्क्रान्त्यादिप्रति- पादिकाः सन्ति। तस्मादस्ति जीवोऽणुरिति विभोरुत्क्रान्त्यादयो नाव- कल्पन्ते ॥१९॥

(२३६) स्वात्मना चोत्तरयोः ॥२०॥

उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनि- वृत्त्या सम्भवति। किन्तु उत्तरयोर्गत्यागत्योः स्वात्मनैव जीवात्मनः सम्बन्धोऽस्ति। अतस्ते जीवात्मनोऽमध्यमपरिमाणस्याणुत्वे एव सम्भवतः। तस्मादस्याणुत्वसिद्धिरिति ॥२०॥

(२३७) नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥२१॥

अथ नायमात्माऽणुः। कस्मात्? अतच्छ्रुतेः = अणुत्वविपरीत- परिमाणश्रवणात्। 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु' (बृ० ४।४।१२) 'सत्यंज्ञानमनन्तं ब्रह्म' (तै० २।१।१) 'सर्व- व्यापी सर्वभूतान्तरात्मा (श्वे० ६।११) इत्यादिना सर्वगतत्वश्रुतेरिति चेन्न; इतराधिकारात्। परस्यैव ब्रह्मणः सर्वेषु वेदान्तेषु प्राधान्येन ज्ञेयतया प्रकृतत्वात्। तस्मात्परिमाणान्तरश्रवणस्य ब्रह्मविषयतया जीवाणुत्वश्रुतिविरोधः ॥२१॥

(२३८) स्वशब्दोन्मानाभ्यां च ॥२२॥

इतश्च जीवोऽणुः। यतः 'एषोऽणुरात्मा चेतसा वेदितव्यः' (मु० ३।१।९) इत्यत्र स्वस्याणुत्वस्य वाचकः शब्दः साक्षादेव श्रूयते। तथा 'बालाग्रशतभागस्य शतधाकल्पितस्य च। भागो जीवः स विज्ञेयः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(श्वे० ५।८) इत्याद्युन्मानं जीवाणुत्वबोधकमस्ति। सर्वस्थूलपरिमाणापेक्षयाऽत्यन्तापकृष्टपरिमाणमुन्मानमित्यर्थः। अतस्ताभ्यां जीवोऽणुरेवेति सिद्धम् ॥२२॥

ननु जीवस्याणुत्वे जाह्नवीह्रदनिमग्नानां देहव्यापिशैत्योपलब्धिर्निदाघसमये च सकलदेहपरितापोपलब्धिश्च कथमुपपद्यते इत्यत आह–

(२३९) अविरोधश्चन्दनवत् ॥२३॥

यथा देहैकदेशसम्बद्धोऽपि चन्दनविन्दुः शरीरव्यापि सुखं जनयति, तथाऽस्माऽपि देहैकदेशस्थो देहव्यापिनीं शैत्यौष्ण्योपलब्धिं करिष्यतीत्यविरोधः। सकलशरीरव्यापित्वचा सहात्मनः सम्बन्धस्तत्र कारणमित्यर्थः ॥२३॥

(२४०) अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥२४॥

ननु दृष्टान्तदार्ष्टान्तयोर्वैषम्यं, प्रत्यक्षेण चन्दनविन्दोरवस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादजनकत्वं चानुभूयते, नैवं प्रत्यक्षेणात्मनो देहैकदेशस्थत्वमनुभूयतेऽनुमीयते तु तदिति चेन्न; चन्दनवदात्मनोऽपि देहैकदेशवृत्तित्वस्याभ्युपगमात्। कथम्? हृदि हि, यस्मात् 'हृदि ह्येष आत्मा' (प्र० ३।६) 'स वा एष आत्मा हृदि' (छा० ८।३।३) 'हृद्यन्तर्ज्योतिः पुरुषः' (बृ० ४।३।७) इत्यादावल्पपरिमाणो हृदि जीवो पठ्यते। अतो जीवस्याणुत्वाभ्युपगमान्न दृष्टान्तवैषम्यमिति भावः ॥२४॥

अस्तु सावयवतया चन्दनविन्दोः सकलदेहव्यापित्वं, तथापि निरवयवस्याणुपरिमाणस्य जीवस्य कथं देहव्यापित्वं स्यादित्यतः पक्षान्तरमाह—

(२४१) गुणाद्वा लोकवत् ॥२५॥

चैतन्यगुणव्याप्तेर्वाऽणोरपि जीवस्य सकलदेहव्यापिकार्यं न विरुध्यते। लोकवत्, यथा गृहैकदेशवर्तिनां मणिप्रदीपादीनामपि प्रभादिरूपगुणवशात् कृत्स्नगृहव्यापिप्रकाशादि कार्यं सम्भवति, तद्वदित्यर्थः॥२५॥

ननु पटस्य शुक्लो गुणः पटव्यतिरिक्तेणान्यत्र यथा न वर्तते, तथा निविडावयवाद्गुणिनः प्रदीपाद्व्यतिरेकेणान्यत्र विरलावयवः प्रभात्मको गुणो न वर्तेतेत्यत आह—

(२४२) व्यतिरेको गन्धवत् ॥२६॥

यथा गुणस्य सतो गन्धस्य गन्धवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संकल्पात्मकं मनः। ते विज्ञानमनसी भूतानामात्मनश्चान्तरा... जायेते, 'एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च खं वायुर्ज्यो...रापः पृथिवी विश्वस्य धारिणी' (मु० २।१।३) इत्यादिश्रुतेस्त... गमकत्वात्। तस्माद्भूतानां पूर्वोक्तोत्पत्तिप्रलयभङ्गप्रसङ्गादस्तिवि... इति पूर्वः पक्षः। सिद्धान्तस्तु न; अविशेषात्। बुद्धिमनसोर्भौतिक... भूतोत्पत्तिप्रलयाभ्यां तदुत्पत्तिप्रलययोरविशेषादिति नात्र क्रमा... मृग्यम्। भूतोत्पत्तिक्रमेणैव भौतिकानामुत्पत्तिरित्यतो न विरोध... अथर्वणश्रुतिस्तु सर्वेषां भूतानां भौतिकानां चोत्पत्तिमात्रं ब्रूते, ...क्रमम्। तस्मान्नास्ति भूतोत्पत्तिक्रमभङ्गप्रसङ्ग इति सर्वमनवद्यमिति

[१० चराचरव्यपाश्रयाधिकरणम्। सू० १६]

इत्थं तत्पदार्थब्रह्मसिद्ध्यर्थं भूतकरणोत्पत्तिश्रुतिविरोधं नि... पादसमाप्तिपर्यन्तं जीवविषयश्रुतिविरोधो निरसनीयः। तत्र करण... भौतिकत्वेन यथा भूतोत्पत्तिश्रुतेरविरोधोऽभिहितः, न तथेह जी...त्पत्तिशास्त्रेणाविरोध इत्यतो जीवोत्पत्तौ भूतोत्पत्तिक्रमभङ्गस्याव...म्भावित्वादिति प्रत्युदाहरणसंगत्येदमारभ्यते—

(२३२) चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥१६॥

अत्र पूर्वपक्षे जातकर्मादिसंस्कारविधानात् जातो देवदत्तः इत... लौकिकव्यपदेशाच्च जीवस्यानित्यत्वं, सिद्धान्ते 'न जीवो म्रि... इत्यादिश्रुतिप्रामाण्यात्तस्य नित्यत्वमिति फलभेदः। अत्र 'न जी... म्रियते' (छा० ६।११।३) इति जीवनित्यत्वश्रुतेस्तदुत्पत्त्यादिनिमि... जातेष्ट्यादि शास्त्रेण विरोधोऽस्ति न वेति विशये; विरोधोऽस्... पूर्वःपक्षः। सिद्धान्तस्तु तयोर्लौकिकजन्ममरणयोर्व्यपदेशो जीव... भाक्तः, चराचरव्यपाश्रयः स्थावरजङ्गमदेहविषयस्तु मुख्यो... कस्मात्? तस्य जन्मादिव्यपदेशस्य देहोत्पत्तिनाशान्वयव्यतिरे... विधायित्वात्। जातकर्मादिविधानं देहप्रादुर्भावापेक्षमिति जीव... र्भावाभावान्न जीवनित्यत्वंशास्त्रस्य विरोध इति भावः ॥१६॥

[११ आत्माधिकरणम्। सू० १७]

इत्थं देहोत्पत्तिनाशाभ्यां न जीवस्य जन्मनाशौस्तः इत्यु... तत्तथा स्यातां, कल्पाद्यन्तयोर्जीवस्य जन्मनाशौ किं नाभ्युपेयौ... प्रत्युदाहरणसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२३३) नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥१७॥

अत्र पूर्वपक्षे जीवस्य ब्रह्मकार्यत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धिः फलं, सिद्धान्ते जीवस्य नित्यत्वे ब्रह्मात्मैक्यबोधः फलमितिभेदः। अत्र शरीराद्यधिष्ठाता कर्मफलसम्बन्धी जीवात्मा किं व्योमादिवदुत्पद्यते ब्रह्मणः, उत ब्रह्मवदेव नोत्पद्यते इति श्रुतिविप्रतिपत्तेर्विशयः। तत्र 'सर्व एवात्मानो व्युच्चरन्ति' इत्यात्मनां पृथक्सृष्टिश्रवणेन जीवस्य जन्माभ्युपेयमिति पूर्वःपक्षः। सिद्धान्तस्तु आत्मा जीवो नोत्पद्यते। कुतः ? अश्रुतेः = भूयःसु प्रदेशेपूत्पत्तिप्रकरणे जीवोत्पत्तेरश्रवणात्। न च क्वचिदस्याप्युत्पत्तिः श्रूयते इति वाच्यम्, असम्भवात्। कस्मात् ? नित्यत्वाच्च ताभ्यः 'स वा एष महानज आत्मा' (बृ० ४।४।२२) 'अज्ञो नित्यः शाश्वतोऽयं पुराणः' (क० २।१८) इत्यादिश्रुतिभ्यो जीवस्य नित्यत्वावगमाच्च। जीवोत्पत्ति वाक्यं च घटाकाशोत्पत्तिवदौपाधिकजन्मविषयकमिति न जीवश्रुतीनां मिथो विरोध इति भावः ॥१७॥

[१२ साधिकरणम्। सू० १८]

पूर्वं जीवानुत्पत्तिरभिहिता। अधुना तत्रैव चेतनत्वाचेतनत्वविचारप्रसक्त्या हेतुहेतुमद्भावसंगत्येदमाह—

(२३४) ज्ञोऽत एव ॥१८॥

अत्र पूर्वपक्षे कणभुजानामिवागन्तुकचैतन्य आत्मेति बोधः, सिद्धान्ते आत्मानित्यचैतन्य इति निश्चयः इति फलभेदः। 'पश्यंश्चक्षुः' इत्यादिश्रुतिबलेनात्ममनःसंयोगजज्ञानवदात्मप्रतिपादकराद्धान्तस्य 'आत्मनः स्वयंज्योतिष्ट्वप्रतिपादकश्रुत्याविरोधोऽस्ति न वेति सन्देहे, विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु ज्ञोनित्यचैतन्योऽयमात्मा। कुतः ? अत एव—परस्यैव ब्रह्मणोऽविकृतस्योपाधिसम्पर्काज्जीवत्वेनावतिष्ठमानस्योत्पत्त्यसम्भवादेवेत्यर्थः। जीवप्रकरणे 'असुप्तः सुप्तानभिचाकशीति' (बृ० ४।३।११) 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' (बृ० ४।३।९) 'नहि विज्ञातुर्विज्ञातेर्लोपो विद्यते' (बृ० ४।३।३०) इत्यादिश्रुतयोऽपि विद्यन्ते। 'न चात्मनो नित्यचैतन्यस्वरूपत्वे घ्राणाद्यानर्थक्यमिति वाच्यम्; गन्धाय घ्राणम्' इत्यादिना गन्धादिगोचरान्तःकरणवृत्तये तेषामावश्यकत्वात्। कणभुजादितर्कश्च श्रुतिविरोधादाभासरूप इत्यतस्तेनापि न स्वयंज्योतिष्ट्वश्रुतेर्विरोध इति भावः ॥१८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(तै० ३।२) इति श्रुतेः 'तदयोऽसृजत' (छा० ६।२।३) इत्यपां ब्रह्ममूलकत्वश्रुत्या विरोधोऽस्ति न वेति संशये; अस्तीति पूर्वपक्षः। सिद्धान्तस्तु—आपोऽतस्तेजसो जायन्ते। हि=यस्मात्, तथा='अग्नेरापः' इति श्रुतिरपां तेजोजन्यत्वमाह। नन्वपामग्निदाह्यत्वात्कथं तज्जन्यत्वमिति चेन्न; त्रिवृत्कृतवदत्रिवृत्कृतयोरप्तेजसोर्दाह्यदाहकत्वासम्भवाद् वचनाच्च विरोधाभाव इत्यर्थः। अतः पूर्ववत्तेजोभावापन्नब्रह्मजत्वेनानयोरैकार्थ्यान्न विरोध इति भावः ॥११॥

[६ पृथिव्यधिकरणम् । सू० १२]

(२२८) पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥१२॥

पूर्ववदत्रापि ब्रह्मजन्यत्वाजन्यत्वबोधकश्रुत्योर्विरोधाविरोधौ पूर्वपक्षसिद्धान्तयोः फलं बोध्यम्। 'अद्भ्यः पृथिवी' पृथिव्या अब्जन्यत्वश्रुतेः 'ता अन्नमसृजन्त' (छा० ६।२।४) इति श्रुत्या विरोधोऽस्ति नवेति सन्देहे; अन्नशब्दस्य व्रीहियवादौ प्रसिद्धत्वेन पृथिव्यर्थेऽप्रसिद्धत्वेन चापामेकत्र पृथिवीहेतुत्वमन्यत्रान्नहेतुत्वं श्रूयत इत्यतः पूर्वोक्तयोः श्रुत्योर्विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु पृथिव्येवेयमन्नशब्देनाद्भ्यो जायमाना विवक्ष्यते; नौदनादि। कुतः ? अधिकाररूपशब्दान्तरेभ्यः। अधिकारस्तावत् 'तत्तेजोऽसृजत' इत्यादि महाभूतविषयोऽस्ति। तत्र क्रममतिक्रम्य नाकस्माद्व्रीहियवादिपरिग्रहो न्यायः। तथा 'यत्कृष्णं तदन्नस्य' इति वाक्यशेषे पृथिवीत्वज्ञापकं कृष्णरूपमपि श्रूयते। शब्दान्तरमपि 'अद्भ्यः पृथिवी' इति पृथिव्या अब्जन्यत्वप्रतिपादकमस्त्येव। अतः पृथिव्या अन्नवाच्यत्वनिश्चितेऽनयोरैकार्थ्यं नैकवाक्यत्वादविरोध इति ॥१२॥

[७ तदभिध्यानाधिकरणम् । सू० १३]

पूर्वं क्रमेण महाभूतोत्पत्तिश्रुतीनामविरोधो दर्शितः। सम्प्रति भूतान्याश्रित्यान्यद्विचारणीयमिति आश्रयाश्रयिभावसंगत्येदमारभ्यते—

(२२९) तदभिध्यानादेव तु तल्लिङ्गात् ॥१३॥

अत्र पूर्वपक्षे वियदादीनामपि स्वोत्तरोत्पन्नभूतकारणत्वबोधः फलं सिद्धान्ते परमेश्वरस्यैव सर्वसृष्टिकारणत्वबोधः फलमिति भेदः। ब्रह्मणः सर्वसृष्टिकर्तृत्वप्रतिपादकश्रुतेः केषांचिद् भूतानां भौतिकस्रष्टृत्वप्रतिपादकश्रुत्या विरोधोऽस्ति नवेति सन्देहे; 'आकाशाद्वायुरि'त्यादि भूतानां तत्तत्कार्यजनने स्वातन्त्र्यश्रवणात् 'तत्तेज ऐक्षत' 'ता आ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऐक्षन्त' इत्यादौ भूतानां चेतनत्वश्रवणाच्चास्ति विरोध इति पूर्वपक्षः। सिद्धान्तस्तु स एव परमेश्वरस्तेन तेन रूपेणावतिष्ठमानस्तत्तत्कार्यगोचरेक्षणात्मकाभिध्यानादेव तं विकारं सृजति। कुतः? तल्लिङ्गात्=तस्य परमेश्वरस्य 'यः पृथिव्यां तिष्ठन्यः पृथिव्या अन्तरो यं पृथिवी न वेद' (बृ० ३।७।३) इत्यादौ सर्वनियन्तृत्वरूपलिङ्गदर्शनात्। अप्तेजसोरीक्षणश्रवणं तु परमेश्वरावेशवशादेव द्रष्टव्यम्। अतः परमेश्वराधिष्ठितभूतानां स्रष्टृत्वप्रतिपादकतयाऽनयोरेकवाक्यत्वादविरोधः॥१३॥

[८ विपर्ययाधिकरणम्। सू० १४]

इत्थं भूतानामुत्पत्तिं विचार्य बुद्धिस्थो लयक्रमो विचारणीय इति प्रसङ्गसंगत्येदमारभ्यते—

(२३०) विपर्ययेण तु क्रमोऽत उपपद्यते च ॥१४॥

अत्र पूर्वपक्षे भूतानां लयक्रमचिन्तनं निष्प्रयोजनं, सिद्धान्ते प्रासङ्गिकविचारस्य ब्रह्मध्यानं फलमिति भेदः। किमत्र भूतानामुत्पत्तिक्रमेणैव लयः, तद्विपरीतक्रमेण वेति सन्देहे; उत्पत्तिक्रमस्य श्रुतत्वात्क्रमापेक्षस्य प्रलयस्यापि स एव क्रमः स्यादिति कल्प्यमानापेक्षया क्लृप्तस्याश्रये लाघवादिति पूर्वपक्षः। सिद्धान्तस्तु अत उत्पत्तिक्रमाद्विपर्ययेण तु विपरीतक्रमेणैव लयक्रमो भवति। यथाहि लोके सोपानारोहणक्रमाद्विपरीतक्रमेण तदवरोहणं दृश्यते। एवं स्मृतावपि 'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते' इत्यादौ तथादर्शनात्। उपपद्यते च व्युत्क्रमेणैव लयः। नहि कार्ये सति कारणस्याप्ययो युक्तः, कारणनाशे कार्यस्यावस्थानानुपपत्तेः कार्ये तु नष्टे कारणस्यावस्थानं मृदादिषु दृष्टम्॥१४॥

[९ अन्तराविज्ञानाधिकरणम्। सू० १५]

भूतोत्पत्तिलयक्रमविचारस्य यत्प्रयोजनं, तदेव करणोत्पत्तिक्रमविचारस्येकप्रयोजनकत्वसंगत्येदमारभ्यते—

(२३१) अन्तराविज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥१५॥

अत्र पूर्वोत्तरपक्षयोर्भूतोत्पत्तिक्रमवत्करणोत्पत्तिक्रमे विरोधाविरोधयोः सतोरेकवाक्यत्वभंगः श्रुतीनां तदैक्यं च फलं द्रष्टव्यम्। पूर्वोक्तक्रमः करणोत्पत्तिक्रमेण विरुध्यते न वेति सन्देहे; विज्ञानमनसी=विज्ञायतेऽनेनेति व्युत्पत्त्या सेन्द्रिया बुद्धिर्विज्ञानशब्दार्थः,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुष्पवाटिकातो दूरे पर्यटतां पुंसां पुष्पगन्धोपलब्धिदर्शनात्। एवमणोरपि जीवस्य चैतन्यगुणस्तदन्यत्र भविष्यति। अतः पूर्वोक्तः पटरूपादिदृष्टान्तोऽनैकान्तिकः ॥२६॥

(२४३) तथा च दर्शयति ॥२७॥

हृदयापतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तस्यैव 'आलोमभ्य आ नखाग्रेभ्यः (छा० ८।८।१) इति श्रुतिः चैतन्येन गुणेन समस्तदेहव्यापित्वं दर्शयति ॥२७॥

तत्रैवहेत्वन्तरमाह—

(२४४) पृथगुपदेशात् ॥२८॥

'प्रज्ञया शरीरं समारुह्य' (कौ० ३।६) इत्यत्रात्मज्ञानयोः कर्तृकरणभावेन पृथगुपदेशात् चैतन्यगुणेनैवास्य शरीरव्यापित्वं गम्यते। तस्माद् व्यापकं ज्ञानं, जीवात्मा त्वणुरेवेति पूर्वः पक्षः ॥२८॥

सिद्धान्तस्तु—

(२४५) तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥२९॥

तुशब्दः पूर्वपक्षव्यावर्तकः। नैवाणुरात्मा, उत्पत्त्यश्रवणात् परस्यैव ब्रह्मणः प्रवेशश्रवणात्तादात्म्योपदेशाच्च परमेव ब्रह्म जीवः इति। कथं तर्हि जीवेऽणुत्वव्यपदेशः? तद्गुणसारत्वात् = तस्या बुद्धेर्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयस्तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति स तद्गुणसारस्तस्य भावस्तत्त्वम्। नहि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति। तस्मात्तद्गुणसारत्वाद् बुद्धिपरिमाणेनास्यपरिमाणव्यपदेशः, तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो, न स्वतः। तथा च 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः' (श्वे० ६।८) इति श्रुतिर्बुद्धिगुणसम्बन्धेनैवाराग्रमात्रतां शास्ति, न स्वरूपेण। प्राज्ञवत् = यथा प्राज्ञस्य परमात्मनः सगुणोपासनेषु दहराद्युपाधिवशादणुत्वादिव्यपदेशः तद्वदित्यर्थः॥२९॥

अथ यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत, तर्हि कदाचिद्बुद्ध्या वियोगे तस्य संसारित्वं न स्यादित्यत उत्तरं पठति—

(२४६) यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥३०॥

नायमनन्तरो दोषः। कुतः? यावदात्मभावित्वाद्बुद्धिसंयोगस्य यावदस्य जीवस्य तत्त्वदर्शनेन संसारित्वं न निवर्तते, तावदस्य बुद्धिसंयोगो न शाम्यति। बुद्ध्युपाधिसम्बन्धपर्यन्तमेव जीवस्य जीवत्व

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संसारित्वं चेत्यर्थः। परमार्थतस्तु न जीवो नाम नित्यमुक्तस्वरूपाद्-ब्रह्मणो भिन्नः कश्चित्पदार्थोऽस्ति; 'नान्योऽतोऽस्ति द्रष्टा' (बृ० ३।७।२३) 'तत्त्वमसि' 'अहं ब्रह्मास्मि' (बृ० १।४।७) इत्यादिश्रुतिभ्यः। ननु यावदात्मभावित्वं बुद्धिसंयोगस्य कथमवगम्यते इति चेन्न; तद्दर्शनात्। 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति' (बृ० ४।३।७) इत्यादिश्रुतौ तथा दर्शनात्। अतो नोक्तदोप इत्यर्थः ॥३०॥

ननु सुषुप्तप्रलययोर्नात्मनोबुद्धिसम्बन्धोऽभ्युपगन्तुं शक्यते 'स्वमपीतो भवति' (छा० ६।८।१) इति वचनात् सर्वकार्यप्रलयाभ्युपगमाच्च। अतो बुद्धिसंयोगस्य यावदात्मभावित्वं नास्तीत्यत आह—

(२४७) पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगाच्च ॥३१॥

यथा लोके बाल्ये बीजात्मना सतामेव पुंस्त्वादीनां यौवनेऽभिव्यक्तिस्तद्वत् सुषुप्त्यादौ सूक्ष्मात्मना सत एव बुद्धिसंयोगादेरभिव्यक्तिसम्भवात् न तस्य यावदात्मभावित्वं विरुध्यते इति भावः ॥३१॥

नन्वात्मन उपाधिभूतेऽन्तःकरणेबुद्ध्यपरपर्याये किं मानं, यत्प्रयुक्तश्चात्मनः संसारः स्यादित्यत आह—

(२४८) नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो नान्यथा ॥३२॥

तच्चोक्तं मनोऽवश्यमभ्युपेयम्। अन्यथा=मनसोऽनभ्युपगमे सर्वेषामात्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येत। सत्यपि हेतुसमवधाने फलाभावान्नित्यमेवानुपलब्धिः प्रसज्येत। अथवाऽन्यतरस्यात्मन इन्द्रियस्य वा शक्तिप्रतिबन्धोऽभ्युपेयः। न चात्मनः स सम्भवति तस्याविक्रियत्वात्। नापीन्द्रियस्य, शक्तेरान्तरत्वेनेन्द्रियधर्मत्वायोगात्। तस्माद्युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गम्। तथा च 'अन्यत्रमना अभूवम् नादर्शमन्यत्रमना अभूवं नाश्रौषम्' (बृ० १।५।३) 'मनसा ह्येव पश्यति मनसा शृणोति' (बृ० १।५।३) इत्यादिश्रुतिरपि तत्र मानम्। मनः प्रयुक्तश्चात्मनि संसारोऽणुत्वादिरिति। तस्मादौपाधिकाणुत्वश्रुत्या न पारमार्थिकसर्वगतत्वश्रुतेर्विरोध इति भावः ॥३२॥

[१४ कर्त्रधिकरणम्। सू० ३३-४०]

अथ जीवस्याणुत्वं यथौपाधिकं, स्वयंज्योतिष्ट्वादिवत्सर्वगतत्वं च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रभेदानुवादित्वेनाभेदपरत्वात्कल्पितभेदवानंशो जीव इतिभावः ॥४३॥

(२६०) मन्त्रवर्णाच्च ॥४४॥

'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी' (छा० ३।१२।६) ति मन्त्रवर्णात् ब्रह्मणोऽविद्याकल्पितपादोंऽशो भागो भूतपदवाच्यो जीवोऽवगम्यते ॥४४॥

(२६१) अपि च स्मर्यते ॥४५॥

'ममैवांशो जीवलोके जीवभूतः सनातनः' (गी० १५।७) इत्यादौ परमेश्वरांशत्वं जीवस्य स्मर्यते। तस्य कल्पिततया तयोरीशित्रीशितव्यभावो निश्चये इत्यनवद्यम् ॥४५॥

ननु जीवस्येश्वरांशत्वाभ्युपगमे तत्संसारदुःखेनेश्वरस्यापि दुःखित्वप्रसक्तिरित्यत आह—

(२६२) प्रकाशादिवन्नैवं परः ॥४६॥

यथा जीव ऽविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमित्यविद्यया कृतं दुःखोपभोगमभिमन्यते, नैवं परमेश्वरः। कथम ? प्रकाशादिवत् = यथा सौरश्चान्द्रमसो वा प्रकाशो वियद्व्याप्यवर्तमानोऽङ्गुल्याद्युपाधिसम्बन्धाद्वक्रादिभावमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते। यथा चाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि परमार्थतो न गच्छति, एवमविद्योपहिते जीवाख्येंऽशे दुःखायमानेऽपि नांशी परमेश्वरो दुःखायते। जीवस्यापि दुःखित्वमविद्यानिमित्तमेव। निमित्तापाये नैमित्तकस्याप्यपाय इति तत्त्वमस्यादिमहावाक्येन तदैक्यं प्रतिपद्यते। अतो न जैवेन दुःखेन परमात्मनो दुःखित्वप्रसङ्गः ॥४६॥

(२६३) स्मरन्ति च ॥४७॥

तथैव 'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः। न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ॥ इत्यादिना व्यासादयः परमेश्वरस्य दुःखासंस्पर्शित्वं स्मरन्ति। च शब्देन 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (श्वे० ४।६) 'एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' (क० ५।११) इत्यादिना श्रुतयः समामनन्ति ॥४७॥

ननु तर्ह्येकश्चेत् सर्वेषां भूतानामन्तरात्मा, कथं लौकिको वैदिकोवानुज्ञापरिहारौ स्यातामित्यत आह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२६४) अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥४८॥

'ऋतौ भार्यामुपेयात्' 'अग्नीषोमीयं पशुमालभेत' इत्यनुज्ञा। 'गुर्वङ्गनां नोपगच्छेत्' 'न हिंस्यात् सर्वा भूतानि' इति परिहारः। लोकेऽपि 'मित्रं सेव्यमित्यनुज्ञा' 'शत्रुः परिहर्तव्य' इति परिहारः। एवं विधानुज्ञा परिहारौ सर्वत्रात्मनोऽखण्डैकरसत्वेऽपि देहसम्बन्धात् अविद्यानिमित्तदेहतादात्म्यसम्बन्धात्संगच्छेते। ज्योतिरादिवत्। यथा ज्योतिषोऽग्नेरेकत्वेऽप्यग्निः श्मशानसम्बन्धात्परिह्रियते, नान्यः। यथा चैकस्यापि भानोः प्रकाशोऽमेध्यदेशसम्बद्धः परिह्रियते, न शुचिभूमिष्ठः। यथा च मूत्रपुरीषं गवां पवित्रतया परिगृह्यते, तदेव जात्यन्तरीयं परिवर्ज्यते, तद्वदात्मापीत्यर्थः ॥४८॥

नन्वेवमप्यात्मन एकत्वे कर्मफलसङ्करो दुर्वार इत्यत आह—

(२६५) असंततेश्चाव्यतिकरः ॥४९॥

अव्यतिकरः=तथासत्यपि कर्मफलसम्बन्धस्यासङ्करः। कुतः ? उपाधितन्त्रस्यात्मनः सर्वैः शरीरैः सन्ततेरभावात्। उपाध्यसन्तानाज्जीवसन्तानाभावेन कर्मफलव्यतिकरो न भवतीत्यर्थः ॥४९॥

(२६६) आभास एव च ॥५०॥

किं चैष परस्यात्मन आभास एव जीव जलसूर्यवत्प्रतिपत्तव्यः। अतश्च नैकस्मिन् प्रतिबिम्बेकम्पमाने प्रतिबिम्बान्तरं कम्पते यथा, तथैव नैकस्मिन् जीवे सति कर्मफलसम्बन्धिनि जीवान्तरस्य तत्सम्बन्ध इति कर्मफलयोःसङ्करः सुपरिहरः। सांख्यमते विभूनां नानात्मनां स्वरूपत्वात्सन्निधानाद्यविशेषाच्चैकस्य सुखदुःखसम्बन्धे सर्वेषां सुखदुःखसम्बन्धः स्यात्। काणादमतेऽपि यदैकात्मना मनः संयोगः तदात्मान्तरैरपि विभुत्वान्मनः संयोगो नान्तरीयकः, ततश्चैकस्यात्मनः सुखदुःखसम्बन्धे सर्वात्मनामपि समानं सुखित्वादिकं प्रसज्येत इति कर्मफलसंकरो दुर्वारः ॥५०॥

ननु नानात्मवादेऽदृष्टनियमात्कर्मफलनियमः स्यादित्यत आह—

(२६७) अदृष्टानियमात् ॥५१॥

सांख्यमतेऽनात्मसमवायिनः प्रधानसमवेतस्यादृष्टस्य सर्वात्मसाधारण्यान्नप्रत्यात्मं सुखादिभोगस्यनियामकत्वमुपपद्यते। काणादमतेऽपि पूर्ववत्साधारणेनात्ममनःसंयोगेन निष्पन्नस्यादृष्टस्यास्यैवात्मनोऽदृष्टमिदमिति हेत्वभावेन तुल्यो दोष इति संकरस्तदवस्थ एव ॥५१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विद्याप्रत्युपस्थापितबुद्ध्यादिकरणसंघातसम्पृक्त आत्मा स्वप्नजागृतयोः कर्त्ता दुःखी भवति, करणाद्यनपेक्ष्य स्वभावतोऽकर्त्ता सुषुप्त्यादौ सुखी भवति। विधिशास्त्रं तु तावद्यथाप्राप्तं कर्त्तृत्वमुपादाय कर्त्तव्यविशेषमुपदिशति, न स्वाभाविकं कर्तृत्वमात्मनः प्रतिपादयतीति न तेनासङ्गत्वश्रुतेर्विरोधोऽस्तीति भावः ॥४०॥

[१६ परायत्ताधिकरणम्। सू० ४१-४२]

इत्यमौपाधिकं कर्तृत्वं जीवस्याभिहितम्, सम्प्रतितदुपजीव्येश्वराधीनं तदिति साधयितुमुपजीव्योपजीवकभावसंगत्येदमाह—

(२५७) परात्तु तच्छ्रुतेः ॥४१॥

अत्र पूर्वपक्षे जीवकर्त्तृत्वं रागादिप्रयुक्तं, सिद्धान्ते परमेश्वराधीनमिति फलभेदः। अत्र किल 'एष ह्येव साधुकर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते'। (कौषी० ३।८) इत्यादिश्रुतेर्विधिप्रतिषेधादिशास्त्रेण विरोधोऽस्ति न वेति विशये; रागद्वेषादिप्रयुक्तः कारकान्तरसामग्री सम्पन्नः स्वयमेव जीवः कर्तृत्वमनुभवति, किं तस्येश्वरः करिष्यति? 'अतः कर्त्तृत्वप्रतिपादकविध्यादिशास्त्रेण सह पूर्वोक्तश्रुतेर्विरोधोऽस्त्येवेति पूर्वपक्षः। सिद्धान्तस्तु सौत्रेण तुशब्देन पूर्वोक्तामाशङ्कां व्यावर्त्य प्रतिजानीते। कार्यकरणसंघाताविवेकिनो जीवस्याविद्यातिमिरान्धस्य न स्वतः कर्त्तृत्वसिद्धिः, किन्तु परात्=परमेश्वरात्कर्माध्यक्षात्सर्वभूताधिवासात्साक्षिणस्तस्य कर्त्तृत्वादिलक्षणस्यसंसारस्यसिद्धिः, तदनुकम्पाहेतुकविज्ञानेन च मोक्षसिद्धिर्भवितुमर्हति। कुतः? तच्छ्रुतेः। 'एष ह्येव साधु कर्म कारयति' इत्यादिश्रुतेः परमेश्वरस्य हेतुकर्तृकत्वश्रवणात्। रागादिदोषप्रयुक्तस्य सामग्रीसम्पन्नस्यापि जीवस्य सर्वास्वेव प्रवृत्तिषु परमेश्वरो हेतुकर्त्तेति पूर्वोक्तश्रुत्यावसीयते इत्यर्थः ॥४१॥

नन्वीश्वरस्य कारयितृत्वे वैषम्यनैर्घृण्येस्यातामकृताभ्यागमादिदोषश्च जीवस्येत्यत आह—

(२५८) कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥४२॥

तुशब्दश्चोदितदोषं व्यावर्तयति। जीवेन कृतः यः प्रयत्नो धर्मादिलक्षणस्तदपेक्षः परमेश्वरएवैनमनन्तरमपिधर्मादिकं कारयति, तदनुसारं सुखादिकं फलपर्जन्यवत् प्रयच्छतीति न तत्र वैषम्यनैर्घृण्यदोषप्रसक्तिः। ननु कृतप्रयत्नापेक्षत्वमेव जीवस्यैश्वराधीने कर्त्तृत्वे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नोपपद्यते इति चेन्न; जीवस्य कर्मकर्तृत्वेऽपि तत्र कारयितृत्वं परमेश्वरस्यैवेत्यदोषात्। अधुना पूर्वप्रयत्नमपेक्ष्य कारयति ततः पूर्वतरं प्रयत्नमपेक्ष्याकारयदित्यनादित्वात्संसारस्येत्यदोषः। ननु कृतप्रयत्नापेक्षः कथमीश्वरोऽवगम्यते ? विहितप्रतिषिद्धावैयर्थ्यादिभ्यः। तथाहि 'स्वर्गकामो यजेत' 'ब्राह्मणो न हन्तव्यः' इति विहितप्रतिषिद्धयोरेवं सत्यवैयर्थ्यं भवति। अन्यथा तदनर्थकं स्यात्। एवमीश्वरस्यात्यन्तानपेक्षत्वे लौकिकस्य पुरुषप्रयत्नस्य देशकालनिमित्तानामपि वैयर्थ्यं स्यादकृताभ्यागमादिदोपश्चेत्येतत्सर्वमादिना ग्राह्यम्। अतः परमेश्वराधीनकर्तृत्वप्रतिपादकविध्यादिशास्त्रेण 'एष ह्येव साधु कारयतीत्यादिशास्त्रस्य न विरोध इति भावः ॥४२॥

[१७ अंशाधिकरणम् । सू० ४३-५३]

इत्थं जीवस्य नित्यत्वादिकमभिधायाधुना ब्रह्माभेदयोग्यस्य तस्य तदैक्यं साधयितुं हेतुहेतुमद्भावसंगत्येदमाह—

(२५९) अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥४३॥

अत्र पूर्वपक्षे जीवेश्वरयोर्भेदः सिद्धान्ते तदभेद इतिफलभेदः। अत्र 'तत्त्वमसि' इत्याद्यभेदश्रुतिवाक्यानां 'य आत्मनि तिष्ठन्' इत्यादिभेदश्रुत्या विरोधोऽस्ति न वेति संशये; जीवेश्वरयोः स्वामिभृत्यवदुपकार्योपकारकभावसम्बन्धः पूर्वमभिहितः, सम्बन्धस्य द्विष्ठत्वेन भेदापेक्षत्वात् तदभेदश्रुतिनिर्भेदश्रुतीनां विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु—अग्निविस्फुलिङ्गवदंश इवांशोजीवोऽस्तीश्वरस्य, न तु स्वाभाविकोंऽशः। नहि निरवयवस्य मुख्योंऽशः सम्भवति। तस्य निरंशत्वं च 'निष्कलमि' तिश्रुतौ श्रूयते। ननु निरंशत्वात्तयोरंशांशिभावो न सम्भवतीत्यत आह—नानाव्यपदेशात् = 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा० ८।७।१) 'य आत्मनि तिष्ठन्' इत्यादिना तयोर्नानात्वस्य व्यपदेशात्। अन्यथा चापि अनानात्वस्य चापि व्यपदेशात्। तथाहि—एके शाखिनः आथर्वणिका ब्रह्मसूक्ते 'ब्रह्मदाशा ब्रह्म दासा ब्रह्मैवेमे कितवाः' इत्यादिना ब्रह्मणोदाशकितवादिभावमामनन्ति। दाशाः कैवर्तकाः, दासाः स्वामिष्वात्मानमुपक्षपयन्तो भृत्याः, कितवाःद्यूतकृतः। सर्वे एते ब्रह्मैवेत्यामनन्ति। अतो नानात्वस्याभेदस्य च व्यपदेशात् कल्पितोऽशांशिभावः कल्पनीयः। तस्माद्भेदश्रुतीनां प्रत्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पारमार्थिकं साधितम्, एवमेव कर्तृत्वादिकमपि बुद्ध्युपाधिपरिकल्पितमित्यान्तरबहिर्भावसंगत्येदमाह—

(२४९) कर्त्ता शास्त्रार्थवत्त्वात् ॥३३॥

अत्र पूर्वपक्षे जीवकर्तृत्वस्य पारमार्थिकत्वेन श्रुतिविरोधः। सिद्धान्ते तस्यापारमार्थिकत्वेन श्रुत्यविरोधः इति फलभेदः। अत्रात्मनः कर्तृत्वाकर्तृत्वे विचारयितव्ये। तत्कि बुद्धिः कर्त्री उत जीव इति विशये; विकारित्वाद् बुद्धिरेव कर्त्रीति पूर्वःपक्षः। सिद्धान्तस्तु आत्मैव कर्त्ता। कुतः ? शास्त्रार्थवत्त्वात्। 'यजेत' 'जुहुयात्' 'दद्यात्' इत्यादिशास्त्रस्य कर्तृसापेक्षोपायबोधकस्य सति जीवस्य कर्तृत्वेऽर्थवत्त्वसम्भवात्। बुद्धेः कर्तृत्वे जीवात्मना भोक्तृत्वे चाभ्युपगते तादृशविधिशास्त्रमनर्थकं स्यात्। तस्मादात्मनः कर्तृत्वं न केवलं बुद्धेरितिभावः ॥३३॥

(२५०) विहारोपदेशात् ॥३४॥

इतश्च जीवस्य कर्तृत्वं, कुतः ? जीवप्रकरणे स्वप्नावस्थायां 'स्वे शरीरे यथाकामं परिवर्तते' (बृ० २।१।१८) इतिश्रुत्या विहारस्य संचरणस्योपदेशात् अकर्तुः संचरणायोगादित्यर्थः ॥३४॥

(२५१) उपादानात् ॥३५॥

इतोऽपि जीवस्य कर्तृत्वम्। कुतः ? 'प्राणानां विज्ञानेन विज्ञानमादाय' (बृ० २।१।१७) इतिश्रुत्या जीवप्रकरणे ग्रहणशक्तिकरणानामुपादानसंकीर्तनात् ॥३५॥

(२५२) व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः स्यात् ॥३६॥

अपि च 'विज्ञानं यज्ञं तनुते' (तै० २।५।१) इत्यादौ लौकिकवैदिकक्रियायां विज्ञानस्य कर्तृत्वव्यपदेशाद् विज्ञानपदवाच्यो जीवात्मैव कर्त्ता, न बुद्धिः। ननु विज्ञानशब्दो बुद्धिपरो न जीवपर इति चेन्न; तथासति निर्देशविपर्ययः प्रसज्येत। विज्ञानमित्यत्र विज्ञानेनेति निर्देश्यं स्यादित्यर्थः। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते, 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' (बृ० २।१।१७) इति। अतो 'विज्ञानं यज्ञं तनुते' इत्यत्र कर्तृसामानाधिकरण्यनिर्देशाद्विज्ञानस्य कर्तृत्वं सुस्पष्टमिति भावः ॥३६॥

ननु स्वतन्त्रस्यात्मनः कर्तृत्वे स स्वतन्त्रः सन्प्रियं हितं चैव नियमेन सम्पादयेत् न विपरीतमित्यत आह—

(२५३) उपलब्धिवदनियमः ॥३७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथाऽयमात्मोपलब्धौ स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते तथैवानियमेन हिताहिते सम्पादयिष्यतीति। न चोपलब्धौ सहायापेक्षत्वादुपलब्धुः पारतन्त्र्यमिति वाच्यम् काष्ठोदकाद्यपेक्षस्यापि पक्तुः पाकक्रियायां स्वातन्त्र्यदर्शनात् ॥३७॥

(२५४) शक्तिविपर्ययात् ॥३८॥

इतश्च जीवः कर्त्ता न बुद्धिः। कुतः ? बुद्धौ कर्त्तृत्वे तत्र करणशक्तिर्हीयेत कर्त्तृशक्तिश्चापद्येत। करणान्तरकल्पनायां संज्ञामात्रे विवादः स्यात् न वस्तुभेदः कश्चित्। त्वयापि करणव्यतिरिक्तस्यैव कर्तृत्वमभ्युपगम्यते इति भावः ॥३८॥

किं च तत्त्वसाक्षात्कारसाधननिदिध्यासनविध्यन्यथानुपपत्त्यापि जीवस्य कर्त्तृत्वं स्वीकार्यमित्याह—

(२५५) समाध्यभावाच्च ॥३९॥

असत्यात्मनः कर्त्तृत्वे 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २।४।५) 'ओमित्येवं ध्यायथ' (मु० २।२।६) इत्यादौ विहितस्यौपनिषदात्मप्रतिपत्तिप्रयोजनस्य समाधेरभावप्रसङ्गादात्मनः कर्त्तृत्वसिद्धिरिति भावः ॥३९॥

[१५ तक्षाधिकरणम् । सू० ४०]

इत्थं शास्त्रार्थवत्त्वादिहेतुभिः कर्तृत्वं शारीरस्य प्रतिपादितं, सम्प्रति तस्यात्मन्यध्यस्तत्त्वप्रतिपादनायेदमारभ्यते इत्युपजीव्योपजीवकभावसंगत्येदमाह—

(२५६) यथा च तक्षोभयथा ॥४०॥

अत्र पूर्वपक्षे कर्तृत्वस्यानध्यस्तत्वेन जीवब्रह्मैक्यासिद्धिः, सिद्धान्ते तदध्यस्तत्वेन तत्सिद्धिरिति फलभेदः। अत्र "ध्यायतीव लेलायतीव" (बृ० ४।३।७) "असङ्गो ह्ययं पुरुषः" इत्यसङ्गत्वश्रुतिवाक्यस्य 'यजेत' इत्यादिना क्रतुरिष्टसाधनावबोधकविधिवाक्येन विरोधोऽस्ति न वेति सन्देहे; अपवादहेत्वभावात्पूर्वोक्तैः शास्त्रार्थवत्त्वादिहेतुभिः कर्तृत्वस्य स्वाभाविकतया कर्तृत्वप्रतिपादकविधिशास्त्रेण सह विरोधोऽस्तीति पूर्वः पक्षः। सिद्धान्तस्तु नाग्नेरौष्ण्यमिवात्मनः स्वाभाविकं कर्तृत्वं सम्भवति; अनिर्मोक्षप्रसङ्गात्, किन्त्वौपाधिकं तत्कर्त्तृत्वम्। यथा च लोके तक्षा वास्यादिकरणहस्तः कर्त्ता सन् दुःखी भवति, स एव वास्यादिकरणान्यनपेक्ष्य स्वगृहं प्राप्तः स्वस्थो निर्व्यापारः सुखी भवत्येवम-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नन्वहमिदमिष्टं फलं प्राप्नवान्यनिष्टं च परिहराणीत्येवंविधा अभिसंध्यादयः प्रत्यात्मं नियता अदृष्टात्मनोः स्वस्वामिभावसम्बन्ध-नियामकाः स्युरित्यत आह—

(२६८) अभिसन्ध्यादिष्वपि चैवम् ॥५२॥

साधारणेनैवात्ममनः संयोगेन सर्वात्मसन्निहितेष्वभिसन्ध्यादि-ष्वपि नियमहेतुत्वाभावादुक्तदोषस्तदवस्थः ॥५२॥

(२६९) प्रदेशादिति चेन्नान्तर्भावात् ॥५३॥

ननु विभुत्वेऽप्यात्मनां स्वस्वदेहावच्छिन्नात्मप्रदेशस्थमनःसंयो-गेनाभिसन्ध्यादीनामदृष्टस्य सुखदुःखादीनां च व्यवस्था भविष्यतीति चेन्न; अन्तर्भावात्। विभुत्वेन सर्वात्मनां सर्वशरीरेष्वन्तर्भावादस्येदं शरीरमिति नियमाभावात्परमार्थतः प्रदेशकल्पना काणादमते न युक्तेति सांकर्यमदृष्टादीनांतदवस्थम्। अस्मन्मतेऽविद्यानिमित्तयोर्जीव-भावभेदयोर्ब्रह्मविद्ययाऽविद्याव्युदासेन जीवस्य ब्रह्मात्मप्रतिपादकस्य तत्त्वमस्यादिश्रुतिजातस्याविद्यक जीवभेदानुवादिश्रुतिजातेनाविरोध इति। तस्मादात्मैकत्वपक्षे सर्वदोषाभाव इतिसिद्धम्। अतो भूत-भौतिकविषयश्रुतीनां मिथोविरोधनिरासेन प्रामाण्याद्ब्रह्मणि समन्वय इत्यनवद्यम ॥५३॥

इति ब्रह्मसूत्रविद्यानन्दवृत्तौ द्वितीयाध्यायस्य तृतीयः पादः ॥३॥

द्वितीयाध्याये चतुर्थः पादः।

इत्थं वियदादिभूतभोक्तृविषयकः श्रुतिविरोधस्तृतीयपादेन परि-हृतः अधुना भौतिकेन्द्रियोत्पत्ति संख्यातत्त्वादिविषयकश्चतुर्थपादेन परिह्रियते। तत्र पूर्वाधिकरणे कर्तृस्वरूपावधारणेन बुद्धिस्थानां कर-पकरणानामिन्द्रियाणामुत्पत्ति साधयितुं बुद्धिस्थसंगत्येदमाह—

(१ प्राणोत्पत्त्यधिकरणम्। सू० १-४

(२७०) तथा प्राणाः ॥१॥

अत्र पूर्वपक्षे प्राणोत्पत्यनुत्पत्तिप्रतिपादकश्रुतीनां मिथो विरोधा-त्समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र 'एतस्मा-ज्जायते प्राणो मनः (मु० २-१-३) इत्यादीन्द्रियोत्पत्तिश्रुतेः 'तस्माद् एतस्मादात्मन आकाशः सम्भूतः' (तै० २-१-१) इतीन्द्रियानुत्पत्ति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रुत्या 'ऋषयो वाव तेऽग्रेऽसदासीत्' 'प्राणा वाव ऋषय' इत्यादि-प्रागुत्पत्तेरिन्द्रियसद्भावश्रुत्या च विरोधोऽस्ति न वेति सन्देहे, विरोधोऽस्तीति पूर्वपक्षः सिद्धान्तस्तु तथा प्राणाः। यथा पूर्वस्मिन् पादेऽकाशादयः परस्य ब्रह्मणो विकाराः समधिगतास्तथा प्राणा अपि तस्यैव विकारा इति बोध्यम्। केषुचित्प्रदेशेषु प्राणोत्पत्त्यश्रवणेऽपि प्रदेशान्तरे श्रवणाच्छ्रुतत्वाविशेषादाकाशादिवत्प्राणा अप्युत्पद्यन्ते इति भावः ॥१॥

ननु प्रागुत्पत्तेरिन्द्रियसद्भावश्रवणात्प्राणोत्पत्तिश्रुतिर्गौणीत्यत आह—

(२७१) गौण्यसम्भवात् ॥२॥

गौण्याः प्राणोत्पत्तिश्रुतेरसम्भवस्तस्मात्। नहि प्राणानामुत्पत्ति-श्रुतिर्गौणीसम्भवति। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा प्राणादेः समस्तस्य जगतो ब्रह्मविकारत्वे सति प्रकृतिभिन्नत्वेन विकाराभावा-त्सिध्यति। अन्यथा सा प्रतिज्ञा हीयेत। ननु प्रागुत्पत्तेः प्राणानां सद्भावः श्रूयते इति चेन्न; 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः' (मु० २।१।२) इतिमूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वावधारणेन प्राणसद्भावश्रुतेर्हिरण्यगर्भात्मकावान्तरप्रकृतिविषयत्वादिति न तया प्राणोत्पत्तिश्रुतेर्विरोधः ॥२॥

(२७२) तत्प्राक्श्रुतेश्च ॥३॥

इतश्च वियदादीनामिव प्राणादीनामपि मुख्यैव जन्मश्रुतिः। कुतः? तत् 'एतस्माज्जायते' (मु० २।१।३) इत्यत्रैकं जन्मवाचिपदं प्राणेषु प्राक्श्रुतं सदाकाशादिष्वनुवर्तते। नहि तेष्वेकत्राकाशादिषु मुख्यं जन्म प्राणेषु च गौणमिति निश्चेतुं शक्यम्; सकृदुच्चरितत्वात् श्रुतेर्वैरूप्य-प्रसङ्गाच्च। तस्मात्प्राणानामपि मुख्यमेव जन्मेति भावः ॥३॥

ननु 'तत्तेजोऽसृजत' (छा० ६।२।३) इत्यत्रप्रकरणे प्राणोत्पत्त्य-श्रवणात्तेजोऽबन्नभूतत्रयाणामेवोत्पत्तिश्रवणाच्चेत्यत आह—

(२७३) तत्पूर्वकत्वाद्वाचः ॥४॥

'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' (छा० ६।५।४) इत्यत्र ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां तत्सामान्याच्च सर्वेषां प्राणानामपि ब्रह्मप्रभवत्वं सिद्धं भवति। तस्मात्प्राणादीनामन्नमयत्वादिवचनाद्ब्रह्मविकारत्वसिद्धिरिति भावः ॥४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[२ सप्तगत्यधिकरणम् । सू० ५ ६]

इत्थं प्राणानामुत्पत्तौ श्रुतिविरोधं परिहृत्य तेभ्यो जीवस्य विवेचनार्थं प्राणाश्रितसंख्यां निर्णेतुमाश्रयाश्रयिभावसंगत्येदमाह—

(२७४) सप्तगतेर्विशेषितत्वाच्च ॥५॥

अत्र पूर्वपक्षे प्राणसंख्याश्रुतिविप्रतिपत्तेः समन्वयासिद्धिः, सिद्धान्तेऽविरोधात्तत्सिद्धिरिति फलभेदः। 'सप्त प्राणाः प्रभवन्ति तस्मात्' (मु० २।१।८) 'अष्टौ ग्रहा अष्टावतिग्रहाः' (बृ० ३।२।१) इत्येवं सप्तत्वाष्टत्वसंख्याश्रुतीनां मिथोविरोधोऽस्ति न वेति संशये; अस्तीति पूर्वपक्षे एकदेशिसिद्धान्तः सप्तेन्द्रियाणि। कुतः; 'सप्त प्राणाः' इति श्रुत्या तेषां सप्तत्वावगतेः। 'सप्त वै शीर्षण्याः प्राणाः' (तै० सं० ५।१।७१) इत्यत्र शीर्षण्यत्वेन विशेषितत्वाच्च। ननूक्तमष्टत्वादिसंख्याश्रवणम्? सत्यं; विरोधादन्यतमासंख्याध्यवसानाय स्तोककल्पनानुरोधात्सप्तसंख्याध्यवसानं वरं वृत्तिभेदापेक्षं च संख्यान्तरश्रवणमिति भावः॥ ५ ॥

(२७५) हस्तादयस्तु स्थितेऽतो नैवम् ॥६॥

तुशब्दः पूर्वसूत्रोक्तमेकदेशिमतं निवर्तयति। 'हस्तौ वै ग्रहः स कर्मणाऽतिग्रहेण गृहीतः' (बृ० ३।२।८) इत्यादिश्रुतिषु सप्तभ्यः शीर्षण्येभ्योऽतिरिक्ता हस्तादयोऽपरे प्राणाः श्रूयन्ते। स्थिते च सप्तत्वातिरिक्ते सप्तत्वमन्तर्भावयितुं शक्यते। 'दशेमे पुरुषे प्राणा आत्मैकादशः' (बृ० ३।९।४) इतिश्रुत्युक्तैकादशसंख्यायां सप्तसंख्याया अन्तर्भावात्। अतो नैवं मन्तव्यं—स्तोककल्पनानुरोधात् सप्तैव प्राणाः इति॥ ६ ॥

इयमपराऽपि सूत्रद्वययोजना—सप्तैव प्राणाः सन्ति, यतः 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ० ४।४।२) इत्यत्र सप्तानामेवावगतिश्रवणात्। ननु सर्वशब्दपाठात्कथं सप्तानामेवावगतिप्रतिज्ञेति? विशेषितत्वाच्च 'स यत्रैष चाक्षुषः पुरुषः' (बृ० ४।४।१) इत्यादौ सप्तानामेव चक्षुरादीनामुत्क्रमणे विशेषितत्वात् प्रकृतत्वादित्यर्थः। अतः सर्वे ब्राह्मणा भोजयितव्या इत्यत्र यथा सर्वशब्दस्यामन्त्रितापेक्षत्वमेवमत्रापि सर्वशब्दस्य प्रकृतापेक्षत्वमिति प्राप्ते ब्रूमः—'हस्तो वै ग्रहः' इत्यादौ सप्तभ्यो व्यतिरिक्ता हस्तादयोऽपरेऽपि प्राणाः प्रतीयन्ते। 'दशेमे पुरुषे प्राणा आत्मैका-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दशस्ते यदाऽस्माच्छरीरादुत्क्रामन्ति अथ रोदयन्ति' इत्यत्रैकादशानां प्राणानां सहैवोत्क्रमणं श्रूयते। एवं च सर्वेषामुत्क्रमणेऽस्थितेऽतो नैवं मन्तव्यम्। यत्सप्तानामेवोत्क्रमणं नैकादशानामिति। तस्माच्छ्रुतीनां मिथोऽविरोध इति सिद्धम् ॥५-६॥

[३ प्राणाणुत्वाधिकरणम् । सू० ७]

नन्वपरिच्छिन्नाहंकारजन्यत्वेनेन्द्रियाणां विभुत्वात्कथं तेषामुत्क्रमणसम्भव इत्याक्षेपसंगत्येदमाह—

(२७६) अणवश्च ॥७॥

अत्र पूर्वपक्षेविभुत्वादिन्द्रियाणामुत्क्रमणासम्भवः, सिद्धान्ते परिच्छिन्नत्वात्तत्सम्भव इति फलभेदः। अत्रोत्क्रान्त्यादिश्रुतेः 'प्राणाः सर्वेऽनन्ताः' इतीन्द्रियविभुत्वश्रुत्याविरोधोऽस्ति न वेति संशये; विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु अणवश्चैते प्रकृताः प्राणा विज्ञेयाः। अणुत्वं चैषामनुद्भूतरूपस्पर्शत्वेन सूक्ष्मत्वं, न परमाणुतुल्यत्वम्। अन्यथा कृत्स्नशरीरव्यापिकार्यानुपपत्तिप्रसङ्गः। विभुत्वे चैषामुत्क्रान्तिगत्यागतिश्रुतिव्याकोपप्रसङ्गेन विभुत्वश्रुतेरुपासनापरत्वान्न तयोत्क्रान्तिश्रुतेर्विरोध इति ॥७॥

[४ प्राणश्रैष्ठ्याधिकरणम् । सू० ८]

इत्थमिन्द्रियाणां सृष्ट्यादिकं प्रतिपाद्य प्रथमाधिकरणन्यायं मुख्येऽपि प्राणेऽतिदेशयितुमतिदेशसंगत्येदमाह—

(२७७) श्रेष्ठश्च ॥८॥

अत्रापि पूर्वाधिकरणवत्फलभेदो बोध्यः। अत्र 'एतस्माज्जायते प्राणः' (मु० २।१।३) इति मुख्यप्राणजनिश्रुतेः 'आनीदवातं स्वधया तदेकम्' (ऋ० सं० ८।७।१७) इति सृष्टेः प्राक् प्रलये प्राणसद्भावश्रुत्या विरोधोऽस्ति न वेति सन्देहे; विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु श्रेष्ठश्च मुख्योऽपि प्राण इतरप्राणवद्ब्रह्मणो जायते। आनीच्छब्दो न प्रागुत्पत्तेः प्राणसद्भावसूचकः; अवातमिति विशेषणात् 'अप्राणो ह्यमनाः शुभ्रः' इति मूलप्रकृतेः प्राणादिसमस्तविशेषराहितत्वस्य दर्शितत्वाच्च। अतो न तया श्रुत्या प्राणोत्पत्तिश्रुतेर्विरोध इति ॥८॥

[५ न वायुक्रियाधिकरणम् । सू० ९-१२]

इत्थं प्राणोत्पत्तिं विचिन्त्य तत्स्वरूपचिन्तनाय प्रसङ्गसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२७८) न वायुक्रिये पृथगुपदेशात् ॥९॥

अत्र मुख्यप्राणविषये श्रुतिन्याययोर्विरोधात्पूर्वपक्षसिद्धान्तयोः समन्वयासिद्धिसिद्धिफलम्। अत्र मुख्यः प्राणः किं वायुरेव, उत इन्द्रियव्यापारः, वायुविशेषो वेति सन्देहे; 'यः प्राणः स वायुः स एष वायुः पञ्चविध' इतिश्रुत्या वायुरेव मुख्यः प्राणः। 'सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च' इति तन्त्रान्तरीयाभिप्रायेण धर्मिभेदाद्धर्मभेदो लघीयानिति न्यायेन च समस्तेन्द्रियव्यापारो वा प्राणः इति पूर्वपक्षः। सिद्धान्तस्तु न वायुक्रिये—न वायुर्मुख्यप्राणः नापि सर्वेन्द्रियव्यापारः। कुतः? पृथगुपदेशात्। 'प्राण एव ब्रह्मणश्चतुर्थःपादः स वायुना ज्योतिषा भाति च तपति च' (छा० ३।१८।४) इत्यत्र वायोः प्राणस्य पृथगुपदेशात्। तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मु० २।१।३) इत्यत्र वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशात्। नहि वायुरेव वायोः करणव्यापार एव करणेभ्यश्च पृथगुपदिश्यते। तस्माद्वायुविशेषोऽयमध्यात्मभावापन्नः पञ्चवृत्तिः प्राणः इति न पूर्वपक्षोक्तविरोध इति भावः ॥९॥

ननु नेन्द्रियव्यापारः प्राणो, नापीन्द्रियवत्तत्र करणत्वं चेत्तर्हि जीववत्तस्यापि स्वातन्त्र्यप्रसङ्गः स्यादित्यत आह—

(२७९) चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥१०॥

तुशब्दः प्राणस्य जीववत्स्वातन्त्र्यं व्यावर्तयति। नात्र शरीरेजीववत्प्राणः स्वतन्त्रः, किन्तु राजप्रकृतिवज्जीवस्य कर्तृत्वदिकं प्रति यथा चक्षुरादिकमुपकरणम्, एवं मुख्यः प्राणः सर्वार्थकरत्वेन राजमन्त्रिवज्जीवस्योपकरणभूतः। कुतः? तत्सहशिष्ट्यादिभ्यः। तैश्चक्षुरादिभिः सहैव प्राणसंवादादिषु प्राणः शिष्यते, समानधर्माणां सह शासनस्य युक्तत्वात्। आदिना प्राणस्य स्वातन्त्र्यनिराकरणहेतूनामचेतनत्वभौतिकत्वादीनां संग्रहः इति भावः ॥१०॥

ननु प्राणस्य चक्षुरादिवज्जीवोपकरणत्वे रूपादिवद्विषयान्तरं प्रसज्येतेत्यत आह—

(२८०) अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥११॥

न तावद्विषयान्तरदोषः प्रसज्यते, प्राणस्याकरणत्वात्। नहि चक्षुरादिवत्प्राणस्य विषयावबोधकत्वेन करणत्वमभ्युपेयते, किन्त्वन्यथैव। तथाहि 'तान्वरिष्ठः प्राण उवाच, मा मोहमापद्यथाहमेवैतत्पञ्च-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धात्मानं प्रविभज्यैतद्बाणमवष्टभ्यविधारयामी' (प्र० २।३) इतिश्रुतिस्तमेवार्थं दर्शयति। तस्मात् प्राणोत्क्रमणनिमित्तां वागादिशैथिल्यापत्तिं शरीरपातप्रसङ्गं च दर्शयन्ती श्रुतिः प्राणस्य शरीरस्थितिरूपं व्यापारविशेषं दर्शयति ॥११॥

(२८१) पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥१२॥

इतोऽपि मुख्यस्य प्राणस्य वैशेषिकं कार्यम् यत्किल 'प्राणोऽपानो-व्यान उदानः समानः' (बृ० १।५।३) इति श्रुतिषु पञ्चवृत्तिः प्राणो व्यपदिश्यते। मनोवत्, यथा श्रोत्रादिनिमित्ताः शब्दादिविषया मनसः पञ्चवृत्तयः प्रसिद्धाः। एवं प्रागगमनवान् प्राणः। मूत्रपुरीपाद्यधोनयनादर्वागगमनवानपानः। सन्धौ वर्तमानो वीर्यवत्कर्महेतुर्व्यानः। ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुरुदानः। सर्वाङ्गेषु समंरसनयनात्समानः। तदसाधारणव्यापारापेक्षया जीवोपकरणत्वं प्राणस्य मनोवदिति सिद्धम् ॥१२॥

[६ श्रेष्ठाणुत्वाधिकरणम्। सू० १३]

इत्थं प्राणस्योत्पत्तिं स्वरूपं चोक्त्वापरिमाणव्यपदेशायातिदेश संगत्येदमाह :—

(२८२) अणुश्च ॥१३॥

अत्रोत्क्रान्त्यादिश्रुतेर्विभुत्वश्रुतेश्च मिथोविरोधात्समन्वयासिद्धिस्तदविरोधात्समन्वयसिद्धिरिति पूर्वपक्षसिद्धान्तयोः फलभेदः। अत्र 'तमुत्क्रामन्तं सर्वे प्राणा उत्क्रामन्ति' इत्यादिश्रुतेः 'सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण' (बृ० १।३।२२) इत्यादिप्राणविभुत्वश्रुत्या विरोधोऽस्ति न वेति सन्देहे; विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु मुख्यप्राणोऽपि चक्षुरादिवदणुरेव। अत्रापि सूक्ष्मत्वं परिच्छिन्नत्वं चाणुत्वं, न परमाणुतुल्यत्वम्, पञ्चवृत्तिभिः सर्वशरीरव्यापित्वादित्यर्थः। न चैवं विभुत्वश्रुतिविरोध इति वाच्यम्; तस्याः सकलवायुपरत्वात्। अतो नोभयोःश्रुत्योर्विरोध इति ॥१३॥

[७ ज्योतिराद्यधिकरणम्। सू० १४-१६]

इत्थं मुख्यप्राणस्याध्यात्माधिदेवभेदेनाणुत्वं विभुत्वं चाभिधाय-प्राणप्रसङ्गेनाधिदैवकाद्यधिष्ठितानामिन्द्रियाणां चेष्टामाचष्टे इति प्रसंग-संगत्येदमाह—

(२८३) ज्योतिराद्यधिष्ठानं तु तदामननात् ॥१४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र पूर्वपक्षे चक्षुरादीनां दैवाधीनप्रवृत्तिप्रतिपादकश्रुतेर्दैवनिरपेक्ष-प्रवृत्तिप्रतिपादकश्रुतेश्च मिथोविरोधात्समन्वयासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' (ऐ० २।४) इति वागादीन्द्रियाणां देवताधीनचेष्टात्वश्रुतेः 'वाचा शब्दान् वदति' इत्यादिश्रुत्या विरोधोऽस्ति न वेति वागादीनां देवताधीन-प्रवृत्त्यभ्युपगमे देवतानामेव भोक्तृत्वप्रसङ्गेन जीवस्य भोक्तृत्वं प्रलीयेत। अतः स्वमहिम्नैवैषां प्रवृत्तिरिति पूर्वपक्षः। सिद्धान्तः—तुशब्देन पूर्वपक्षं व्यावर्तयति। ज्योतिरादिभिरग्न्यादिदेवताभिरधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तते। कुतः? तदामननात्। तस्य देवताधिष्ठितत्वस्य 'अग्निर्वाग्भूत्वा मुखं प्राविशति' त्यादिश्रुत्या पाठात्। स्मृतावपि 'वागध्यात्ममिति प्राहुर्ब्राह्मणास्तत्त्वदर्शिनः। वक्तव्यमधिभूतं तु वह्निस्तत्राधिदैवतम्' इत्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं दर्शितम्। शक्तानामपि रथादीनामश्वाद्यधिष्ठितानां प्रवृत्तिदर्शनेन 'चक्षुषा हि' इतिश्रुत्या च देवताधिष्ठितत्वानिषेधेन श्रुतिप्रामाण्याद्वागादीनां देवताधिष्ठितत्वमिति ॥१४॥

नन्वेवं सति देवतानामेव भोक्तृत्वप्रसङ्गः स्यादित्यत आह—

(२८४) प्राणवता शब्दात् ॥१५॥

प्राणवता जीवेनैवकार्यकरणसंघातस्वामिनैषामिन्द्रियाणां स्वस्वामिभावसम्बन्धः। कुतः? शब्दात्। 'स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमि' (छा० ८ १२।४) त्यादिश्रुत्या जीवेनैव प्राणानां सम्बन्धः श्रूयते। अत इन्द्रियसाध्य-भोगभाक्त्वं जीवस्यैव न देवतानामिति सिद्धम् ॥१५॥

(२८५) तस्य च नित्यत्वात् ॥१६॥

तस्य च शारीरस्यात्रशरीरे स्वकर्मोपार्जिते भोक्तृत्वेन नित्यत्वात्पुण्यपापोपलेपसम्भवात्सुखदुःखोपभोगसम्भवाच्च न देवतानां भोक्तृत्वम्। तस्माद्देवतानामिन्द्रियाधिष्ठातृत्वेऽपि करणपक्षत्वमेव, न भोक्तृपक्षत्वमिति ॥१६॥

[८ इन्द्रियाधिकरणम्। सू० १७–१९]

ननु मुख्यप्राणव्यतिरेकेणेन्द्रियाभावात्कुतस्तदधिष्ठातृदेवताचिन्तेत्याक्षेपसंगत्येदमाह—

(२८६) त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥१७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र पूर्वपक्षे इन्द्रियाणां मुख्यप्राणेऽन्तर्भावः सिद्धान्ते तदभाव इति फलभेदः। अत्र 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मु० २।१।३) तीन्द्रियाणां तत्त्वान्तरत्वश्रुतेः 'त एतस्यैव सर्वे रूपमभवन्' (बृ० १।५।२) इति तेषां मुख्यप्राणात्मकत्वश्रुत्या विरोधोऽस्ति न वेति सन्देहे; एकस्यैव प्राणस्य प्राणादिपञ्चवृत्तिवद् वागाद्या अप्येकदशेति पूर्वोक्तश्रुत्योर्विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु श्रेष्ठान्मुख्यप्राणादन्यत्र तत्त्वान्तराण्येव वागादीनि इन्द्रियाणीत्युच्यन्ते। कुतः? तद्व्यपदेशात्। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इत्यादिश्रुतौ मुख्यप्राणादिन्द्रियाणां भिन्नत्वस्य व्यपदेशदर्शनात्। ननु 'मनः सर्वेन्द्रियाणि च' इतिश्रुत्यैव प्राणवन्मनसोऽपीन्द्रियभिन्नत्वव्यपदेशोऽस्तीति चेन्न; 'इन्द्रियाणि दशैकं च पञ्चचेन्द्रियगोचराः' (गी० १३।५) इतिस्मृतौ मनसोऽप्येकादशेन्द्रियेषु तत्त्वेन व्यपदेशात्। प्राणस्येन्द्रियत्वं श्रुतौ स्मृतौ वा कुत्रापि न प्रसिद्धम्। तस्मान्मुख्यप्राणात्तत्त्वान्तरभूतानीन्द्रियाणीति ॥१७॥

(२८७) भेदश्रुतेः ॥१८॥

किं च वागादिभ्यः प्राणस्य भेदश्रुतेः। तथाहि 'ते ह वाचमूचुः' इत्यादिना वागादीन्द्रियप्रकरणमुपसंहृत्य 'अथ हेममासन्यं प्राणमूचुः' (बृ० १।३।७) इत्यत्रासुरविध्वंसिनोमुख्यप्राणस्येन्द्रियेभ्यो भेदेन श्रवणमस्ति। तस्मादिन्द्रियाणां तत्त्वान्तरत्वमिति ॥१८॥

(२८८) वैलक्षण्याच्च ॥१९॥

किं च सुषुप्त्यवस्थायां वागादिषु सुप्तेषु मुख्यप्राणस्य स्थितिः, नेन्द्रियाणामित्यादिभूयोवैलक्षण्यात्तत्त्वान्तरत्वम्। तस्मान्नानयोः श्रुत्योर्विरोध इति सिद्धम् ॥१९॥

[६ संज्ञामूर्त्तिक्लृप्त्यधिकरणम्। सू० २०–२२]

इत्थं नामरूपभेदेन प्राणेन्द्रिययोर्भेदमभिधाय तत्प्रसङ्गेन नामरूपव्याकरणहेतुं दर्शयितुं प्रसङ्गसंगत्येदमाह—

(२८९) संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥२०॥

अत्र पूर्वपक्षे त्रिवृत्कृतभौतिकसर्गस्य जीवकर्तृकतया ब्रह्मणि समन्वयासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र परमेश्वरदत्रिवृत्कृतभूतानां सृष्टिमभिधाय 'सेयं देवता…… अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा० ६।३।२) इति त्रिवृत्कृत-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भौतिकानां जीवकर्त्तृकत्वश्रुतेः 'आकाशो ह वै नाम नामरूपयोर्निर्वहिता' (छा० ८।१४।१) इति परमेश्वरकर्तृकत्वश्रुतेश्च मिथोविरोधोऽस्ति न वेति सन्देहे; 'अनेन जीवेनात्मनेति' विशेषणात् जीवकर्त्तृकमिदं नामरूपव्याकरणमिति। यथा चारेणाहं परसैन्यमनुप्रविश्य संकलयानीति चारकर्त्तृकस्य सैन्यसंकलनस्य राज्ञोहेतुकर्तृकत्वादात्मन्यारोपवज्जीवकर्त्तृकस्य नामरूपव्याकरणस्य देवतात्मन्यारोपः। अतो व्याकरवाणीत्युत्तमपुरुषप्रयोगोऽविरुद्धः। एवं चोभयोर्विरोधोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु—तुशब्दः पक्षान्तरव्यावर्तकः। 'तासां त्रिवृतं त्रिवृत्तमेकैकां करवाणी ति त्रिवृत्करणे परमेश्वरस्य निरपवादकर्त्तृत्वनिर्देशेन संज्ञामूर्त्तिक्लृप्तिः=नामरूपव्याक्रिया तस्यैवाभ्युपेया। कुतः ? उपदेशात्। 'सेयं देवतैक्षत' इत्युपक्रम्य 'व्याकरवाणि' इत्युत्तमपुरुषप्रयोगेन नामरूपव्याकरणस्य परदेवताकर्त्तृकत्वोपदेशात्। ननु जीवेनेति विशेषणाज्जीवकर्त्तृकं व्याकरणमध्यवसेयमिति चेन्न; गिरिनदीसमुद्रादिषु नानाविधेषु नामरूपेष्वल्पमेधसो जीवस्य व्याकरणसामर्थ्याभावात् 'जीवेनेत्यस्यानन्तर्यात् 'अनुप्रविश्येत्यत्रैव सम्बन्धाच्च। तस्मात्परमेश्वरस्यैव त्रिवृत्कुर्वतः कर्म नामरूपव्याकरणमित्यविरोध ॥२०॥

इत्थं बहिस्त्रिवृत्करणमभिधायाध्यात्मिकमपरं त्रिवृत्करणमभिधातुमाह—

(२६०) मांसादि भौमं यथाशब्दमितरयोश्च ॥२१॥

भूमेरन्नात्मिकायाः त्रिवृत्कृतायाः पुरुषेणोपभुज्यमानायाः कार्यं मांसादि। आदिना पुरीषमनसी गृह्येते। तथाहि 'अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' (छा० ६।५।१) इत्यादौ त्रिवृत्कृता भूमिरेवैषा यवादिरूपेणाद्यते इत्युच्यते। एवमितरयोरप्तेजसोर्यथाशब्दं कार्यं बोध्यम्। मूत्रं लोहितं प्राणश्चापां कायम्। अस्थि मज्जा वाक्तेजस इति भावः ॥२१॥

ननु सर्वमेव त्रिवृत्कृतं भूतभौतिकमविशेषश्रवणात्, तत्किंकृतोऽयं विशेषः, इदमन्नमिमा आप इदं तेज इति। कथम् वाशितस्यान्नस्याध्यात्मं कार्यं मांसादिकमित्यत आह—

(२६१) वैशेष्यात्तु तद्वादस्तद्वादः ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तुशब्दः शङ्कापनोदकः । सत्यपि सर्वेषां पृथिव्यादीनां त्रिवृत्करणाविशेषे वैशेष्याद्भूयत्वादेवतेजोऽवन्नविशेषवादः संयुज्यते । तद्वाद इतिपदाभ्यासोऽध्यायपरिसमाप्तिद्योतकः । एवं च सर्वासां श्रुतीनामविरोधादद्वितीये ब्रह्मणि समन्वयः सिद्ध इति ॥२२॥

इति ब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ द्वितीयाध्यायस्य चतुर्थःपादः ॥४॥

—:०*०:—

अथ तृतीयाऽध्याये प्रथमः पादः ।

(अत्र तृतीये साधनाख्याध्याये सर्वसाधनानां विचारस्तत्र प्रथम पादे जीवस्य परलोकगत्यागतिचिन्ता वैराग्यसम्पादनार्था) ।

[१ तदन्तरप्रतिपत्त्यधिकरणम् । सू० १-७]

प्रथमाध्यायोक्तस्य ब्रह्मणि श्रुतिसमन्वयस्य द्वितीयाध्याये स्मृतिन्यायश्रुतिविरोधनिराकरणेनानिश्चयात्मकाप्रामाण्यस्य प्रतिषेधे साधनावधारणाय तार्तीयविचारो भवतीति हेतुहेतुमद्भावसंगत्याध्यायोऽयमारभ्यते । पूर्वत्र जीवोपकरणभूतभौतिकपदार्थोत्पत्तिरभिहिता । तदुपजीव्य तदुपाधियुक्तस्य जीवात्मनो वैराग्यं यथा स्यात्तथा संसारस्वरूपनिरूपणाय शरीरान्तरारम्भे भूतसूक्ष्मसंपरिष्वक्तस्यैव परलाकगमनं भवतीत्याह—

(२६२) तदन्तर-प्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥१॥

अत्र पूर्वपक्षे स्वर्गादिलोकमारोहतां प्राणेन्द्रियाद्युपहितानां जीवानां भूतसूक्ष्मात्माधारमन्तरेण गमनासम्भवान्न वैराग्यं, सिद्धान्ते तत्सम्भवाद्वैराग्यमिति फलभेदः । अत्र सोपाधिको जीवः किं देहान्तरारम्भकैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति, संपरिष्वक्तो वेति सन्देहे; करणोपादानवद्भूतोपादानस्याश्रवणादसंपरिष्वक्त इति पूर्वपक्षः । सिद्धान्तस्तु—तदन्तरप्रतिपत्तौ=देहान्तरप्रतिपत्तौ देहान्तरारम्भकैर्भूतसूक्ष्मैः संपरिष्वक्तो जीवो रंहति गच्छतीति । कुतः ? प्रश्ननिरूपणाभ्याम् । तथाहि—'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती' (छा० ५।३।३) तिप्रश्ने द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपा पञ्चहुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तावाप: पुरुषवचसो भवन्ति" (छा० ५।६।१) इति प्रतिवचनम्, ताभ्यामित्यर्थः । तस्मादद्भिः परिवेष्टितो जीवो गच्छतीति गम्यते ॥१॥

नन्वेवमद्भिः संपरिष्वक्तत्वेऽपि जीवस्य सर्वभूतसंपरिष्वक्तत्वं नास्तीत्यत आह—

(२९३) त्र्यात्मकत्वात्तु भूयस्त्वात् ॥२॥

तुशब्दः शङ्कानिरासार्थः । त्रिवृत्करणश्रुतेरितरभूतद्वयसम्मेलनस्यावश्यकत्वेनापां त्र्यात्मकत्वात् । त्र्यात्मकश्च देहस्त्रयाणामपि तेजोऽबन्नानां तत्र कार्योपलब्धेः न च देहः केवलाभिरद्भिरारब्धुं शक्यः तस्माद्भूयस्त्वादपां देहे 'आपः पुरुषवचसो भवन्ती'ति प्रश्नप्रतिवचनयोरप्शब्दो, न केवलापेक्षः इत्यर्थः ॥२॥

(२९४) प्राणगतेश्च ॥३॥

'तमुत्क्रामन्तं प्राणोऽनूत्क्रमति' (बृ० ४।४।२) इत्यत्र प्राणानां देहान्तरप्रतिपत्तौ गतेः श्रवणात् । अतः प्राणाश्रयभूतानामपि भूतान्तरोपसृष्टानामपां गतिगरवम्यते इति ॥३॥

(२९५) अग्न्यादिगतिश्रुतेरिति चेन्न; भाक्तत्वात् ॥४॥

ननु 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः' (बृ० ३।२।१३) इत्यादिना वागादि प्राणानामग्न्यादिषु गतिश्रवणान्न देहान्तरप्रतिपत्तौ जीवेन सह प्राणानां गमनमिति चेन्न; वागादिलयश्रुतेः 'ओषधीर्लोमानि वनस्पतीन्केशा' (बृ० ३।२।१३) इत्यादिवद् गौणत्वात् । अतोऽन्यत्र जीवेन सह प्राणानां गमनश्रवणादत्रापि वागाद्यधिष्ठात्रीणां तदुपकारिदेवतानामुपकारनिवृत्तिमात्रमपेक्ष्य वागादयोऽग्न्यादीन्गच्छन्तीत्युपचारः ॥४॥

(२९६) प्रथमेऽश्रवणादिति चेन्न; ता एव ह्युपपत्तेः ॥५॥

ननु द्युलोकादिपञ्चाग्निषु प्रथमे द्युलोकाग्नौ "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति" (छा० ५।४।२) इत्यादौ श्रद्धाया आहुतित्वश्रवणादपामश्रवणादयुक्तः पञ्चम्यामाहुतावपां पुरुषभाव इति चेन्न; यतस्तत्रापि ता एवापः श्रद्धापदेनाभिप्रेताः । कुतः ? उपपत्तेः । आदिमध्यावसानानां तत्रैवैकवाक्यत्वोपपत्तेरित्यर्थः । किं च श्रद्धायाः सोमवृष्ट्यादिस्थूलीभवदब्बहुलं लक्ष्यते इति श्रद्धाया अप्त्वे युक्तिः "अपो हास्मै श्रद्धांसंनमन्ते पुण्याय कर्मणे' इति श्रुतौ श्रद्धाहेतुत्वादपां श्रद्धाशब्दोपपत्तिरित्यपि युक्तम् ॥५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२६७) अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥६॥

ननु श्रद्धाशब्दवाच्यानामपां क्रमेण पञ्चम्यामाहुतौ पुरुषवचस्त्वेऽपि जीवस्य तत्संपरिष्वक्तत्वं न युज्यते ? अश्रुतत्वात्। नह्यत्रापामिव जीवबोधकः कश्चन शब्दोऽस्तीति चेन्न; 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ती' (छा० ५।१० ६) त्यादिनेष्टादिकारिणां चन्द्रादिलोकावाप्तिप्रतीतेः। तस्मात्स्वकर्मफलोपभोगाय श्रद्धापदवाच्याहुतीमयीभिरद्भिः परिवेष्टिता जीवा गच्छन्तीति युक्तम् ॥६॥

नन्विष्टादिकारिणां स्वकर्मफलोपभोगाय रंहणप्रतिज्ञा नोपपद्यते, 'तद्देवानामन्नं तं देवा भक्षयन्ती' (बृ० ६।२।१६) त्यादौ तेषां धूमादिमार्गेण चन्द्रलोकमारूढानां देवभक्ष्यत्वश्रवणादित्यत आह—

(२६८) भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति ॥७॥

वा शब्दश्चोदितदोषनिराकरणार्थः। इष्टादिकारिणामन्नत्वं भाक्तं, नमुख्यम्। मुख्ये ह्यन्नत्वे "स्वर्गकामो यजेत" इतिफलश्रुतिरुपरुध्यते। अतो "विशोऽन्नं राज्ञां पशवोऽन्नं विशामि" तीष्टस्त्रीपुत्रादिवदिष्टादिकारिणामनात्मवित्त्वादुपभोगहेतुत्वसामान्यात्तैः सुखविहरणत्वमेवान्नत्वं न मोदकादिवदित्यर्थः। तथाहि श्रुतिरनात्मविदां देवोपभोग्यत्वं दर्शयति, "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्" (बृ० १।४।१०) इति। तस्मादिष्टादिकारिणामन्नवचनस्य भाक्तत्वात्परलोकभोगार्थं भूतसूक्ष्मपरिवेष्टितानां जीवानां रंहणमुचितमिति ॥७॥

[२ कृतात्ययाधिकरणम्। सू० ८-११]

ननु कर्मसमवेतानामपां पञ्चम्यामाहुतौ पुरुषरूपेण परिणामश्रवणं हेतुमनुसृत्यावादिभूतसूक्ष्मसंपरिष्वक्तस्य जीवस्य चन्द्रलोकारोहणं नोपपद्यते ? ततोऽवरोहतां जीवानां कर्माभावेन तत्समवेतानामपामप्यभावादित्याक्षेपसंगत्येदमाह—

(२६९) कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥८॥

अत्र पूर्वपक्षे स्वर्गादवरोहतां जीवानां कर्माभावेन तदनुरूपतिर्यगादियोनिप्राप्त्ययोगान्न तत्कर्मफलेषु वैराग्यम्। सिद्धान्ते कर्मभावाद्वैराग्यमिति फलभेदः। अत्र 'तस्मिन्यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतम' (छा० ५।१०।५) इत्यारभ्य 'रमणीयचरणा रमणीयां योनिमापद्यन्ते' इत्यत्र किं निरनुशया जीवाः स्वर्गादवरोहन्ति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सानुशया वेति सन्देहे; निरनुशया इति पूर्वपक्षः। सिद्धान्तस्तु कर्मजातेन फलोपभोगाय स्वर्गलोकं समारूढास्तस्य कृतस्योपभोगेन क्षयेऽग्निसम्पर्काद् घृतकाठिन्यप्रविलयवत् क्षयितेऽस्मयशरीरे सानुशयवान् जीवोऽवरोहति। तत्रानुशयो नाम स्वर्गादिफलप्रापककर्मातिरिक्तं कर्मेत्यर्थः। कुतः? दृष्टस्मृतिभ्याम्। तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा" (छा० ५।१०।७) इति दृष्टा प्रत्यक्षा श्रुतिः। "वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशकालजातिकुलरूपायुःश्रुतवित्तसुखमेधसो जन्म प्रतिपद्यन्ते" इति स्मृतिस्ताभ्यां सानुशयानामेवावरोहणं गम्यते। न चैषां शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इति वाच्यम्; इष्टत्वात् सम्यग्ज्ञानेनाशेषकर्मक्षयश्रुतेश्च। ते चावरोहन्तो यथेतमनेवं चावरोहन्ति। यथागतं धूमादिमार्गेणेत्यर्थः। अनेवं तद्विपर्ययेण वक्ष्यमाणाभ्रादिमार्गेणावरोहन्तीति भावः ॥८॥

(३००) चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥९॥

ननु "रमणीयचरणाः" इति श्रुतिः चरणाद्योन्यापत्तिं दर्शयति नानुशयात्। चरणं चरित्रमाचारः शीलमिति पर्यायः, अनुशयस्तु भुक्तफलादतिरिक्तं कर्माभिप्रेतम्। 'यान्यवद्यानि कर्माणि''' यान्यस्माकं सुचरितानि" (तै० १।११।२) इति श्रुतावपि कर्मचरणयोर्भिन्नत्वं प्रतिभासते। तस्मान्नानुशयसिद्धिरिति चेन्न; यतोऽनुशयोपलक्षणार्थैव चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते इति ॥९॥

(३०१) आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥१०॥

ननु यथाश्रुतार्थस्य चरणशब्दार्थस्य शीलस्य परित्यागेनानुशयकत्वस्वीकारे चरणश्रुतेरानर्थक्यमिति चेन्न; तदपेक्षत्वात् इष्टादिकर्मणश्चरणापेक्षत्वात्। नहि सदाचारहीनः कश्चित्कर्मणि स्यादधिकृतः। तस्माच्चरणश्रुतेरर्थवत्वेन कर्मैव शीलोपलक्षितमनुभूतं योन्यापत्तिकारणमिति पूर्वोक्ताचार्यस्य मतमिति ॥१०॥

(३०२) सुकृतदुष्कृते एव तु बादरिः ॥११॥

बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देनाभिधीयेते इति मन्यते। अविशेषेण कर्ममात्रे चरणशब्दप्रयोगात्। यो हीष्टादि पुण्यं कर्म कुरुते, तं लौकिकाधार्मिकमाचक्षते। अभिन्नयोः कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेन भेदोपदेशोपपत्तिः। तस्मादिष्टादि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिणश्चन्द्रलोकं गता जीवास्ततः सानुशया अवरोहन्तीति सिद्धम् ॥११॥

[३ अनिष्टादिकार्यधिकरणम् । सू० १२-२१]

ननु न केवलमिष्टादिकारिण एव चन्द्रमसं यान्ति, अनिष्टादिकारिणामपि तत्र गमनसम्भवादित्याक्षेपसंगत्येदमाह—

(३०३) अनिष्टादिकारिणामपि च श्रुतम् ॥१२॥

अत्र पूर्वपक्षेऽनिष्टादिकारिणामपि चन्द्रलोकगमनसम्भवे तदनुष्ठानमनर्थकम्, सिद्धान्ते पापिनां चन्द्रलोकगमनाभावेन तदर्थं तदनुष्ठानं सार्थकमिति फलभेदः। अनिष्टादिकारिणोऽपि चन्द्रलोकं गच्छन्ति न वेति सन्देहे; गच्छन्तीति कुतः; 'ये वै के चास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ती (कौषी० १।२) त्यत्र तेषामपि चन्द्रलोकगमनं श्रुतम्। अतस्तयोः समानेऽपि चन्द्रलोकगमनेऽनिष्टादिकारिणां भोगाभावो विशेष इति ॥१२॥

(३०४) संयमने त्वनुभूयेतरेषामारोहावरोहौ, तद्गतिदर्शनात् ॥१३॥

तुशब्दः पूर्वपक्षव्यावर्त्तकः। भोगायैव चन्द्रलोकारोहणं न निष्प्रयोजनं, नापि प्रत्यवरोहार्थम्। लोके वृक्षारोहिणां तथा दर्शनात्। अतः संयमने=यमालये स्वदुष्कृतानुरूपा यमयातना अनुभूय पुनरिमं लोकं प्रत्यवरोहन्ति। एतादृशौ तेषामारोहावरोहौ भवतः। कुतः; तद्गतिदर्शनात्। 'न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्। अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' (क० २।६) इत्यत्र यमवश्यतारूपायास्तद्गतेर्दर्शनादित्यर्थः ॥१३॥

(३०५) स्मरन्ति च ॥१४॥

अपि च मनुव्यासादयः शिष्टाः संयमने पुरे यमाधीनं कपूयकर्मफलं स्मरन्ति। अतो धार्मिकाणामेव चन्द्रलोकगमनं नान्येषामिति भावः ॥१४॥

(३०६) अपि च सप्त ॥१५॥

अपि च सप्त रौरवादयो नरकाः पापफलोपभोगभूमित्वेन पौराणिकैः स्मर्यन्ते। तानेवानिष्टादिकारिणः प्राप्नुवन्ति न चन्द्रलोकमिति भावः ॥१५॥

ननु रौरवादिषु यमायत्ता यातनाः पापिनोऽनुभवन्तीति वचनमसंगतं; तत्र चित्रगुप्तादीनामधिष्ठातृत्वस्मरणादित्यत आह—

(३०७) तत्रापि च तद्व्यापारादविरोधः ॥१६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्रापि सप्तसु रौरवादिनरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराऽविरोधः। चित्रगुप्तादयोऽधिष्ठातारस्तु यमप्रयुक्ता एवेति भावः ॥१६॥

(३०८) विद्याकर्मणोरिति तु प्रकृतत्वात् ॥१७॥

किं च पञ्चाग्निविद्यायां प्रश्नप्रतिवचनकाले 'अथैतयोः पथोर्न कतरेणचनतानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति। जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं, तेनासौ लोको न सम्पूर्यते' (छा० ५।१०।८) इत्यत्रैतयोर्विद्याकर्मणोरेव देवयानपितृयाणमार्गसाधनयोः प्रकृतत्वादपि न समेषां चन्द्रलोकगमनसम्भवः। उभयमार्गभ्रष्टानामसकृत्संसारावर्तनश्रवणात्। 'चन्द्रमसमेव ते सर्वे गच्छन्तीति श्रौतशङ्कानिरासार्थः सौत्रस्तुशब्दः। सर्वशब्दस्य तत्राधिकृतमात्रपरत्वात्। ये केचिदधिकृता अस्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति भावः ॥१७॥

ननु पञ्चम्यामाहुतावित्याहुति संख्यानियमाद् देहप्राप्तये पापिनामपि चन्द्रलोकारोहणमभ्युपेयमित्यत आह—

(३०९) न तृतीये तथोपलब्धेः ॥१८॥

तृतीये स्थाने देहलाभायाहुतीनां पञ्चसंख्यानियमोनादरणीयः। कुतः? तथोपलब्धेः। यतो विनैवाहुतिसंख्यानियमं 'जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमि'ति श्रुतौ तृतीयेस्थाने देहप्राप्तेरुपलब्धेः। इष्टादिष्वधिकृतानां पुरुषशब्दवाच्यानां मनुष्याणामेव संख्यानियमोऽस्तीति भावः ॥१८॥

(३१०) स्मर्यते च लोकेऽपि ॥१९॥

अपि च लोके द्रोणधृष्टद्युम्नसीताद्रौपदीप्रभृतीनामयोनिजत्वं स्मर्यते। तत्रद्रोणादीनां योषिद्विषयैकाहुतिर्नास्ति। धृष्टद्युम्नादीनां योषित्पुरुषविषये द्वे आहुती नस्तो यथा, तथाऽन्यत्रापि आहुतिसंख्यानियमाभावो द्रष्टव्यः ॥१९॥

(३११) दर्शनाच्च ॥२०॥

अपि च चतुर्विधे भूतग्रामे जरायुजाण्डजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोर्विनैव स्त्रीपुंव्यक्तिसंयोगमुत्पत्तिदर्शनादाहुतिसंख्यानियमाभावो यथा। तथान्यत्रापि भविष्यतीति ॥२०॥

ननु "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति, आण्डजं जीवजमुद्भिज्जमि" (छा० ६।३।१) ति भूतग्रामस्य त्रैविध्यश्रवणात्कथं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चातुर्विध्यमित्यत् आह—

(३१२) तृतीय शब्दावरोधः संशोकजस्य ॥२१॥

"आण्डजं जीवजमुद्भिज्जमि" त्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजस्य संग्रहो बोध्यः। उभयोः स्वेदजोद्भिज्जयो र्जलं पृथिवीं चोद्भिद्य प्रभवत्वस्य तुल्यत्वात्तेनास्य सङ्ग्रहान्न चातुर्विध्यहानिः स्यात्। एवं स्थावरजङ्गमात्मकत्वेन तयोर्भेदोऽप्यविरुद्धः। अतो नानिष्टादिकारिणां चन्द्रलोकप्राप्तिः किन्त्विष्टादिकारिणामेवेति भावः ॥२१॥

[४ साभाव्यापत्त्यधिकरणम् । सू० २२]

इत्थं मार्गद्वयोपक्रमसामर्थ्येन 'तृतीयं स्थानमि'ति स्थानशब्दस्य-मार्गोपलक्षकत्वं यथा, न तथेह श्रुतेः सादृश्योपलक्षकत्वमस्ति, तत्र-प्रमाणाभावादिति प्रत्युदाहरणसंगत्येदमाह—

(३१३) साभाव्यापत्तिरुपपद्यते ॥२२॥

अत्र पूर्वपक्षे श्रुतिर्मुख्यार्था, सिद्धान्ते गौणार्थेति फलभेदः। अत्रेष्टादिकारिणां चन्द्रलोकंगतानां यावत्सम्पातमुपभुक्तफलानां ततोऽवरोहणं श्रूयते "अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायु वायुर्भूत्वा धूमो भवति धूमोभूत्वाऽभ्रं भवत्यभ्रंभूत्वामेघो भवति मेघोभूत्वाप्रवर्षति (छा० ५।१०।५) इत्यादि। तत्र स्वर्गादवरोहतां जीवानामाकाशादेः सारूप्यमुत साम्यं प्राप्यते इति संशये; श्रुत्याऽकाशादेः सारूप्यप्राप्तिः प्रतीयतेऽन्यथा लक्षणा स्यादिति पूर्वपक्षः। सिद्धान्तस्तु--जीवानामाकाशादिभिः साभाव्यापत्तिः सादृश्यापत्ति र्भवति। कुतः ? उपपत्तेः। तथाहि चन्द्रमसमारूढानामम्मयं शरीरं प्रारब्धकर्मफलोपभोगात्तत्क्षयदर्शनजनितशोकाग्निना करकादिवद्विलीयमानं सूक्ष्ममाकाशसमं भवति, ततोवाय्वादिप्राप्तिरित्येतदुपपद्यते। अन्यस्यान्यभावो मुख्यो नोपपद्यते। आकाशस्वरूपापत्तौ वाय्वादिक्रमेणावरोहो नोपपद्यत। श्रुत्यसम्भवे लक्षणा न्यायैव। तस्मादाकाशादिसादृश्यापत्तिरेव तद्भाव इत्युपचर्यते ॥२२॥

[५ नातिचिराधिकरणम् । सू० २३]

इत्थमाकाशादिसादृश्यापत्तिमभिधाय तदुपजीव्यान्यार्थंविचारयितुमुपजीव्योपजीवकभावसंगत्येदमाह—

(३१४) नातिचिरेण विशेषात् ॥२३॥

अत्र पूर्वपक्षेऽधिकारिणां सर्वत्र तत्तत्सादृश्यापत्तिस्वीकारेप्ययत्न-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लाघवम् सिद्धान्ते तदर्थं कर्तव्यप्रयत्नस्य क्वचिल्लाघवं क्वचिद्गौरव मिति फलभेदः। तत्र किं जीवाश्चिरकालं पूर्वपूर्वसादृश्येनावस्थायोत्तरोत्तरसादृश्यं गच्छन्त्युताल्पमल्पमिति संशये; नियामकशास्त्रस्याभावादनियम् इति पूर्वपक्षः। सिद्धान्तस्तु नातिचिरेणेति। अल्पमल्पं कालमकाशादिसादृश्येनावस्थाय वर्षधारादिभिः सहेमां पृथिवीं जीवाः प्रविशन्ति। कुतः? विशेषात्। व्रीह्यादिभावापत्त्यनन्तरं "अतो वै खलु दुर्निष्प्रपत्तरम्' (छा० ५।१०।६) इति विशेषदर्शनात् ततः पूर्वं सुनिष्प्रपत्ततरत्वप्रतीतेरित्यर्थः। तस्मिन्नवधौ स्थूलदेहानिष्पत्तेः सूक्ष्मदेहमात्रेण भोगासम्भवाद् व्रीहिभावापत्तेः प्रागल्पेनैवकालेन तत्तत्सादृश्यमवस्थाय जीवानामवरोहणमिति भावः ॥२३॥

[६ अन्याधिष्ठिताधिकरणम्। सू० २४-२७]

यद्यपि दुर्निष्प्रपत्तरशब्देन चिरकालावस्थानं लक्ष्यते, तथापि प्रकृते तिलमाषादिभावेन 'जायन्ते' इति श्रुत्या जीवजनिर्मुख्यासम्भवतीति प्रत्युदाहरणसंगत्येदमाह—

(३१५) अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥२४॥

अत्र पूर्वपक्षेऽनुशयिनां व्रीह्यादिभावेन जनिर्मुख्या, तन्निरासाय नैरधिकंयतनीयम्, सिद्धान्ते तत्र तत्र जीवानां संश्लेषमात्रं भवतीति न तन्निराकरणायाधिकं यतनीयमिति फलभेदः। तस्मिन्नेवावरोहे प्रवर्षणानन्तरं 'त इह व्रीहियवा ओषधिवनस्पयस्तिलमाषा इति जायन्ते" (छा० ५।१०।६) इति श्रुत्युक्तं व्रीह्यादिभावेन जीवानां किं मुख्यं जन्म, उत क्षेत्रज्ञान्तराधिष्ठितेषु स्थावरदेहेषु संश्लेषमात्रमिति संशये; स्थावरभावस्य श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः श्वादिजन्मवद् व्रीह्यादिजन्मापि मुख्यमेवेति पूर्वःपक्षः। सिद्धान्तस्तु—अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संश्लेषमात्रमनुशयिनां भवति, न ते तत्सुखदुःख भाजो भवन्ति। कुतः? पूर्ववदभिलापात्। यथाऽकाशादिषु वर्षान्तेषु न कंचित् कर्मव्यापारं परामृशति, तथैव व्रीह्यादिष्वपि कर्मपरामर्शमन्तरेणैव प्रवेशाभिलापात्तत्र नानुशयिनां सुखदुःखभक्तृत्वम्। यत्र तु सुखदुःख भोक्तृत्वमभिप्रेतं, तत्र रमणीयचरणाः कपूयचरणा इत्यादिना कर्मव्यापारं परामृशति। किं चान्येषामपुण्यसामर्थ्येन स्थावरत्वं गतानां सम्भवेऽपि तदुपभोगसाधनत्वे न स्वर्गादवरोहतामनुशयिनां स्थावरत्वमुपभोगसाधनत्वमिति। तस्माज्जनिश्रुतिः संश्लेषमात्राभिप्राया न मुख्येति सिद्धम् ॥२४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३१६) अशुद्धमिति चेन्न शब्दात् ॥२५॥

ननु पशुहिंसादियोगादाध्वरिकं ज्योतिष्टादिकं कर्माशुद्धम्, तस्यानिष्टमपि फलं कल्पनीयमित्यतोऽनुशयिनां व्रीह्यादिस्थावरेषु मुख्यमेव जन्मास्त्विति चेन्न; शब्दात्। धर्माधर्मविज्ञानस्य शास्त्रहेतुत्वात्। शास्त्राद्धिहिंसानुग्रहाद्यात्मकस्य ज्योतिष्टोमादेर्धर्मत्वमवधारितम्, तत्र कथमशुद्धत्वेन दुःखहेतुत्वं कल्प्यते। 'न हिंस्यात् सर्वा भूतानि' इति सर्वभूतविषयाहिंसानिषेधस्यौत्सर्गिकस्य 'अग्नीषोमीयं पशुमालभेत' इत्यपवादशास्त्रेण तयोर्व्यवस्थितविषयत्वम्। तस्माच्छुद्धेन वैदिककर्मणा न व्रीह्यादिस्थावरत्वप्राप्तिरिति भावः ॥२५॥

(३१७) रेतः सिग्योगोऽथ ॥२६॥

इतश्च व्रीह्यादिभावस्तत्संश्लपमात्रम्। यतोऽनुशयिनां व्रीहियवादिसम्बन्धानन्तरं रेतःसिचा पुरुषेण योगः सम्बन्धोऽन्नद्वारेण तत्कुक्षौ प्रवेशः 'यो योऽन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवती' (छा० ५।१०।६) इति श्रूयते। न चात्रमुख्योरेतः सिग्भावः सम्भवति, प्राप्तयौवनस्यैव रेतःसिग्भावात्। तस्मादवश्यं पुरुषसम्बन्धमात्रमेव रेतःसिग्भावोऽभ्युपेयते यथा तथाऽऽकाशादावपि संसर्गमात्रस्यैवाभ्युपगतत्वेन मध्ये व्रीह्यादावपि संश्लेपमात्रमेव तद्भावापत्तिरिति भावः ॥२६॥

नन्वेवं सत्यनुशयिनां सर्वत्र संश्लेपाभ्युपगमे मुख्यजन्माभावप्रसङ्गः इत्यत आह—

(३१८) योनेः शरीरम् ॥२७॥

रेतः सिग्भावानन्तरं योनौ रेतसि निषिक्ते योनेः सुखदुःखोपभोगयोग्यं तेषां शरीरं जायते इति शास्त्रमाह—'तद्य इह रमणीय चरणाः' इत्यादि। तस्मात्स्वर्गादवरोहतामनुशयिनां व्रीह्यादिसंश्लेषमात्रं ब्राह्मणादिमुख्यं जन्मेति सिद्धम् ॥२७॥

इति ब्रह्मसूत्र शाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ तृतीयाध्यायस्य प्रथमःपादः ॥१॥

—❀❀—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृतीयाध्याये द्वितीयः पादः

(अत्रपादेपूर्वभागेन त्वंपदार्थस्योत्तरभागेन तत्पदार्थस्य च शोधनम्

[१ सन्ध्याधिकरणम् । सू० १–६]

अतीते पादे पञ्चाग्निविद्यामुदाहृत्य जीवस्य गत्यागति संसारो भिहितः। अत्रपादे तस्यैव कर्मफलेभ्यो विरक्तस्य महावाक्यार्थज्ञाना तत्त्वंपदार्थयोः शोधनमारभ्यते इति हेतुहेतुमद्भावसंगतिरस्य पाद पूर्वेण सह। इत्थं गत्यागतिचिन्तया जाग्रदवस्थां निरूप्य त्वंपदार्थ स्वयं ज्योतिष्ट्वसिद्धये स्वप्नावस्थानिरूपणायेदमाह–पादान्तरत्वान्नाि पूर्वेणास्याधि करणस्य संगतिः।

(३१९) सन्ध्ये सृष्टिराह हि ॥१॥

अत्र पूर्वपक्षे स्वप्नावस्थातो जीवस्य पार्थक्यासम्भवे स्वप्रका त्वासिद्धिः, सिद्धान्ते तत्सम्भवे स्वप्रकाशत्वसिद्धिरिति फलभेद तत्र स्वप्नाधिकारे 'न तत्र रथानरथयोगा न पन्थानो भवन्त्यथ रथा रथयोगान्पथः सृजते' (बृ० ४।३।१०) इति श्रुत्युक्ता स्वप्नसृष्टि व्या हारिकी, मायामयी वेति सन्देहे; जाग्रत्सुषुप्तयोः सन्ध्ये = सन्धौ भ स्वप्ने तथ्यरूपैव सृष्टिभवितुमर्हति। हि यस्मात् 'अथ रथान् रथयो न्पथः सृजते' इति प्रमाणभूता श्रुतिरेवमाह। 'स हि कर्ता' इत्यु संहारादप्येवमवगम्यते ॥१॥

(३२०) निर्मातारं चैके पुत्रादयश्च ॥२॥

किं चैके शाखिनोऽस्मिन्नेव सन्ध्ये कामानां निर्मातारमात्मान मनन्ति 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' (क ५।८) इति। काम्यन्ते इति कामाः पुत्रादयश्चात्र कामपदेनाभिप्रेयन्ते 'अन्यत्र धर्मादन्यत्राधर्मात्' (क० २।१४) इति प्रकरणात् 'तदे शुक्रं तद्ब्रह्म तदेवामृतमुच्यते' (क० ५।८) इति वाक्यशेषाच्च प्रा मीश्वरं निर्मातारं प्रतीमः। एवं च स्वप्नसृष्टिस्तथ्यरूपा, प्राज्ञकर्तृ त्वात्, जाग्रद्वदित्यनुमानेनापि व्यावहारिकत्वसिद्धिः। अतः श्रुत्य मानाभ्यां तथ्यरूपैव स्वप्नसृष्टिरिति ॥२॥

एवं प्राप्ते सिद्धान्तं ब्रूते—

(३२१) मायामात्रं तु कार्त्स्न्येनानभिव्यक्त स्वरूपत्वात् ॥३॥

तु शब्दः पूर्वपक्षव्यावर्तकः। स्वप्नसृष्टिर्मायामात्रं = मिथ्या

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कार्त्स्न्येनेनानभिव्यक्तिस्वरूपत्वात्। नहि देशकालनिमित्तसम्पत्त्यबाधरूपेण परमार्थवस्तुधर्मेण स्वप्नस्वरूपमभिव्यज्यते। न तावत्संकीर्णे देहदेशे रथादयोऽवकाशं लभेरन्, नापि स्वप्नद्रष्टा देहाद्वहिर्गतः? स्वप्नात्प्रतिबुद्धस्तद्देशे एव स्वात्मानं पश्यति। एवं कालविसंवादोऽपि स्वप्ने भवति; रात्रौ सुप्तो वासरं भारते वर्षे मन्यते। नापि करणोपसंहारादस्य स्वप्नद्रष्टुश्चक्षुरादीनि निमित्तानि रथादिग्रहणाय सन्ति। बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे। स्वप्ने सृष्टिश्रुतिः 'न तत्र रथाः' इतिश्रुत्यैवापारमार्थिकत्वेन परिहृता। 'स्वयं विहत्य स्वयं निर्मिमाय स्वेनभासा स्वेन ज्योतिषा प्रस्वपिति' (बृ० ४।३।९) इति स्वप्ने जीवव्यापारश्रवणेनोक्तानुमाने प्राज्ञकर्तृकत्वहेतोरसिद्धिश्च। अतः स्वप्नसृष्टिर्मिथ्यैवेति सिद्धम् ॥३॥

ननु स्वप्नसृष्टेर्मिथ्यात्वे न तत्सूचितोऽर्थः सत्यः स्यादित्यत आह—

(३२२) सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥४॥

भविष्यतोर्हिंसाध्वसाधुवस्तुनोः सूचकश्च स्वप्नो भवति, 'पुरुषं कृष्णं कृष्णदन्तं पश्यति, स एवं हन्ति' 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति' (छा० ५।२।९) इत्यादिश्रुतेरवगम्यते। तद्विदः स्वाध्याय विदश्चेष्टानिष्टसूचकत्वं स्वप्नस्याचक्षते वदन्तीत्यर्थः।

ननु मन्त्रदेवताद्रव्यनिमित्ताः केचित्स्वाप्नाः सत्यार्थगन्धिनो भवन्तीति चेन्न, तत्र सूच्यमानस्य वस्तुनः सत्यत्वेऽपि सूचकानां स्त्र्यादिदर्शनानां जागरणे बाध्यमानत्वेन वैतथ्येऽविरोधात्। न च त्वन्मते वियदादिसर्गस्यापि मिथ्यात्वं 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र० २।१।१४) इत्यत्रप्रतिपादितमिति वाच्यम् ब्रह्मात्मत्वदर्शनात्प्राग्वियदादिसर्गस्य व्यवस्थितरूपत्वेन स्वाप्नप्रपञ्चस्य प्रतिदिनं बाध्यमानत्वेन च तयोर्भेदात्। अतः स्वप्नस्य मायामात्रत्वं वैशेषिकमुदितमिति भावः ॥४॥

नन्वैश्वर्ययोगात्संकल्पमात्रेणापि सत्यसृष्टिसम्भवे समुचितदेशादिनिमित्ताभावात्कुतः स्वप्नस्य मिथ्यात्वमित्यत आह—

(३२३) पराभिध्यानात्तु तिरोहितं ततोह्यस्य बन्धविपर्ययौ ॥५॥

तुशब्दः पूर्वपक्षनिरासार्थः। सत्यपि जीवस्याग्नेर्विस्फुलिङ्गादिवत्परमात्मांशत्वेऽविद्यादिव्यवधानादैश्वर्यादिकं तिरोहितं, तच्च परमेश्वरस्याभिध्यानात्=आभिमुख्येन ध्यानादभिव्यज्यते कस्यचिदेव,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न स्वभावतः सर्वेषां जन्तूनामैश्वर्यादेरभिव्यक्तिः। ततो हीश्वर स्वरूपापरिज्ञानाद्बन्धः तत्स्वरूपपरिज्ञानात्तु मोक्ष इति 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आत्मकामः' (श्वे० १।११) इत्यादिश्रुतिराह। तस्माज्जीवब्रह्मणोरभिन्नत्वेऽप्यैश्वर्यतिरोहितस्य जीवस्य न संकल्पमात्रेण सृष्टिकर्तृत्वमिति ॥५॥

ननु परमात्मांशस्य जीवस्य ज्ञानैश्वर्यादितिरोहितत्वे कोहेतुरित्यत आह—

(३२४) देहयोगाद्वा सोऽपि ॥६॥

सोऽपि जीवस्य ज्ञानैश्वर्यादितिरोभावो देहयोगात् अविद्याप्रत्युपस्थापित देहेन्द्रियमनोबुद्धिरूपोपाधि योगाद्भवति। यथा भस्माच्छन्नस्याग्नेर्दहनप्रकाशनसामर्थ्यं तिरोभवति तद्वदित्यर्थः वा शब्दो जीवेश्वरयोर्भिन्नत्वशङ्काव्यावर्तकः। 'अनेन जीवेनात्मनानुप्रविश्य' (छा० ६।३।२) 'तत्सत्यं स आत्मा तत्त्वमसि' (छा० ६ ८।४) इत्यादि श्रुतिशतेभ्यस्तयोर भिन्नत्वावगमात्। तस्मात्स्वाप्नस्य मायामयत्वे तन्निर्मुक्तस्य जीवस्य स्वयंज्योतिष्ट्वसिद्धिरिति भावः ॥६॥

[२ तदभावाधिकरणम्। सू० ७-८]

इत्थं जीवस्य स्वप्नभवत्वाय स्वप्नमिथ्यात्वमीरितम्। अथास्य ब्रह्मभावायसुषुप्तः क्वेति चिन्त्यते इत्येकाधिकारत्वसंगत्येदमाह—

(३२५) तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥७॥

अत्र पूर्वपक्षे स्थानविकल्पाज्जीवस्य ब्रह्माभिन्नत्वासिद्धिः, सिद्धान्ते स्थानसमुच्चयात्तत्सिद्धिरिति फलभेदः। तत्र 'तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु नाडीषु सृप्तो भवति' (छा० ८।६।३) इति, ताभिः प्रत्यवसृप्य पुरीतति शेते' (बृ० २।१।१६) इति, 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' (बृ० २।१।१७) इति च मिथो विरुद्धेषु श्रुतिवाक्येषु संशयः किमेतानि नाड्यादीनि सुषुप्तिस्थानानि परस्परनिरपेक्षाणि भिन्नानि परस्परापेक्षयैकं वा स्थानमिति। व्रीहि यवादिवदेकार्थत्वान्नाड्यादीनां विकल्पेन कदाचित्किञ्चित्स्थानं स्वापायेति पूर्वः पक्षः। सिद्धान्तस्तु तदभावतस्य स्वप्नस्याभावः सुषुप्तिर्नाड्यादिषु आत्मनि चेति स्वापाय समुच्चयेनोपसर्पति न विकल्पेन कुतः ? तच्छ्रुतेः : सर्वेषामेव नाड्यादीनां तत्र तत्र सुषुप्तस्थानत्व

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रुतत्वात्। पूर्वोक्तासु श्रुतिषु नाड्यः पुरीतत् ब्रह्म चेति त्रीण्येव सुषुप्तिस्थानानि। तत्र नाड्यः पुरीतच्च ब्रह्मणि प्रवेशाय द्वारमात्रं, ब्रह्मैवैकं मुख्यं सुषुप्तिस्थानम्। नाड्यां पुरीतति च प्रविश्य सति ब्रह्मणि हृदयाकाशे जीवः शेते इति नाडीपुरीततोरप्राधान्यं ब्रह्मणश्च प्राधान्यमवगन्तव्यम्। तस्माच्छ्रुतिसङ्ग्रहाय समुच्चयोऽङ्गीकर्तव्य इति ॥७॥

(३२६) अतः प्रबोधोऽस्मात् ॥८॥

यस्मादात्मैव सुषुप्तिस्थानमत एव हेतोः परमात्मन एव जीवस्य प्रबोध स्वापाधिकारे शिष्यते—'कुत एतदगात्' (बृ० २।१।१६) इति प्रश्नोत्तरावसरे' 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणाः' (बृ० २।१।२०) इत्यादिश्रुत्या। 'सत आगम्य न विदुः सत आगच्छामहे' (छा० ६।१०।२) इति च। अतः परमात्मसकाशाज्जीवागमनश्रवणेन तत्रैव सुषुप्तिरिति निश्चीयते। अन्यथा नाडीभ्यः पुरीततः परमात्मनश्च जीवस्य प्रबोधो वक्तव्यः स्यात्। तस्मात् सुषुप्ति स्थान समुच्चयाज्जीवस्यमिथ्याज्ञानाभावमात्रेण तदा ब्रह्माभिन्नत्वं सिद्धिमिति ॥८॥

[३ कर्मानुस्मृतिशब्दविध्यधिकरणम्। सू० ९]

इत्थं परमात्मसकाशाज्जीवोत्थानश्रवणात्परमात्मैव स्वापस्थानमुक्तं तदयुक्तम्, अन्यस्य स्वापोऽन्यस्य च प्रबोधः इति सम्भवेन नाड्यादिष्वपि स्वापः सम्भवतित्याक्षेपसंगत्येदमाह—

(३२७) स एव तु कर्मानुस्मृतिशब्द विधिभ्यः ॥९॥

अत्र पूर्वपक्षे सुषुप्तिमात्रेण मोक्षसिद्धौ ज्ञानस्य वैयर्थ्यम्। सिद्धान्तेऽज्ञानान्नस्य तदासत्सम्पन्नत्वेऽपि पुनरुत्थानादज्ञाननाशाय तत्सार्थक्यमिति फलभेदः। तत्र सुप्त एव जीवः प्रतिबुध्यतेऽन्योवेति संशये; अनियम। कुतः; नहि जलाशये प्रक्षिप्ते जलविन्दौ पुनरुद्धरणे तस्यैवोद्धरणमिति नियन्तुं शक्यमिति पूर्वः पक्षः' सिद्धान्तस्तु स एव सुप्तो जीवः प्रतिबुध्यते, नान्यः। कुतः; कर्मानुस्मृति शब्दविधिभ्यः पञ्चहेतुभ्यः। पूर्वेद्युः सामिकृतस्य कर्मणः शेषव्यापरेद्युः प्रतिबुध्यानुष्ठानदर्शनेन द्विनद्वयसाध्यस्य कर्मणः कर्तैक एवेति। योऽहमतीतेऽहनि घटमद्राक्षम्, स एवाहं साम्प्रतमेतं घटं स्पृशामिति प्रत्यभिज्ञाऽनुशब्दवाच्या। ततः स घट इति स्मृतिः। 'पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव' (बृ० ४।३।१६) 'सर्वाः प्रजा अहरहर्गच्छन्त्य एवं ब्रह्म-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकं न विन्दन्ति' (छा० ८।३।१२) इत्यादिश्रुति समुदायः शब्दः कालान्तरफलभाविनोः कर्मविद्ययोर्विधिनाऽप्येवमवगम्यते। सुप्तस्य पुनरनुत्थाने एते द्वे तयो बाध्येरन्। अतः स एव जीवः प्रतिबुध्यते। किं चास्तु जलाशये प्रक्षिप्तस्य जलबिन्दोरुद्धारः पुनरुद्धरणे, विवेक कारणाभावात्। अत्र तु कर्म विद्या चेति विवेककारणस्य सत्त्वे सुप्तस्यै प्रतिबोध इत्यविरुद्धमिति ॥९॥

[४ मुग्धेऽर्धसम्पत्त्यधिकरणम् । सू० १०]

इत्थं सोऽहमित्यादिप्रत्यभिज्ञानादिहेतुना सुप्तप्रतिबुद्धयोरैक्यं यथाऽभिहितं, तथाविशेषाभावप्रत्यभिज्ञानात्सुषुप्तिरेव मूर्च्छेति दृष्टान्त- 'गत्येदमाह—

(३२८) मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥१०॥

अत्र पूर्वपक्षे स्वापमूर्च्छयोरैक्यं, सिद्धान्ते तयोर्भेद इति निर्णय- फलमिति विशेषः। तत्र किं सुषुप्तिरेव मूर्च्छा तद्भिन्ना वाऽवस्थान्तरं संशये; सुषुप्त्यन्तर्गता मूर्च्छेति पूर्वपक्षः। सिद्धान्तस्तु न तावच्चतसृणा- मवस्थानां मध्ये स्वप्नजागृतयोर्मूर्च्छाऽन्तर्भावयितुं शक्या ? मूर्च्छायां संज्ञाभावात्। नापि मुग्धो मृतः; प्राणोष्मणोः सत्त्वात्। तयोरभावे सत्येव लोके मृतशब्दव्यवहारदर्शनात्। नापि सुषुप्त्यन्तर्गता मूर्च्छा वैलक्षण्यात्। मुग्धस्य चिरमप्युच्छ्वासाभावो, देहोऽस्य सवेपथुः भयानकं वदनं, विस्फारिते च नेत्रे इत्यादिलक्षणस्य सुप्तावस्थाभावात्तद्भिन्ना परिशेषादर्धसम्पत्तिर्मूर्च्छेति बोध्यम्। परिशेषो नाम प्रसक्तस्य प्रति- षेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे वस्तुनि सम्प्रत्ययः। मुग्धे मूर्च्छावस्था- गते निःसंज्ञत्वादर्धेन सम्पन्नताऽर्धेनेतरस्माद्वैलक्षण्यादसम्पन्नतेति युक्ताऽर्धसम्पत्तिर्मूर्च्छा सुषुप्तिभिन्ना। तस्मादर्धसम्पत्तित्वान्मूर्च्छा पञ्चमी गण्यते इति ॥१०॥

[५ उभयलिङ्गाधिकरणम् । सू० ११-२१]

इत्थं तत्त्वंपदार्थयोस्त्वंपदार्थस्य प्रथममुपस्थितस्योद्देश्यस्य प्रकाशचिदेकरसत्वेन सर्वावस्थानिर्मुक्तत्वेन च प्रतिपादनानन्तरं तत्पदार्थस्य विधेयस्य प्रतिपादनामावसरसंगत्येदमाह—

(३२९) न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥११॥

अत्र पूर्वपक्षे निर्विशेषं सविशेषं चोभयरूपं ब्रह्म ध्येयं। सिद्धान्ते निर्विशेषमेवेति फलभेदः। तत्र 'सर्वकर्मा सर्वकामः सर्वगन्धः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वरसः' (छा० ३।१४।२) इत्यादिश्रुतयः सविशेषलिङ्गाः, "अस्थूलमनणु" (बृ० ३।८।८) इत्यादिश्रुतयश्च निर्विशेषलिङ्गाः इत्युभलिङ्गश्रुत्यनुरोधेनोभय रूपं ब्रह्म; उतान्यतररूपम्; अन्यतरस्मिन्नपि सविशेषं निर्विशेषं वेति सन्देहे; उभयलिङ्गश्रुत्यनुग्रहादुभयरूपमेव ब्रह्मेति पूर्वपक्षः। सिद्धान्तस्तु—न तावत्स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते। न ह्येकं वस्तु रूपादियुक्तं तद्रहितं चैकदाऽवधारयितुं शक्यं; विरोधात्। नापि स्थानत उपाधित उभयरूपत्वं तात्त्विकं युक्तम्। न खलु स्वच्छः सन्स्फटिको जपाकुसुमाद्युपाधि सम्बन्धादस्वच्छो भवितुमर्हति; तत्रास्वच्छताप्रतीतेर्भ्रमसात्रत्वात्। अतोऽन्यतर लिङ्गपरिग्रहे निर्विशेषमेव ब्रह्म प्रतिपत्तव्यम्। यतो हि सर्वत्र 'अशब्दमस्पर्शमरूपमव्ययम' (क० ३।१५ मुक्तिको० २।७२) इत्यादिषु सर्वेषु ब्रह्मप्रपिपादकेषु वेदान्तवाक्येषु सविशेषत्वनिरासेन निर्विशेषं ब्रह्मोपदिश्यते इतिभावः ॥११॥

(३३०) न, भेदादिति चेन्न; प्रत्येकमतद्वचनात् ॥१२॥

ननु न सर्वत्र निर्विशेषमेव ब्रह्म ध्येयम्। कुतः ? भेदात्। प्रतिविद्यं ब्रह्मण आकारभेदेन भेदात्। चतुष्पाद्ब्रह्म, षोडशकलं ब्रह्म, वामनीत्वादि लक्षणं ब्रह्म. त्रैलोक्य शरीरंवैश्वानरशब्दवाच्यं ब्रह्मेति श्रुतिसामर्थ्यात्सविशेषत्वमपि ब्रह्मणो रूपमभ्युपेयमिति चेन्न; प्रत्येकमतद्वचनात्। प्रत्युपाध्यभेदवचनात् "यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा" (बृ० २।५।१) इत्यादिश्रुतौ सर्वोपाधिषु ब्रह्मणोऽभेदश्रवणादित्यर्थः तस्माद्भेदस्योपासनार्थत्वादभेदे तात्पर्यमिति ॥१२।

(३३१) अपि चैवमेके ॥१३॥

अपि चैवं भेदनिन्दापूर्वकमभेददर्शनमेवैके शाखिनः 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (क० ४।११) 'नेह नानास्ति किञ्चन' (क० ४।१२) इत्यादिना समामनन्ति ।।१३॥

ननु सति निर्विशेषसविशेषपरे द्विविधश्रुतिवाक्ये कथं निर्विशेषे श्रुतितात्पर्यमवधारयितुं शक्यमित्यत आह—

(३३२) अरूपवदेव हि तत्प्रधानत्वात् ॥१४॥

रूपादिहीनं निर्विशेषमेव ब्रह्मावधारणीयं, न विपरीतम। कुतः ?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्प्रधानत्वात् । 'अस्थूलम्' 'अशब्दम्' 'दिव्योह्यमूर्त्तः' इत्यादिनिषेध शास्त्रस्य निष्प्रपञ्चब्रह्मप्रधानत्वात् । भेदप्रतिपादकानामुपासनावाक्यानां सविशेषत्वे तात्पर्याभ्युपगमे वाक्यभेदापत्ते अतस्तेषां प्रत्यक्षादिसि प्रसिद्धस्य प्रपञ्चस्यानुवादकत्वेन निर्विशेषब्रह्म परत्वात् न ब्रह्मणः सविशेषत्वे तत्प्रामाण्यमिति भावः ॥१४॥

ननु तर्हि का गतिः सविशेषश्रुतीनामित्यत आह—

(३३३) प्रकाशवच्चावैयर्थ्यम् ॥१५॥

यथा सौरश्चान्द्रमसो वा प्रकाशोङ्गुल्याद्युपाधिसम्बन्धाद् ऋजु वक्रादिभावं प्रतिपद्यते, तथा ब्रह्मापि पृथिव्याद्युपाधियोगात्तदाकारता मिव प्रतिपद्यते । अतो ब्रह्मणस्तादृशौपाधिकाकारविशेषोपदेशस्योपा सनार्थत्वेन सविशेष ब्रह्मविषयाणां श्रुतिवाक्यानामवैयर्थ्यमिति सर्वासां श्रुतीनां प्रमाणत्वाविशेषात्केषाञ्चिद्वैयर्थ्यं नयुक्तम् । न चोपा धियोगादपि ब्रह्मणोद्विरूपत्वमिति; उपाधीनामाविद्यकत्वेन वस्तुत्वानु पपत्तेरिति भावः ॥१५॥

(३३४) आह च तन्मात्रम् ॥१६॥

किं च 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ० ४।५।१३) इति श्रुतिलोहितपिण्डवद् बाह्याभ्यन्तरभेदरहितं तन्मात्रं = चैतन्यमा निर्विशेषं ब्रह्मेत्याह ॥१६॥

(३३५) दर्शयति चाथो अपि स्मर्यते ॥१७॥

इतश्च निर्विशेषमेव ब्रह्म, यत्प्रपञ्चनिषेधद्वारा तदुपदिश्यते अन्यथा सविशेषब्रह्मावबोधक श्रुतिभिरेव तत्र तत्सिद्धेः प्रपञ्चप्रत्या ख्यानोपदेशानर्थक्यं प्रसज्येत । तथाहि 'अथात आदेशो नेति नेति' (बृ० २।३।६) 'अन्यदेव तद्विदितादथोऽविदितादधि' यतो वाचो नि वर्तन्तेऽप्राप्य मनसा सह' (बृ० २।४।१) इत्यादिश्रुतिर्ब्रह्मणो निर्वि शेषत्वं दर्शयति । सौत्रोऽथशब्दस्तथार्थे । तथा स्मर्यतेऽपि 'अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते' (गी० १३।१२) इत्यत्र निर्विशेषमेव ब्रह्मतिभावः ॥१७॥

(३३६) अत एव चोपमा सूर्यकादिवत् ॥१८॥

किंचयत एवायमात्मा चैतन्यरूपो निर्विशेषोवाङ्मनसातीतः प्रपञ्चनिषेधेनोपदेश्योऽत एवौपाधिकमपारमार्थिकं सविशेषत्वमा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रेत्य जलसूर्यकादिवदुपमोपादियते मोक्षशास्त्रेषु 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' (ब्र० वि० १२) इत्यादिषु अतोऽनेन दृष्टान्तेन ब्रह्मणो निर्विशेषत्वमिति भावः ॥१८॥

(३३७) अम्बुवदग्रहणात्तु न तथात्वम् ॥१९॥

न ब्रह्मणो जलगतसूर्यादिप्रतिबिम्बतुल्यत्वमुपपद्यते ? तस्याम्बुवदग्रहणात्। सूर्यादिभ्यो हि मूर्त्तेभ्यो भिन्नं दूरस्थं मूर्त्तं जलं यथा गृह्यते, न तथाऽमूर्त्ताद्ब्रह्मणोभिन्नदूरस्थोपाधिर्गृह्यते, तस्य सर्वगतत्वादनन्तत्वाच्च। तस्माद्विषमोऽयं दृष्टान्तः ॥१९॥

(३३८) वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्॥२०॥

यथा जलान्तर्गतस्य सूर्यप्रतिबिम्बस्य जलगतवृद्धिह्रासभाक्त्वं तदौपाधिकं न पारमार्थिकम्। एवं निर्विशेषस्य ब्रह्मणो देहाद्युपाध्यन्तर्भावात्तद्गतवृद्धिह्रासभाक्त्वं न पारमार्थिकम्, किन्त्वौपाधिकमेव। एवं विवक्षितांशसम्भवेनोभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोधः। नहि दृष्टान्तदार्ष्टान्तिकयोः सर्वसारूप्यं केनापि दर्शयितुं शक्यम्; तथासति तद्भावोच्छेदप्रसङ्ग इति भावः ॥२०॥

(३३९) दर्शनाच्च ॥२१॥

किंच शास्त्रैकसमधिगम्येऽर्थे नैवं शङ्कनीयम्। 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः। पुरः स पक्षीभूत्वा पुरः पुरुष आविशदिति' (बृ० २।५।१८) 'अनेन जीवेनात्मनाऽनुप्रविश्य' (छा० ६।३।२) इत्यादिश्रुतौ परस्यैव ब्रह्मणो देहाद्युपाधिषु प्रतिबिम्बभावेनान्तरनुप्रवेशस्य दर्शनात्। अतो जलसूर्यादिदृष्टान्तः संगच्छते। तस्मान्निर्विशेषैकरूपमेव ब्रह्म, नोभयरूपं विपरीतं वेति निःसन्दिग्धं सिद्धम् ॥२१॥

[६–प्रकृतैतावत्त्वाधिकरणम्। सू० २२–३०]

ननु निषेधश्रुतिबलेन यथा ब्रह्मणि निर्विशेषत्वमुक्तं, कथं न तथाविधश्रुतिबलेनैव ब्रह्मणोऽपि निषिद्धत्वमित्याक्षेपसंगत्येदमाह—

(३४०) प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥२२॥

अत्र पूर्वपक्षे ब्रह्मणोऽसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। 'द्वेवाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्त्तं च' (बृ० २।३।१) इत्युपक्रम्य 'अथात आदेशो नेति नेति' (बृ० २।३।६) इति श्रुत्या किं प्रपञ्चो ब्रह्म

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चेत्युभयमपिनिषिध्यते, उतैकम्। अन्यतरनिषेधे तयोः कस्य निषेधः इति संशये; द्वावेतौ प्रतिषेधौ। कुतः, नेति शब्दस्य द्विः प्रयोगात्। अथवा ब्रह्मैवप्रतिषिध्यते, तस्य वाङ्मनसातीतत्वेमासम्भाव्यमानसत्त्वात्। प्रपञ्चस्य प्रत्यक्षादिगोचरत्वाद्प्रतिषेधार्हत्त्वमिति पूर्वपक्षः। सिद्धान्तस्तु न तावत्प्रपञ्चब्रह्मणोरुभयोः प्रतिषेध शक्यते वक्तुम्; शून्यवादप्रसङ्गात्। नहि रज्जुसर्पादीनां प्रतिषेधो निरवधिको लोके दृष्टः। निषेधशास्त्रं त्वयोदितं हि प्रकृतैतावत्त्वं प्रतिषेधति। प्रकृतं यदेतावत्त्वमियत्तापरिच्छिन्नं मूर्त्तामूर्त्तलक्षणं ब्रह्मणोरूपं, तदेव 'नेति नेति' इत्यादि श्रुतिः प्रतिषेधति, सन्निहितावलम्बनेनेति शब्देन पूर्वप्रपञ्चितस्य ब्रह्मणोरूपद्वयस्य प्रधानस्य परामर्शसम्भवात्। षष्ठ्या निर्दिष्टस्य ब्रह्मणोरूपद्वयात्मकनिखिलजगद्विशेषणत्वेन निषेद्धुमर्हत्वात्। तस्मात्ब्रह्मणि कल्पितं प्रपञ्चमेव प्रतिषेधति, परिशिनष्टि च ब्रह्मेति निर्णयः। इतोऽप्येषनिर्णयः। यतस्ततः प्रतिषेधाद्भूयः 'नह्येतस्मादिति नेत्यन्यत्परमस्ति' (बृ० २।३।६) इत्यत्र एतस्माद्ब्रह्मणोव्यतिरिक्तं नास्तीत्यतो नेतिनेतीत्युच्यते ब्रह्मैव तु केवलमस्तीति ब्रवीति। अथवा ततः प्रपञ्च प्रतिषेधात्परं भूयः 'अथ नामधेयं सत्यस्य सत्यमिति' (बृ० २।१।२०) इत्यादिवाक्यं प्रथमान्तसत्यपदेन ब्रह्मेव ब्रवीति। तस्माद्ब्रह्मावसानोऽयं प्रतिषेधो नाभावसान इति प्रपञ्चस्य व्यावहारिकत्वेन न तत्प्रदिषेधे प्रत्यक्षविरोध इति च सिद्धम ॥२२॥

ननु प्रपञ्चादन्यदस्ति चेद्ब्रह्म, तर्हि कस्मान्नोपलभ्यते इत्यत आह-

(३४१) तदव्यक्तमाह हि ॥२३॥

न व्यज्यते इत्यव्यक्तं प्रत्यक्षाद्यविषयं सर्वसाक्षित्वात्तद्ब्रह्म। हि यतो 'न चक्षुषा गृह्यते नापि वाचा' (मु० ३।१।८) 'स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यते' (बृ० ३।९।२६) इत्यादिश्रुतिरेवमेवाह ॥२३॥

ननु सर्वथा ब्रह्मणो ग्रहणाभावेऽनिर्मोक्षप्रसङ्गः इत्यत आह—

(३४२) अपि च संराधने प्रत्यक्षानुमानाभ्याम् ॥२४॥

अपि चैनमात्मानमव्यक्तं भक्तिध्यानप्रणिधानाद्यनुष्ठानकाले योगिनः पश्यन्ति। तथैव श्रुतिस्मृतिभ्यामवगम्यते। तथाहि 'पराञ्चि खानि व्यतृणत् स्वयंभूः''' कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' (क० ४।१) 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' (मु०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३।१।८) इत्यादिश्रुतिः 'ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः इत्यादिस्मृतिरिति ताभ्यामवगम्यते इत्यर्थ ॥१४॥

ननु जीवब्रह्मणोः संराध्यसंराधकत्वाभ्युपगमे भेदप्रसक्तिरित्याशंकायामाह—

(३४३) प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥२५॥

यथा प्रकाशाकाशसवित्रादयोऽङ्गुल्याद्युपाधौ कर्मणि भिन्नवदवभासन्ते, वस्तुतस्त्वेक एव। तथा ध्यानाद्युपाधिनिमित्त एवायमात्मभेदोऽवभासते, वस्तुतस्तु तस्यब्रह्मणोऽवैशष्यमेकरूपत्वमेव। कुतः; तत्त्वमसीत्यादिश्रुतिवाक्येषु तयोरभिन्नत्वेनाभ्यासादित्यर्थः ॥२५॥

(३४४) अतोऽनन्तेन तथा हि लिङ्गम् ॥२६॥

अतश्च भेदस्याविद्याकृतत्वाद्विद्ययाऽविद्यां तत्प्रयुक्तं भेदं च विधूय जीवोऽनन्तेन निर्विशेषब्रह्मणैकतां गच्छति। तथा हि 'ब्रह्म वेद ब्रह्मैव भवति' (मु० ३।२।९) 'ब्रह्मैवसन्ब्रह्माप्येति' (बृ० ४।४।६) इत्यादि ज्ञापकमित्यर्थः ॥ २६ ॥

इत्थं जीवपरयोः पारमार्थिकमभेदमुक्त्वा मतान्तरमुपन्यस्यति स्वमतविशुद्धये—

(३४५) उभयव्यपदेशात्त्वहिकुण्डलवत् ॥२७॥

'ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति ध्यातृध्येयत्वद्रष्टृद्रष्टव्यत्वादिना भेदस्य 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यभेदस्य च श्रुतौ व्यपदेशात्तयोरन्यतरस्यापारमार्थिकत्वानुपपत्त्या जीवपरयो भेदाभेदौ स्तः। सिद्धान्तवैलक्षण्यद्योतनार्थस्तुशब्दः। अहिकुण्डलवत्। यथाहिरित्यभेदः कुण्डलाभोगप्रांशुत्वादिना भेदस्तद्वदित्यर्थः ॥२७॥

न केवलं धर्मभेदेन भेदाभेदौ स्त, अपित्वेकधर्मावच्छेदेनापि तावितिपक्षान्तरमाह—

(३४६) प्रकाशाश्रयवद्वा तेजस्त्वात् ॥२८॥

यथा सवितृतत्प्रकाशयोतेजस्त्वाविशेषान्नात्यन्त भेदेऽपिभेदव्यपदेशः। तद्वज्जीवपरयोर्भेदाभेदौ स्वीकार्याविकिभावः ॥२८॥

ननु पारमार्थिकस्य भेदात्मकबन्धस्य विद्यया तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्र वैयर्थ्यं स्यात्। न चात्रोभयोर्भेदाभेदयोस्तुल्यश्रुत्या व्यपदेशः; भेदश्रुते र्लोकसिद्धभेदानुवादकत्वेनाभेदस्यैव श्रुतिप्रतिपाद्यत्वेन विवक्षितत्वादित्याह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३४७) पूर्ववद्वा ॥२९॥

यथा वा पूर्वं प्रकाशादिवच्चावैशेष्यमित्यत्रोपन्यस्तः काल्पनिको भेदः, पारमार्थिकश्चाभेदः। स एव श्रौतः सिद्धान्तोऽभ्युपगन्तव्य इति भावः ॥२९॥

(३४८) प्रतिषेधाच्च ॥३०॥

'नान्योऽतोऽस्ति द्रष्टा' (बृ० ३।७।२) इत्यादिशास्त्रेण ब्रह्मभिन्नस्य चेतनस्य 'नेति नेति' इत्यादिशास्त्रेण च कृत्स्नस्य प्रपञ्चस्य प्रतिषेधात् ब्रह्माद्वितीय मित्येष वेदान्तराद्धान्तः। तस्माच्छ्रुतिबलान्निर्विशेषमेव ब्रह्मेति सिद्धम् ॥३०॥

[७–पराधिकरणम् । सू० ३१–३७]

ननु 'नेति नेति' इत्यादिना प्रपञ्चं निषेध्य ब्रह्मावशेषितमित्युक्ति-र्दुरुक्तिः; तस्य सेतून्मानादिव्यपदेशेन वस्त्वन्तरसत्त्वावगमात्। न च द्युभ्वाद्यधिकरणे तत्र सेतुत्वं गौणत्वं निर्णीतमिति वाच्यम्; तथात्वेऽप्युन्मानादीनां मुख्यत्वाद्दोषस्य तादवस्थ्य मित्याक्षेपसंगत्येदमाह—

(३४९) परमतः सेतून्मान सम्बन्धभेदव्यपदेशेभ्यः ॥३१॥

अत्र पूर्वपक्षे उन्मानादिश्रुतीनां मुख्यत्वात्सविशेषं ब्रह्म, सिद्धान्तेऽद्वैतश्रुत्या निर्विशेषं ब्रह्मेति फलभेदः। तत्र ब्रह्मणोऽन्यद्वस्तु तात्त्विकमस्ति न वेति सन्देहे; पूर्वपक्षमाह—परमतो ब्रह्मणोऽन्यत्तत्त्वमस्ति। कुतः 'अथ य आत्मा स सेतुर्विधृतिः' (छा० ८।४।१) इत्यादिना तस्य सेतुत्वव्यपदेशात्। 'तदेतद्ब्रह्म चतुष्पात्' इत्युन्मानव्यपदेशात्। उन्मितस्य परिच्छिन्नत्वं कार्षापणादेः प्रसिद्धं लोके। तेनापि तदन्यत्वसिद्धिः। 'सता सोम्य ! तदा सम्पन्नो भवती' (छा० ६।८।१) त्यादिना सम्बन्धव्यपदेशात्। 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' (छा० १।६।६) इत्यादित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारस्यश्वरस्य 'अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छा० १।७।५) इत्यादिना व्यपदेशाच्च। तस्मादेतेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणो भिन्नमस्तीति सद्वितीयं ब्रह्मेति सिद्धम् ॥३१॥

(३५०) सामान्यात्तु ॥३२॥

तुशब्देन प्रदर्शितां चोदनां निवर्तयति। न ब्रह्मणोऽन्यत्किञ्चिदस्ति, प्रमाणाभावात्। सर्वस्य हि जगतो जन्मादिकारणत्वं ब्रह्मण इति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निर्धारितम् । न च सेतुत्वादिव्यपदेशा ब्रह्मातिरिक्तं तत्त्वं सूचयन्तीति वाच्यम्; सेतुसामान्यात्तत्र सेतुशब्दप्रयोगेऽविरोधात् । नहि मृद्दार्वादिमयो लोके सेतुर्दृष्ट इत्येतावता ब्रह्मणोऽपि तादृशमेव सेतुत्वमस्तीति कल्पनीयम् । किन्तु यथा सेतोर्जलमर्यादाव्यवस्थापकत्वमेवं ब्रह्मणोऽपि जगतस्तन्मर्यादानां च विधारकत्वेन लोकप्रसिद्धसेतुसाम्यात्सेतुत्वव्यपदेशोऽविरुद्ध इति भावः ॥३२॥

(३५१) बुद्ध्यर्थः पादवत् ॥३३॥

किं च 'ब्रह्म चतुष्पात्' इति श्रुतावुन्मानव्यपदेशोऽपि न मुख्यतया ब्रह्मभिन्नवस्तुतत्त्वावबोधकः । किं तर्हि ? बुद्ध्यर्थः उपासनार्थ इति यावत् । अन्यथा निर्विशेषस्य बुद्धिस्थत्वायोगः । उपासनार्थं विकारद्वारा तस्योन्मानकल्पना, न मुख्य उन्मानव्यपदेशः । पादवत् । यथा ब्रह्मप्रतीकस्याकाशस्याध्यानायाग्न्यादश्चत्वारः पादाः, मनसो वागादयश्च पादाः कल्प्यन्ते, तद्वदित्यर्थः ॥३३॥

(३५२) स्थानविशेषात्प्रकाशादिवत् ॥३४॥

ननु सम्बन्धभेदव्यपदेशौ ब्रह्मव्यतिरिक्तवस्तुतत्त्वसाधकौ स्यातमिति चेन्न; तयोः स्थानविशेषादुपपत्तेः । स्थानमुपाधिर्बुद्ध्यादिः तद्विशेषादुद्भूतस्य भेदस्योपाध्युपशमे सुप्तौ भेदोपशमात्परमात्मना सह सम्बन्ध औपचारिको, न मुख्यः । तथाक्ष्यादित्युपुरुषयोर्भेदव्यपदेशोऽक्ष्यादित्यरूपस्थानविशेषादौपचारिको, न स्वरूपापेक्षः । प्रकाशादिवत् । यथैकस्यैव सौर्यादिप्रकाशस्योपाधियोगादुपजातभेदस्योपाध्युपशमे सम्बन्धव्यपदेशोऽस्ति, उपाधिभेदाच्च भेदव्यपदेशस्तद्वदित्यर्थः ॥३४॥

(३५३) उपपत्तेश्च ॥३५॥

इतश्च न मुख्यसम्बन्धो जीवब्रह्मणोः सुषुप्तौ सम्भवति ? 'स्वमपीतो भवती' (छा० ६।८।१) इति श्रुतावनपायिनः स्वरूपस्यैव तदा सम्बन्धव्यपदेशोपपत्तेः । न खलु जीवपरयोः सुप्तौ नरनगरन्यायेन सम्बन्धोघटते । तथा भेदोऽपि न मुख्यो, बहुतर-श्रुतिप्रसिद्धैकचेतनत्वविरोधात् । तस्माच्छ्रुत्युपपत्तेर्नजीवपरयोर्मुख्यौ भेदसम्बन्ध व्यपदेशौ स्तः ॥ ३५ ॥

एवं सेत्वादिव्यपदेशान्भेदहेतून्निरस्य सम्प्रति ब्रह्मणोऽद्वितीयत्वसाधनायाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३५४) तथान्यप्रतिषेधात् ॥ ३६ ॥

किं च तथा स 'एवाधस्तात्' (छा० ७।२५।१) 'अहमेवाधस्तात्' (छा० ७।२५।१) 'आत्मैवाधस्तात्' (छा० ७।२५।२) इत्यादिश्रुतिभिरन्यवस्तुनः प्रतिषेधादपि ब्रह्मणः परं वस्तुतत्त्वं नास्तीति गम्यते। अतोब्रह्मैवाद्वितीयमिति सिद्धम् ॥ ३६ ॥

नन्वेवं सिद्धेऽपि ब्रह्मणोऽद्वितीयत्वे सर्वगतत्वं न सिद्धमित्यत आह—

(३५५) अनेन सर्वगतत्व मायामशब्दादिभ्यः ॥३७॥

अनेन सेतुत्वादिव्यपदेशनिरासेन वस्त्वन्तरस्य च प्रतिषेधेन ब्रह्मणःसर्वगतत्वं सिद्धं भवति। अन्यथा सेतुत्वादिव्यपदेशस्य मुख्यत्वे वस्त्वन्तराप्रतिषेधे च तत्र परिच्छिन्नत्वं प्रसज्येत। किं चायामशब्दादिभ्योऽपि सर्वगतत्वं विज्ञायते। "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः" (छा० ८।१।३) 'ज्यायान्दिवः' (छा० ३।१४।३) 'नित्यः सर्वगतः' (गी० २।२४) इत्यादिव्यापकत्ववाचकोऽयमायामशब्दः। तस्माच्छ्रुतिशतेभ्योब्रह्मणः सर्वगतत्वमद्वितीयत्वं च तदन्यदाविद्यकमिति सिद्धम् ॥३७॥

(८ फलाधिकरणम् । सू० ३८–४१)

इत्थं ब्रह्मभिन्नं वस्तु प्रतिषेध्य निर्विशेषं ब्रह्मावधारितम्। साम्प्रतं तस्य फलदातृत्वाभावमाक्षिप्याक्षेपसंगत्येदमाह—

(३५६) फलमत उपपत्तेः ॥३८॥

अत्र पूर्वपक्षे तत्पदवाच्यस्येश्वरस्य फलदातृत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। तत्र जन्तूनां त्रिविधं संसारगोचरं कर्मफलं कर्मणो भवतीश्वराद्वेति सन्देहे; कर्मण इति पूर्वपक्षः। सिद्धान्तस्तु—अतोऽस्मादीश्वरात्फलं भवति। कुतः; अनुक्षणविनाशिनः कर्मणः कालान्तरभाविफलोत्पत्त्यासंभवेनैश्वरस्यैव फलदातृत्वोपपत्तेरिति।३८।

(३५७) श्रुतत्वाच्च ॥३९॥

किं च न केवलमुपपत्तेरेवैश्वरस्य फलदातृत्वं कल्प्यते। किन्तु 'स वा एष महानज आत्माऽन्नादो वसुदानः' (बृ० ४।४।२४) इति श्रुतत्वादपि तस्य फलदातृत्वमवगम्यते ॥३९॥

(३५८) धर्मं जैमिनिरत एव ॥४०॥

जैमिनिराचार्योऽपि सिद्धान्तिवत् श्रुत्युपपत्तिभ्यामेव धर्मं फलदा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तारं मन्यते। तथाहि 'स्वर्गकामो यजेत' इतिविधि श्रुति विषयस्य यागस्य स्वर्गोत्पादकत्वमवगम्यते। अन्यथा तदुपदेशवैयर्थ्यप्रसङ्गः। नन्वनुक्षणविनाशिनो यागस्य कथं फलदातृत्वमिति चेन्नः श्रुतिप्रामाण्यात्तदुत्तरावस्थारूपस्यापूर्वाख्यव्यापारस्य कल्पनीयत्वादिति यागादि धर्म एव फलदाता। तस्मादीश्वरस्याविचित्रस्य विचित्रफलदातृत्व स्वीकारे वैषम्यादि दोषप्रसङ्गाद्धधर्माद्यनुष्ठानवैयर्थ्यापत्तेश्च धर्मादेव फलं भवतीति ॥४०॥

(३५६) पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥४१॥

तु शब्दः पूर्वसूत्रोक्तशङ्कानिरासार्थः। बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं कर्मापेक्षं फलहेतुं मन्यते, न स्वतन्त्रं कर्म, नाप्यपूर्वं वा। कुतः; हेतुव्यपदेशात्। 'एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधुकर्म कारयति तं यमधो निनीषते' 'अन्नादो वसुदानः' 'तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्' । इत्यादि श्रुतिस्मृतिषु धर्माधर्मयोरपि कारयितृत्वेन तत्फलदातृत्वेन चेश्वरस्यैव हेतुत्व व्यपदेशात्। तदेवमत्रपादे पूर्वार्धेन त्वंपदार्थं संशोध्योत्तरार्धेनाधिकरणचतुष्टयेन निर्विशेषः स्वयं प्रकाशोऽप्रतिषेध्योऽद्वितीयः शाखाचन्द्रन्यायेन कर्मकारयितृत्वतत्फलदातृत्वोपलक्षितः तत्पदार्थः परमात्मा संशोधित इति भावः ॥४१॥

इति ब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां श्रीविद्यानन्दवृत्तौ तृतीयाध्यायस्य द्वितीयः पादः ॥२॥

अथ तृतीयाध्यायस्य तृतीयः पादः।

(अत्रपादे परापरब्रह्मविद्यागुणोपसंहारविवरणम्)

[सर्ववेदान्त प्रत्ययाधिकरणम्। सू० १–४]

एवमतिक्रान्ते पादे वाक्यार्थज्ञानहेतुभूततत्त्वं पदार्थनिरूपणं कृतम्। साम्प्रतं वाक्यार्थनिर्धारणाय हेतु हेतुमद्भावसगत्या तृतीय पादोऽयमारभ्यते। अत्र निर्गुणे ब्रह्मणि नानाशाखापठितः पुनरुक्तपदोपसंहारः प्रसङ्गाच्च सगुणविद्यासु शाखान्तरीयगुणोपसंहारानुसंहारौ निरूपणीयौ। येन चित्तैकाग्र्यद्वारा निर्गुणवाक्यार्थज्ञानसामर्थ्यं सम्पद्येत। अस्य पादान्तरत्वात् नाव्यवहिताधिकरणेन संगत्यपेक्षा। प्रथमं तावत्पञ्चाग्निविद्यादीनां स्वरूपमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३६०) सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥१॥

अत्र पूर्वपक्षे उपासनाभेदाद्गुणानुपसंहारः। सिद्धान्ते तदभेदाद्गुणानुपसंहार इति फलभेदः। किमत्र प्रतिशाखमुक्तोपासनानिभिद्यन्ते न वेति संशये; नामरूपभेदादुपासनानां प्रतिवेदान्तं भेद इति पूर्वपक्षः। सिद्धान्तस्तु सर्वेषु वेदान्तेषु प्रत्ययान्युपासनानिनभिद्यन्ते। कुतः; चोदनाद्यविशेषात्। चोदना-संयोग-रूप-समाख्याविशेषात्। यथैकस्मिन्नग्निहोत्रे शाखाभेदेऽपि 'जुहुयादि' ति पुरुषव्यापारस्तादृश एव चोद्यते। अतः शाखाभेदेऽपि चोदनाविशेषात् नित्याग्निहोत्रमेकमेव। तथैव 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद' (बृ० ६।१।१ छा० ५।१।१) 'श्रेष्ठश्चश्रेष्ठश्चस्वानां भवति' इत्यादौ वाजसेयिनां छन्दोगानां चोभयत्र पुरुषव्यापारतत्फलसम्बन्धयोश्चाविशषादेकैव प्राणविद्या, नभिन्ना तथा यागस्य द्रव्यदेवतावद्ज्येष्ठादिगुणान्वितं विज्ञानमुभयत्र समानमेवरूपम्। सैव प्राणविद्येति समाख्याऽपि समानैव। एवं पञ्चाग्निविद्या, वैश्वारविद्या, शाण्डिल्य, विद्येत्यादिषु योजयितव्यम्। न च नामरूपादीनां भेदादुपासनाभेद इति वाच्यम्; 'न नाम्ना स्यादचोदनाभिधानत्वादि' त्यारभ्य प्रथमकाण्डेपरिहृतत्वादिति ॥१॥

(३६१) भेदान्नेति चेन्नैकस्यामपि ॥२॥

ननु वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य 'तस्याग्निरेवाग्निर्भवति' (बृ० ६।२।१४) त्यादिना प्रसिद्धाग्निं षष्ठमुपास्यत्वेनामनन्ति। छन्दोगास्तु 'अथ ह य एतानेवं पञ्चावनीन् वेद' (छा० ५।१०।१०) इत्यादिना पञ्चसंख्ययैवोपसंहरन्ति। अतो वेद्यभेदाद्विद्याभेदे द्रव्यदेवताभेदाद्यागभेदवदिति चेन्न; एकस्यामपि हि विद्यायामेवं जातीयकोगुणभेद उपपद्यते, नैतावता विद्याभेदोऽनुमेयः। द्युलोकादीनां पञ्चाग्नीनामुभयत्र प्रत्यभिज्ञायमानत्वात्। न च षष्ठाग्नितदभावाभ्यां विद्याभेद इति वाच्यम्; 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इत्येकस्मिन्नेवातिरात्रे षोडशिग्रहणाग्रयोर्दर्शनेऽपि तद्भेदाभावादिति। अथवा समारोप्याः पञ्चाऽन्य उभयत्र समानाः षष्ठाऽनेश्च निव्यावादस्तस्यान्यत्रोपसंहारोऽपिवैकल्पिकः। तस्मादुभयत्रवेद्यराशेर्भूयस्त्वेनैकविद्यमेवेति ॥ २ ॥

नन्वाथर्वणिके ब्रह्मविद्यां प्रतिशिरोव्रताद्यपेक्षणादन्यत्रापेक्षाभावाद्धर्मभेदाद्विद्याभेद इत्यत आह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३६२) स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥३॥

स्वाध्यायस्यैष धर्मो न विद्यायाः। हि यतस्तथात्वेन स्वाध्यायाङ्गत्वेन समाचारे वेदव्रतोपदेशपरे ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन समामनन्ति। अधिकाराच्च 'नैतदचीर्णव्रतोऽधीते' (मु० ३।२।११) इत्यधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वशाखोपनिषदध्ययनाङ्गमेवैतदिति निर्धार्यते। तत्र सववच्च तन्नियम इति दृष्टान्तमाह। यथा सवा—होमाः सप्त सौर्यादयः शतौदनान्ता आथर्वणिकानां सन्ति, तेऽभिसम्बन्धादेकस्मिन्नेवाथर्वणिकेऽग्नौ क्रियन्ते, तेषामेव शाखान्तरोक्तत्रेताग्नौ सम्बन्धाभावान्न क्रियन्ते, नियम्यते इति भावः। तथैवायमपि धर्मो मुण्डकाध्ययने नियम्यते। तस्मात्सर्वत्र विद्यैकत्वमनवद्यम् ॥३॥

(३६३) दर्शयति च । ४॥

किं च 'सर्वे वेदा यत्पदमामनन्ति' (क० २।१५) इति वेदवाक्यं सर्ववेदान्तेषु निर्गुणस्य ब्रह्मणो वेद्यस्यैकत्वोपदेशाद्विद्यैकत्वं दर्शयति। तथा वाजसनेयके प्रादेशमात्रत्वेन सम्पादितस्य वैश्वानरस्य सगुणब्रह्मणः 'यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरम्' (छा० ५।१८।१) इत्यत्र सिद्धवदुपादानाद्वैश्वानरविद्याया एकत्वमिति। एवं सर्ववेदान्तप्रत्ययत्वेनान्यत्र विहितानां शाखविशेषरूपोक्थादीनामन्यत्रोपासनाविधानायोपादानात्प्रायेणोपासनानामप्यैकत्वं सर्वत्रेति सिद्धम् ॥ ४ ॥

[२—उपसंहाराधिकरणम्। सू० ५]

इत्थं सर्वशाखासुविद्यैकत्वमभिधाय तत्फलमभिधातुं फलफलिभावसंगत्येदमाह—

(३६४) उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥५॥

अत्र पूर्वपक्षे पूर्वाधिकरणस्य विवक्षितफलासिद्धिः, सिद्धान्ते तत्सिद्धिरितिफलभेदः तत्र सर्वत्रोपासनानामेकत्वे स्थितेऽप्येकशाखोक्तविज्ञानेऽन्यशाखोक्तविज्ञानगुणानामुपसंहारो भवति न वेति सन्देहे; तत्र तत्र परिपठितैर्गुणैरेवाकाँक्षानिवृत्तायामुपसंहारो न युक्त इति पूर्वपक्षः। सिद्धान्तस्तु—अन्यत्रोक्तानां विज्ञानगुणानामन्यत्रापि समाने विज्ञाने उपसंहारो युक्तः। कुतः, अर्थाभेदात्प्रयोजनाभेदादित्यर्थः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

उपास्यगुणैर्निष्पाद्यस्यार्थस्य विज्ञानस्य सर्वत्राभेदात्। तत्र दृष्टान्तमाह—विधिशेषवत्। यथा सिद्धेऽग्निहोत्रैकत्वे तद्धर्माणां विधिशेषाणामुपसंहारस्तद्वदिहापीत्यर्थः। अस्यैव प्रयोजनसूत्रस्य 'सर्वाभेदादित्यारभ्य' प्रपञ्चः ॥५॥

[३—अन्यथात्वाधिकरणम्। सू० ६-८]

पूर्वं यथा चोदनादिसमाख्याया अविशेषाद्विद्यकत्वमुक्तं, तद्वदत्राप्युद्गीथविद्येति समाख्याविशेषाद्विद्यैक्यमेवेति दृष्टान्तसंगत्येदमाह—

(३६५) अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥६॥

अत्र पूर्वपक्षे मिथोगुणोपसंहारः, सिद्धान्ते विद्याभेदाद्गुणानुसंहार इति फलभेदः। तत्र 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' (बृ० १।३।७) इति वाजसनेके, तथा 'अथ ह य एवायं मुख्यःप्राणस्तमुद्गीथमुपासांचक्रिरे' (छा० १।२।७) इति छान्दोग्ये च पठ्यते। उभयत्रापि मुख्यप्राणप्रशंसया प्राणोपासनाविधिरवसीयते। किमत्र विद्यैक्यं विद्याभेदो वेति संशये; पूर्वन्यायेन विद्यैकत्वमिति पूर्वपक्षः ननु अन्यथात्वं = विद्यैकत्वं न युक्तम्। कुतः; 'त्वं न उद्गाय' इत्यत्र प्राणस्योद्गीथकर्तृत्वेन 'तमुद्गीथमुपासांचक्रिरे' इत्यन्यत्रोद्गीथत्वेनोपास्यत्वप्रतिपादनात् शब्दभेदादिति चेन्न; सत्यप्येतस्मिन्विशेषे बहुतराविशेषस्य प्रतीयमानत्वात्। देवासुरसंग्रामोपक्रमासुरजयार्थसम्वादोद्गीथोपन्यासासुरविध्वंसादीनामुभयत्राविशेषादित्यर्थः। तस्माच्छान्दोग्येऽपि प्राणे कर्तृत्वस्य लक्ष्यत्वेन विद्यैकत्वमिति ॥६॥

प्राप्ते सिद्धान्तमाह—

(३६६) न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥७॥

न वा विद्यैकत्वमत्रयुक्तम्। कुतः; प्रकरणभेदात् = प्रक्रमभेदात्। 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।१।१) इति प्रस्तुत्य 'प्राणमुद्गीथमुपासांचक्रिरे' इति वाक्येनैकत्रोद्गीथावयवे ह्योंकारे प्राणदृष्टिरूपदिश्यते। वाजसनेयके तदुद्गीथशब्देनावयवग्रहणे हेत्वभावात्सकलैव सामभक्तिरावेद्यते। तथा 'त्वं न उद्गाये' त्यनेन तस्याः कर्तोद्गाता प्राणत्वेनावेद्यते इति प्रक्रमभेदात्। न च प्राणस्योद्गीथत्वमसम्भवमिति वाच्यम्; उद्गीथभाववदुद्गीथकर्तृत्वस्याप्युपासनार्थत्वेनोपदिश्यमानत्वात् प्राणवीर्येणैवोद्गातुरौद्गात्रेसमर्थत्वाच्च। तत्र दृष्टान्तमाह—परोवरीयस्त्वादिवदिति। यथा समानेऽपि परमा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्मदृष्ट्यध्यासे 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्। 'स एष परोवरीयानुद्गीथः' (छा० १।९।१२) इति परोवरीयस्त्वादिगुणविशिष्टमुद्गीथोपासनमक्ष्यादित्यगतहिरण्यश्मश्रुत्वादिविशिष्टोद्गीथोपासनाद्भिन्नम्। न तत्रान्योऽन्यगुणोपसंहारस्तद्वदित्यर्थः ॥७॥

(३६७) संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥८॥

ननूद्गीथविद्येति संज्ञैकत्वाद्विद्यैकत्वमुभयत्रेति चेत्तदुक्तम् 'न वा प्रकरणभेदात्परोवरीयस्त्वादिवदिति सूत्रे। अस्ति तु संज्ञैकत्वं प्रसिद्धभेदेऽपि। यथा प्रसिद्धभेदानामग्निहोत्रादीनां काठकैकग्रन्थपरिपठितानां काठकसंज्ञैकत्वं, तथेहापि बोध्यम्। नैतावता विद्यैकत्वं कल्पनीयमिति भावः ॥८॥

[४–व्याप्त्यधिकरणम् । सू० ९]

इत्थम् 'ओमित्येतदक्षरमुद्गीथमित्यत्रोङ्कारोद्गीथयोर्विशेषणविशेष्यभावमङ्गीकृत्यप्रक्रमभेदाद्विद्याभेदोऽभिहितः। स न युज्यते इत्याक्षेपसंगत्येदमाह—

(३६८) व्याप्तेश्च समञ्जसम् ॥९॥

अत्र पूर्वपक्षे पूर्वाधिकरणोक्तसिद्धान्तासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र 'ओमित्येतदक्षरमुद्गीथमि (छा० १।१।१) त्यत्राक्षरोद्गीथयोः श्रूयमाणं सामानाधिकरण्यं किं नाम ब्रह्मेतिवदन्यत्रान्यतरबुद्धिः। किं वा तत्त्वमस्यादिवाक्यजन्यबुद्ध्या निवर्त्यमानाया देहतादात्म्यबुद्धेरिवात्रापवादः। उत द्विजोत्तमो ब्राह्मणो भूसुर इतिवदुभयपदयोरनतिरिक्तार्थम्, किं वा नीलमुत्पलमिति वद्विशेषणविशेष्यभावनिबन्धनं तत्सामानाधिकरण्यमिति संशयेऽन्यतमनिर्धारणेकारणाभावादनिर्धारणमिति पूर्वपक्षः। सिद्धान्तस्तु–चशब्दः तुशब्दस्थाननिवेशी पक्षत्रयनिरासार्थः। विशेषणपक्ष एव न्यायः। तत्राध्यासपक्षे लक्षणाप्रसंगः 'आपयिता ह वै कामानां भवति' (छा० १।१।७) इत्यादिफलश्रुतेराप्त्यादिगुणविशिष्टोपासनविषयकतयाऽत्रबुद्ध्यध्यासस्य फलान्तरकल्पनाप्रसंगाच्च। अपवादपक्षे उपासनापरस्यैतद्वाक्यस्य वस्तुपरत्वविरहेण मिथ्याबुद्धिनिवर्तनफलकत्वायोगेन फलान्तरकल्पनाप्रसङ्गः। ऐक्यपक्षे शब्दद्वयोच्चारणस्य वैयर्थ्यापत्तिः। परिशेषाद्विशेषणपक्ष एव श्रेयमिति तदाह–व्याप्तेश्च समञ्जसम्। ऋग्यजुः सामसुत्रिषु वेदेषु व्याप्तेर्व्याप्तत्वात् क

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओङ्कार उपास्य इति जिज्ञासायाम 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति श्रुत्योद्गीथावयवत्वेनोङ्कारो विशेष्यते। अतश्च व्याप्तत्वहेतोरुद्गीथावयवभूत ओङ्कारो ग्राह्यः इत्योमित्येतदक्षरमित्येतस्योद्गीथमित्येतद्विशेषणमिति समञ्जसम् निरवद्यमित्यर्थः ॥९॥

[५–सर्वाभेदाधिकरणम् सू० १०]

इत्थं सर्ववेदव्याप्तोऽप्योङ्कार उद्गीथत्वविशेषादुद्गीथावयवत्वेन ग्राह्योऽभिहितस्तद्वत् 'एवं विद्वान्' इति प्रकृतगुणमात्रग्राहकेनं शब्देनाशाखान्तरव्यावृत्तिरिति दृष्टान्तसंगत्येदमाह—

(३६९) सर्वाभेदादन्यत्रेमे ॥१०॥

अत्र पूर्वपक्षसिद्धान्तयोर्गुणानुपसंहारोपसंहारौ फलभेदः। तत्र वाजसनेयके छान्दोग्ये च यथा प्राणसम्वादे श्रैष्ठ्यादिगुणविशिष्टप्राणोपासने 'यद्वा अहं वसिष्ठोस्मि त्वं तद्वसिष्ठोऽपि (छा० ६।१।१४) इत्यादिना वसिष्ठत्वादयोऽपि श्रूयन्ते, न तथा कौषीतक्यादिशाखासु। तत्र किमन्यत्रोक्ता वसिष्ठत्वादिगुणास्तदनुक्तस्थले नोपसंह्रियन्ते, उपसंह्रियन्ते वेतिसन्देहे; 'य एवं विद्वानि' त्यादिशब्देन सन्निहितश्रैष्ठ्यादिगुणपरामर्शात्तन्मात्रविशिष्टोपासनस्य युक्तत्वान्नान्यत्र वसिष्ठत्वादयो गुणा उपसंहर्तव्याः इति पूर्वपक्षः। सिद्धान्तस्तु क्वचिदुक्ता इमे वसिष्ठत्वादिगुणा अन्यत्र तदनुक्तस्थलेऽप्युपसंहर्तव्याः। कुतः; सर्वाभेदात्। सर्वासु शाखासु प्राणसंवादादिसारूप्यात् प्राणसंवादस्थस्य प्राणोपासनस्याभिन्नत्वात्। अतः प्रत्यभिज्ञाबलेन प्राणविद्याऽभिन्नत्वे सिद्धे कौषीतकिगतप्राणविद्यायामपि वसिष्ठत्वादिगुणजातस्योपसंहारो युक्तः इति सर्वे सर्वत्रोपासनैक्ये उपसंहर्तव्या. इति सिद्धम् ॥१०॥

[६–आनन्दाद्यधिकरणम् । सू० ११–१३]

इत्थं सविशेषस्य प्राणस्योपासनायां शाखान्तरीयवसिष्ठत्वादिगुणोपसंहारो युक्तः निर्विशेषस्य तु ब्रह्मणः स्वशाखागतधर्मैरेव प्रमितिसिद्धेर्नशाखान्तरगतानन्दाद्युपसंहारो युक्त इति प्रत्युदाहरणसंगत्येदमाह—

(३७०) आनन्दादयः प्रधानस्य ॥११॥

अत्र पूर्वपक्षे आनन्दादिगुणानुपसंहारे वाक्यार्थानिर्धारणम्, सिद्धान्ते तन्निर्धारणमिति फलभेदः। अत्र निर्गुणब्रह्मप्रतिपादनपरासु श्रुतिषु क्वचिदानन्दरूपत्व विज्ञानघनत्व सर्वव्यापकत्वसर्वात्मत्वादयो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्माः श्रूयन्ते। ते यत्र यावन्तः श्रूयमाणा एव प्रतिपत्तव्याः, किं वा सर्वे सर्वत्रोपसंहर्तव्याः इतिसन्देहे; यथाश्रुतिविभागं धर्मप्रतिपत्तिः कर्तव्येति पूर्वपक्षः। सिद्धान्तस्तु—आनन्दादयः सर्वे धर्माः प्रधानस्य ब्रह्मणः सर्वत्रोपसंहर्तव्याः। कुतः; सर्वाभेदादेव। सर्वशाखासु वेद्यस्य ब्रह्मण एकत्वेन विद्याया भेदाभावादिति। नहि स्वदेशे शौर्यादिगुणविशिष्टो देवदत्तो देशान्तरे गतस्तद्धीनोभवति। अतो ब्रह्मधर्माणां सार्वत्रिकत्वमिति ॥११॥

नन्वेवं सति 'तस्य प्रियमेव शिरः' (तै० २।५) इत्यत्रोक्ताः प्रियशिरस्त्वादयोपि धर्माः सर्वत्रोपसंहर्तव्या इत्यत आह—

(३७१) प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥१२॥

प्रियशिरस्त्वादिधर्माणां न सर्वत्र प्राप्तिः। हि यस्मात् प्रियं मोदः प्रमोद आनन्द इत्येते परस्परापेक्षया भोक्त्रन्तरापेक्षया चोपचयापचयौ वृद्धिक्षयावुपलभ्येते। नहि धर्मिभेदं विना तौ निर्भेदे ब्रह्मणि सम्भवतः। न चैते प्रियशिरस्त्वादयो ब्रह्मधर्माः, किं तर्हि कोशधर्मा इत्यानन्दमयाधिकरणेऽस्माभिरुपदिष्टम्। एतेन संयद्वामत्वसत्यकामत्वादिधर्माणां क्वचिच्छ्रुतानां न सर्वत्र प्राप्तिरित्यपि व्याख्यातम् तत्रोपास्यत्वाविशेषेऽपि प्रक्रमभेदादुपासनाभेद इति भावः ॥१२॥

ज्ञानोपयोगित्वादानन्दादीनां संयद्वामत्वादिधर्मेभ्यो वैलक्षण्यमाह—

(३७२) इतरे त्वर्थसामान्यात् ॥१३॥

इतरे संयद्वामत्वादीनामुपास्यधर्माणामपेक्षया त्वानन्दादिधर्मा ब्रह्मतत्त्वावबोधायोच्यमानाः सर्वत्रोपसंहर्तव्याः। कुतः; अर्थसामान्यात्। अर्थस्य प्रतिपाद्यस्य ब्रह्मण एकत्वादित्यर्थः। तस्माद्ब्रह्मप्रतिपत्तिफलकनामविद्यानिवृत्तिं ब्रह्मानन्दावाप्तिं च यावत्सर्वत्रोपसंहारो न्यायः इति भावः ॥१३॥

[७—आध्यानाधिकरणम्। सू० १४–१५]

इत्थं ब्रह्मस्वरूपेष्वुपसंहार्येष्वानन्दादिधर्मेषु ब्रह्मज्ञानोपायत्वमुक्त्वा ब्रह्मस्वरूपस्यानुपसंहार्यस्यार्थादिपरत्वात्मकधर्मस्यात्मज्ञानोपायत्वं वक्तुमेकफलत्वसंगत्येदमाह—

(३७३) आध्यानाय प्रयोजनाभावात् ॥१४॥

अत्र पूर्वपक्षे वाक्यभेदाद्विद्याभेदः। सिद्धान्ते वाक्यैक्याद्विद्यैक्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिति फलभेदः। 'इन्द्रियेभ्यः परा ह्यर्था' इत्यारभ्य 'पुरुषान्न परं किञ्चित्साकाष्ठा सा परागतिः' (क० ३।१०-११) इति काठके पठितानीमानि वाक्यानि किं भिन्नार्थानि, किं वात्मपरमेकमेव वाक्यमिति संशये; प्रत्येकमेषां परत्वप्रतिपादनपरं भिन्नं वाक्यमिति पूर्वपक्षः। सिद्धान्तस्तु—आध्यानायाध्यानपूर्वकाय सम्यग्दर्शनाय पुरुष एवार्थादिभ्यः सर्वेभ्य परत्वेन प्रतिपाद्यते इति युक्तम् न त्वर्थादयः परत्वेन प्रतिपाद्याः। कुतः ? प्रयोजनाभावात्। नहीतरेषु परत्वेन प्रतिपन्नेषु किञ्चित्प्रयोजनं दृश्यते श्रूयते च। 'निचाय्य तन्मृत्युमुखात्प्रमुच्यते' (क० ३।५) इत्यत्रेन्द्रियादिभ्यः परस्मिन्पुरुषेऽवगते च मोक्षसिद्धिः प्रयोजनं श्रूयते। तस्मात्प्रतिपाद्यैक्याद्वाक्यैक्यमिति सिद्धम् ॥१४॥

(३७४) आत्मशब्दाच्च ॥१५॥

इतश्च पुरुषप्रतिपत्त्यर्थमेवेन्द्रियादिपरत्ववाक्यम्; यत्किल 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' (क० ३।१२) इति प्रकृतपुरुषे आत्मशब्दश्रवणाच्चात्मभिन्नपरत्वं न विवक्षितम्। तस्यैवात्मनो दुर्विज्ञानतां संस्कृतमतिगम्यतां च प्रदर्श्यापूर्वता श्रुत्या प्रदर्श्यते इति भावः ॥१५॥

[८ आत्मगृहीत्यधिकरणम्। सू० १६-१७]

पूर्वं यथा वाक्यभेदभियाऽर्थादीनां पृथक्प्रतिपाद्यत्वं नास्तीत्युक्तम्, तद्वत् 'अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः' इत्यत्र पूर्वस्मिन् वाक्ये हिरण्यगर्भस्य प्रकृतत्वात् वाक्यभेदभिया तस्यैवात्मशब्देनाभिधानं युक्तमिति दृष्टान्तसंगत्येदमाह—

(३७५) आत्मगृहीतिरितरवदुत्तरात् ॥१६॥

अत्र पूर्वपक्षे आत्मशब्दस्य जीवात्मपरत्वान्नतत्प्रमित्यर्थमानन्दादिधर्माणामत्रोपसंहारः। सिद्धान्ते परमात्मनोऽत्र विवक्षितत्वात्तत्प्रमित्यर्थं तदुपसंहार इति फलभेदः। 'आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चनमिषत्' (ऐ० १।१) इत्यत्र किमात्मशब्देन हिरण्यगर्भ उच्यते, परमात्मा वेति संशये, 'आत्मैवेदमग्र आसीत्पुरुषविधः' (बृ० १।४।१) इति श्रुतेः 'स वै शरीरी प्रथमः' इति स्मृतेश्च परमेश्वराधिष्ठितेनापरेणैव लोकसृष्ट्यवधारणात् 'स ईक्षत लोकान्नु सृजा' (ऐ० १।१) इत्यत्र लोकस्रष्टा हिरण्यगर्भ इति पूर्वपक्षः। सिद्धान्तस्तु सृष्टिवाक्येऽस्मिन् परमात्मन एवात्मशब्देन गृहीति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहणं न्याय्यं, नान्यस्य। इतरवत्। यथा इतरेषु सृष्टिवाक्येषु 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै० २।१।१) इत्यादिषु परमात्मन एव ग्रहणं भवति। तथेहापीतिभावः। न चोक्ताभ्यां श्रुतिस्मृतिभ्यां हिरण्यगर्भस्य ग्रहणं सम्भवतीति वाच्यम्; तत्र पुरुषविधत्वादिविशेषणान्तरवशातस्य ग्रहण सम्भवेऽपि अत्र परमात्मानुगुणविशेषणेन लोकसर्जनाद्यात्मकेन परमात्मग्रहणोपपत्तेः। एतच्च विशेषणं मुख्यतया परमात्मन्येत्र श्रुत्यन्तरेष्ववगतमिति भावः॥१६॥

(३७६) अन्वयादिति चेत्स्यादवधारणात् ॥१७॥

ननु पर्यालोचनया लोकसृष्टिवाक्यानां हिरण्यगर्भे एव वाक्यान्वयदर्शनान्नात्र परमात्मग्रहणमुचितमि चेत्? परमात्मनो ग्रहणमुपपन्नं स्यात्। कुतः? अवधारणात्। 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० १।१) इत्यत्र हि परमात्मग्रहणे प्रागुत्पत्तेरात्मैकत्वावधारण संगच्छते। लोकसृष्टिवचनं तु शाखान्तरप्रसिद्धमहाभूतसृष्ट्यनन्तरमिति योजनीयम्। तस्मादत्रात्मशब्देन परमात्मग्रहणं युक्तमेवेति॥१७॥

॥ इति प्रथमं वर्णकम् ॥

पूर्वं वाक्यैक्यबलादर्थादि परत्वं केवलमात्मनि स्वीकृत्य विद्यैकत्वमुक्तमिह तूपक्रमभेदेन वाक्यभेदाद्विधैकत्वं न युक्तमिति प्रत्युदाहरणसंगत्येदमाह—

आत्मगृहीतिरितरवदुत्तरात् ॥१८॥

अत्र पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः सिद्धान्तेऽभेदाद्गुणोपसंहारः इति फलभेदः। वाजसनेयके 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ० ४।३।७) इत्यात्मशब्देनोपक्रम्य 'स वा एष महानज आत्मा' (बृ० ४।४।२५) इत्यादिना तस्यैवोपसंहारे सर्वसङ्गविनिर्मुक्तत्वप्रतिपादनेन ब्रह्मात्मत्वमवधारितम्। छान्दोग्ये तु 'सदेव सोम्येदमग्र आसीत्' (छा० ६।२।१) इत्यात्मशब्दं विनैव सच्छब्देनोपक्रम्योपसंहारे 'स आत्मा तत्त्वमसि' (छा० ६।८।७) इति तादात्म्यमुपदिष्टम्। तत्र किमनयोर्वाक्ययोस्तुल्यार्थत्वमतुल्यार्थत्वं वेति सन्देहे; अतुल्यार्थत्वमिति पूर्वपक्षः। सिद्धान्तस्तु छान्दोग्ये सत्पदेनाप्यात्मगृहीतियुक्ता। इतरवत्, यथा बृहदारण्यके 'कतम आत्मा' इत्यात्मपदेनात्मगृहीतिस्तथैव। कुतः? उत्तरात्। 'स आत्मा' इत्युपसहारे आत्मतादात्म्योपदेशादित्यर्थः। तस्मादुभ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्र तुल्यार्थत्वम् ॥१६॥

अन्वयादिति चेत्स्यादवधारणात् ॥१७॥

ननूपसंहारस्योपक्रमान्वयादुपक्रमतन्त्रत्वादुपक्रमे चात्मशब्दाश्रवणान्नात्मगृहीतिरिति चेत्तत्राह—सत्पदेनात्मग्रहणं युक्तं स्यात्। कुतः? 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि' (छा० ६।१।१) त्येकविज्ञानेन सर्वविज्ञानमवधार्य 'सदेव' इति सतोऽद्वितीयत्वावधारणादित्यर्थः। तस्मात्प्रतिपादनप्रकारभेदेऽपि पूर्वोक्तानां वाक्यानां न प्रतिपाद्यार्थभेदः इति सिद्धम् ॥१७॥

॥ इति द्वितीयं वर्णकम् ॥

[६ कार्याख्यानाधिकरणम् । सू० १८]

पूर्वं यथोपसंहारवाक्यानुरोधात्सन्दिग्धस्य सदुपक्रमस्यात्मपरत्वं निर्णीतं, तथैव 'आचामेदि' तिवाक्यशेषबलात् 'आचामन्ती'ति वर्तमानोपदेशस्य विधित्वसन्दिग्धस्य विधित्वनिर्णय इति दृष्टान्तसंगत्येदमाह—

(३७७) कार्याख्यानादपूर्वम् ॥१८॥

अत्र पूर्वपक्षे प्राणविद्याङ्गत्वेनापूर्वस्याचमनस्य विधेयत्वादन्यत्रापि प्राणोपासनायामुपसंहारः। सिद्धान्ते तदनुपसंहार इति फलभेदः। छान्दोग्ये वाजसनेयके चोभयत्र 'तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनग्नं कुरुते' इति प्राणस्याचमनमनग्नताचिन्तनं च प्रतीयते। तत्रोभयविधाने वाक्यभेदः स्यादित्येकस्मिन् विधेये किमाचमनमनग्नताचिन्तनं वा विधेयमिति सन्देहे; 'आचामेदिति विशिष्टविधिविभक्त्याचमनं विधेयमिति पूर्वपक्षः। सिद्धान्तस्तु—अनग्नताचिन्तनमेवापूर्वमत्र प्राणोपासनाङ्गत्वेन विधेयं, नाचमनम्। कुतः? कार्याख्यानात्। 'द्विजो नित्यमुपस्पृशेदि' त्यादिना स्मार्तविधिना सकलानुष्ठानेषु शुद्ध्यर्थं प्राप्तमेवाचमनम्। तस्यैवेहापि प्राणविद्यायामनग्नताचिन्तनविधानायानुवादादित्यर्थः। न चाचमने विस्पष्टाविधिविभक्तिरिति वाच्यम्; तस्य पूर्वप्राप्तस्य विधेयत्वायोगात्। तस्मात्प्राप्ताचमनानुवादेनेह प्रकृतप्राणवासोविज्ञानमेव विधीयते नाचमनमिति भावः ॥१८॥

[१० समानाधिकरणम् । सू० १९]

इत्थं स्मृतिप्रसिद्धमाचमनमनूद्यानग्नताचिन्तनं विधेयमुक्तम

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साम्प्रतमेकस्यां शाखायामध्येतृवेदितृभेदाभावादशक्यपरिहारे पौनरुक्त्ये न विप्रकृष्टदेशस्थवाक्ययोरेकस्यानुवादकत्वमितरस्य विधायकत्वं वक्तुं युक्तम्। अतोऽनवधारणादुभयोरपि स्वप्रदेस्थगुणविशिष्टविद्याविधायकत्वमिति प्रत्युदाहरणसंगत्येदमाह—

(३७८) समान एवं चाभेदात् ॥१६॥

अत्र पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः। सिद्धान्ते विद्यैक्याद्गुणोपसंहार इति फलभेदः। वाजसनेयशाखायामग्निरहस्ये 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमि'ति शाण्डिल्यविद्या विज्ञायते। तस्यामेव शाखायां बृहदारण्यके 'मनोमयोऽयं पुरुषो भाःसत्यः' (बृ० ५।६।१) इति पठ्यते। तत्र किमुभयत्रैका विद्यागुणोपसंहारश्च, उत विद्याभेदो गुणानुपसंहारश्चेति संशये; विप्रकृष्टदेशस्यत्वान्नैका विद्या, समानगुणाम्नानात् न गुणोपसंहार इति पूर्वपक्षः। सिद्धान्तस्तु—यथा भिन्नासु शाखासु विद्यैकत्वं गुणोपसंहारश्च भवत्येवं समाने च समानायामपि शाखायां विद्यैकत्वं गुणोपसंहारश्च भवितुमर्हति। कुतः ? अभेदात्। मनोमयत्वादिगुणविशिष्टस्योपास्यस्योभयत्राभिन्नत्वेन प्रत्यभिज्ञायमानत्वात्। किं च समानगुणपाठेन विप्रकृष्टदेशस्थां शाण्डिल्यविद्यां प्रत्यभिज्ञाप्य तस्यैवेशानत्वादिगुणो विधीयत इत्यभिधानं युक्तं स्यात न चैवं पौनरुक्त्यमिति वाच्यम्; एकस्यविद्याविधानार्थमपरस्य च गुणविधानार्थमिति विभागोपपत्तेः। तस्मादग्निरहस्ये विहितां विद्यामनूद्य बृहदारण्यके सर्वेशानत्वादिगुणविधानादुभयत्र शाण्डिल्यविद्यैकैवेति सिद्धम् ॥१६॥

(११ सम्बन्धाधिकरणम् । सू० २०–२१)

इत्थमेकत्र शाखायामग्निरहस्ये बृहदारण्यके च विद्यैकत्वे एकेन विहितां विद्यामपरेणानूद्यगुणविधानमुक्तं यथा, तथाऽत्रापि सत्यविद्यैकत्वेऽहरहं चेति नामद्वयमनुष्ठेयं स्यादिति दृष्टान्तसंगत्येदमाह—

(३७९) सम्बन्धादेवमन्यत्रापि ।२०॥

अत्र पूर्वपक्षे उभयत्र नामद्वयानुष्ठानम्। सिद्धान्ते यथाश्रुति विभागेनैकैकनामानुष्ठानमिति फलभेदः। बृहदारण्यके सत्यविद्यायाम् 'सत्यं ब्रह्म' (बृ० ५।५।१) त्युपक्रम्य 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्च दक्षिणेऽक्षन्पुरुषः' (बृ० ५।५।२) इति सत्यस्य ब्रह्मणोऽधिदैवतमध्यात्मं चायतनमुपदिश्याधिदैविकया-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हरिति नाम ध्यानायोपदिष्टम्' आध्यात्मिकस्याहमिति नामोपदिष्टम्। तत्र किमविभागेन नामद्वयमुभयत्रानुसन्धातव्यमुत व्यवस्थयैकैकमनुसन्धेयमिति संशये; यथा शाण्डिल्यविद्यायां विभागेनाप्यधीतायामेकविद्यात्वसम्बन्धान्मिथो गुणोपसंहारोऽभिहितस्तद्वदन्यत्रापि विद्यैक्यसम्बन्धान्नामद्वयमुभयत्रानुसन्धेयमिति पूर्वपक्षः ॥२०॥

सिद्धान्तस्तु—

(३८०) न वा विशेषात् ॥२१॥

नैवोभयोरुभयत्र प्राप्तिर्वक्तुं शक्या। कुतः ? विशेषात् 'तस्योपनिषदहरिति' (बृ० ५।५।३) 'तस्योपनिषदहमिति' (बृ० ५।५।४) चोपासनास्थानविशेषोपनिबन्धादित्यर्थः। ननु ग्रामगतेऽरण्यगते चाचार्ये यथाऽनुगमनादिराचारः समानो विहितस्तथेहापि नामद्वयस्योभयत्र प्राप्तिरिति चेन्न; आसीनस्य तिष्ठतश्चाचार्यस्य विलक्षणानुवर्तनवदत्रापि व्यवस्थयाऽनुसन्धानेऽविरोधादिति ॥२१॥

(३८१) दर्शयति च ॥२२॥

अपि च "तस्यैतस्य तदेव रूपं यदमुष्य रूपमि' (छा० १।७।५) त्यादिना विद्यान्तरेऽक्ष्यादिव्यस्थानभेदभिन्नान्धर्मानन्योऽन्यस्मिन्नुपसंहार्यानवलोकयन्नादित्यपुरुषगतान्रूपादीनतिदेशेनाक्षिपुरुषे दर्शयति। अन्यथाऽतिदेशस्य नैरर्थक्यं स्यात्। तस्मादुपनिषदावेते व्यवस्थिते इति सिद्धम् ॥२२॥

अतिदेश संगत्येदमाह—

[१२ सम्भृत्यधिकरणम्। सू० २३)

(३८२) सम्भृतिद्युव्याप्त्यपि चातः ॥२३॥

अत्र पूर्वपक्षे विद्याभेदस्य गुणव्यवस्थापकत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। राणायनीयानां खिलेषु 'ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान' इत्यादिना वीर्यसम्भृतिद्युव्याप्त्यादीनां पठितानां ब्रह्मविभूतीनां तदीयोपनिषद्विहितशाण्डिल्य विद्यादिषूपसंहारः कर्तव्यो न वेति सन्देहे; ब्रह्मसम्बन्धादुपसंहारो विधेय इति पूर्वपक्षः। सिद्धान्तस्तु—'वीर्या सम्भृतानि' इति या वीर्यसमृद्धिः, या च 'दिवमाततान' इति द्युलोकव्याप्तिः, तयोःसमाहारः सम्भृतिद्युव्याप्तिप्रभृतयो विभूतयः शाण्डिल्यविद्यादिषु नोपसंहर्तव्याः। कुतः ? अतश्चापि नाम्नोरिव 'एष मे आत्माऽन्तर्हृदये' (छा० ३।१४।३)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति शाण्डिल्यविद्यायां हृदयायतनत्वस्य 'य एषोऽक्षिणि पुरुषो दृश्यते' (छा० ४।१५।१) इत्युपकोशलविद्यायामक्ष्यायतनस्य च तत्र तत्र विशेषस्य व्यवस्थापकायतनविशेषादेवेत्यर्थः । अतो वीर्यसंभृत्यादीनां शाण्डिल्यविद्यादिष्वनुपसंहार इति सिद्धम् ॥२३॥

[१३ पुरुषविद्याधिकरणम् । सू० २४]

इत्थमसाधारणगुणाप्रत्यभिज्ञानेन सम्भृत्यादिगुणविशिष्टविद्यानां भेदेऽप्यत्रासाधारणमरणावभृथगुणविशिष्टपुरुषयज्ञयोरेकत्वप्रत्यभिज्ञानाद्विद्यैकत्वमिति प्रत्युदाहरण संगत्येदमाह—

(३८३) पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥२४॥

अत्र पूर्वपक्षे विद्याभेदादुपसंहारः, सिद्धान्तेऽनुपसंहार इतिफलभेदः । ताण्डिनां पैङ्गिनां च रहस्यब्राह्मणे 'पुरुषो वाव यज्ञः' इति पुरुषविद्यायामाशीर्मन्त्रप्रयोगादयो धर्माः श्रूयन्ते । ते च 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी' (नारा०८०) इति तैत्तिरीयोक्तपुरुषविद्यायामुपसंहर्तव्या न वेति सन्देहे; पुरुषयज्ञत्वाविशेषादुपसंहर्तव्या इति पूर्वपक्षः । सिद्धान्तस्तु—यथा ताण्डिनां पैङ्गिनां च पुरुषविद्यायां पुरुषो यज्ञत्वेन कल्पितः, तदीयमायुस्त्रेधा विभज्य स वनत्रयं कल्पितं, अशिशिषादीनि दीक्षादिभावेन कल्पितानि । नैवमितरेषां तैत्तिरीयाणां पुरुषविद्यायामाम्नानमस्ति । तेषां तद्विलक्षणत्वेन पत्नीयजमानवेदिवेदबर्हिर्यूपाज्याद्यनुक्रमणात् । ननु मरणावभृथत्वादिगुणस्य विद्यैकत्वप्रत्यभिज्ञापकत्वमिति चेन्न; भूयसावैलक्षण्येनाल्पीयसोगुणस्य प्रत्यभिज्ञापकत्वायोगात् । तस्माद्विद्याभेदात् शाखान्तराधीतानां पुरुषविद्याधर्माणामाशीर्मन्त्रादीनां तैत्तिरीयकेऽप्राप्तिरिति ॥२४॥

[१४ वेधाद्यधिकरणम । सू० २५]

इत्थमात्मविद्यासान्निध्यात्पुरुषयज्ञस्यात्मविद्याशेषत्वमिव मन्त्राणां कर्मणां चापि सान्निध्यात्तद्विद्याशेषत्वं स्यादिति दृष्टान्तसंगत्येदमाह—

(३८४) वेधाद्यर्थभेदात् ॥२५॥

अत्र पूर्वपक्षे मन्त्रादीनां विद्याशेषत्वेनोपसंहारः, सिद्धान्तेऽनुपसंहारः इतिफलभेदः । तत्राथर्वणिकानामुपनिषदारम्भे 'सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य शिरोऽभिप्रवृज्य त्रिधा विपृक्तः, इत्यादिमन्त्रसमाम्नायोऽस्ति । वाजसनेयिनां तूपनिषदारम्भे 'देवा ह वै सत्रं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निषेदुः' इत्यादिप्रवर्ग्यब्राह्मणं पठ्यत इति। तत्र किमिमेसर्वे प्रविध्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्यासूपसंहियेरन् न वेति संशये; विद्याप्रधानानामुपनिषद्ग्रन्थानां समीपे पाठादुपसंह्रियोरन्निति पूर्वपक्षः। सिद्धान्तस्तु नैषामुपसंहारो विद्यासु युक्तः। कुतः? वेधाद्यर्थभेदात्। हृदयं प्रावध्येत्यादिमन्त्रप्रकाशितार्थानां हृदयवेधादीनामाभिचारिककर्मसम्बद्धानां विद्यासु भेदात्सम्बन्धाभावादित्यर्थः। एवं च 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' (जै० ३।३।१३) इति प्रथमतन्त्रोक्तन्यायेनाभिचारिककर्मसमवेतार्थप्रकाशनसामर्थ्यरूपाल्लिङ्गात्सन्निधेर्दुर्बलत्वान्न मन्त्राणां विद्याङ्गत्वं सन्निधिप्रमाणेन साधयितुं युक्तम। तथा प्रवर्ग्यादीनां कर्मणामपि सन्निधेर्बलवत्ता श्रुत्यादिनाऽन्यत्रज्योतिष्टोमादौ विनियुक्तानां न सन्निधिना विद्याशेषत्वोपपत्तिरिति ॥२५॥

[१५ हान्यधिकरणम्। सू० २६]

इत्थं विद्यासन्निहितानामपि मन्त्रादीनामनावश्यकत्वादुपासनायामनुपसंहारोऽभिहितस्तद्वदनावश्यकत्वाद् हानसन्निहितानामप्युपादानानामुपादानं विनैव हानसम्भवेनानुपसंहार इति दृष्टान्त संगत्येदमाह—

(३८५) हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥२६॥

अत्र पूर्वपक्षे सर्वत्र पुण्यपापयोर्हानोपादानाश्रवणाद्विद्यास्तुतिप्रकर्षासिद्धिः। सिद्धान्तेऽश्रुतस्थलेऽप्युपादानोपसंहाराद्विद्यास्तुतिप्रकर्षसिद्धिरिति फलभेदः। अत्र 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तःपापकृत्यामि'ति शाट्यायनिनाम्, 'तत्सुकृतदुष्कृते विधूनते, तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतमि' (कौ० १।४) ति कौषीतकिनाम्, 'अश्व इव रोमाणि विधूयपापमि' (छा० ८।१३।१) ति ताण्डिनां 'तथा विद्वान्नामरूपाद्विमुक्तः' (मु० ३।२।८) इति चाथर्वणिकानां श्रुतिरस्ति। तत्र पुण्यपापयोर्हानोपादानोभयश्रवणस्थले न कोपि संशयः। उपादानश्रवणस्थलेऽप्यर्थाद्धानं संनिपतति, तत्राप्यसंशयः। यत्र तु ताण्डिनामाथर्वणिकानां वाक्येषु पुण्यपापयोर्हानमात्रं श्रूयते, नोपादानं, तत्र किमन्यत्र पठितमुपादानमुपसंहर्तव्यं न वेति संशये; शाखान्तरीयोपादानश्रवणस्य विद्यान्तरगो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चरत्वान्नोपसंहर्तव्यमिति पूर्वपक्षः। सिद्धान्तस्तु—तुशब्दः कैवल्यवाचकः। केवलायामपि हानौ श्रूतायामुपसंहर्तव्यम्। कुतः? उपायनशब्दशेषत्वात्। कौषीतकिरहस्ये विधूतयोः पुण्यपापयोरुपादानश्रवणेन हानशब्दस्योपादानशब्दशेषत्वावगमादित्यन्यत्राश्रुतमप्युपादानमुपसंहर्तव्यमिति भावः। ननु विद्यान्तरगोचरत्वादुपादानस्य नान्यत्रोपसंहारः कर्तव्य इति चेन्न; हानोपादानयोरत्राननुष्ठेयत्वेन विद्यास्तुतये संकीर्तनात्। ईदृशी महाभागा विद्या, यत्सामर्थ्यादस्य विदुषः पुण्यपापयोः संसारहेत्वोर्विधुतयोरस्य सुहृद्विषत्सु निवेशोभवतीति। तस्माद्गुणोपसंहारविचारप्रसङ्गे स्तुतिप्रकर्षलाभाय स्तुत्युपसंहारप्रदर्शनम्। तत्र दृष्टान्तमाह—कुशाच्छन्दस्तुत्युपगानवत्। तद्यथा 'कुशा वानस्पत्याः?' इति भाल्लविनां निगमे कुशानामुद्गातॄणां स्तोत्रगणनार्थं दारुमयीशलाकानामविशेषेण वनस्पतियोनित्वश्रवणे शाट्यायनिनामौदुम्बराः कुशा इति विशेषवचनादौदुम्बर्यः कुशा आश्रीयन्ते। यथाच्छन्दोभिः स्तुवत इति देवासुरच्छन्दसामविशेषेण पौर्वापर्यप्रसङ्गे 'देवच्छन्दांसि पूर्वाणि' इति पैङ्गिनामाम्नानात्प्रतीयन्ते। यथा षोडशिपात्रविशेषग्रहणाङ्गभूते स्तोत्रे छन्दोगानां कालविशेषाप्राप्तौ 'समयाध्युषिते सूर्ये' इत्यादि तैत्तिरीयकश्रुतेः कालविशेषः प्रतीयते। यथा 'ऋत्विज उपगायन्ति' इति शाखान्तरीयसामान्यवाक्योपगानं 'नाध्वर्युरुपगायति' इति भाल्लविनां विशेषवचनादध्वर्युं विहायान्यदृत्विक्सम्बन्धितया प्रतीयते। एवं कुशादिषु श्रुत्यन्तरगतविशेषान्वयवत् हानावुपादानान्वयः। अन्यथा श्रुत्यन्तरगतस्य श्रुत्यन्तरेऽस्वीकारे सर्वत्रैव विकल्पःस्यात्। सत्यां गतौ सोऽनुचितः। तदुक्तं प्रथमतन्त्रे जैमिनिना 'अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यादिति (जै० १०।८।१५) इति प्रथमं वर्णकम्॥

पूर्वं मन्त्रादीनां विद्यासन्निधेरकिञ्चित्करत्वं यथोक्तम्, तथा विधूननशब्दस्योपायनशब्दसन्निधेरप्रयोजकत्वमिति दृष्टान्तसंगत्येदं योजनान्तरमाह—

हानौ तूपायनशब्दशेषत्वात्''' '''। अत्र पूर्वपक्षे विदुषां सुकृतादिहान्यसिद्धिः। सिद्धान्ते तत्सिद्धिरिति फलभेदः। उदाहृतास्वेव श्रुतिषु विधूननशब्देन पुण्यपापयोर्हानमभिप्रेतमुत चालनमिति संशये; 'धूञ् कम्पने' इति स्मरणात्कञ्चित्कालं तत्फलप्रतिबन्धाचालनमेव विधूननं, न हानमिति पूर्वपक्षः। सिद्धान्ते हानावेवैष विधूननशब्दः प्रयोक्तुं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युक्तः। कुतः ? उपायनशब्दशेषत्वात्। उपायन सन्निधौ श्रुतस्य विधूननशब्दस्योपायनं प्रतिशेषत्वात्। ननु 'दोधूयन्ते ध्वजाग्राणी'ति वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनादुक्तस्मरणाच्च विरोध इति चेन्न; अद्रव्यत्वात्स्मरणोक्तार्थस्य प्रायिकत्वाच्च। एवं चोपायनस्य हानं विनाऽसम्भवात् 'धूञ् कम्पने' इति धातुनापि हानमेव लक्ष्यम्, धातूनामनेकार्थत्वादित्यर्थः। तथा केवलविधूननशब्दस्य हानार्थलक्षकत्वे दृष्टान्तमाह—कुशाच्छन्दस्तुत्युपगानवत्। यथा कुशादिस्थले शाखान्तरीयविशेषवचनं निर्णायकमेवमिहापि क्वचिद्विधूननसन्निधावुपायनं श्रूयमाणं सर्वत्र विधूननशब्दस्य हानार्थोपलक्षकत्वे निर्णायकमिति तदुक्तमिति व्याख्यातमिति द्वितीयं वर्णकम् ॥२६॥

[१६ साम्परायाधिकरणम्। सू० २७–२८]

ननु भवेत्केवलहानश्रवणेऽप्युपायनोपसंहारो, यदि विद्यायाः कर्महानिहेतुत्वं स्यात् ? साम्प्रतं तस्याः कर्महानिहेतुत्वमेवासिद्धमित्याक्षेप संगत्येदमाह—

(३८६) साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥२७॥

अत्र पूर्वपक्षे विद्यासामर्थ्यस्यानादरः सिद्धान्ते तदादरः इति फलभेदः। तत्र पर्यङ्कविद्यायां 'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छती' (कौ० १।३) त्युपक्रमा 'विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृतविधूनते' (कौ० १।४) इति पर्यङ्कब्रह्मोपासकस्य सुकृतादिविधूननं श्रूयते। तत्किं विरजानदीतरणानन्तरमर्धमार्गे भवति, देहत्यागात्प्राक्काले वेति सन्देहे; श्रुतिप्रामाण्यान्नदीतरणानन्तरमेवेति पूर्वपक्षः। सिद्धान्तस्तु—साम्पराये देहादपसर्पणकाले एव विद्यासामर्थ्यात्सुकृत दुष्कृतयोर्हानमभ्युपेयम्। कुतः ? तर्तव्याभावात्। विद्यया ब्रह्म संप्रेप्सतः सम्परेतस्य विदुषोऽन्तराले पुण्यपापाभ्यां प्राप्तव्यस्याभावादित्यर्थः। तस्माज्जीवद्दशायामेव विद्यासामर्थ्यात्तयोः क्षयः श्रुतौ पश्चात्पठ्यते। तथा ह्यन्ये शाखिनस्ताण्डिनः शाट्यायिनश्च 'अश्व इव रोमाणि विधूयपापमि' (छा० ८।१३।१) ति, 'तस्य पुत्रा दायमुपयन्ती' इत्यादौ जीवद्दशायामेव कर्महानमामनन्ति ॥२७॥

(३८७) छन्दत उभयाविरोधात् ॥२८॥

किं च छन्दतः स्वेच्छातो जीवद्दशायामेव यमनियमविद्यानुष्ठानसम्भवे तद्धेतुकः कर्मक्षयोऽपि तदैव युक्तः स्यात्। सति कारणे कार्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विलम्बायोगात्। अन्यथा पतिते देहे कर्मक्षयहेतोः पुरुषप्रयत्नस्य-स्वेच्छातोऽनुष्ठानानुपपत्तेः तद्धेतुकस्य कर्मक्षयस्यानुपपत्तिः। एवं सति विद्याकर्महानयोर्निमित्तनैमित्तिकभावे ताण्ड्यादिश्रुत्योरविरोधात्संगति भवतीति ॥२८॥

[१७ गतेरर्थवत्त्वाधिकरणम्। सू० २९-३०]

इत्थं विद्यया कर्महानं प्रासङ्गिकं विषयमुक्त्वा यथा हानसन्निधौ क्वचिच्छ्रूयमाणमुपायनं सर्वत्रोपसंह्रियते, तथा हानसन्निधौ क्वचिच्छ्रूयमाणो देवयानः सर्वत्रोपसंहर्तव्य इति दृष्टान्तसंगत्येदमाह—

(३८८) गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥२९॥

अत्र पूर्वपक्षे निर्गुणविदपि मुक्तये मार्गमपेक्षते, सिद्धान्ते नापेक्षते इति फलभेदः। तत्र कर्महानसन्निधौ क्वचिच्छ्रूयमाणो देवयानः पन्थाः तदश्रुतस्थले निर्गुणविद्यायामुपसंहर्तव्यो न वेति सन्देहे; उपायनोपसंहारवद्देवयानोपसंहारः इति पूर्वपक्षः। सिद्धान्तस्तु—गतेर्देवयानस्य यथोऽर्थवत्त्वमुभयथा सगुणविद्यायामर्थवती गतिर्न निर्गुणविद्याया-मिति विभागेन भवितुं युक्तम्। अन्यथाऽविशेषेण सर्वत्र देवयान-मार्गोपसंहाराभ्युपगमे हि 'विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' (मु० ३।१।३) इति श्रुतिविरोधः। तस्मान्न निर्गुणविद्यायां मार्गोपसंहार इति ॥२९॥

(३८९) उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥

किं च गतिः क्वचिदर्थवती क्वचिन्नेत्युभयथाभावोपमुपपन्नः। तल्लक्षणार्थोपलब्धेः। तस्या गतेर्लक्षणाभूताया हेतुरूपाया अर्थः पर्यङ्कारोहणादिकं फलं यत्रोपलभ्यते, तत्रैवसगुणविद्यायां गतेरर्थव-त्त्वोपलब्धेरितिभावः। लोकवत्। यथा लोके ग्रामप्राप्तये मार्गोऽपेक्ष्यते, नारोग्यप्राप्तये तद्वदित्यर्थः ॥३०॥

(१८ अनियमाधिकरणम्। सू० ३१)

इत्थं सगुणविद्यायां गतेरर्थवत्व न निर्गुणविद्यायामिति यथोक्तम्, तथा सगुणविद्यास्वपि मार्गश्रवणस्य भावाभावात्स्याद्व्यवस्थेति दृष्टान्तसंगत्येदमाह—

(३९०) अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥३१॥

अत्र पूर्वपक्षे नियतमार्गस्यानुपसंहारः, सिद्धान्ते तूपसंहार इति फलभेदः। तत्र सगुणासु पर्यङ्कोपसलपञ्चाग्निदहरविद्यासु मार्गः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रूयते, न मधुशाण्डिल्य वैश्वानरषोडशकलाविद्यासु। तत्र यथाश्रुतं मार्गस्य नियमोऽस्ति न वेति सन्देहे; प्रकरणस्य नियामकत्वाद्यथाश्रुतं मार्गसम्बन्धीऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु—सर्वासु सगुणविद्यासु मार्गस्यानियमो युक्तः। नन्वेवं प्रकरणविरोधः, नैषोऽस्तिविरोधः; शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः। तथाहि 'तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धा तप इत्युपासते, तेऽर्चिषमभिसम्भवन्ति' (छा० ५।१०।१) इति श्रुतिः "शुक्लकृष्णे गती ह्येते जगतःशाश्वते मते।" (गी० ८।२६) इति स्मृतिः। अतः पञ्चाग्निविदामिव श्रद्धातपोभ्यां विद्यान्तरोपलक्षणतया विद्यान्तरशीलिनामप्यविशेषेणार्चिरादिमार्गप्रतिपादकवाक्येन प्रकरणबाधेऽविरोध इति भावः ॥३१॥

[१९ यावदधिकाराधिकरणम् । सू० ३२]

ननु मुक्तिफलत्वान्निर्गुणविद्यायां मार्गस्य वैयर्थ्यमुक्तं तन्नयुक्तं; निर्गुणब्रह्मविदामपि केषाञ्चिदितिहासादौ देहान्तरोत्पत्तिदर्शनेन तस्या मुक्तिसाधनत्वासम्भवादित्याक्षेपसंगत्येदमाह—

(३८१) यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३२॥

अत्र पूर्वपक्षे निर्गुणब्रह्मविद्याया मुक्तिसाधनत्वाभावान्मार्गोपसंहारः, सिद्धान्ते तत्र मुक्तिहेतुत्वनिश्चितत्वे तदनुपसंहार इति फलभेदः। "अवान्तरतमा नाम वेदाचार्यः कलिद्वापरयोः सन्धौ विष्णुनियोगात्कृष्णद्वैपायनः संबभूवे'त्यादिनावान्तरतमवसिष्ठभृगुसनत्कुमारनारदादीनां निर्गुणब्रह्मविदां देहान्तरोत्पत्तिः स्मर्यते। तत्र किं विदुषां देहान्तरोत्पत्तिदर्शनात्पुनर्जन्मास्ति न वेति संशये; अस्तीति प्राप्ते सिद्धान्तमाह—अवान्तरतमः प्रभृतीनां वेदप्रवर्तनादिलोकव्यवस्थाहेतुष्वधिकारेषु नियुक्तानामाधिकारिकाणां सम्यग्दर्शनवतां यावदधिकारमवस्थितिः प्रारब्धकर्मफलभोगं यावदवस्थानं भवतीत्यर्थः। अतः प्रवृत्तफलस्य कर्मणो मुक्तेषोरिव वेगक्षयान्निवृत्तौ वर्तमानदेहपातानन्तरं तेषां कैवल्यावाप्तौ न देहान्तरप्राप्तिरिति ॥३२॥

[२० अक्षरध्यधिकरणम् । सू० ३३]

इत्थं यथाऽधिकारिकपुरुषाणां मुक्तेषुवत्प्रारब्धकर्मवेगेनैव देहान्तरारम्भसिद्धेः न संचितकर्मणां तद्धेतुत्वमुक्तं, तथेहापि यथाश्रुतिनिषेधैरेवोपलक्षणतया सर्वद्वैतनिषेधसिद्धेर्न शाखान्तरीयनिषेधानां ब्रह्मबोधहेतुत्वमिति दृष्टान्तसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३८२) अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥३३॥

अत्र पूर्वपक्षे श्रुतनिषेधैरुपलक्षणतया सर्वनिषेधसिद्धौ न निर्विशेषब्रह्मप्रमितौ निषेधान्तरोपसंहारः, सिद्धान्ते निर्विशेषप्रमितौ साकाङ्क्षत्वादशेषनिषेधानामुपसंहार इति फलभेदः। वाजसनेयके 'एतद्वै तदक्षरं गार्गि ? ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहम्' (बृ० ३।८।८) त्यादि श्रूयते। आथर्वणे च 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रम्' (मु० १।१।५) इत्यादि श्रूयते। तत्र सर्वनिषेधानां सर्वत्राविशेषेण प्राप्तिरुत व्यवस्थयेति संशये; यथाश्रुतिविभागाद्व्यवस्थाप्राप्तौ सिद्धान्तमाह—अक्षरस्य ब्रह्मणो विशेषप्रतिषेधबुद्धीनां सर्वत्र निषेधस्थलेऽवरोध उपसंहारः कर्तव्यः। कुतः ? सामान्यतद्भावाभ्याम्। द्वैतनिषेधरूपस्य ब्रह्मबोधप्रकारस्य सर्वत्र समानत्वात्प्रतिपाद्यस्य ब्रह्मणो भावादेकत्वेन प्रत्यभिज्ञायमानत्वाच्च। तत्र दृष्टान्तः—औपसदवत्। यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणाम् "अग्नेर्वेर्होत्रम् वेरध्वरमि"त्यौपसदानामुद्गातृवेदोत्पन्नानामप्यध्वर्युभिरभिसम्बन्धो भवति। एवमक्षरप्रमितिशेषाणां निषेधानामेकत्रश्रुतानामप्यक्षरतन्त्रत्वादक्षरेण सर्वत्र सम्बन्धो युक्तः। तदुक्तं प्रथमे तन्त्रे 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेद संयोगः' (जै० ३।३।८) इति ॥३३॥

[२१ इयदधिकरणम्। सू० ३४]

इत्थं पूर्वत्र प्रतिपाद्यब्रह्मप्रत्यभिज्ञानाद्विद्यैक्ये निषेधधियामुपसंहारोऽभिहितः। इह प्रतिपाद्यभेदाद्विद्याभेद इति प्रत्युदाहरणसंगत्येदमाह—

(३८३) इयदामननात् ॥३४॥

अत्र पूर्वपक्षे विद्याभेदादन्योऽन्यगुणानामनुपसंहारः। सिद्धान्ते तदभेदादुपसंहारः इति फलभेदः। आथर्वणे "द्वा सुपर्णा सयुजा' (मु० ३।१।१) इत्यादिमन्त्रः श्रूयते, काठकेऽपि 'ऋतं पिबन्तौ सुकृतस्य लोके' (क० ३।१) इत्यादि। तत्र किमनयोर्विद्यैकत्वं नानात्वं वेति संशये; एकत्रैकस्य भोक्तृत्वमन्यत्रोभयोर्भोक्तृत्वमिति विशेषदर्शनाद्विद्याभेदः इति पूर्वपक्षः। सिद्धान्तस्तु मन्त्रद्वये विद्यैकत्वमेव। कुतः ?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इयतः इयत्तावच्छिन्नस्य द्वित्वोपेतस्य वेद्यरूपस्योभयत्राभिन्नत्वेनामननादभिधानादित्यर्थः। ननु वेद्यस्य रूपभेदो दर्शितः इति चेन्न; उभयत्र भोक्तृत्वानुवादेन जीवद्वितीयस्य परमात्मनोऽभिन्नत्वेन प्रतिपाद्यत्वात्। पिबन्ताविति जीवेपिबति परमात्मनि छत्रिन्यायेन भोक्तृसाहचर्यादुपपत्तेरिति भावः ॥३४॥

[२२ अन्तराधिकरणम् । सू० ३५-३६]

इत्थं पिबन्तावित्यस्य लाक्षणिकत्वमुपादाय मन्त्रद्वयेऽपि भोक्त्रभोक्तृपरत्वेनार्थैकत्वाद्विद्यैकत्वमुक्तमिह त्वर्थैक्येऽपि न विद्यैकत्व मभ्यासादिति प्रत्युदाहरणसंगत्येदमाह—

(३६४) अन्तरा भूतग्रामवत्स्वात्मनः ॥३५॥

अत्र पूर्वपक्षेऽन्योऽन्यधर्माणामनुपसंहारः, सिद्धान्ते तूपसंहार इति फलभेदः। वाजसनेयके "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ० ३।४।१–३।५।१) इत्युषस्तकहोलप्रश्नयोर्द्विराम्नानम्। किमत्र विद्याभेदो विद्यैक्यं वेति संशये; 'समिधो यजतीति अभ्यासाद्विद्याभेद इति पूर्वपक्षे सिद्धान्तमाह—आमननादित्यनुवर्तते। ब्राह्मणद्वयेऽपि स्वात्मनः सर्वान्तरत्वाम्नानाविशेषाद्विद्यैकत्वमिति। नह्येकत्र देहे द्वयोर्मुख्यं सर्वान्तरत्वं युक्तम्। भूतग्रामवत्। यथा पञ्चभूतात्मके देहे पृथिव्यपेक्षया जलमान्तरं तदपेक्षया तेज इत्यादि क्रमेणपञ्चभूतानामापेक्षिकमान्तरत्वं न मुख्यमेवमत्रापीति बोध्यम्। यद्वा 'एको देवः सर्वभूतेषु गूढः' (श्वे० ६।११) इतिमन्त्रे समस्तेषु भूतग्रामेष्वके एवात्मा सर्वान्तरः समाम्नायते। तद्वदनयोर्ब्राह्मणयोरित्यर्थः। तस्माद्वेद्यैक्याद्विद्यैकत्वमिति ॥३५॥

(३६५) अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥३६॥

नन्वन्यथा विद्याभेदेऽनभ्युपगम्यमाने आम्नानभेदानुपपत्तिरिति चेन्नः उपदेशान्तरवदभ्यासोपपत्तेः। यथा हि छान्दोग्ये 'तत्त्वमसीति नवकृत्वोऽप्युपदेशो न विद्याभेदः; उपक्रमोपसंहाराभ्यामेकार्थत्वावगमात्। तथेहापि ब्राह्मणद्वये प्रश्नरूपोपक्रमस्य 'अतोऽन्यदार्त्तमि' (बृ० ३।४।२–३।५।१) त्युपसंहारस्यैकार्थविषयत्वान्न विद्याभेदः। तस्मादेकैव विद्येति ॥३६॥

[२३ व्यतिहाराधिकरणम् । सू० ३७]

पूर्वं विद्यैक्येऽप्यभ्यास आदरार्थो यथोक्तस्तथा जीवेशयोर्मिथो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशेषणविशेष्यभावरूपव्यतिहारोपदेशस्यादरार्थत्वाद्विद्यैकत्वं स्यादिति दृष्टान्तं संगत्येदमाह—

(३६६) व्यतिहारो विंशिपन्ति हीतरवत् ॥३७॥

अत्र पूर्वपक्षे मतेरेकत्वे लाघवं, सिद्धान्ते तद्वैरूप्ये व्यतिहारसार्थक्यमिति फलभेदः। ऐतरेयके 'तद्योऽहं सोऽसौ योऽसौ सोऽहमि' त्यादित्यपुरुषं प्रकृत्याम्नानमस्ति। तत्र किमिह व्यतिहारेणोभयरूपा मतिः कर्तव्योतैकरूपैवेति संशये; एकरूपैवेति प्राप्ते सिद्धान्तमाह—व्यतिहारोऽयमाध्यानायोपदिश्यते, इतरवत्। यथेतरे सर्वात्मत्वादयो गुणा आध्यानायोपदिष्टास्तद्वदित्यर्थः। तथाहि 'त्वमहमस्म्यहं च त्वमसी' त्युभयोच्चारणेन विशिंषन्ति समाम्नातारः। तच्चोभयरूपायां मतौ कर्तव्यामर्थवद्भवति। अन्यथा हीदं विशेषेणोभयाम्नानमर्थकं स्यादेकेनैव कृतार्थत्वात्। ननु व्यतिहारोपदेशस्यैकत्वदृढीकरणाय सार्थक्यमिति चेन्न; व्यतिहारेणोभयरूपामतौ कर्तव्यायामपि फलतः एकत्वमतेर्दृढीकारस्यानिवार्यत्वात्। अतो मतिर्द्विरूपैवेति सिद्धम् ।३७।

[२४ सत्याद्यधिकरणम् । सू० ३८]

पूर्वं जीवब्रह्मणोर्व्यतिहारोपदेशभेदाद्द्विरूपामतिः कर्तव्योक्ता, एवमिहापि 'जयतीमान् लोकान्, हन्ति पाप्मानमि'ति लोकजयपापहननरूपफलोक्तिभेदाद्विद्याभेद इति दृष्टान्तसंगत्येदमाह—

(३६७) सैव हि सत्यादयः ॥३८॥

अत्र पूर्वपक्षे विद्याभेदाद्गुणानामनुपसंहारः सिद्धान्ते विद्यैक्यादुपसंहारः। वाजसनेयके 'स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मे' (बृ० ५।४।१) ति सत्यविद्याविधानानन्तरं 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः' (बृ० ५।५।२) इत्यादि श्रूयते। तत्र कि द्वे एते सत्यविद्ये किं वैकैवेति सन्देहे; द्वे इति पूर्वपक्षः। सिद्धान्तस्तु एकैवेयं सत्यविद्येति। कुतः ? हि यतः 'तद्यत्तत्सत्यमि' (बृ० ५।५।२) ति प्रकृतस्यैवोपास्यस्य हिरण्यगर्भस्याकर्षणादुपास्याभेदे विद्याभेदो न युक्तः। ननु फलान्तरश्रवणाद्विद्यान्तरमिति चेन्न; सत्यविद्याप्रकरणेऽङ्गफलस्य सर्वस्यापि सत्यविद्याफलत्वात्। तस्माद्विद्यैक्यात्सर्वे सत्यादयोगुणा एकत्रैव प्रयोगे उपसंहर्तव्या इति सिद्धम् ॥३८॥

[२५ कामाद्यधिकाराधिकरणम् । सू० ३९]

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वत्र 'तद्यत्तत्सत्यमि'ति प्रकृताकर्षणेन रूपाभेदाद्गुणोपसंहारः प्रोक्तः। अत्र तु क्वचिदाकाशस्योपास्यत्वं क्वचित्तदाश्रितस्य ज्ञेयत्वमिति रूपभेदाद्गुणानुपसंहार इति प्रत्युदाहरणसंगत्येदमाह—

(३९८) कामादीतरत्र तत्र चायतनादिभ्यः ॥३९॥

अत्र पूर्वपक्षे क्वचिदाकाशस्य ध्येयत्वं क्वचिदाश्रयस्य ज्ञेयत्वमिति विशेषसिद्धिः। सिद्धान्ते ब्रह्मण एवाकाशशब्दवाच्यत्वादुक्तविशेषासिद्धिरिति फलभेदः। छान्दोग्ये दहराकाशं प्रस्तुत्य 'एष आत्माऽपहतपाप्मा' (छा० ८।१।५) इत्यपहतपाप्मत्वादयो गुणाः पठ्यन्ते। वाजसनेयकेतु 'योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी' (बृ० ४।४।२२) इत्युक्तस्याकाशाश्रयस्य सर्ववशित्वादयो गुणाः पठ्यन्ते। ते विद्यैक्ये उपसंहर्तव्या न वेति संशये; नोपसंहर्तव्या इति प्राप्ते सिद्धान्तमाह—छान्दोग्याम्नातं सत्यकामत्वादिगुणजातमितरत्र वाजसनेयके, वाजसनेयकोक्तं च सर्ववशित्वादिकं तत्र छान्दोग्ये उपसंहर्तव्यम्। कुतः? आयतनादिभ्यः। उभयत्र हृदयमायतनं, वेद्यं ब्रह्म, तस्य सेतुत्वं लोकासम्भेदप्रयोजनमित्यादि बहु सामान्यं दृश्यते। नन्वेवं वेद्याऽभेदेऽपि छान्दोग्ये सगुणत्वं वाजसनेयके च निर्गुणत्वमिति भेदाद्विद्याभेद इति चेन्न; उपासनार्थं गुणोपसंहारानभ्युपगमेन विद्यास्तुत्यर्थं तदभ्युपगमेऽदोषादिति भावः॥३९॥

[२६ आदराधिकरणम् । सू० ४०–४१]

पूर्वत्र विद्याभेदेऽपि स्तुत्यर्थं गुणोपसंहारो यथाभिहितस्तद्वद्भोजनलोपेऽपि पूर्वभोजनस्तुतये प्राणाग्निहोत्रालोप इति दृष्टान्तसंगत्येदमाह—

(३९९) आदरादलोपः ॥४०॥

अत्र पूर्वपक्षे भोजनलोपेऽपि प्राणाग्निहोत्रालोपः। सिद्धान्ते तल्लोपे तल्लोप इति फलभेदः। छान्दोग्ये 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहा' (छा० ५।१९।१) इति वैश्वानरविद्यायां प्राणाग्निहोत्रं श्रूयते। तत्र किं भोजनलोपे लोपः प्राणाग्निहोत्रस्यालोपो वेति संशये; भोजनलोपे प्राणाग्निहोत्रस्यालोपः। कुतः? 'पूर्वोऽतिथिभ्योऽश्नीयात्। यथा ह वै स्वयमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तत्' इत्यतिथिभोजनस्य प्राथम्यं निन्दित्वा स्वामि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भोजने प्राथम्यं प्रतिपादिका जाबालश्रुतिः प्राणाग्निहोत्रे आदरं कुरुते। नहि प्राथम्य धर्मलोपमसहमाना श्रुतिर्धर्मिणः प्राणाग्निहोत्रस्य लोपं सहेतेति! ननु भोजनार्थभक्तागमनसंयोगाद्भोजनलोपे लोपः स्यादिति चेन्न; भोजनलोपेऽप्यद्भिर्वाऽन्येन वा द्रव्येणाविरुद्धेन प्रतिनिधिन्यायेन तद्वाक्यस्य द्रव्यविशेषविधानार्थत्वाद्। तस्मादलोप इति पूर्वपक्षः॥४०

सिद्धान्तस्तु—

(४००) उपस्थितेऽतस्तद्वचनात् ॥४१॥

उपस्थिते भोजनेऽतस्तस्मादेव प्रथमोपस्थिताद्भोजनद्रव्यात्प्राणाग्निहोत्रं निष्पाद्यम्। कुतः? तद्वचनात्। "तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमि" ति श्रुतिप्रतीतसिद्धभक्तागमने प्राणाग्निहोत्रपरामर्शात्। कथं भोजनलोपे तत्र द्रव्यान्तरं प्रतिनिधेयम्? नन्वादरवचनं तन्नित्यताप्रापकमिति चेन्न, भोजनपक्षे तस्य प्राथम्यविधानार्थत्वात्! अतो भोजनलोपे प्राणाग्निहोत्रस्य लोप एवेति॥४१॥

[२७ तन्निर्धारणाधिकरणम्। सू० ४२]

पूर्वत्रानित्यभोजनाश्रितप्राणाग्निहोत्रस्यानित्यत्वं यथोक्तं, तथेह नित्यकर्माङ्गाश्रितोपास्तीनां नित्यत्वमिति दृष्टान्तसंगत्येदमाह—

(४०१) तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥४२॥

अत्र पूर्वपक्षे कर्माङ्गोपासनानां कर्मसु पर्णमयीत्वादिवन्नित्यं, सिद्धान्ते गोदोहनादिवदनित्यमिति फलभेदः। 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।१।१) इत्यादौ कर्माङ्गोद्गीथाश्रितानि पर्णतावन्नित्यानुष्ठेयान्युत गोदोहनवदनित्यानीति सन्देहे; अनारभ्याधीतत्वेन नित्यानीति पूर्वपक्षः। सिद्धान्तस्तु—तेषामुद्गीथोपासनानां कर्माङ्गाश्रितानामनियमः पर्णतावदनुष्ठानाभावः। कुतः? तद्दृष्टेः। तेषामनियमस्य 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' (छा० १।१।१०) इत्यत्र दर्शनात् "तां चेदविद्वान्प्रस्तोष्यति' (छा० १।१०।६) इत्यादौ प्रस्तावादिदेवताविज्ञानविहीनानामपि प्रस्तोत्रादीनां याजनाध्यवसान दर्शनाच्च। किं चैतादृशानां कर्माङ्गोपसानानां हि पृथक्फलं कर्मफलसिद्ध्यप्रतिबन्धस्तत्समृद्धिरतिशयविशेषः 'यदेव विद्यया करोतिश्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती' (छा० १।१।१०) इत्यादावुपलभ्यते। तस्माद्वीर्यवत्तरत्वादिपृथक्फलश्रवणान्नोपासनानां नित्यवत्कर्माङ्गत्वमिति॥४२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[२८ प्रदानाधिकरणम् । सू० ४३]

पूर्वत्र फलभेदात्कर्म्यङ्गानां कर्माश्रितोपासनानां नित्यानित्यत्वात्मकः प्रयोगभेदोऽभिहितः। इह तु वायुप्राणयोस्तत्त्वाभेदात्तत्प्राप्तिलक्षणफलैक्याच्च ध्यानप्रयोगैक्यमिति प्रत्युदाहरणसंगत्येदमाह—

(४०२) प्रदानवदेव तदुक्तम् ॥४३॥

अत्र पूर्वपक्षे विद्यैक्यात् प्रयागैक्यसिद्धिः सिद्धान्ते विद्यैक्येऽपि गुणभेदाद्भेदसिद्धिरिति फलभेदः। वाजसनेयके 'वदिष्याम्येवाहमिति वाग्दध्रे' (बृ० १।५।२१) इत्यत्र वागादिभ्यः प्राणः श्रेष्ठोऽन्यादिभ्यो वायुः श्रेष्ठोऽवधारितः तथा 'वायुर्वाव सवर्गः' (छा० ४।३।१) 'प्राणो वाव संवर्गः' (छा० ४।३।२) इति छान्दोग्येऽपि। तत्र किमस्यां विद्यायां प्रयोगस्याभेदो भेदो वेति सन्देहे; तत्त्वाभेदादभेद इति पूर्वपक्षः। सिद्धान्तस्तु पृथगेव वायुप्राणावनुचिन्तनीयौ। कुतः ? अध्यात्माधिदैवयोराध्यानार्थं। विभागेन पृथगुपदेशात्। प्रदानवदेव। यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे' इतीन्द्रदेवतैक्येऽपि राजादिगुणभेदेन तद्विशिष्टदेवताभेदात्पुरोडाशानां प्रदानस्य प्रक्षेपस्य भेदः, यथा वाग्निहोत्रैक्येऽपि सायंप्रातःकालभेदाद्भेदस्तद्वद्विद्यैक्येऽप्यध्यात्माधिदैवरूपगुणभेदात्प्रयोगभेदः। तदुक्तं देवताकाण्डे 'नाना वा देवता पृथग्ज्ञानात्' इति। अतस्तत्त्वाभेदेऽप्युपास्यांशभेदादुपासनाभेद इत्यर्थः ॥४३॥

[२९ लिङ्गभूयस्त्वाधिकरणम। सू० ४४–५२]

पूर्वत्रैकप्रयोगासम्भवाद्वायुप्राणौ प्रयोगभेदेन ध्येयौ गदितौ, तर्हि मनश्चिदादीनां कर्माङ्गत्वेनैकप्रयोगत्वं स्यादिति प्रत्युदाहरणसंगत्येदमाह—

(४०३) लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥४४॥

अत्र पूर्वपक्षे क्रियार्थानामग्नीनां क्रियाङ्गत्वम्, सिद्धान्ते पुमर्थानां तेषां विद्यामयत्वमेवेति फलभेदः। वाजसनेयकेऽग्निरहस्ये मनोऽधिकृत्य 'तत्षट्त्रिंशत्सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितः' इत्यादि। तथैव वाक्चितः प्राणश्चितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचितः' इत्यादि मनश्चिदादयोऽग्नयः श्रूयन्ते। तत्र किमेते मनश्चिदादयः कर्माङ्गभूताः केवलविद्यात्मिकाः स्वतन्त्रा वेति सन्देहे; प्रकरणात्क्रियानुप्रवेशिनस्तदङ्गभूता इति पूर्वपक्षः। सिद्धान्तस्तु—एते स्वतन्त्रा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एव। कुतः? लिङ्गभूयस्त्वात्। 'तद्यत्किं चेमानि भूतानि मनसा संकल्पयन्ति तेषामेव सा कृतिः' 'एवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते' इत्येवं जातीयकानां स्वातन्त्र्यज्ञापकलिङ्गानां भूयसां सत्त्वात्। तद्धि लिङ्गं प्रकरणाद्बलीयः, तदपि बलीयस्त्वमुक्तं पूर्वतन्त्रे 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि' (जै० ३।३।१३) ति ॥४४॥

इत्थं सिद्धान्तमुपक्रम्य पूर्वपक्षमाह—

(४०४) पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॥४५॥

मनश्चिदादीनामग्नीनां स्वातन्त्र्यं न युक्तं, किन्तु प्रकरणात्पूर्वस्य क्रियामयस्याग्नेर्विकल्पः संकल्पात्मकोऽग्निः क्रियामय एव स्यात्। न च लिङ्गास्यप्रकरणाद्बलीयस्त्वात्तेषां स्वातन्त्र्यमिति वाच्यम्; तस्य लिङ्गस्य साम्पादिकाग्निप्रशंसारूपत्वादसत्यां गतौ गुणवादोपपत्त्या प्रकरणस्य बाधितुमशक्यत्वात्। तस्मात्क्रियानुप्रवेशिन एवैतेऽग्नयः। मानसवत्। यथा प्रथमतन्त्रे (जै० १०।६।१३) अधिकरणे द्वादशाहे मानसग्रहं श्रूयते 'अनया त्वा पृथिव्या पात्रेण समुद्रसया प्रजापतये त्वा जुष्टं गृह्णामीति मानसं प्रजापत्यं गृह्णाति' इति पृथिवी पात्रं, समुद्रः सोमः, प्रजापतिर्देवता, एवं विशिष्टस्य ग्रहस्य ग्रहणे मनः साधनमिति मानसमुच्यते। तच्च मानसग्रहं द्वादशाहमध्यपातिनोदशमस्याह्नोऽङ्गम् 'एष वै दशमस्याह्नो विसर्गो यन्मानसमि'ति वचनात्। विसर्गोऽन्तो विसर्गवतो धर्मिणो धर्मो न स्वतन्त्रः। अन्यथाऽहरन्तरत्वे द्वादशाहसमाख्याविरुध्येत। तत्र यथा मानसमपि ग्रहं क्रियाप्रकरणात्क्रियाङ्ग तथैतेऽग्नयः प्रकृतकर्माङ्गाः इत्यर्थः ॥४५॥

(४०५) अतिदेशाच्च ॥४६॥

किं च 'षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः। इति पूर्वणेष्टिकाचितेनाग्निना साम्पादिकाग्नीनां सादृश्यातिदेशात्क्रियाशेषत्वमुपोद्बलयति। तस्मान्नैतेऽग्नयःस्वतन्त्राः ॥४६॥

(४०६) विद्यैव तु निर्धारणात् ॥४७॥

तु शब्दः सूत्रद्वयोक्तपूर्वपक्षस्य व्यावर्तकः। विद्यात्मका एवैते मनश्चिदादयः स्वतन्त्राः स्युर्न कर्माङ्गभूताः। कुतः? "ते हैते विद्याचित एव' इति 'विद्यया हैवैते एवं विदश्चिता भवती' ति अवधारणात्। एवकारश्रुतिः कर्मप्रकरण बाधिकेत्यर्थः ॥४७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(४०७) दर्शनाच्च ॥४८॥

किं चैषां मनश्चिदादीनां स्वातन्त्र्यज्ञापकलिङ्गस्य प्रागुक्तस्य प्रकरणबाधकस्य दर्शनादपि स्वातन्त्र्यमिति भावः ॥४८॥

(४०८) श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥४९॥

किं च प्रकरणात् श्रुतिलिङ्गवाक्यानां बलीयस्त्वान्न दुर्बलेन कर्मप्रकरणेन मनश्चिदादीनां स्वातन्त्र्य बाधः। श्रुतिस्तावत् 'ते हैते विद्याचित एव', लिङ्गं सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते," वाक्य "विद्यया हैवैते एवं विदश्चिता भवन्ती' त्येतानि प्रकरणं प्रबाध्य तेषां स्वातन्त्र्यं बोधयन्तीत्यर्थः। ननु लिङ्गस्य साम्पादिकाग्निस्तुतिपरत्वमुक्तमिति चेन्न; विस्पष्टं विध्यन्तरानुपलब्धेरेतेन संकीर्त्तनेनोपासनाविधिकल्पनीयाच्च। तस्मात्स्वातन्त्र्यपक्ष एव ज्यायानिति ॥४९॥

(४०९) अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥५०॥

इतश्च प्रकरणमुपमृद्य मनश्चिदादीनां स्वातन्त्र्यं, यत्किल 'ते मनसैवाधीयन्त मनसाऽचीयन्त मनसैव ग्रहा अगृह्यन्त" इत्यादिना मन आदिव्यापारेषु कर्माङ्गानां सम्पादनात् "तेषामेकैक एव तावान्यावानसौ पूर्वः' इति क्रियामयस्याग्नेर्माहात्म्यस्य ज्ञानमयानामेकैकस्मिन्नतिदेशाच्चेत्यर्थः। ननु पूर्वपक्षेऽप्यतिदेशस्योपोद्बलकत्वमिति चेन्न; सति सामान्येऽतिदेशप्रवृत्तिरिति न्यायस्याग्नित्वसादृश्येनातिदेशस्यसिद्धान्तेऽप्युपपत्तेः। एवं चानुबन्धादिहेतुभ्यो मनश्चिदादीनां स्वातन्त्र्यम्। प्रज्ञान्तरपृथक्त्ववदिति दृष्टान्तमाह। यथा प्रज्ञान्तराणां शाण्डिल्यविद्यादीनां स्वेन स्वेनानुबन्धेनानुबध्यमानानां कर्मभ्यः प्रज्ञान्तरेभ्यश्च पृथक्त्वं स्वातन्त्र्यं तद्वत्। "अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते" (जै० ३।३।३) इत्यत्र 'राजा राजसूयेन स्वाराज्यकामो यजेत' इति वाक्यविहिते राजसूयप्रकरणेऽवेष्टि संज्ञक पञ्चयागरूपाऽवेष्टिनामिका काचनेष्टिः श्रूयते। तत्र "यदि ब्राह्मणो यजेत" इति श्रुताया ब्राह्मणकर्तृकाया अवेष्टेः राजमात्र कर्तृकराजसूयप्रकरणादुत्कर्षो यथा दृष्टस्तद्वदिहाप्यग्नीनां कर्मप्रकरणादुत्कर्षो द्रष्टव्यः। तदुक्तं 'क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगात्' (जै० ११।४।११) इति प्रथमे तन्त्रे। क्रत्वर्थाया राजसूयक्रतुशेषायामवेष्टौ तल्लिङ्गस्यनिवेशइति चेन्न; वर्ण संयोगात्। 'यदि ब्राह्मणो यजेत' इति वर्ण संयोगाद्राजसूये राज्ञ एवाधिकारान्न तत्र ब्राह्मणस्याधिकार इति सूत्रार्थः ॥५०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(४१०) न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥५१॥

यदुक्तं पूर्ववादिना मानसवदिति, तत्प्रत्याह न मानसग्रह सामान्यादपि मनश्चिदादीनां क्रियाशेषत्वं कल्प्यम्; पूर्वोक्तश्रुत्यादिहेतुभ्यः स्वातन्त्र्योपलब्धेः। नहि कस्यचित्केनचित्सामान्येन सर्वत्र यथास्वं वैषम्यं निवर्तते। मृत्युवत्। यथा 'स वा एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषः' इति 'अग्निर्वै मृत्युरि' (बृ० ३।२।१०) ति चाग्न्यादित्यपुरुषयोः समानेऽपि मृत्युशब्दप्रयोगे नात्यन्तसाम्यापत्तिः, यथा वा 'असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिदि' (छा० ५।४।१) त्यत्र समिदादि सामान्यान्न द्युलोकस्याग्निभावापत्तिस्तद्वन्मानसग्रह मानसिकाग्न्योर्मानसत्वसाम्येऽपि मिथोवैषम्यमपरिहार्यमिति भावः॥५१

किं च पूर्वापरब्राह्मणयोः स्वतन्त्रविद्याविधानसामर्थ्यान्मध्यस्थ ब्राह्मणस्याप्यस्य स्वतन्त्रविद्याविधानपरत्वमित्याह—

(४११) परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥५२॥

मानसाग्निब्राह्मणात्परेण 'अयं वाव लोकोऽग्निश्चितः' इत्यनेन ब्राह्मणेन शब्दस्य ताद्विध्यं केवलविद्याविधित्वं लक्ष्यते। चकारात् 'तदेतन्मण्डलं तपति' इति पूर्वस्मिन्ब्राह्मणेऽपि मण्डलपुरुषोपासना रूपं केवलविद्याविधित्वमेव लक्ष्यते। तत्सामान्यादिहापि तथात्वम्। नन्वेवं तर्हि कुतः क्रियाग्निना सहैषां पाठ इति शङ्कानिरासार्थस्तुशब्दः। मानसाग्निविद्यायां भूयसां कर्माग्न्यवयवानां सम्पाद्यमानत्वात्तनानुबन्धः सहपाठो युक्तः। तस्मान्मनश्चिदादीनां स्वतन्त्रपुरुषार्थहेतुतया केवलविद्यात्मकत्वसिद्धिरिति ॥५२॥

[३० ऐकात्म्याधिकरणम्। सू० ५३-५४]

ननु मनश्चिदादीनां पुरुषार्थत्वमनुपपन्नं, देहादिव्यतिरिक्तस्य तत्फलभोक्तुः पुरुषस्याभावादित्याक्षेपसंगत्येदमाह—

(४१२) एक आत्मनः शरीरे भावात् ॥५३॥

अत्र पूर्वपक्षे स्वर्गापवर्गाद्यधिकारिणो देहादिव्यतिरिक्तस्यात्मनोऽभावात्तत्प्रतिपादकशास्त्रवैयर्थ्यम्, सिद्धान्ते तादृगात्मसत्त्वात्तत्सार्थक्यमिति फलभेदः। अत्र देहादिव्यतिरिक्त आत्माऽस्ति न वेति सन्देहे; एके देहमात्रात्मदर्शिनो लोकायतिका देहभिन्नस्यात्मनोऽभावं मन्यमाना मदशक्तिवच्छरीराकारपरिणतेभ्यो भूतेभ्यः संजातेन चैतन्येन विशिष्टो देह एवात्मा नातिरिक्तः इत्याहुः। कुतः; शरीरे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्यात्मोपलब्धेर्भावादसति शरीरे तदुपलब्धेरभावादित्यन्वयव्यतिरेकाभ्यामग्निधर्मौष्ण्यप्रकाशवत्प्राणचेष्टाचैतन्यस्मृत्यादीनां देहधर्मत्वेन तदतिरिक्तात्मासिद्धेरिति ॥५३॥

पूर्वपक्षे सिद्धान्तमाह—

(४१३) व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥५४॥

देहादेर्व्यतिरेक एवात्मत्मनो युक्तः। कुतः? तस्य देहस्य तद्धर्माणां च रूपादीनां मृतावस्थायां भावेऽपि चैतन्यस्मृत्यादीनामात्मधर्माणामभावित्वात् पतिते च जातुचिद्देहेऽस्मिन्देहान्तरावच्छेदेनात्मधर्माणां भावित्वान्न तेषां देहधर्मत्वम्। उपलब्धिवत्। यथैकैकस्मिन् भूते न चैतन्योपलब्धिस्तथा भूतसङ्घातेऽपि भौतिके देहे न तस्योपलब्धिरित्युपलब्धिरेव न आत्मेतिदेहभिन्नस्यात्मनः सत्त्वसिद्धिः। ननु मदशक्तिवद्भूतसंघात्मकदेहाच्चैतन्यं जायते इत्युक्तमिति चेन्न; मदशक्तिः प्रतिमदिरावयवं मात्रयावतिष्ठते तद्वद्देहेऽपि चैतन्यस्य तदवयवेषु मात्रया सत्त्वाभ्युपगमे एकत्रदेहेऽनेकचैतन्यानुपपत्तेः तथा च नानाचेतनाधिष्ठितं शरीरमपि न किञ्चित्कर्त्तुमुत्सहेत। अतो देहव्यतिरिक्तस्यात्मनोऽस्तित्वमनवद्यमिति ॥५४॥

[३१ अङ्गावबद्धाधिकरणम्। सू० ५५–५६]

पूर्वं यथा देहात्मनोर्भेदादात्मधर्माणां न देहे सम्भवः, तद्वदेकशाखागतोद्गीथधर्माणां शाखान्तरगतोद्गीथादेः स्वरादिभेदेन भेदात् नान्यत्र तत् प्राप्तिसम्भव इति दृष्टान्तसंगत्येदमाह—

(४१४) अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥५५॥

अत्र पूर्वपक्षे प्रतिशाखमुद्गीथधर्माणामनुष्ठानव्यवस्था, सिद्धान्ते तदव्यवस्थेति फलभेदः। तत्रोद्गीथकर्माश्रिताः प्रत्ययाः 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।१।१) 'लोकेषु पञ्चविधं सामोपासीत' (छा० २।२।१) इत्यादिश्रुत्या प्रतिवेदं शाखाभेदेषु विहितास्तत्तच्छाखागतेष्वेवोद्गीथादिष्वनुष्ठेयाः सर्वशाखागतोद्गीथादिषु वेति सन्देहे; स्वशाखागतोद्गीथादिष्वेव विधीयेरन्। कुतः? 'उद्गीथमुपासीते' (छा० १।१।१) ति सामान्यविधेर्विशेषाकाङ्क्षायां सन्निकृष्टेन स्वशाखागतविशेषेणैवाकाङ्क्षानिवृत्तेः। तस्मात्प्रतिशाखं व्यवस्थेति पूर्वपक्षः। सिद्धान्तस्तु—तुशब्दः पूर्वपक्षं व्यावर्तयति। नैतेऽङ्गावबद्धाः प्रत्ययाः प्रतिवेदं स्वशाखासु वर्तमानोद्गीथाद्यालम्बना भवितुं युक्ताः अपितु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वशाखास्वनुवर्तनीयाः। कुतः; हि यतः उद्गीथादिश्रुत्यविशेषात्। स्वशाखाव्यवस्थायामुद्गीथमुपासीते'ति सामान्यश्रुतिः सन्निधानवशेन विशेषे व्यवस्थाऽक्षमाना पीड्येत। तस्मात्स्वरादिभेदे सत्यप्युद्गीथत्वश्रुतिसामान्यात्सर्वशाखागतोद्गीथादिषूक्तप्रत्यया अनुवर्तनीया इति॥

(४१५) मन्त्रवद्वाऽविरोधः ॥५६॥

किं च मन्त्राणां कर्मणां गुणानां च शाखान्तरविहितानां शाखान्तरेविनियोगेऽविरोधो यथा, तथाऽत्रापि शाखान्तरीयकर्माङ्गानां शाखान्तरीयोद्गीथादिषु सर्वत्रानुवृत्तेरविरोधः। तथाहि तण्डुलपेषणार्थमश्मादानमन्त्रस्य 'कुटुरसीत्यादे'रेकत्राम्नातस्यान्यत्र 'कुक्कुटोऽसी'त्यश्मानमादत्ते कुटुरसीति वेत्यस्य विनियोगस्तद्वदुपासनानामपि तत्तच्छाखास्वपठितानामुक्तदृष्टान्तेन तत्र तत्र विनियोगेऽविरोध इति भावः॥५६॥

[३२ भूमज्यायस्त्वाधिकरणम्। सू० ५७]

पूर्वत्रोद्गीथादिश्रुत्या सन्निधिं बाधित्वोद्गीथाद्युपास्तीनां सर्वशाखासूपसंहारो भणितः, तद्वदिहापि व्यस्तोपासनस्य विधिश्रुतेः फलश्रुतेश्च समस्तोपासनसन्निधिप्राप्तस्तुत्यर्थत्वं बाधित्वा विधेयत्वमिति दृष्टान्तसंगत्येदमाह—

(४१६) भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥५७॥

अत्र पूर्वपक्षे वाक्यभेदः, सिद्धान्ते तदैक्यमिति फलभेदः। छान्दोग्ये वैश्वानरविद्यायां 'दिवमेव भगवो राजन्निति हो वाचे' (छा० ५।१२) त्यादौ द्युलोकसूर्यादिषु व्यस्तेषु तथा 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा' (छा० ५।१८।२) इत्यत्र समस्तेष्वपि मूर्धादिषु वैश्वानरमुपासनं श्रूयमाणमुभयथाऽनुष्ठेयं, केवलं सामस्त्येनैव वेति संशये; प्रत्यवयव 'मुपास्से' इति श्रुतेः 'तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते (छा० ५।१२।१) इति फल श्रुतेश्चोभयथोपास्तिरिति पूर्वपक्षः। सिद्धान्तस्तुभूम्नः समस्तस्य वैश्वानरोपासनस्यास्मिन्वाक्ये ज्यायस्त्वं प्राधान्यं विवक्षितं, न व्यस्तोपासनानाम्। क्रतुवत्। यथा दर्शपूर्णमासादिषु क्रतुषु साङ्गप्रधानप्रयोगो विवक्ष्यते, न व्यस्तानामपि प्रयाजादीनां, तद्वत्। ननु कुतस्तावदेतद्भूम्न एव ज्यायस्त्वमिति? एकवाक्यत्वावगमात्। तथा हि दर्शयति श्रुतिः—प्राचीनशालादीनां षण्णामृषीणां वैश्वानरविद्यानिर्णयार्थं कैकेयं राजानमुपगच्छतां व्यस्तोपसनानि 'मूर्धा ते व्यपतिष्य्यदि' (छा० ५।१२।२) त्यादि वाक्येन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निन्दित्वा कैकेयेन राज्ञा 'मूर्धात्वेष आत्मन इति होवाच' (छा० ५।१२।२) इत्यादिना समस्तोपासनस्योक्तत्वाच्छ्रुतेरेकवाक्यताऽवगम्यते। एकवाक्यतया श्रुतिर्भूम्नो ज्यायस्त्वं दर्शयति। ननु 'प्रत्यवयवमुपास्से' इति श्रुतेः पूर्वोक्तश्रुतेश्च व्यस्तोपासनमपि प्रतीयत इत्युक्तमिति चेन्न; प्रत्यवयवमाख्यातश्रुते समस्तोपासनाविधानार्थं व्यस्तोपासनानुवादकतया व्यस्तोपासनमपोद्य 'स सर्वेषु लोकेषु सर्वेषु भूतेष्वन्नमत्ती' (छा० ५।१८।१) त्यादौ भूमाश्रयस्यैव च फलस्य श्रवणेनादोपात्। अतः समस्तोपासनस्यैव ज्यायस्त्वमिति ॥५७॥

[३३ शब्दभेदाधिकरणम् । सू० ५८]

पूर्वत्र यथा व्यस्तोपास्तिषु सत्यामपि विधिश्रुतौ समस्तोपासनस्य ज्यायस्त्वं गदितं, तथा वेद्याभेदे प्रत्येकं विधिसत्त्वेऽपि समस्तोपासनस्यैव ज्यायस्त्वेन नास्ति विधिभेदे विद्याभेद इति दृष्टान्तसंगत्येदमाह-

(४१७) नाना शब्दादिभेदात् ॥५८॥

अत्रापि पूर्वपक्षे वाक्यभेदः, सिद्धान्ते तदैक्यमिति फलभेदः। तत्र सगुणब्रह्मैकविषयाः शाण्डिल्यादिविद्याः प्राणादिगोचराविद्याश्च किमभिन्ना भिन्ना वेति संशये; यागस्य द्रव्यदैवतमिव विद्याया वेद्यमेव रूपमिति वेद्यैकत्वे विद्यैकत्वमिति पूर्वपक्षः। सिद्धान्तस्तु—वेद्याभेदेऽप्यत्र विद्या नाना भिन्ना एव। कुतः? शब्दादिभेदात्। 'वेद' 'उपासीत' 'क्रतुं कुर्वीत' इतिशब्दादादिनोपास्यगुणभेदाच्च। ननु वेदेत्यादिशब्दभेदेऽपि 'यजतीत्यादिवदर्थभेदाभावात्कथं शब्दभेदाद्विद्याभेद इति चेन्न; मनोवृत्त्यर्थत्वाभेदेऽप्यनुबन्धगुणभेदाद्धेचभेदे सति विद्याभेदोपपत्तेरित्यर्थः ॥५८॥

[३४ विकल्पाधिकरणम् । सू० ५९]

इत्थं विद्याभेदे सिद्धेऽस्य विचारस्य प्रवर्तमानत्वेन हेतुहेतुमद्भावसंगत्येदमाह—

(४१८) विकल्पोऽविशिष्टफलत्वात् ॥५९॥

अत्र पूर्वपक्षेऽहंग्रहोपास्तीनां यथाकाममनुष्ठानमित्यनियमः, सिद्धान्ते विकल्पेनानुष्ठानमिति नियम, इति फलभेदः। किं सगुणब्रह्मविद्यानां यथेच्छं समुच्चयो विकल्पोवाऽनुष्ठानं, विकल्प एव वेति संशये; नियामकाभावाद्यथेच्छमिति पूर्वपक्षः। सिद्धान्तस्तु विकल्प एवासां विद्यानां युक्तो न समुच्चयः। कुतः? अविशिष्टफलत्वात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अविशिष्टं ह्यासां फलमुपास्यविषयं साक्षात्करणम्। एकेनैवोपासनेनेश्वरादावुपास्ये साक्षात्कृतेऽनर्थकं द्वितीयमुपासनम्। किं च समुच्चयपक्षे साक्षात्करणमसम्भवं, तस्य चित्तविक्षेपकरत्वात्। तस्मात्समानफलानामन्यतममुपासनमुपास्यसाक्षात्कारपर्यन्तं कर्तव्यमिति ॥५९॥

[३५ काम्याधिकरणम्। सू० ६०]

पूर्वत्राहंग्रहोपासनानां विकल्पेनैवानुष्ठानमुक्तं, तथोपास्तित्वसामान्यात्प्रतीकोपास्तीनामपि कुतो न विकल्पेनैवानुष्ठानमित्याक्षेप संगत्येदमाह—

(४१९) काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥६०॥

अत्र पूर्वपक्षे यवादिवदनुष्ठाननियमः, सिद्धान्ते फलवशादनियम इति फलभेदः। किमत्र 'नाम ब्रह्मेत्युपास्ते' (छा० ७।१।५) इत्यादिनोक्तानि प्रतीकोपासनानि विकल्पेनानुष्ठेयानियथाकामं वेति संशये; विकल्पेनैवेति पूर्वपक्षः। सिद्धान्तस्तु क्रियावददृष्टेन फलसाधकाः काम्यास्तु विद्या यथाकामं समुच्चीयेरन् नवा समुच्चीयेरन्। कुतः ? पूर्वहेत्वभावात्। पूर्वस्याविशिष्ट फलत्वस्य विकल्पहेतोरभावादित्यर्थः ६०

[३६ यथाश्रय भावाधिकरणम्। सू० ६१—६६]

पूर्वं यथा स्वतन्त्रत्वात्प्रतीकोपासनानां यथाकाममनुष्ठानं, न तथेहाङ्गाश्रितोपास्तीनामङ्गतन्त्रत्वादिति प्रत्युदाहरण संगत्येदमाह—

(४२०) अङ्गेषु यथाश्रयभावः ॥६१॥

अत्र पूर्वपक्षे समुच्चयानुष्ठानात्फल भूयस्त्वं, सिद्धान्ते यथेष्टानुष्ठानात्प्रयोग सौकर्यमिति फलभेदः। तत्र कर्माङ्गोद्गीथाश्रिताःविद्या वेदत्रयविहिताः किं समुच्चयेनानुष्ठेया विकल्पेन वेति संशये; पूर्वपक्षमाह—अङ्गेषु यथाश्रयभावः। यथा यागादिषु तदाश्रिताङ्गानां समुच्चयानुष्ठाननियमः, तथा कर्माङ्गेष्वपि प्रत्ययानामाश्रयतन्त्रत्वात्समुच्चयानुष्ठाननियम इति भावः ॥६१॥

(४२१) शिष्टेश्च ॥६२॥

किं च वेदत्रये प्रत्ययाश्रयाणां स्तोत्रादीनामिव वेदत्रयोक्ताना तदाश्रितोपास्तीनां चाविशेषेणशिष्टेः शासनाद्विधानात्समुच्चयनियमोऽविरुद्धः इत्यर्थः ॥६२॥

(४२२) समाहाराच्च ॥६३॥

किं च "होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति' (छा० १।५।५)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यृग्वेदोक्तप्रणवस्य सामवेदोक्तोद्गीथेनैकत्वविज्ञानबलादुद्गाता स्वकर्मण्युत्पन्नं क्षतं हौत्रात्कर्मणः सम्यक्कृतहोतृशंसनतः समाहरति समादधातीति लिङ्गाद्वेदद्वयोक्तप्रणवोद्गीथयोरेकत्वविज्ञानादपि सर्ववेदोक्तानामङ्गाश्रितोपासनानां समुच्चनियमोऽवबोध्य इति ॥६३॥

(४२३) गुणसाधारण्यश्रुतेश्च ॥६४॥

"तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति संसत्योमित्युद्गायती" (छा० १।१।९) ति वेदत्रयसाधारणस्य विद्यागुणस्योंकारस्य साधारण्यश्रुतेस्तदाश्रितोपास्तीनामपि साधारण्यं समुच्चयानुष्ठानमित्यर्थः। अथवा सर्वेषां कर्मगुणानामुद्गीथादीनां साधारण्यं समुच्चित्यानुष्ठानरूपं न स्यात्, तर्हि तदाश्रितप्रत्ययानामपि साधारण्यं न स्यात्। अतः सर्वाङ्गग्राहिणामुद्गीथादीनां सर्वाङ्गग्राहिणा प्रयोगबचनेन साधारण्यश्रुतेस्तदाश्रितानामपि प्रत्ययसहभावोऽविरुद्धः ॥६४॥

(४२४) नवा तत्सहभावाश्रुतेः ॥६५॥

न वेति पूर्वपक्षव्यावर्तकम्। नाङ्गाश्रितोपास्तीनामङ्गवत्सहभावनियमोऽस्ति। कुतः ? तत्सहभावाश्रुतेः। "ग्रहं गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति" इत्यादिना यथा त्रिवेदीविहितानां स्तोत्रादीनामङ्गानां सहभावः श्रूयते, नवैमुपास्तीनां सहभावश्रुतिरस्ति। नन्वङ्गतन्त्रत्वादुपासनानां सहभावनियम इति चेन्न; तेषां गोदोहनादिवत्पुरुषार्थतया क्रत्वर्थत्वाभावेन समुच्चयानियमादित्यर्थः ॥६५॥

(४२५) दर्शनाच्च ॥६६॥

"एवं विद्धवै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षती' (छा० ४।१७।१०) त्यत्राङ्गाश्रितोसनानामसहभावदर्शनात्तेषां यथेष्टं समुच्चयो विकल्पो वेत्यनवद्यम् ॥६६॥

शाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां इति ब्रह्मसूत्रविद्यानन्दवृत्तौ तृतीयाध्यायस्य तृतीयः पादः ॥३॥

—०:—

तृतीयाध्याये चतुर्थःपादः।

[अत्र निर्गुणविद्याया अन्तरङ्गवहिरङ्गसाधनविचारः]

पूर्वं परापरविद्यानां गुणोपसंहारनिरूपणेन फलमवधारितम्। इह तासां कर्मनिरपेक्षाणामेव पुरुषार्थसाधनत्वनिरुपणाय वहिरङ्गानि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञादीनि, शमादीनि श्रवणादीनि चान्तरङ्गानि निरूप्यन्ते इत्येक-विद्याविषयकत्वरूपसंगत्या पादोऽयमारभ्यते ।

[१ पुरुषार्थाधिकरणम् । सू० १–१७]

कर्माङ्गविद्याप्रसङ्गाद्ब्रह्मज्ञानस्य कर्माङ्गत्वमाक्षिप्य समाधानाय प्रसङ्गसंगत्याधिकरणमिदमाह—

(४२६) पुरुषार्थोऽतः शब्दादिति बादरायणः ॥१॥

अत्र पूर्वपक्षे समुच्चिताभ्यां ज्ञानकर्मभ्यां मुक्तिः, सिद्धान्ते केवलज्ञानान्मुक्तिरिति फलभेदः ।

अत्र किमौपनिषदमात्मज्ञानं कर्तृद्वारा कर्मानुप्रविश्य पुरुषार्थ-साधकं स्वतन्त्रमेव वेति संशये; कर्मानुप्रविश्य पुरुषार्थसाधकं तदिति पूर्वपक्षः । सिद्धान्तस्तु—अतोऽस्मादौपनिषदात्मज्ञानात् स्वतन्त्रात्पुरुषार्थो मोक्ष इति बादरायण आचार्यो मन्यते । कुतः ? शब्दादित्याह । 'तरति शोकमात्मवित्' (छा० ७।१।३) 'ब्रह्मवेद ब्रह्मैवभवति' (मु० ३।२।९) 'ब्रह्मविदाप्नोतिपरम्' (तै० २।१।१) त्यादिकेवलात्मज्ञानस्य मोक्षहेतुत्वबोधकशब्दादित्यर्थः ॥१॥

इत्थं सिद्धान्ते पूर्वपक्षमाह—

(४२७) शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥२॥

ननु कर्तृत्वेनात्मनः कर्मशेषत्वात्तद्विज्ञानमपि व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्माङ्गम् । न च 'तरतिशोकमात्मविदित्यादिफलश्रवणात्कुतस्तत्कर्माङ्गं, फलशून्यं हि कर्माङ्गं दृष्टमित्यत आह पुरुषेत्यादि । यथा 'यस्य पर्णमयी जुहूर्भवति, न स पापं श्लोकं शृणोती' त्यादिष्वन्येषु द्रव्यसंस्कारकर्मसु फलश्रुतिरर्थवादस्तद्वदत्रापि पुरुषार्थश्रुतिरर्थवादः इति जैमिनिराचार्यो मन्यते । न च देहव्यतिरिक्तात्मज्ञानस्य देहपातोत्तरकालफलेषु वैदिककर्मसु कथञ्चित्कर्तृद्वारोपयुक्तत्वेऽपि नापहतपाप्मत्वादिविशिष्टासंसार्यात्मदर्शनस्य प्रवृत्त्यङ्गत्वमिति वाच्यम्; प्रियादिसंसूचितस्य संसारिण एवात्मनो द्रष्टव्यत्वेनोपदेशादपहतपाप्मत्वादिविशेषणस्य स्तुत्यर्थत्वाच्चेति भावः ॥२॥

(४२८) आचारदर्शनात् ॥ ३ ॥

'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे' (बृ० ३।१।१) इत्यादौ ब्रह्मविदां जनकादीनामपि विद्यया सह कर्माचारसम्बन्धदर्शनात्तस्याः कर्माङ्गत्वमिति । केवलाच्चेदात्मज्ञानात्पुरुषार्थसिद्धिः, कथं तेऽनेका-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

याससाध्यानि कर्माणि कुर्युः ? 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदि'ति न्यायात् ॥३॥

(४२९) तच्छ्रुतेः ॥ ४ ॥

'यदेव विद्यया करोती' (छा० १।१।१०)ति तृतीयश्रुत्या तत्र कर्मशेषत्वश्रवणान्न केवलात्मविद्यायाः पुरुषार्थहेतुत्वमित्यर्थः ॥४॥

(४३०) समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' (बृ० ४।४।२) इति फलारम्भे विद्याकर्मणोः साहित्यदर्शनान्न फलारम्भे विद्याया स्वातन्त्र्यमिति ॥५॥

(४३१) तद्वतो विधानात् ॥ ६ ॥

'आचार्यकुलाद्वेदमधीत्य' (छा० ८।१५) इत्यादिना समस्तवेदार्थविज्ञानवतः कर्मविधानादपि ज्ञानस्य फलारम्भेऽस्वातन्त्र्यम् । न चाधीत्येत्यध्ययनमेव श्रूयते, नार्थविज्ञानमिति वाच्यं; दृष्टार्थत्वाद्वेदाध्ययनस्यार्थबोधपर्यवसायित्वमित्यर्थः ॥ ६ ॥

(४३२) नियमाच्च ॥ ७ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' (ईशा० २) इति लक्षणाद्यावज्जीवं कर्माचारनियमादपि विद्यायाः कर्मशेषत्वमिति ॥७॥

एवं प्राप्ते सिद्धान्तयति—

(४३३) अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दः पूर्वपक्षव्यावर्तकः । 'शेषत्वात्पुरुषार्थवादः' इत्यादिना त्वदुक्तं तत्त्वज्ञानस्य कर्माङ्गत्वं नोपपद्यते । कुतः; अधिकोपदेशात् । भवेत्फलश्रुतेरर्थवादत्वं, यदि श्रुतिषु संसार्येवात्मा शारीरः कर्त्ता भोक्ता शरीरमात्रभिन्नत्वेनोपदिष्टः स्यात् । अधिकस्याकर्त्तुरभोक्तुरसंसारिणश्चिन्मात्रस्योपदेशान्न तद्विज्ञानं कर्मणां प्रवर्तकं, कर्मोच्छेदकं तु तदित्यत एवं 'पुरुषार्थोऽतः' (बृ० ३।४।१) इत्यत्रोक्तं बादरायणस्य मतं व्यवस्थितं न शेषत्वादिहेत्वाभासैर्निराकर्त्तुं शक्यम् । नन्वधिकोपदेशासिद्धिरिति चेन्न; तद्दर्शनात् । 'यः सर्वज्ञः सर्ववित्' (मु० १।१।६) 'एतस्य वा अक्षरस्य प्रशासने गार्गि' (बृ० ३।८।६) 'नान्यदतोऽस्ति द्रष्टा' (बृ० ३।८।११) 'तत्त्वमसि' इत्यादिश्रुतिसहस्रेषु तस्य शारीरादधिकस्य पारमेश्वरस्वरूपस्योपदेशदर्शनात्तदेव जीवस्य पारमार्थिकं रूपं नौपाधिकमिति भावः ॥८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(४३४) तुल्यं तु दर्शनम् ॥ ९ ॥

न चाचारदर्शनात्तत्त्वज्ञानं कर्माङ्गमुपपद्यते, तस्याकर्मशेषत्वेऽपि तुल्यमेवाचारदर्शनम् । 'एतद्ध स्म वै पूर्वे विद्वांसोऽग्निहोत्रं न जुहवां चक्रिरे' 'व्युत्थायाथ भिक्षाचर्यं चरन्ती' (बृ० ३।५।१) 'एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजे' (बृ० ४।५।१५) त्यादिश्रुतिभ्यो याज्ञवल्क्यादीनामात्मविदामकर्म निष्ठत्वं दृश्यते । तुशब्देनाकर्मलिङ्गदर्शनस्य प्राबल्यं, जनकादीनां तु कर्माणि कर्तृत्वाभिमानाभावेन तत्कृतकर्मणामकर्मतया तदाचारदर्शनस्य दौर्बल्यमिति भावः ॥९॥

"तच्छ्रुतेः" इत्यनेन यदुक्तं तत्राह—

(४३५) असार्वत्रिकी ॥१०॥

'यदेव विद्यया करोती' त्येषा श्रुतिरसार्वत्रिकी प्रकृतोद्गीथविद्यामात्रपरत्वान्न सर्वविद्यागोचरेति न तृतीयाश्रुत्या ब्रह्मविद्यायाः कर्माङ्गत्वमिति ॥१०॥

'समन्वारम्भणात्' इति यदुक्तं तत्राह—

(४३६) विभागः शतवत् ॥११॥

'तं विद्याकर्मणी समन्वारभेते' इत्यत्र विभागो द्रष्टव्यो, विद्याऽन्यं पुरुषमन्वारभते, कर्मान्यमिति । शतवत् । यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पञ्चाशदेकस्मै, पञ्चाशदपरस्मै, तद्वदित्यर्थः । न चेदं समन्वारम्भवचनं मुमुक्षुविषयम् ? "इति नु कामयमानः" (बृ० ४।४।६) इति संसारिविषयत्वोपसंहारादित्यर्थः । तस्मान्नाविभागेन समन्वारम्भवचनं कल्पनीयमिति ॥११॥

'तद्वतो विधानादि' ति यदुक्तं तत्प्रत्याह—

(४३७) अध्ययनमात्रवतः ॥१२॥

'आचार्यकुलाद्वेदमधीत्ये' त्यत्राध्ययनमात्रश्रवणाद्वेदाध्ययनमात्रवत एव कर्मविधिर्नौपनिषदज्ञानवतोऽपि । किं च कर्मज्ञानमध्ययनप्रभवं कर्माधिकारप्रयोजकं न तत्रौपनिषदज्ञानमपेक्षते, तस्य स्वतन्त्रफलवान् । नहि क्रत्वन्तरज्ञानं क्रत्वन्तराधिकारप्रयोजकं तद्वदित्यर्थः ।१२।

"नियमाच्चे" त्युक्तं प्रत्याह—

(४३८) नाविशेषात् ॥१३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'कुर्वन्नेवेह कर्माणी' ति यावज्जीवं कर्मनियामकं वाक्यं न तत्त्ववद्विषयकं तत्त्वविदि विशेषाभावादित्यर्थः ॥१३॥

(४३९) स्तुतयेऽनुमतिर्वा ॥१४॥

यद्वाऽत्रापरो विशेष आख्यायतेस्यात्प्रकरणात्तत्त्वविदे कर्मानुमतिः कर्मानुज्ञा 'कुर्वन्नेवेहे' ति श्रुतौ। सा च ब्रह्मविद्यास्तुतये वोध्या, 'न कर्म लिप्यते नरे" (ईशा० २) इत्यत्र यावज्जीवं कर्म कुर्वत्यपि त्वयि तत्त्वविदि न तल्लेपाय भवतीति वक्ष्यमाणत्वात् ॥१४॥

(४४०) कामकारेण चैके ॥१५॥

अपि चैके विद्वांसः प्रत्यक्षीकृततत्त्वज्ञानफलास्तत्सामर्थ्यात्फलान्तरसाधनेषु प्रजादिषु प्रयोजनाभावं परामृशन्तः प्रजादिकं कामकारेण स्वेच्छयात्यक्तवन्तः इति "एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते, किं प्रजया करिष्यामः" (बृ० ४।४।२२) इत्यादौ श्रूयते। विद्याफलस्य चानुभवारूढतया न तस्याः कर्मशेषत्वं तद्विषयायाः फलश्रुतेश्चार्थवादत्वमाश्रयितुं शक्यमिति ॥१५॥

(४४१) उपमर्दं च ॥१६॥

किं च "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि' (बृ० २।४।१४) त्यादौ कर्माधिकारहेतोः क्रियाकारक फलात्मकस्य समस्तस्याविद्याकृतस्य विद्यासामर्थ्यादुपमर्दमामनन्तीत्यतो वेदान्तोक्तात्मज्ञानस्य कर्माधिकारोच्छेदकत्वान्न कर्माङ्गत्वमिति ॥१६॥

(४४२) ऊर्ध्वरेतःसु च शब्दे हि ॥१७॥

किं चोर्ध्वरेतः सु यतिषु ब्रह्मविद्याऽवगतेति श्रूयते। न च तत्र विद्यायाः कर्माङ्गत्वमुपपद्यते; तेषामग्निहोत्रादिकर्माभावात्। न च यत्याश्रमाभावो वक्तुं युक्तः; "त्रयो धर्मस्कन्धाः' (छा० २।२३।१) इति प्रस्तुत्य "ब्रह्मसंस्थोऽमृतत्वमेति" (छा० २।२३।१) इत्यत्र "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती' (बृ० ४।४।२२) ति 'ब्रह्मचर्यादेव प्रव्रजेदि' (जा० ४) इत्यत्र शब्देहि यत्याश्रमस्य श्रुतत्वेन प्रामाणिकत्वात्। अतो ब्रह्मविज्ञानस्य स्वतन्त्रपुरुषार्थहेतुतया न कर्माङ्गत्वमिति ॥१७॥

[परामर्शाधिकरणम् । सू० १८–२०]

पूर्वं यत्याश्रमस्य सद्भावे यदुक्तं प्रमाणं; तत्कुतो विध्यभावे सम्भवित्याक्षेपसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(४४३) परामर्शं जैमिनिरचोदना चापवदति ॥१८॥

अत्र पूर्वपक्षे यत्याश्रमाभावात् ज्ञानस्य स्वतन्त्रफलत्वासिद्धिः, सिद्धान्ते तद्भावात्तत्सिद्धिरिति फलभेदः। तत्र यत्याश्रमस्य सद्भावोऽस्ति न वेति संशये; विध्यभावान्नास्ति यत्याश्रम इति जैमिनिराचार्यो मन्यते। 'त्रयो धर्मस्कन्धाः' इत्युदाहृतासु श्रुतिषु तस्य परामर्शमनुवादमात्रं, न विधिः। नह्यत्र लिङादीनामन्यतमश्चोदनाशब्दोऽस्ति। 'ब्रह्मसंस्थोऽमृतत्वमेती' (छा० २।२३।१) ति ब्रह्मसंस्थता स्तुतिमात्रपरेत्येतत्सूत्रस्थचकारादवगम्यते। एवं च स्मृत्याचाराभ्यां प्रसिद्धोऽपि स प्रत्यक्षश्रुतिविरोधे नादरणीयः, अनधिकृतविषयो वा। अपि च 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः' (तै० १।११।१) 'नापुत्रस्य लोकोऽस्ति' इत्यादि प्रत्यक्षाहि श्रुतिराश्रमान्तरमपवदति। तस्मान्नास्ति यत्याश्रमः॥ इति पूर्वपक्षः। सिद्धान्तस्तु—

(४४४) अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥१९॥

गार्हस्थ्यवदेवाश्रमान्तरमनिच्छतापि कल्याणकामुकेनानुष्ठेयं भगवान्बादरायणो मन्यते। कुतः? साम्यश्रुतेः। 'त्रयो धर्मस्कन्धाः' इत्यादिश्रुतौ श्रुत्यन्तरविहितस्य गार्हस्थ्यस्येव 'ब्रह्मचर्यादेव प्रव्रजेदि' (जा० ४) ति श्रुत्यन्तरविहितस्य पारिव्राज्यस्यापि साम्यश्रवणात्। तथा च 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती' (बृ० ४।४।२२) ति यत्याश्रमस्य वेदानुवचनादिभिः समभिव्याहारो द्रष्टव्यः। ततश्च ब्रह्मसंस्थास्तुतिपरादपि वाक्याद्यत्याश्रमस्य सिद्धिः। न च वीरहेत्यादिप्रत्यक्षश्रुतिविरोध इति वाच्यम्; तस्याः श्रुतेरज्ञानादग्न्युद्वासकस्याहिताग्नेर्विषयकत्वेनाविरोधात्। न च 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा' (जा० ४) इति पारिव्राज्यविधिश्रुतिरनधिकृतविषयेति वाच्यम्; अविशेषश्रवणात् 'अथ पुनरेव व्रती वाऽव्रती वा स्नातको वाऽस्नातकोवा उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेदि' (जा० ४) त्यनधिकृतानां पृथग्विधानाच्च। अतो यत्याश्रमस्य विधानाद्ब्रह्मविद्यायाः स्वातन्त्र्यं सिद्धमिति ॥१९॥

(४४५) विधिर्वा धारणवत् ॥२०॥

यद्वा 'त्रयो धर्मस्कन्धाः' (छा० २।२३।१) इति वाक्येऽस्मिन् आश्रमान्तराणां विधिरेव, न परामर्शमात्रम्। न चाश्रमान्तरविधाने

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाक्यभेदप्रसक्तिः सम्भवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वादिति वाच्यम्;. आश्रमान्तराणामपूर्वसिद्धतया परामर्शानुपपत्तेः परामर्शाभावे च स्तुत्यसम्भवेनैकवाक्यतां विहायात्र वाक्यभेदस्येष्टत्वात्। एतादृगपूर्वविधौ दृष्टान्तमाह धारणवत्। यथा 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती" त्यत्र प्रेताग्निहोत्रे श्रुयमाणवाक्ये सत्यामपि स्रुग्दण्डादधोधारणेन विधेरेकवाक्यताप्रतीतावपि स्रुग्दण्डस्योपरि समिद्धारणस्य हि शब्दोपेतस्यापि विधिरेव पूर्वत्वाद्यथेष्टस्तत्र वाक्यभेदः। तदुक्तं 'विधिस्तु धारणेऽपूर्वत्वादि' (जै० ३।४।१५) त्यत्र। तथेहाप्याश्रमान्तराणां परामर्शश्रुतिर्विधिरेवेति कल्प्यते।

वस्तुतस्तु वाक्येऽस्मिन् पारिव्राज्यमेव विधीयते; ब्रह्मसंस्थतास्तुतिसामर्थ्यात्। नहि पारिव्राज्यं विहायान्येष्वाश्रमेषु ब्रह्मसंस्थता सम्भवति; तेषां स्वाश्रमकर्मपरित्यागे प्रत्यवायश्रवणात्स्वकर्मासक्त्या च ब्रह्मसंस्थत्वायोगात्। परिशेषात् स्तूयते यत्तद्विधेयमिति पारिव्राज्यमत्र विधेयम्, तस्य स्वाश्रमधर्माः शमदमादयो ब्रह्मसंस्थतानुकूलाः। तथा च वाक्यभेदः। अतः सर्वकर्मपरित्यागात्मकस्य यत्याश्रमस्य श्रुतिप्रमाण सिद्धत्वाद्विद्यायाः पुरुषार्थसाधने स्वातन्त्र्यमिति ॥२०॥

[३ स्तुतिमात्राधिकरणम्। सू० २१-२२]

पूर्वं यथाऽनुष्ठेयसाम्यश्रुतेः पारिव्राज्यं विधेयमुक्तं, तथेह रसतमत्वादीनामङ्गाश्रितत्वेनेयमेव जुहूरादित्य इति श्रुति सामान्यात्स्तुतिमात्रत्वमिति दृष्टान्त संगत्येदमाह—

(४४६) स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥२१॥

अत्र पूर्वपक्षे कर्माङ्गाश्रितोपास्तीनामनुष्ठानासिद्धिः। सिद्धान्ते तत्सिद्धिरिति फलभेदः। तत्र 'स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः' (छा० १।१।३) इत्यत्रोक्तासूद्गीथाद्युपास्तिषु किमेतद्वाक्यं कर्माङ्गोद्गीथस्तुतिमात्रमुत गुणविधायकमिति संशये; 'इयमेव जुहूरादित्यः कूर्मः स्वर्गो लोक आहवनीय' इति जुह्वादिस्तुतिवद्रसतमत्वादिवाक्यं सर्वमपि कर्माङ्गोद्गीथस्तुति मात्रपरमिति। कुतः ? कर्माङ्गोद्गीथोपादानश्रवणात्। उपादायह्युद्गीथादीनि कर्माङ्गानि रसतमत्वादीनां श्रवणमस्तीति चेन्न; तद्वाक्यं स्तुतिमात्रं, किन्तु गुणविधायकम्। कुतः ? अपूर्वत्वात्। कर्माङ्गोद्गीथाद्युपास्तीनां रसतमत्वादिगुणानां च प्रमाणान्तराप्राप्तत्वात्। सति विधौ स्तुतेरुपयोगः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युर् (जै० १।२।७) त्यत्र निर्णीतः। अत्रैव विधिसम्भवे प्रदेशान्तरविहितोद्गीथादिस्तावककल्पनमन्याय्यम्। 'इयमेव जुहूरित्यादि तु विधिसन्निधावेव पठितमित्यतो वैषम्यम्। तस्मादेताःश्रुतयो विध्यर्थाः ॥२१॥

(४४७) भावशब्दाच्च ॥२२॥

किं 'चोद्गीथमुपासीत' (छा० १।१।१) 'सामोपासीते' (छा० २।२।१) त्यादिविस्पष्टविधिशब्दाच्चकारेण प्रतिकरणं 'आपयिता ह वै कामानां भवती' (छा० १।१।७) त्यादिना फलश्रवणाच्च। स्तुतिमात्रप्रयोजनत्वे सर्वं व्याहन्येत। अतोपि गुणविधायकमेतद्वाक्यम् ॥२२॥

[४ पारिप्लवाधिकरणम्। सू० २३–२४]

पूर्वं यथोद्गीथादिस्तुत्यपेक्षयोपास्यविषयसमर्पकत्वं ज्यायो रसतमत्वादेरुक्तं तथाऽख्यायिकानामपि विद्यास्तुत्यर्थत्वापेक्षया पारिप्लवशेषत्वं ज्यायोऽस्त्विति दृष्टान्तसंगत्येदमाह—

(४४८) पारिप्लवार्था इति चेन्न; विशेषितत्वात् ॥२३॥

अत्र पूर्वपक्षे वेदान्तोक्ताख्यायिकानां पारिप्लवप्रयोगशेषत्वात्तत्रोक्तविद्याया अप्राधान्येन पुरुषार्थहेतुत्वासिद्धिः, सिद्धान्ते विद्यास्तुत्यर्थत्वाद्विद्यैकतया तस्याः प्राधान्येन पुरुषार्थहेतुत्वसिद्धिरिति फलभेदः। 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी चे' (बृ० ४।५।१) त्यवेमादिषु वेदान्ताम्नातेष्वाख्यानेषु किमेतानि पारिप्लवार्थानि सन्निहितविद्यास्तुत्यर्थानि वेति संशये; आख्यानसामान्यात् पारिप्लवार्था सर्वाख्यायिका बोध्याः। तत्र पारिप्लवो नाम अश्वमेधे पुत्रादिपरिवृतस्य राज्ञे यज्ञानाविधकथाभिधानमिति चेन्न; विशेषितत्वात्। 'पारिप्लवमाचक्षीते' ति प्रस्तुत्य 'प्रथमेऽहनि मनुर्वैवस्वतो राजेत्याह, द्वितीयेऽहनि यमो वैवस्वतो राजेत्याह तृतीयेऽहनि वरुण आदित्य' इत्यादिवाक्यशेषे कासांचिदेवाख्यायिकानामेव पारिप्लवार्थत्वेन विशेषितत्वात्। आख्यानसामान्यात्सर्वाख्यायिकानां तथात्वेऽनर्थकमेवेदं विशेषणं स्यात्। तस्मान्नैता आख्यानश्रुतयः परिप्लवार्था इति ॥२३॥

(४४९) तथा चैकवाक्यतोपबन्धात् ॥२४॥

तथा चैषामाख्यानानामपारिप्लवार्थत्वे सन्निहितविद्यास्तुत्यर्थत्वं न्याय्यम्। कुतः एकवाक्यतोपबन्धात्। मैत्रेयी ब्राह्मणे 'आत्मा वा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अरे द्रष्टव्यः' (बृ० ४।५।६) इत्यनया विद्यया, प्रातर्दने 'प्राणोऽस्मि प्रज्ञात्मा' (कौ० ३।२) जानश्रुतिरित्यत्र 'वायुर्वाव संवर्गः' (छा० ४।३।१) इति चानयां सहैकवाक्यत्वदर्शनादित्यर्थः ॥२४॥

[५ अग्नीन्धनाद्यधिकरणम् । सू० २५]

इत्थमाख्यायिकानां विद्याशेषत्ववत्कर्मणामपि तच्छेषत्वं स्यादिति दृष्टान्तसंगत्येदमाह—

(४५०) अत एव चाग्नीन्धनाद्यनपेक्षा ॥२५॥

अत्र पूर्वपक्षे ब्रह्मविद्या स्वफलारम्भायेतिकर्तव्यतात्वेन कर्माण्यपेक्षते, सिद्धान्ते नापेक्षते इति फलभेदः । किं ब्रह्मविद्या मोक्षारम्भाय कर्माण्यपेक्षते न वेति सन्देहे; अपेक्षते इति पूर्वपक्षः । सिद्धान्तस्तु अत एवाद्याधिकरणन्यायेन ब्रह्मविद्यायाः स्वतन्त्रपुरुषार्थहेतुत्वादेव स्वार्थसिद्धावग्नीन्धनादीनामाश्रमकर्मणामनपेक्षा । तस्माद्रजतभ्रमनिवृत्तौ शुक्तिज्ञानस्य स्वातन्त्र्यवन्मोक्षे ब्रह्मविद्यायाः स्वातन्त्र्यमिति ॥

[६ सर्वापेक्षाधिकरणम् । सू० २६–२७]

पूर्वत्र ब्रह्मविद्या, न स्वफलारम्भे कर्माण्यपेक्षते, प्रमाणत्वाच्छुक्तिज्ञानवदित्युक्तं यथा, तथा सा स्वोत्पत्तावपि न कर्मापेक्षेति दृष्टान्तसंगत्येदमाह—

(४५१) सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥२६॥

अत्र पूर्वपक्षे ज्ञानार्थं यज्ञाद्यनुष्ठानस्याभावः, सिद्धान्ते तदर्थं तद्भाव इति फलभेदः । तत्र किं स्वोत्पत्तौ विद्यायाः स्वाश्रमकर्मणामपेक्षास्ति न वेति सन्देहे; स्वार्थसिद्धिवत्स्वोत्पत्तावपि न कर्मापेक्षेति पूर्वपक्षः । सिद्धान्तस्तु—स्वोत्पत्तौ विद्यायाः सर्वेषां स्वाश्रमकर्मणामपेक्षास्ति । कुतः ? यज्ञादिश्रुतेः । 'विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने' (बृ० ४।४।२२) त्यादिना विविदिषासंयोगेन यज्ञादीनां सर्वेषां स्वाश्रमकर्मणां विद्यासाधनत्वदर्शनात् 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिस्मृतेश्च । नन्वेवं स्वार्थे मोक्षेऽपि विद्या कर्माण्यपेक्षेतेति शङ्कायां दृष्टान्तमाह—अश्ववदिति । यथा योग्यताबलादश्वो रथचर्यायामुपयुज्यते, न लाङ्गलाकर्षे । एवं विद्यायाः फलसिद्धौ योग्यत्वाभावान्नाश्रमकर्मणामपेक्षेति भावः ॥२६॥

(४५२) शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥२७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्यपि विविदिषन्ति यज्ञेनेति वर्तमानव्यपदेशेन विध्यभावादुक्तश्रुतिरनुवादस्वरूपा न यज्ञादिविधिपरा। तथापि शमदमाद्युत्पत्तेः स्याद्विद्यार्थी। कुतः? 'तस्मादेवं विच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यती' (बृ० ४।४।२३) त्यत्र विद्याङ्गतया शमादीनां विधानाद्विहितानामवश्यानुष्ठेयत्वाच्च। न च 'पश्यती' त्यत्रापि विध्यभावः समान इति वाच्यं; तस्मादिति प्रकृतप्रशंसापरिग्रहाद्विधित्वप्रतीतेः 'पश्येदि'ति च माध्यन्दिन्यां विस्पष्टं विधानात्। एवं च यज्ञादीनां विविदिषासंयोगस्यापूर्वत्वात् 'विविदिषन्तीत्यत्रापि विधिः कल्पनीयः। तस्मादेवंविदिति विद्यासंयोगादन्तरङ्गानि शमादीनि विद्योत्पत्तौ विविदिषा संयोगात्तु यज्ञादीनि वहिरङ्गानीति विवेक्तव्यम् ॥२७॥

[७ सर्वान्नानुमत्यधिकरणम्। सू० २८-३१]

पूर्वं यथा विविदिषन्तीति वर्तमानापदेशेऽप्यपूर्वत्वात्। पञ्चमलकारेण विधिः कल्पितः, तथा 'न ह वा अस्यानन्न जग्ध भवती'ति वर्तमानापदेशेऽप्यपूर्वत्वात्विधिः कथं न कल्पनीय इत्याक्षेपसंगत्येदमाह—

(४५३) सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥२८॥

अत्र पूर्वपक्षे प्राणोपासकस्य भक्ष्याभक्ष्यविभागसिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। प्राणोपासनायां 'न ह वा एवंविदि किञ्चनानन्नं भवति' (छा० ५।२।१) तथा 'न ह वा अस्यानन्नं जग्धं भवति नानन्न प्रतिगृहीतमि' (बृ० ६।१।१४) ति श्रूयते। तत्र किमिदं प्राणोपासकस्य सर्वान्नानुज्ञानं शमादिवद्विद्याङ्गं विधीयते, स्तुत्यर्थं वा संकीर्त्यते इति संशये; विद्याङ्गं विधीयते इति पूर्वपक्षः। सिद्धान्तस्तु—नेदं सर्वान्नानुज्ञानं विधीयते, विधायकशब्दाभावात्। किं तर्हि, प्राणान्नविज्ञानप्रशंसार्थोऽयमर्थवादः। एवं च प्राणात्यये परस्यामापदि हि सुरावर्जं सर्वान्नस्य विद्वदविद्वद्भ्यामदनीयत्वेनानुमतिरनुज्ञानं, न स्वस्थाय। कुतः? तद्दर्शनात्। चाक्रायणस्यर्षेः 'मटचीहतेषु कुरुषु' (छा० १।१०।१०) इति ब्राह्मणेऽस्मिन् कष्टावस्थायां हास्तिपकोच्छिष्टकुल्माषभक्षणे प्रवृत्तिदर्शनात् प्राणरक्षार्थमित्यर्थः। एवं च विध्यभावात् श्वादिमर्यादान्नस्य मानुषेणैकेन देहेनोपभोक्तुमशक्यत्वाच्च न सर्वान्नानुज्ञानं शमादिवद्विद्याङ्गत्वेन विधेयम्, किन्तु प्राणस्य सर्वमिद-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रमिति चिन्तनाय प्राणविद्यास्तुत्यर्थं तत्संकीर्त्यते इति ॥२८॥

(४५४) अबाधाच्च ॥२९॥

भक्ष्याभक्ष्यविभागशास्त्रस्याबाधश्च सर्वान्नानुज्ञानमर्थवादमात्रमित्यर्थः। ननु 'मा हिंस्यात्सर्वा भूतानी'ति सामान्यशास्त्रस्य 'पशुना यजेते'ति विशेषशास्त्रेण बाधनियमात्सामान्यविशेषभावाद्भक्ष्याभक्ष्यविभागशास्त्रोपपत्तिरिति चेन्न; सत्यागतावुक्तरीत्या विभागानुपपत्तेरित्यर्थः ॥२९॥

(४५५) अपि च स्मर्यते ॥३०॥

अपि चापदि विदुषोऽविदुषश्चाविशेषेण सर्वान्नभक्षणमपि स्मर्यते 'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।' 'मद्यं नित्यं ब्राह्मणो वर्जयेदि'त्यादि ॥३०॥

(४५६) शब्दश्चातोऽकामकारे ॥३१॥

शब्दश्चाभक्ष्यभक्षणस्य 'तस्माद्ब्राह्मणः सुरां न पिबेत्' इति प्रतिषेधकोऽकामकारे स्वेच्छाकृतप्रवृत्तिनिराकरणे श्रूयते। तस्मादेतादृशा अर्थवादा न विधेयाः इति ॥३१॥

[८ आश्रमकर्माधिकरणम्। सू० ३२–३६]

इत्थं यथा शास्त्रान्तरविरोधात्सर्वान्नत्ववचनं स्तुतिरेवं 'यावज्जीवमग्निहोत्रं जुहोती'ति नित्यत्वश्रुतिविरोधाद्यज्ञादीनां विद्यासाधनत्ववचनं स्तावकमिति दृष्टान्तसंगत्येदमाह—

(४५७) विहितत्वाच्चाश्रमकर्मापि ॥३२॥

अत्र पूर्वपक्षे विविदिषावाक्यस्य विवक्षितार्थत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। 'सर्वापेक्षा च—(ब्र० सू० ३।४।२६) इत्यत्र स्वाश्रमकर्मणां तत्त्वज्ञानसाधनत्वमवधारितम्। तान्यमुमुक्षुणाऽनुष्ठेयानि न वेति सन्देहे; 'विविदिषन्ती'त्यादिनाश्रमकर्माणि विद्यासाधनत्वेन विहितानि विद्याफलमनिच्छता फलान्तरं कामयमानेनामुमुक्षुणाऽननुष्ठेयानीति पूर्वपक्षः। सिद्धान्तस्तु—आश्रममात्रनिष्ठेनामुमुक्षुणाऽप्याश्रमकर्म कर्तव्यमेव। कुतः? 'यावज्जीवमग्निहोत्रं जुहोती'त्यादिना विहितत्वादित्यर्थः ॥३२॥

(४५८) सहकारित्वेन च ॥३३॥

नन्वेवं सति विद्यासाधनत्वमेषां न स्यादिति चेन्न; 'तमेतं वेदानु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वचनेन ब्राह्मण। विविदिषन्ती' त्यादिना चित्तशुद्धिद्वारा विद्यासहकारित्वेन तेषां यज्ञादीनां विहितत्वेऽविरोधादित्यर्थः ॥३३॥

(४५९) सर्वथाऽपि त एवोभयलिङ्गात् ॥३४॥

सर्वथापि=नित्यत्वेनाश्रमकर्मत्वपक्षेऽनित्यत्वेन विद्यासहकारित्वपक्षे चापि त एवाग्निहोत्रादयो धर्मा अनुष्ठेयाः। कुतः ? उभयलिङ्गात्। 'विविदिषन्ति यज्ञेने' ति श्रुतिलिङ्गात्, 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः' इति स्मृतिलिङ्गाच्च ॥३४॥

(४६०) अभिनवं च दर्शयति ॥३५॥

'एष आत्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते' (छा० ८।५।३) इत्यादिनाश्रुतिर्ब्रह्मचर्यादिसाधनसम्पन्नस्य रागादिक्लेशैरनभिभवं सहकारित्वस्योपोद्बलकं दर्शयति। अतो यज्ञादीनामाश्रमकर्मत्वं विद्यासहकारित्वं च निश्चितमितिः ॥३५॥

[६ विधुराधिकरणम्। सू० ३६-३९]

ननु विद्यासहकारित्वमाश्रमकर्मणामित्युक्तौ विधुराणां विद्यायामनधिकारप्रसक्तिरिति प्रत्युदाहरणसंगत्येदमाह—

(४६१) अन्तरा चापि तद्दृष्टेः ॥३६॥

अत्र पूर्वपक्षे कंचिदाश्रममनधिकृत्य विहितानां जपादीनां विद्या साधनत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र विधुराणां द्रव्यादिसाधनरहितत्वेनान्यतमाश्रमप्रतिपत्तिहीनानां किं विद्यायामधिकारोऽस्ति न वेति सन्देहे; सहकारियज्ञादिकर्माणाभावान्नास्ति तेषां ब्रह्मविद्यायामधिकार इति पूर्वपक्षः। सिद्धान्तु—अन्तरा चाप्यनाश्रमित्वेन तु वर्तमानानामपि विधुराणां ब्रह्मविद्यायामधिकारोऽस्ति। कुतः ? तद्दृष्टेः। तेषां रैक्वादीनां ब्रह्मवित्त्वश्रुत्युपलब्धेः ॥३६॥

(४६२) अपि च स्मर्यते ॥३७॥

संवर्तादीनां नग्नचर्यादियोगादाश्रमकर्मरहितानामपि महायोगित्वं स्मर्यते ॥३७॥

(४६३) विशेषानुग्रहश्च ॥३८॥

किं च रैक्वादीनामप्यनाश्रमिणामविरुद्धैः पुरुषमात्रसम्बद्धैर्जपोपवासादिभिः कर्मविशेषैर्ज्ञानसाधनैरनुग्रहो विद्यायाः सम्भवति। यथा च "जाप्येनैव संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्नवा कुर्यान्मैत्रो ब्राह्मण उच्यते" ॥ इति स्मृतिः ॥३८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नन्वेवं जपादिनैव विद्यासिद्धेराश्रमित्वं व्यर्थमित्यत आह—

(४६४) अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥३९॥

तु शब्दः शङ्काव्यावर्तकः। आश्रमित्वं व्यर्थं नास्ति किं तर्ह्यतोऽनाश्रमित्वादाश्रमित्वं ज्यायो विद्यासाधनम्। कुतः? "तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चे' (बृ० ४।४।९) ति श्रुतिलिङ्गात्, 'अनाश्रमी न तिष्ठेत् दिनमेक मपि द्विजः' इति स्मृतिलिङ्गाच्च ॥३९॥

[१० तद्भूताधिकरणम्। सू० ४०]

इत्थमनाश्रमकर्मणां विद्याहेतुत्ववदुत्तमाश्रमात्पूर्वाश्रम प्रत्यवरोहिकर्मणां विद्याहेतुत्वं स्यादिति दृष्टान्तसंगत्येदमाह—

(४६५) तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥४०॥

अत्र पूर्वपक्षे कस्यचिदाश्रमस्य ज्यायस्त्वसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। किमारूढपतितस्य कर्म विद्यासाधनमस्ति न वेति सन्देहे; पूर्वकर्मसु यागहोमादिष्वनुष्ठानचिकीर्षया रागादिना वा प्रत्यवरोहसम्भवे तत्रानुष्ठितं कर्मापि विद्यासाधनमस्तीति पूर्वपक्षः। सिद्धान्तस्तु–तद्भूतस्योर्ध्वरेतोभावं गतस्यातद्भावस्ततः प्रत्यवरोहः कथमपि न सम्भवतीति जैमिनेराचार्यस्य सम्मतमपिना बादरायणस्यापि। कुतः? नियमातद्रूपाभावेभ्यः 'अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषदिति नियमः। 'ब्रह्मचर्यं परिसमाप्य गृही भवेद् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेदि' (जा० ४) त्यारोहवदवरोहबोधकश्रुत्यभावोऽतद्रूपम्' शिष्टाचाराभावाश्च, तेभ्यः। न च पूर्वाश्रमधर्मचिकीर्षया रागादिना वा प्रत्यवरोह इति वाच्यं, 'श्रेयान्स्वधर्मो विगुणः' (गी० ३।३५) इति स्मरणात्, नियमशास्त्रस्य बलीयस्त्वाच्च। तस्मात्प्रच्युते प्रामाणिकत्वादारूढपतितस्य कर्म न विद्यासाधनमित्यर्थः ॥४०॥

[११ अधिकाराधिकरणम्। सू० ४१–४२]

इत्थं प्रच्युतस्य कर्म न विद्याहेतुरितिवत्तत्कृतप्रायश्चित्तस्यापि न विद्याहेतुरिति दृष्टान्तसंगत्येदमाह—

(४६६) न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥४१॥

अत्र पूर्वपक्षे कृतप्रायश्चित्तेनानुष्ठितं कर्म न विद्यासाधनं, सिद्धान्ते तत्साधनमिति फलभेदः। प्रमादात्पतितस्य प्रायश्चित्तमस्ति न वेति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन्देहे; अधिकारलक्षणे प्रायश्चित्तसाधिकारिकम् "अवकीर्णि पशुश्च तद्वदाधानस्याप्राप्तकालत्वात्" (जै० ६।८।२) इति "ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इत्यादिना निर्णीतमपि गर्दभालम्भनरूपं नैष्ठिकस्यावकीर्णिनो नैवास्ति। कुतः ? पतनानुमानात्। "आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा" इत्यप्रतिसमाधेयपतनस्मरणात्, उपकुर्वाणस्य तु तादृक्पतनस्मरणाभावात्तदस्तीति ॥४१॥

पूर्वपक्षे सिद्धान्तमाह—

(४६७) उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥४२॥

अपि त्वेके आचार्याः उपपदपूर्वमुपपातकमेवैतन्मन्यन्ते, न महापातकं; गुरुतल्पादिषु महापातकत्वपरिगणनात्। तस्मादुपकुर्वाणवन्नैष्ठिकस्यापि प्रायश्चित्तस्य भावमिच्छन्ति, तयोर्ब्रह्मचारित्वे सत्यवकीर्णित्वाविशेषात्। अशनवत्। यथा तस्य मधुमांसादिभक्षणे व्रतलोपः पुनः संस्कारश्च तद्वत्। तस्मात्तद्भावो युक्ततरः। तदुक्तं प्रथमतन्त्रे 'समा विप्रतिपत्तिः स्यात्' (जै० १।३।८) "शास्त्रस्था वा तन्निमित्तत्वात्' (जै० १।३।९) इति। एवं च प्रायश्चित्ताभावस्मरणं तु त्वदुक्तं यत्नगौरवार्थमिति व्याख्येयम्। एवं 'वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षमभिवर्धयेदि' ति वानप्रस्थस्य महाकक्षाभिवर्धनं 'भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जस्वशास्त्रसंस्कारश्चे'ति यतेश्च यथाशास्त्रमनुस्मर्तव्यमिति ॥४२॥

[१२ बहिरधिकरणम्। सू० ४३]

इत्थं कृतप्रायश्चित्तेनारूढपतितेन कृतं कर्म विद्यासाधनं यथा तथैव तेन सह शिष्टाचारात्मकं कर्मापि विद्यासाधनं स्यादिति दृष्टान्तसंगत्येदमाह—

(४६८) बहिस्तूभयथापि स्मृतेराचाराच्च ॥४३॥

अत्र पूर्वपक्षे आरूढपतितमित्यादिशास्त्रं विरुद्धं, सिद्धान्तेऽविरुद्धमिति फलभेदः। कृतप्रायश्चित्तेन सह कृतं श्रवणादिकं विद्यासाधनमस्ति न वेति सन्देहे; विद्यासाधनं तदस्ति, अन्यथा प्रायश्चित्तस्य वैयर्थ्यापत्तेरिति पूर्वपक्षः। सिद्धान्तस्तु—ऊर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकमुपपातकं वा स्यादुभयथापि ते कृतप्रायश्चित्ता अपि शिष्टैर्बहिष्कर्तव्याः। 'प्रायश्चित्तं न पश्यामि, येन शुध्येत्स आत्महा'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'आरूढपतितं विप्रं स्पृष्ट्वा चान्द्रायणं चरेदि' त्यादिबहुनिन्दास्मरणात् शिष्टाचाराच्च। अतः तत्कृतप्रायश्चित्तस्य परलोकार्थत्वान्नतेन सहैहिक-फलकं श्रवणादिकं विद्यासाधनमिति ॥४३॥

[१३ स्वाम्यधिकरणम् । सू० ४४–४६]

पूर्वं यथा "कृतप्रायश्चित्तः संव्यवहार्यः" इत्युत्सर्गस्य निन्दाऽतिशयोक्त्या नैष्ठिकादिषु बाधः, तथात्राङ्गकर्त्तैव तदाश्रितोपास्तिकर्त्तेत्युत्सर्गस्य फलभाजो यजमानस्य कर्त्तः फलश्रुत्या बाधः स्यादिति दृष्टान्त संगत्येदमाह—

(४६९) स्वामिनः फलश्रुतेरित्यात्रेयः ॥४४॥

अत्र पूर्वपक्षे कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यं, सिद्धान्ते, ऋत्विक्कर्तृत्वं स्वाम्यधीनमिति परम्पर्यैकाधिकरण्यमिति फलभेदः। तत्र किमङ्गवदङ्गाश्रितोपासनानि यजमानकर्माणि, ऋत्विक्कर्माणि वेति संशये: यजमानकर्माणि। कुतः? फलश्रुतेः। 'वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पञ्चविधं सामोपास्ते' (छा० २।३।२) इत्यत्र वृष्टौ पञ्चविधसामोपासकस्योक्तफलश्रवणात्। तस्मात्स्वामिनो यजमानस्य फलवत्सूपासनेषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते इति पूर्वपक्षः ॥४४॥ सिद्धान्तस्तु—

(४७०) आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४५॥

स्वामिकर्माण्युपासनानि ऋत्विक्कर्तृकानीत्यौडुलोमिराचार्यो मन्यते। कुतः? तस्मै हि साङ्गाय कर्मणे यजमानेनर्त्विक्परिक्रियते, तदन्तःपातीनि चोद्गीथोपासनान्यधिकृताधिकारविषयत्वादुगोदोहनादिनियमवदेवर्त्विक्कर्तृकानीतिभावः। न च कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यनियमात्फलश्रुतिविरोध इति वाच्यं; स्वर्गगामिफलकर्मार्थ यजमानेनर्त्विजः परिक्रीतत्वेनाविरोधादिभावः ॥४५॥

(४७१) श्रुतेश्च ॥४६॥

'यां वै काञ्चन यज्ञ ऋत्विज आशिषमाशासते इति यजमानायैव तामाशासते इति होवाच' (छा० १।७।८) इति श्रुतेः ऋत्विक्कर्तृकोपासनस्य फलं यजमानगामीत्यतोऽङ्गोपासनानामृत्विक्कर्मत्वसिद्धिरितिभावः ॥४६॥

[१४ सहकार्यन्तरविध्यधिकरणम् । सू० ४७–४९]

दृ थं 'यां कांचन यज्ञे' इत्यादिवाक्यशेषादङ्गोपासनमृत्विक्कर्तृकं-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निर्णीतमिव 'अथ मुनि' रित्यादिवाक्यशेषाद्विधिविरहादपि न विधि-रिति दृष्टान्तसंगत्येदमाह—

(४७२) सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥४७॥

अत्र पूर्वपक्षे मौनस्यानुष्ठेयत्वासिद्धिः, सिद्धान्ते ज्ञानं प्रत्यन्तरङ्ग-त्वात्तत्सिद्धिरिति फलभेदः। 'बाल्यं च पाण्डित्यं च निर्विद्याथमुनिर-मौनं च मौनं च निर्विद्याथ ब्राह्मणः' (बृ० ३।५।१) इत्यत्र किं मौनं विधीयते, न वेति संशये; 'अथ मुनिरित्यत्रविधिविभक्तेरभावान्मुनि-पण्डितशब्दयोर्ज्ञानार्थत्वात्पाण्डित्येनैव मौनस्य प्राप्तत्वाच्च न विधि-रिति पूर्वपक्षः। सिद्धान्तस्तु—ब्रह्मसाक्षात्काराय बाल्यपाण्डित्यवद्विद्या-सहकारिणोऽन्यस्य मानस्य निदिध्यासनस्य विधिराश्रयणीयः, अपूर्व-त्वात्। ननु पाण्डित्यशब्देनैव मौनमवगतमित्युक्तमिति चेन्न; मुनि-शब्दस्य ज्ञानातिशयार्थत्वात् पाण्डित्यशब्दस्य श्रवणार्थकत्वाच्चेति-भेदः। ननु 'गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमि'त्यत्र मौनशब्दस्य पारिव्राज्ये प्रयोगदर्शनात्कथं मौनं निदिध्यासनमित्यत आह तृतीयं, बाल्यपाण्डित्यापेक्षया निदिध्यासनमेवात्र ज्ञानातिशयरूपं मौन विधीयते। आश्रमान्तरसमभिव्याहारात्स्मृतौ मौनशब्देन पारिव्राज्यं लक्ष्यं न तु वाच्यमिति। तत्र तद्वतो विद्यावतः संन्यासिन एव मुख्य-तयाधिकारात् 'आत्मानं विदित्वापुत्राद्येषणाभ्यो व्युत्थायाथ भिक्षा-चर्यं चरन्ती'ति श्रुतेः। तत्रापि निदिध्यासनस्य भेददर्शनपक्षे प्राप्त्य-सम्भवाद्विधेः सार्थक्यमित्याह पक्षेण। तत्र दृष्टान्तमाह—विध्यादिवत्। यथा विधिप्रधाने दर्शपूर्णमासादिवाक्ये सहकारित्वेनाग्न्याधानादिक-मङ्गजातं विधीयते, तद्वदविधिप्रधानेऽपि ब्रह्मपरवाक्ये मौनस्य-विधिरित्यर्थः ॥४७॥

ननु श्रवणादिप्रधाने संन्यासाश्रमे श्रुतिसिद्धे कस्माच्छान्दोग्ये 'अभिसमावृत्य कुटुम्बे' (छा० ८।१५।१) इति गृहिणोपसंहार इत्यत आह—

(४७३) कृत्स्नभावात्तु गृहिणोपसंहारः ॥४८॥

बहुलायाससाध्यानानां यज्ञादीनामाश्रमान्तरविहितशमादीनां च कार्त्स्न्येनेन तत्र सद्भावादादरेण गृहमेधिनोपसंहारो नैतेन संन्यासाश्रमा-भावसिद्धिः ॥४८॥

(४७४) मौनवदितरेषामप्युपदेशात् ॥४९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मौनगार्हस्थ्ययोरिव 'तप एव द्वितीयो ब्रह्मचर्याचार्यकुलवासीतृतीयः (छा० २।२३।१) इत्यादिश्रुतिषु ब्रह्मचारिवानप्रस्थयोरप्युपदेशाच्चतुर्णामाश्रमाणां सिद्धिः। इतरेषामिति द्वयोर्बहुवचनं वृत्तिभेदापेक्षयानुष्ठातृभेदापेक्षया वेति द्रष्टव्यम् ॥४९॥

[१५ अनाविष्काराधिकरणम् ॥५०॥

पूर्वत्र यथा मौनशब्दस्य निदिध्यासने प्रसिद्धिमाश्रित्याप्राप्तमौनस्य विधिस्तद्वद्बाल्यशब्दस्य भावशुद्धस्य प्रसिद्धेस्तद्विधेयमिति दृष्टान्तसंगत्येदमाह—

(४७५) अनाविष्कुर्वन्नन्वयात् ॥५१॥

अत्र पूर्वपक्षे बाल्यस्य कामचारादेरपि विद्याङ्गत्वेनानुष्ठानं, सिद्धान्ते भावः शुद्धेरेवेति फलभेदः। 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदि'त्यादौ किं बाल्यशब्देन बालस्य कर्म कामचारादिकं विधीयते, भावशुद्धिर्वेति संशये; नियामकाभावात्कामचारादिकमिति पूर्वपक्षः। सिद्धान्तस्तु 'अव्यक्तलिङ्गोऽव्यक्ताचारः' इतिश्रुतेः 'अंधवज्जडवच्चापि मूकवच्च महीं चरेदि'ति स्मृतेश्च ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमनाविष्कुर्वन्नख्यापयन्भावशुद्धो भवेदितिविधिः यतीनां ज्ञानाभ्यासः प्रधानमिति तत्रैव बाल्यस्य भावशुद्धस्यान्वयान्न कामचारादीनामिति शौचादिधर्मविधायकशास्त्रविरोधादित्यर्थः ॥५०॥

[१६ ऐहिकाधिकरणम् । सू० ५१]

इत्थं संन्यासादिबाल्यान्तं साधनमुक्त्वा तत्साध्यविद्योत्पत्तिं विचारयितु हेतुहेतुमद्भावसंगत्येदमाह—

(४७६) ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥५१॥

अत्र पूर्वपक्षे श्रवणादेर्विद्यासाधनत्वासिद्धिः, सिद्धान्तेऽसति प्रतिबन्ध इह जन्मनि अन्यथा जन्मान्तरे तत्सिद्धिरिति फलभेदः। किमत्रैव जन्मनि श्रवणादिना विद्योत्पत्तिर्जन्मान्तरे वेति संशये; इहैव मे विद्याजायतामिति कामनया तत्साधने श्रवणादौ प्रवृत्तेरैहिकमेव विद्याजन्मेति पूर्वपक्षः। सिद्धान्तस्तु अप्रस्तुतप्रतिबन्धेऽसति बन्धके विद्याजन्मैहिकमपि श्रवणादिना भवति, सति प्रतिबन्धे त्वमुत्रापीत्यनियमः। प्रस्तुतप्रतिबन्धो नाम फलजननाय विद्याविरुद्धफलकं कर्मेति तत्प्रतिबन्धेन प्रतिबद्धस्य तत्त्वज्ञानस्य जन्मान्तरेऽपि जननमविरुद्धमीति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावः। कुतः ? तद्दर्शनात्। "श्रवणायापि वहुभिर्यो न लभ्यः" (कं० १।२।७) 'गर्भ एव शयानो वामदेव एवमुवाच' इति श्रुतिषु प्रतिवन्धतदभावाभ्यां तस्यानियमस्य दर्शनात्। तस्मादैहिकमामुष्मिकं वा विद्याजन्म प्रतिवन्धक्षयमपेक्ष्य भवतीत्यर्थः ॥५१॥

(१७ मुक्तिफलाधिकरणम्। सू० ५२]

इत्थं यथा साधनोत्कर्षापकर्षाभ्यां तत्फलस्य विद्याया उत्कर्षापकर्षावेवं विद्याफले मोक्षेऽपि कश्चिदुत्कर्षादिविशेषनियमः स्यादिति दृष्टान्त संगत्येदमाह—

(४७७) एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥५२॥

अत्र पूर्वपक्षे ज्ञानसाध्या मुक्तिः, सिद्धान्ते, तस्या नित्यप्राप्तत्वाज्ज्ञानाभिव्यक्तिमिति फलभेदः। किं विद्यावन्मुक्तौ विशेषनियमोऽस्ति न वेति सन्देहे; साधनवीर्यविशेषाद्विद्यावद्विद्याफलेऽपि विशेषनियमोऽस्तीति पूर्वपक्षः। सिद्धान्तस्तु—एवं विद्यावत्तत्फले मोक्षेऽनियमो नियमाभावः। कुतः ? तदवस्थावधृतेः। सर्ववेदान्तेषु मुक्त्यवस्थायाः समानरूपतयावधृतेः 'ब्रह्मैवेदममृतं पुरस्तात्' (मुण्ड० २।२।११) 'स वा एष महानज आत्मा' (बृ० ४।४।२५) इत्यादिनावधारणात्। ननु विद्यावत्तत्फलेऽपि मोक्षे विशेषः स्यादित्युक्तमिति चेन्न; तस्य नित्यसिद्धतया विद्यया तदभिव्यज्यमानस्वरूपत्वात्। किं च विद्याभेदाभावादपि तत्फलभेदनियमस्याभावो वोध्यः। नहि मुक्तिसाधिकाया विद्यायाः कर्मणामिव भेदोऽस्ति। सत्यपि सगुणविद्यायां गुणभेदेन भेदे मोक्षफलायां निर्गुणविद्यायां निर्गुणत्वादेव तदभाव इत्यर्थः। पदाभ्यासोऽध्याय परिसमाप्त्यर्थः ॥५२॥

इति ब्रह्मसूत्र शाङ्करभाष्यावलम्बिन्यां श्रीविद्यानन्दगिरि-विरचितायां विद्यानन्दवृत्तौ तृतीयाध्यायस्य चतुर्थः पादः ॥४॥

॥ इति तृतीयाऽध्यायः ॥

अथ चतुर्थाध्याये प्रथमपादः

(अयं चाध्यायः सगुणनिर्गुणविद्ययोः फलविशेषनिर्णयार्थः)

[अत्र फलाध्याये प्रथमपादे जीवन्मुक्तिनिरूपणम्]

अतिक्रान्तेऽध्याये परापरविद्यात्मकं साधनं सवैराग्यं तत्त्वंपदार्थशोधनपूर्वकं निरूपितं प्रायेण। अथेदानीं तत्फलं निरूपयितुं कार्यकारण-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावसंगत्याध्यायोऽयमारभ्यते ।

[१ आवृत्त्यधिकरणम् । सू० १–२]

पूर्वत्र मोक्षे विशेषाभावोऽभिहितो यथा, तथेह श्रवणादावावृत्ति विशेषाभावोऽस्त्विति दृष्टान्तसंगत्येदमधिकरणमाह—

(४७८) आवृत्तिरसकृदुपदेशात् ॥१॥

अत्र पूर्वपक्षे प्रयाजादिवददृष्टार्थत्वाच्छ्रवणादेःसकृदनुष्ठानं, सिद्धान्तेऽवघातवद् दृष्टार्थत्वात्फलप्राप्तिं यावदावृत्त्यानुष्ठानमिति फलभेदः । तत्र किं श्रवणादिकं सकृदेव कर्तव्यम्, तस्यावृत्तिर्वा कर्तव्येति संशये; सकृदेवानुष्ठेयं, तावता शास्त्रस्य कृतार्थत्वादिति पूर्वपक्षः । सिद्धान्तस्तु श्रवणादेरावृत्तिः कर्तव्या । कुतः ? असकृदुपदेशात् । 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यत्रासकृदुपदेशात् । ननु यावच्छब्दमेकैकं वारं श्रवणं मननं निदिध्यासनं चानुष्ठेयमिति चेन्न; तेषां दर्शनपर्यवसायित्वात् । दृष्टार्थं हि तत्, यथाऽवघातादीनि तण्डुलनिष्पत्त्यर्थानि दृष्टार्थानि, तद्वदित्यर्थः । यदि च प्रयाजादिवच्छ्रवणादिकम् अदृष्टद्वारा फलजनकं स्यात्तर्हि प्रयाजादिवदेव सकृदनुष्ठानेन कृतार्थं स्यात् । न त्वेतदस्ति । अतस्तदावृत्त्यानुष्ठेयम् । एवं 'वेद उपासीत', इत्यावृत्तिश्रवणादुपास्यसाक्षात्कारद्वारा फलहेतूपासनेषु आवृत्तिर्बोध्या ॥ १ ॥

(४७९) लिङ्गाच्च ॥ २ ॥

किं चोद्गीथादिविज्ञानं प्रस्तुत्य 'आदित्य उद्गीथः' (छा० १।५।१) इत्येकपुत्रतादोषेणोपोद्य 'रश्मींस्त्वं पर्यावर्तयादि' (छा० १।५।२) ति रश्मिबहुत्वोपासनं बहुपुत्रतायै विदधद्वाक्यं सिद्धवत्प्रत्यावृत्तिं दर्शयति अतः सामान्यतया तन्न्यायाद् दृष्टार्थेषु सर्वोपासनेष्वावृत्तिः कर्तव्येति भावः । नन्वतिशयविरहान्निर्गुणोपासनेष्वावृत्तिरनर्थिका । न च युक्तिनिरपेक्षश्रवणस्य साक्षात्काराजनकतया तत्सार्थक्यमिति वाच्यम्; सकृच्छ्रवणवत्तस्यावृत्तावपि फलाजनकत्वादिति चेन्न, विचित्रप्रज्ञत्वात्प्रतिपत्तॄणाम् । तथाहि—स्यादानर्थक्यं तं प्रति, यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात्, तद्भिन्नं प्रति श्रवणादेरावृत्तेः सार्थक्यमस्त्येव । अत एव छान्दोग्ये श्वेतकेतुं प्रत्यसकृदुपदिष्टम् । न च सकृच्छ्रुतं तत्त्वमसीति वाक्यं स्वार्थमनुभावयितुमसमर्थमावर्त्यमानमपि न तत्र प्रभवेदिति वाच्यं, दृष्टफलकेऽनुपपत्तेर्दर्शयितुमशक्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वात् । तस्माद्ब्रह्मात्मैक्यसाक्षात्काराय तदुपायेष्वावृत्तिसिद्धिरिति ।२

[२ आत्मत्वोपासनाधिकरणम् । सू० ३]

इत्थं सिद्धे सति ब्रह्मात्मैक्ये तत्साक्षात्काराय श्रवणाद्यावृत्तेः सार्थक्यं, तदेव नास्तीत्याक्षेपसंगत्येदमाह—

(४८०) आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥३॥

अत्र पूर्वपक्षेऽभेदपराणां श्रुतीनां गौणार्थत्वं सिद्धान्ते मुख्यार्थत्वमिति फलभेदः । तत्र किं श्रवणाद्यावृत्तिकालेऽहमिति स्वात्मत्वेन ब्रह्म ध्येयं भिन्नत्वेन वेति संशये; सर्वज्ञत्वाल्पत्वादिविरुद्धधर्माश्रयत्वात् 'नाहमीश्वर' इति प्रत्यक्षविरोधाच्च भिन्नत्वेन ब्रह्मध्येयमिति पूर्वपक्षः । सिद्धान्तस्तु 'आत्मेत्येव ब्रह्म ध्यातव्यम् । तथाहि ब्रह्मप्रकरणे 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि भगवो देवते' इति जावाला आत्मत्वेनैव ब्रह्माभ्युपगच्छन्ति । ग्राह्यन्ति चात्मत्वेन ब्रह्म 'तत्त्वमसि' 'एष ते आत्मासर्वान्तरः' (बृ० ३।४।१) 'एष ते आत्माऽन्तर्याम्यमृतः' (बृ० ३।७।३) इत्येवमादीनि वेदान्तवाक्यानि । तत्र तेषां मनो ब्रह्मेतिवद्गौणार्थत्वमिति ? सति मुख्यार्थत्वे गौणार्थत्वायोगात् । न च सर्वज्ञत्वादिविरुद्धधर्माश्रयत्वं, नाहमीश्वर इति प्रत्यक्षं च तयोरभिन्नत्वे बाधकमिति वाच्यम्; विरुद्धधर्माश्रयत्वस्यौपाधिकत्वात्प्रत्यक्षस्य च मिथ्याभेदगोचरत्वेन पारमार्थिकाभेदाविषयत्वादित्यात्मत्वेन ब्रह्म ध्येयमिति सिद्धम् ॥३॥

[३ प्रतीकाधिकरणम् । सू० ४]

इत्थं जीवब्रह्मणोरभिन्नतयाऽहं ब्रह्मेत्यात्मत्वेन ब्रह्म ध्येयमित्युक्तं यथा, तद्वन्मन आदिषु प्रतीकेष्वपि ब्रह्मविकारत्वाद्ब्रह्मत्वे सत्यात्मत्वोपपत्तेरहं ग्रहः कार्य इति दृष्टान्तसंगत्येदमाह—

(४८१) न प्रतीके न हि सः ॥४॥

अत्र पूर्वपक्षे प्रतीकोपासनानामहंग्रहोपास्तेरविशेषः, सिद्धान्ते विशेष इति फलभेदः । 'मनो ब्रह्मेत्युपासीत' (छा० ३।१८।१) 'आदित्यो ब्रह्मेत्यादेशः (छा० ३।१९।१) इत्यादिषु प्रतीकोपासनेषु किमत्र प्रतीकेष्वहंग्रहः कर्तव्यो न वेति संशये; कर्तव्य इति पूर्वपक्षः । सिद्धान्तस्तु प्रतीकेष्वहंग्रहो न कार्यः । कुतः ? प्रतीकेष्वात्मत्वानुभवाभावात् । न हि स उपासकः प्रतीकान्यात्मत्वेनाकलयति । नापि श्रुत्या तथा ध्येयमिति; तादृक्श्रुत्यभावात् । ननु ब्रह्मविकारत्वात्प्रतीकानां ब्रह्मत्वं ब्रह्म

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च सर्वेषामात्मा, ततश्च जीवाभिन्नब्रह्माभिन्नत्वात्प्रतीकेष्वात्मत्वमिति चेन्न; विकाराणां ब्रह्मत्वेनावधारणे विकारोपमर्दादात्मनश्च तथावधारणे कर्तृत्वादिनिराकरणादुपास्योपासकत्वाभावप्रसङ्गात्। अतः प्रतीकेष्वहंग्रहो न कर्तव्य इति भावः ॥४॥

[४ ब्रह्मदृष्ट्यधिकरणम् । सू० ५]

पूर्वोक्तप्रतीकोपासनेषु किमप्यन्यद्विचारयितुमेकविषयत्वसंगत्येद माह— (४८२) ब्रह्मदृष्टिरुत्कर्षात् ॥५॥

अत्र पूर्वपक्षे 'उत्कृष्टबुद्धिर्निकृष्टे कार्ये'ति लौकिकन्यायानपेक्षा, सिद्धान्ते तदपेक्षेतिफलभेदः। किमत्रादित्यादिप्रतीकदृष्टिर्ब्रह्मणि कार्या, किं वा प्रतीकेषु ब्रह्मदृष्टिरिति संशये; ब्रह्मणि प्रतीक दृष्टिकर्तव्या; तस्य प्राधान्येनोपास्यत्वाद् ब्रह्मोपासनं फलवदिति शास्त्रनियमाच्चेति पूर्वपक्षः। सिद्धान्तस्तुब्रह्मदृष्टिवारादित्यादिप्रतीकेषु कर्तव्या न विपरीता। कुतः ? उत्कर्षात्। एवं हि क्रियमाणायामुत्कृष्टदृष्टौ निकृष्ट निकृष्टस्योत्कृष्टता भवति 'उत्कृष्ट दृष्टिर्निकृष्टेऽध्यसितव्येति लौकिकन्यायानुगतश्च। यथा राजदृष्टिरमात्ये। स चानुसरणीयः। विपर्यये प्रत्यवायप्रसङ्गात्। ननु ब्रह्मणः प्राधान्येनोपास्यत्वसिद्धये ब्रह्मणि प्रतीकदृष्टि रिति चेन्न, प्रथमोपस्थितानामादित्यादि शब्दानामेव मुख्यार्थत्वेनाविरोधात। न च फलत्वाय ब्रह्मोपासनमेवादरणीयमिति वाच्यम्; उक्तन्यायेनादित्यानामुपास्यत्वेऽपि सर्वाध्यक्षत्वेन ब्रह्मणि फलदातृत्वस्याविरोधादित्यर्थः ॥५॥

[५ आदित्यादि मत्यधिकरणम् । सू० ६]

पूर्वं समस्तजगत्कारणत्वादपहतपाप्मत्वादिगुणयोगाच्चादित्यादेरुत्कृष्टं ब्रह्म यथोदितमेवं सिद्धरूपादित्यादिभ्यः साध्यरूपोद्गीथादीनां फलसन्निकर्षोत्कर्षाद्विशेषवत्त्वनियमः इति दृष्टान्त संगत्येदमाह—

(४८३) आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥६॥

अत्र पूर्वोत्तरपक्षयोः स्वस्वपक्षसिद्धिरेव फलमिति विवेकः। 'य एवासौ' तपति तमुद्गीथमुपासीत' (छा० १।३।१) 'लोकेषु पञ्चविधं सामोपासीत' (छा० २।२।१) इत्येवमादिष्वङ्गाश्रितोपासनेषु किमादित्यादिषूद्गीथादिदृष्टिः कर्तव्या, उद्गीथादिष्वादित्यादिदृष्टिर्वेति संशये; आदित्यादिषूद्गीथादि दृष्टिः-कर्तव्या। कर्मात्मकत्वादुद्गीथादीनां कर्मणश्च फलप्राप्तिप्रसिद्धेरिति पूर्वपक्षः। सिद्धान्तस्तु कर्माङ्गोद्गी-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

थादिष्वादित्यादिदृष्टिरेव कार्या। कुतः? अपूर्वसन्निकर्षादादित्यादिदृष्ट्या संस्क्रियमाणेषूद्गीथादिषु कर्मसमृद्धिरूपफलोपपत्तेः। तथा च 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती' (छा० १।१।१०) इति श्रुतिर्विद्यायाः कर्मसमृद्धिहेतुत्वं दर्शयति। ननूद्गीथादिदृष्ट्योपास्यमानेष्वादित्यादिषु कर्मात्मकतया सम्पद्यमानेषु फलजनकत्वमिति चेन्न; स्वयमेवोपासनस्य कर्मत्वात्फलवत्त्वोपपत्तेः। नह्यादित्यादिदृष्ट्योपास्यमानामुद्गीथादीनां कर्मात्मकत्वमपैति, तेषां तत्स्वरूपत्वात्। किं च कर्मरूपोद्गीथादीनां ब्रह्मवद्विशेषवत्त्वनियमः, तेषां सिद्धरूपादित्याद्यपेक्षया साध्यतया फलसन्निकर्षोत्कर्षादिति भावः ॥६॥

[६ आसीनाधिकरणम्। सू० ७–१०]

अङ्गाश्रितोपासनवदङ्गाऽनाश्रितोपासनेष्वप्यासननियमाभाव इति दृष्टान्तसंगत्येदमाह—

(४८४) आसीनः सम्भवात् ॥७॥

अत्र पूर्वपक्षे आसनाभ्यासासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। किमङ्गानवबद्धोपासनान्यनियमेनासीनस्तिष्ठन् शयानो वा कुर्यादुतनियमेनासीन एवेति संशये; मानसत्वादुपासनस्य शरीरस्थितेरनियम इति पूर्वपक्षः। सिद्धान्तस्तु–आसीन एवोपासीतेति। कुतः? गत्यादीनां चित्तविक्षेपकतयासीनस्यैवोपासनानांसम्भवात्। उपासनं नाम समानप्रत्ययप्रवहणं गच्छतो धावतो वा न सम्भवति, चित्तविक्षेपकत्वप्रसङ्गात्, शयानस्य निद्राभिभवप्रसङ्गाश्चेति भावः ॥७॥

(४८५) ध्यानाच्च ॥८॥

उपासनानां ध्यायत्यर्थरूप ध्यानरूपत्वात्। ध्यायति बको ध्यायति प्रोषितबन्धुरिति ध्यायतेश्चासीनेषु बकादिषु प्रयोगदर्शनादासीन एवोपासीतेत्यर्थः ॥८॥

(४८६) अचलत्वं चापेक्ष्य ॥९॥

"ध्यायतीव पृथिवी" (छा० ७।६।१) इति पृथिव्यादिष्वचलत्वमपेक्ष्य ध्यायतिवादो भवति। तस्मादपि लिङ्गादासीन एवोपासीतेत्यर्थः ॥९॥

(४८७) स्मरन्ति च ॥१०॥

स्मरन्ति च शिष्टाः 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः (गी० ६।११) इत्यादिनोपासनाङ्गत्वेनासनम्। अत एवासनविशेषो-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदेशो योगशास्त्रे इति ॥१०॥

[७ एकाग्रताधिकरणम् । सू० ११]

नन्वङ्गानाश्रितोपासनेषु यथासननियमस्तद्वत्तत्र कथं न दिगादिनियम इत्याक्षेपसंगत्येदमाह—

(४८८) यत्रैकाग्रता तत्राविशेषात् ॥११॥

अत्र पूर्वपक्षे दिगादिषूपासनार्थमादरः, सिद्धान्ते त्वनादर इति फलभेदः। किमत्र दिगादिनियमोऽस्ति न वेति संशये; प्रायेण वैदिककार्येषु दिगादिनियमदर्शनादस्तीति पूर्वपक्षः। सिद्धान्तस्तु, यत्रैव देशे काले वा मनसः सौकर्येणैकाग्रता स्यात्तत्रैवोपासीत। प्राच्यादि दिगादिनियमविशेषाश्रवणात्, एकाग्रतायाश्चोपासनेषु सर्वत्रेष्टत्वात्। 'ननु समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः। मनोऽनुकूले न तु चक्षुःपीडने गुहानिवाताश्रयणे प्रयोजयेत्' (श्वे० २।१०) इति देशविशेषः श्रूयते इति चेन्न; चित्तैकाग्रतासम्पादकदेशे मनोऽनुकूले ध्यानायविवक्षितत्वात्। तस्मादुपासनेषु दिगादिनियमो नास्तीति सिद्धम् ॥११॥

[८ आप्रायणाधिकरणम् । सू० १२]

इत्थं दिगादिनियमाश्रवणवदुपासनावृत्त्यश्रवणान्न यावज्जीवमुपासनमावर्तनीयमिति दृष्टान्तसंगत्येदमाह—

(४८९) आप्रायणात्तत्रापि हि दृष्टम् । सू० १२)

अत्र पूर्वपक्षे कादाचित्कप्रत्ययाभ्यासस्याहष्टद्वारोपास्यसाक्षात्कारहेतुत्वं, सिद्धान्ते निरन्तरप्रत्ययाभ्यासस्य साक्षादेव तद्धेतुत्वमिति फलभेदः। किमहंग्रहोपासनानि कियन्तं कालमभ्यस्योत्सृजेदुत यावज्जीवमावर्तयेदिति संशये; कदाचिदिति पूर्वपक्षः। सिद्धान्तस्तु आप्रायणादामरणात्प्रत्ययमावर्तयेत्। हि यस्मात् तत्रापि मरणकालेऽपि। स यावत्क्रतुरयमस्माल्लोकात्प्रैति इति श्रुत्या 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्' (गी० ८।६) इति स्मृत्या चोपास्य प्रत्ययानुवर्तनं दृश्यते। ननु जन्मान्तरीयफलारम्भककर्मवदहंग्रहोपासनमप्यदृष्टद्वाराफलसाधकमिति चेन्न; सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अनुपपत्तेः। तस्मादामरणमहंग्रहोपासनं कर्तव्यमिति ॥१२॥

[९ तदधिगमाधिकरणम् । सू० १३]

इत्थमुपासकानां यावज्जीवं कर्तव्याभिधानवन्नब्रह्मविदां कर्तव्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिति प्रत्युदाहरणसंगत्येदमाह—

(४९०) तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥

अत्र पूर्वपक्षे न ब्रह्मविदोपि संचितदुरितफलभोगं विनामुक्तिः, सिद्धान्ते तत्त्वज्ञानानन्तरमेव पापनाशाज्जीवन्मुक्तिरिति फलभेदः। अत्र ब्रह्माधिगमे सत्युत्तरपूर्वाघयोरश्लेषविनाशौ भवतो न वेति संशये; 'नाभुक्तं क्षीयते लोके कृतं कर्मशुभाशुभमिति' स्मृतेर्नेति पूर्वपक्षः। सिद्धान्तस्तु, ब्रह्माधिगमे सत्युत्तरार्धस्य ज्ञानादूर्ध्वमपि देहेन्द्रियवशात्सम्भावितस्याश्लेषः ज्ञानात्पूर्वमिह जन्मनि जन्मान्तरे वा संचितस्य पूर्वाघस्य श्लेषो विनाशश्च भवतः। कुतः? तद्व्यपदेशात्। तथाहि ब्रह्मविद्याप्रकरणे 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवं विदि पापं कर्म न श्लिष्यते' (छा० ४।१४।३) इति ब्रह्मविदामागामिनो दुरितस्यानभिसम्बन्धं दर्शयति। तथा विनाशमपि पूर्वसंचितस्य पापस्य व्यपदेशति 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छा० ५।२४।३) इत्यादि। नन्वनुपभुक्तस्य कर्मणः फलभोगमन्तरेण क्षयकल्पनायां शास्त्रं कदर्थितं स्यादिति चेन्न; शास्त्रस्यौत्सर्गिकत्वात्कर्मणां फलदातृत्वशक्तिसद्भावे मानत्वाच्च। अन्यथा प्रायश्चित्तादीनां वैयर्थ्यप्रसङ्गः। तस्मात् 'नाभुक्तमिति स्मृतेरज्ञविषयतयोक्तरीत्या ब्रह्मविदां पापासंश्लेशविनाशस्वीकारेऽदोष इति ॥१३॥

(४९१) इतरस्याप्येवमसंश्लेषः पाते तु ॥१४॥

इत्थं यथा ब्रह्मविदां पापस्याश्लेषविनाशावुक्तौ, न तथा पुण्यस्य तौ भवतः, तस्य श्रौतस्य श्रौतविज्ञानेनाविरोधादिति प्रत्युदाहरणसंगत्येदमाह—

[१० इतरासंश्लेषाधिकरणम् । सू० १४]

अत्र पूर्वोत्तरपक्षयोः फलं पूर्ववज्ज्ञेयम्। अत्र पापवत्पुण्यस्यापि तत्त्वविदामश्लेषविनाशौ भवतो न वेति सन्देहे; धर्मस्य शास्त्रीयत्वान्न शास्त्रीयज्ञानेन विरोध इति पूर्वपक्षः। सिद्धान्तस्तु, इतरस्यापि पुण्यस्यैवं वदश्लेषविनाशौ ब्रह्मविदां भवतः। कुतः? अकर्त्रात्मबोधनिमित्तस्य कर्मक्षयस्य पुण्यपापयोस्तुल्यत्वात् 'क्षीयन्ते चास्य कर्माणि' (मु० २।२।८) इत्यविशेषश्रुतेः 'उभे उहैवैष एते तरति' (बृ० ४।४।२२) इत्यत्र पापवत्पुण्यस्यापि प्रणाशव्यपदेशाच्च। यत्रापि केवलं पापस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रणाशः श्रूयते, तत्र तेनैव पुण्यमप्याकलितं बोध्यं, तस्य ज्ञानफलापेक्षया निकृष्टफलत्वात् सूत्रे तुशब्दोऽवधारणार्थः। इत्थं ब्रह्मविद् धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धे देहपातेऽवश्यंभाविनीमुक्तिरिति तात्पर्यम् ॥१४॥

[११ अनारब्धाधिकरणम् । सू० १५]

पूर्वं ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः, अधुना प्रारब्धकर्मव्यतिरिक्तविषयतयापवदितुमुत्सर्गापवादसंगत्येदमाह—

(४९२) अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥१५॥

अत्र पूर्वपक्षे जीवन्मुक्त्यसिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र किमनारब्धकर्मवदारब्धे पुण्यपापे तत्त्वज्ञानान्नश्यतो न वेति सन्देहे; 'उभे उ हैवैष एते तरति' (बृ० ४।४।२२) इत्यादावविशेषश्रवणादविशेषेणैव क्षय इति पूर्वपक्षः। सिद्धान्तस्तु अनारब्धकार्ये=अप्रवृत्तफले एव पूर्वे जन्मान्तरीये तत्त्वज्ञानात्प्राक्चैहिके सञ्चिते पुण्यपापे तत्त्वज्ञानान्नश्यतः, न त्वारब्धकार्ये सामिभुक्तफले। कुतः? तदवधेः। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छा० ६।१४।२) इति शरीरपातावधिश्रवणादित्यर्थः। अन्यथा ज्ञानादशेषकर्मक्षये सति शरीरहेत्वभावाज्ज्ञानप्राप्त्यनन्तरमेव मोक्षं प्राप्नुयात्, तत्र शरीरपातप्रतीक्षां नाचक्षीत। नन्वशेषकर्मविनाशनिमित्ते तत्त्वबोधे सामान्येन समुपस्थिते प्रारब्धावशेषकथनमसङ्गतमिति चेन्न: प्रारब्ध कार्यमाश्रित्य ज्ञानोत्पत्तिस्वीकारे चक्रादिवत्प्रवृत्तारब्ध वेगस्यान्तराले प्रतिबन्धासम्भवेन वेगक्षय प्रतिपालनस्यानिवार्यत्वादित्यर्थः ॥१५॥

[१२ अग्निहोत्राद्यधिकरणम् । सू० १६-१७]

यद्यपि पूर्वमनारब्धकार्याणां सर्वेषां कर्मणामुत्सर्गतस्तत्त्वज्ञानात्क्षयोऽभिहितस्तथापि नित्यनैमित्तिकातिरिक्तानारब्धकर्मविषयत्वेनेह तदपवादः क्रियते इत्युत्सर्गापवादसंगत्येदमाह—

(४९३) अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥१६॥

अत्र पूर्वपक्षे ज्ञानार्थं नित्याद्यनुष्ठानासिद्धिः, सिद्धान्ते तदर्थं तत्सिद्धिरिति फलभेदः। अत्र किं नित्यनैमित्तिककर्मणां तत्त्वज्ञानान्नाशो भवति न वेति सन्देहे; अनारब्धफलत्वाविशेषान्नाशो भवतीति पूर्वपक्षे सिद्धान्तमाह—तुशब्दः शङ्कामपनुदति। नित्यनैमित्तिकमग्नि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होत्रादि वैदिककर्म, तेन चित्तशुद्धिद्वारा जातस्य तस्य ज्ञानस्य कार्याय मोक्षायैवास्ति । कुतः ? तद्दर्शनात् । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' (बृ० ४।४।२२) इत्यादौ यज्ञादीनां परम्परया ज्ञानहेतुत्वदर्शनात् । ननु तत्त्वज्ञानादज्ञाननाशे तत्प्रयुक्तस्य कर्तृत्वादेर्विनाशात्कथं तत्त्वविदां नित्यनैमित्तिकादौ प्रवृत्तिरिति चेन्न; ज्ञानात्प्राक्कृतानामेव नित्यादिकर्मणां ज्ञानेनसहैककार्यत्वाभिधानस्य विवक्षितत्वात् । नहि ब्रह्मविदासागाम्यग्निहोत्रादि सम्भवति; तेषामनियोज्यब्रह्मात्मत्वप्रतिपत्त्या शास्त्रस्याविषयत्वादिति ॥१६॥

नन्वेवं किं विषयसश्लेषविनाशवचनं किं विषयं वा 'तस्य पुत्रा दायमुपयन्ति' इत्यादि विनियोगवचनमित्यत आह—

(४६४) अतोऽन्यापि ह्येकेषामुभयोः ॥१७॥

अतोऽग्निहोत्रादेर्नित्यादिकर्मणोऽन्यस्यापि ह्यस्ति साधुकृत्या पापकृत्या च काम्यरूपा, तस्या एव विनियोगोऽभिहितः 'सुहृदोऽपापकृत्यामुपयन्ती' ति । तथाविधकाम्यनिषिद्धयोर्विद्यां प्रत्यनङ्गत्वे सम्प्रतिपत्तिरुभयोरपि जैमिनिबादरायणयोरिति ॥१७॥

[१३ विद्याज्ञानसाधनाधिकरणम् । सू० १८]

इत्थं नित्यादिकमेव विषयमाश्रित्यान्यत्किञ्चिद्विचारयितुमेकविषयत्वसंङ्गत्येदमाह—

(४६५) यदेव विद्ययेति हि ॥१८॥

अत्र पूर्वपक्षे विद्यासंयुक्तमेव नित्यादिकर्म विद्याहेतुः, सिद्धान्ते केवलं तद्विद्याहेतुरिति फलभेदः । तत्र किं विद्यासंयुक्तमेवाग्निहोत्रादिकं नित्यादि कर्मेति नियमः किं तत्सहितं केवलं वाऽनुष्ठेयमित्यनियम इति संशये; विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्मात्मविद्याशेषत्वं प्रतिपद्यते, न विद्याहीनमिति नियमः, श्रुत्यादिषु केवलाद्विद्योपेतस्य वैशिष्ट्यावगमादिति पूर्वपक्षः । सिद्धान्तस्तु, अनियमो युक्तः । 'यदेवविद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती' (छा० १।१।१०) ति श्रुतिर्विद्यायुक्तस्य कर्मणो वीर्यवत्तरत्वं ब्रुवती न विद्याहीनस्य केवलस्य नित्यादिकर्मणोऽहेतुत्वं दर्शयति किं च 'विविदिषन्ति यज्ञेने' त्यविशेषश्रुत्यात्मज्ञानं प्रत्यङ्गत्वं नित्यादिकर्मणोदर्शयत्येव । तस्माद्विद्यासयुक्तं तद्धीनं वा नित्यादिकर्मोभयं मुमुक्षुणा मोक्षप्रयोजनायेह जन्मनि जन्मान्तरे वावश्यमनुष्ठेयं प्राग्ज्ञानोत्पत्तेरितिभावः ॥१८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[१४ इतरक्षपणाधिकरणम् । सू० १९]

स्यादेवमनारब्धकर्मणः क्षयः, आरब्धकार्यस्य कथं क्षय इत्याक्षेपसंगत्येदमाह—

(४६६) भोगेन त्वितरे क्षपयित्वा सम्पद्यते ॥१९॥

अत्र पूर्वपक्षे विदेहकैवल्यासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। किमत्र तत्त्वज्ञोऽपि प्रारब्धक्षयानन्तरं संसरति न वेति संशये; तत्त्वज्ञानादूर्ध्वं देहपातात्पूर्वमिव देहपातानन्तरमपि स संसरतीति पूर्वपक्षः। सिद्धान्तस्तु–इतरे त्वारब्धकार्ये पुण्यपापे भोगेन क्षपयित्वा ब्रह्मविद्ब्रह्म सम्पद्यते विदेहकैवल्यं प्राप्नोतीत्यर्थः। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छा० ६।१४।२) 'ब्रह्मैव सन्ब्रह्माप्नोती' त्यादिश्रुतिभ्यः। ननु सत्यपि तत्त्वज्ञाने देहपातात्पूर्वमिव देहपातात्परमपि भेददर्शनमनुवर्ततेति चेन्न; तदाद्वैतदर्शनानुवृत्तिनिमित्तस्य प्रारब्धकर्मणोऽभावादपरस्य कर्माशयस्य दग्धबीजत्वाच्च। तस्माद्भोगेन प्रारब्धकर्मनाशानन्तरं तत्त्वज्ञः सकारणदुःखात्यन्ताभावपरमानन्दावाप्तिलक्षणं कैवल्यं लभते इति सिद्धम् ॥१९॥

इति ब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां स्वामिविद्यानन्दगिरिविरचितायां विद्यानन्दवृत्तौ चतुर्थाध्यायस्य प्रथमः पादः ॥१॥

चतुर्थाध्याये द्वितीयः पादः

[अत्र पादे उत्क्रान्तिगतिनिरूपणम्]

प्रथमपादे तत्त्वज्ञानेनाज्ञाननिवृत्त्या मुक्तिविरुद्धानारब्धकर्मणां निवृत्तौ जीवन्मुक्तत्वमारब्धकर्मनिवृत्तौ तु विदेहकैवल्यं परापरविद्ययोः फलं च सामान्यतो निरूपितम्। इदानीमपरविद्यया प्रारब्धक्षयानन्तरभाविनिमोक्षे विशेषप्रदर्शनाय पादत्रयमारभ्यते। सामान्यनिरूपणं विशेषनिरूपणे हेतुरिति पूर्वेणास्य पादत्रयस्य सामान्यविशेषभावसंगतिः। तत्राप्ययं पाद उत्क्रान्त्यादिविशेषप्रतिपादनायारभ्यते।

[१ वागधिकरणम् सू० १-२]

पादान्तरत्वान्नाधिकरणसंगत्यपेक्षा।

(४६७) वाङ्मनसि दर्शनाच्छब्दाच्च ।१॥

अत्र पूर्वपक्षे स्वोपादानकारणे स्वस्य लय इति घटादिकार्ये दृष्टस्य न्यायस्यात्रासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र 'अस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोम्य ! पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायामि' (छा० ६।८।६) त्यत्रोत्क्रान्तिश्रुतौ 'वाङ्मनसि सम्पद्यते' इति किमिह वृतिमत्या वाचो मनसि लयो, वाग्वृत्तेर्वेति संशये: श्रुतिबलाद्वाच एव मनसिलयो, वाग्वृत्तेर्लयाभ्युपगमे लक्षणाप्रसङ्ग इति पूर्वपक्षे सिद्धान्तमाह—वाग्वृत्तेर्मनसि लयः। कुतः ? दर्शनात्। सत्यां मनोवृत्तौ वाग्वृत्तिरूपसंह्रियते। न चैवं लक्षणाप्रसक्तिरिति ? उक्तिर्वागिति भावसाधनेन वाक्शब्देन वाग्वृत्तेरभिधानात्। न च श्रुतिबलाद्वाचो मनसि लयः स्वीकार्य इति वाच्यम्; वाचो मनःप्रकृतिकत्वाभावात्। ननु वाङ्मनसीति श्रुतेः कागतिरिति ? शब्दाच्च। वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः ॥१॥

(४९८) अत एव च सर्वाण्यनु ॥२॥

अत एव सवृत्तिके मनस्यवस्थिते वृतिमात्रस्य लयदर्शनात्स्वरूपलयासम्भवाच्छब्दोपपत्तेरेव च हेतोः सर्वाणि चक्षुरादीनीन्द्रियाणि वृत्तिमात्रेण मनोऽनुवर्तन्ते इत्यर्थः। ननु सर्वेषां करणानां मनस्युपसंहाराविशेषे किमर्थं वाचः पृथग्ग्रहणमिति चेन्न; वाङ्मनसि सम्पद्यते' इति श्रुत्यनुरोधात् ॥२॥

[२ मनोधिकरणम्। सू० ३]

इत्थं यथा मनसि सर्वेन्द्रियवृत्तेर्लयोऽभिहितो, न तथा मनोवृत्तेरेव प्राणे लयः, किन्तु स्वरूपेण मनसोलयाभिधानंयुक्तम्, 'मनः प्राणे' इति श्रुत्यनुग्रहात्परम्परया मनसः प्राणोपादानकत्वाच्चेति प्रत्युदाहरणसंगत्येदमाह—

(४९९) तन्मनः प्राण उत्तरात् ॥३॥

अत्र पूर्वपक्षे 'मनः प्राणे' इतश्रुत्याप्राणेमनसोलयः, सिद्धान्ते तद्वृत्तेर्लय इति फलभेदः 'मनः प्राणे' इत्यत्र किं मनसःस्वरूपलयस्तद्वृत्तेर्वेति संशये, मनसः स्वरूपेण लयः इति पूर्वपक्षः। सिद्धान्तस्तु—तत् सर्वेन्द्रियवृत्तिलयाधारभूतं मनोऽपि वृत्तिद्वारेणैव प्राणेऽलीयते 'मनः प्राणे' इत्युत्तराद्वाक्यात्। सुषुप्तोर्मुमूर्षोश्च सत्यां प्राणवृत्तौ मनोवृत्तीनां लयदर्शनादतत्प्रतिकत्वा वृत्तिवृत्तिमतोरभेदोपचारेण शब्दोपपत्तेश्च। ननु जलभूम्योः कार्यकारण मात्रेण तत्कार्ययोः प्राणमनसोरपि कार्यकारणभावो युक्त इति चेन्न; तथाविधेन प्राणादिकेन तत्प्रकृतित्वेनप्राणे मनसः संपत्तुमनर्हत्वात्। अन्यथा हिमकरकादौघटादेर्लय

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसङ्ग इति भावः ॥३॥

[३ अध्यक्षाधिकरणम् । सू० ४-६]

इत्थं प्राणे मनोवृत्तिलयवत्तेजसि प्राणवृत्तिलयोऽस्त्विति दृष्टान्त-संगत्येदमाह—

(५००) सोऽध्यक्षे तदुपगमादिभ्यः ॥४॥

अत्र पूर्वपक्षे तेजःशब्दस्य मुख्यार्थत्वं, सिद्धान्ते भूतोपहितजीवोलक्षकत्वमिति फलभेदः । "प्राणस्तेजसि" इत्युत्तरवाक्ये किं यथाश्रुति प्राणस्य तेजस्येवलयो, जीवे वेति संशये; श्रुतं परित्यज्याश्रुतकल्पनाया-मन्याय्यत्वात्तेजस्येवेति पूर्वपक्षः । सिद्धान्तस्तु स प्राणोऽध्यक्षे जीवे निवृत्तव्यापारो भवति । कुतः ? तदुपगमादिभ्यः । तं जीवं प्रति हि-'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति' इत्युपगमः 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती' त्यनुगमनम् 'सविज्ञानो भवती' त्यन्तर्विज्ञाने जीवेऽपीतकरणग्रामस्य प्राणस्यावस्थानम्, एतेभ्योहेतुभ्य इत्यर्थः । नन्वेवं श्रौतार्थपरित्यागप्रसङ्ग इति चेन्न; उत्क्रमणादिव्यवहारस्याध्यक्षप्रधानत्वात् श्रुत्यन्तरेषु जीवस्यैव प्राणादिलयाधारत्वप्रतीतेश्चेति भावः ॥ ४ ॥

ननु कथं 'प्राणस्तेजसि' इति श्रुतिरित्यत आह—

(५०१) भूतेषु तच्छ्रुतेः ॥५॥

स इति पूर्वसूत्रादनुवर्तते । स च जीवस्तेजःसहितेषु देहान्तरारम्भकेषु भूतसूक्ष्मेषु प्राणवृत्तिलयाधारत्वेनावतिष्ठते । कुतः ? तेजःपदोपलक्षिते जीवे प्राणवृतेर्लयश्रवणात् । एवं प्राणस्य जीवप्राप्त्यर्थं तदुपाधितेजःप्राप्तेः स्वतः सिद्धत्वादित्यर्थः ॥५॥

नन्वेवमपि तेजस्येवैकस्मिन्प्राणवृत्तिलयोऽभ्युपेयः, 'प्राणस्तेजसी' त्यादौ तस्यैव केवलं श्रुतेरित्यत आह—

(५०२) नैकस्मिन्दर्शयतो हि ॥६॥

नैकस्मिन्नेव तेजसि देहान्तरप्राप्तिसमये जीवोऽवतिष्ठते । देहान्तरस्यापि पाञ्चभौतिकत्वदर्शनात् : हि यस्मादेतमेवार्थं रंहत्यधिकरणे प्रश्नप्रतिवचने दर्शयतः । तच्च तत्रैव व्याख्यातं द्रष्टव्यम् ॥६॥

[४ आसृत्युपक्रमाधिकरणम् । सू० ७]

इत्थं पूर्वोक्तोत्क्रान्तिमुपजीव्य किञ्चिदन्यद्विचारयितुमुपजीव्योपजीवकभावसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५०३) समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥७॥

अत्र पूर्वपक्षे दहरादिविद्याविदामुत्क्रान्त्यसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। किमुत्क्रान्तिरविदुषामेवोत दहरादिसगुणब्रह्मविद्यावतामपीति संशये; 'अमृतत्वं हि विद्वानश्नुते' इत्यादौ विदुषोऽमृतत्वश्रवणादुत्क्रान्तिरविदुषामेवेति पूर्वपक्षः। सिद्धान्तस्तु समाना चैषोत्क्रान्तिः 'वाङ्मनसी' त्यादिलक्षणा विद्वदविदुषोः आसृत्युपक्रमाद्देवयानोपक्रमात्प्राग् भवितुमर्हति। कुतः? उक्तश्रुतावविशेषश्रवणात्। ननु सगुणब्रह्मोपासकानाममृतत्वं कथं श्रूयते इति चेत्तत्राह अमृतत्वं चानुपोष्य। अनुपोष्य अदग्ध्वाऽत्यन्तमविद्यादिक्लेशजातमपरविद्याबलादापेक्षिकममृतत्वं सगुणोपासकः प्राप्नोति। अतस्तत्र मृत्युपक्रमो भूताश्रयत्वं चावश्यकमित्यर्थः ॥७॥

[५ संसारव्यपदेशाधिकरणम्। सू० ८-११]

ननु सर्वेषामुत्क्रान्तौ समानायां कथं न मृतमात्रस्यात्यन्तं ब्रह्मसम्पत्तिः स्यादित्याक्षेपसंगत्येदमाह—

(५०४) तदापीतेः संसारव्यपदेशात् ॥८॥

अत्र पूर्वपक्षे मृतमात्रस्य मुक्तिः, सिद्धान्ते तदभाव इति फलभेदः। 'तेजः परस्यां देवतायामि' (छा० ६।८।६) त्यत्र प्रकरणात्तेजः सजीवं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परमात्मनि सम्पद्यते इत्युक्तं, सा किमात्यन्तिकी सम्पत्तिरनात्यन्तिकी वेति संशये; सर्वस्य वस्तुजातस्य ब्रह्मोपादानकत्वात्साऽत्यन्तिकीति पूर्वपक्षः। सिद्धान्तस्तु, तद्यथोक्तं तेज आदि भूतसूक्ष्मापीतेरासंसारमोक्षादवतिष्ठते। कुतः? 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।' (क० ५।७) इत्यादिना संसारव्यपदेशात्। अन्यथा मरणमात्रेण संसाराभावे विधिशास्त्रं विद्याशास्त्रं चानर्थकं स्यात्। तस्मात्तत्प्रकृतित्वेऽपि सुषुप्तादाविव बीजभावावशेषैवेषा तत्सम्पत्तिरिति ॥८॥

(५०५) सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥९॥

तच्चेतरभूतसहितं तेजः प्रमाणतश्चकारात्स्वरूपतश्च सूक्ष्ममस्ति। कुतः? नाडीद्वारा निष्क्रमणश्रवणादिभ्यस्तथा सूक्ष्मत्वस्योपलब्धेः ॥९॥

(५०६) नोपमर्देनात ॥१०॥

अतः सूक्ष्मत्वादेव नास्य स्थूलदेहस्योपमर्देन दाहादिनिमित्तेन सूक्ष्मं शरीरमुपमृद्यते ॥१०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु सूक्ष्मतेजःसद्भावे किं मानमित्यत आह—

(५०७) अस्यैव चोपपत्तेरेष ऊष्मा ॥११॥

अस्यैव सूक्ष्मतेजस एवैष ऊष्माऽन्यस्मिन्देहे संस्पर्शेनोपलभमानो दृश्यते। अन्यथा मृतदेहे रूपाद्युपलब्धिवद्देहधर्मत्वे सोऽप्युपलभ्येत। तस्मात्सति तेजसि जीवद्दशायामूष्मोपलब्धे मृतदेहे तदनुपलब्धेरित्यन्वयव्यतिरेकाभ्यामूष्मणस्तेजोधर्मत्वोपपत्तेरिति ॥११॥

[६ प्रतिषेधाधिकरणम् । सू० १२–१४]

नन्वामृत्युपक्रमाधिकरणे मुख्यामृतत्वे उत्क्रान्त्यभावाभिधानं न युक्तमित्याक्षेपसंगत्येदमाह—

(५०८) प्रतिषेधादिति चेन्न शारीरात् ॥१२॥

अत्र पूर्वपक्षे निर्गुणब्रह्मविदोऽपि ब्रह्मलोकप्राप्तिः, सिद्धान्तेऽत्रैव मुक्तिरिति फलभेदः। निर्गुणब्रह्मविदां प्राणोत्क्रान्तिरस्ति न वेति सन्देहे; अस्तीति पूर्वपक्षः। ननु 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति' (बृ० ४।४।६) इति श्रुत्या निर्गुणब्रह्मविदां देहादुत्क्रान्तिप्रतिषेधान्नास्त्युत्क्रान्तिरिति चेन्न; शारीरात्। जीवादुत्क्रान्तेः प्रतिषेधान्न शरीरात्। कथमेतदवगम्यते? 'न तस्मात्प्राणा उत्क्रामन्ती'ति माध्यन्दिनशाखायां पञ्चमीप्रयोगेन तथावगमात् षष्ठीप्रयोगस्य सम्बन्धसामान्यावगमकस्य सम्बन्धविशेषे व्यवस्थापनाच्च। तस्मादुच्चिक्रमिषोर्जीवात्प्राणा नापक्रामन्ति सहैव तेन गच्छन्तीत्यर्थः॥१२॥

(५०९) स्पष्टो ह्येकेषाम् ॥१३॥

सिद्धान्तस्तु—

नैतद्युक्तं, हि यस्मादेकेषां काण्वानां शाखायां 'यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो नेति' (बृ० ३।२।११) इत्यार्त्तभागप्रश्ने 'नेति होवाच याज्ञवल्क्यः'(बृ० ३।२।११) इति प्रतिवचने निर्गुणब्रह्मविदां देहात्प्राणोत्क्रान्तिप्रतिषेधः स्पष्टः उपलभ्यते। अतो न तस्य प्राणोत्क्रान्तिरपित्वत्रैव लयः। अन्यथानुत्क्रान्तप्राणानां देहेऽवस्थाने 'स उच्छ्वयत्याध्मायत्याध्मातो मृतःशेते' (बृ० ३।२।११) इत्युत्क्रान्तियात्रंदहस्योच्छूनत्वादिलिङ्गं बाध्येत। अतो देहापादानस्यैवोत्क्रमणस्य प्रतिषेधः। एवं पञ्चमीपाठे प्राधान्येन शारीरादुत्क्रान्तिप्रतिषेधेऽपि षष्ठीपाठे विद्वत्सम्बन्धिन्युत्क्रान्तिर्देहादेव प्रतिषिद्धा बोध्येति ॥१३॥

(५१०) स्मर्यते च ॥१४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः' इति महाभारते विदुषामुत्क्रान्त्यभावः स्मर्यते चेत्यर्थः। तस्माद्ब्रह्मविदां गत्युत्क्रान्त्योरभावः सिद्ध इति ॥१४॥

[७ वागादिलयाधिकरणम्। सू० १५]

ननु ब्रह्मणि प्राणलयाभिधानमयुक्तं, 'गताः कलाः पञ्चदश प्रतिष्ठाः' (मु० ३।२।७) इति प्राणशब्दोदितानामिन्द्रियाणां भूतानां च ब्रह्मवित्प्रकरणे पृथिव्यादिषु लयश्रवणादित्याक्षेपसंगत्येदमाह—

(५११) तानि परे तथा ह्याह ॥१५॥

अत्र पूर्वपक्षे विदुषां प्राणादीनां लयः स्वकारणे, सिद्धान्ते परमात्मनीति फलभेदः। किमत्र ब्रह्मविदां प्राणानां विलयः पृथिव्यादिषु, परमात्मनि वेति संशये; 'गताः कलाः पञ्चदश प्रतिष्ठाः' (मु० ३।२।७) इति श्रुत्या स्वकारणेषु पृथिव्यादिषु प्राणानां लय इति पूर्वपक्षे सिद्धान्तमाह—तानि यथोक्तानि प्राणाख्यानीन्द्रियाणि परे परमात्मनि प्रलीयन्ते। तथा ह्याह श्रुतिः—'एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती' (प्र० ६।५) ति। ननु पूर्वश्रुतिविरोधः; विषयभेदेनाविरोधात्। व्यवहारदृष्ट्या कलानां स्वोपादानेषु लयः। परमार्थस्तु स्वोपादानैः सह ते कलाः परमात्मन्येव लीयन्ते, रज्जुज्ञानेनाज्ञानतत्कार्यसर्पादिनिवृत्तिवत्तन्निवृत्तिरिति तात्पर्यम् ॥१५॥

[८ अविभागाधिकरणम्। सू० १६]

इत्थं पूर्वोक्तविद्वत्कलासु किञ्चिदन्यद्विचारयितुमेकविषयत्वसंगत्येदमाह—

(५१२) अविभागो वचनात् ॥१६॥

अत्र पूर्वपक्षे मोक्षासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। किमविद्वद्वद्विदुषोऽपि कलालयः सावशेषो निरवशेषो वेति सन्देहे; सावशेष इति पूर्वपक्षः। सिद्धान्तस्तु—निमित्तापाये नैमित्तिकस्य निरवशेषाय इति नियमेन विद्ययाऽविद्यानिवृत्तौ तन्नैमित्तिकानां विद्वत्कलानां ब्रह्मणा सहात्यन्तमविभाग एव न सावशेषो लयः। कुतः? वचनात्। कलालयोक्त्यनन्तरं 'भिद्यते तासां नामरूपे पुरुष एवेत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवती' (प्र० ६।५) ति कलानां निरवशेषवचनादित्यर्थः। तस्मात्सावशेषो लयोऽविद्वद्विषय इति भावः ॥१६॥

[९ तदोकोऽधिकरणम्। सू० १७]

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं सगुणब्रह्मोपासकानामुत्क्रान्तिर्यथा मार्गोपक्रमपर्यन्तं तथा मार्गोपक्रमेऽप्यस्तु हृत्प्रद्योतनादेः समत्वश्रवणादिति दृष्टान्त-संगत्येदमाह—

(५१३) तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्त-च्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥१७॥

अत्र पूर्वपक्षे विद्याधिकृतस्यातिशयासिद्धिः, सिद्धान्ते तत्सिद्धि-रिति फलभेदः। किमत्र सगुणब्रह्मविदोऽविदुषश्चाविशेषेण मूर्धादिभ्य उत्क्रान्तिरुत विदुषो मूर्धस्थानादेवाविदुषश्च स्थानान्तरेभ्य इति संशये; अविशेषेणेति पूर्वपक्षः। सिद्धान्तस्तु तदोकोऽग्रज्वलनं तस्य लीनवृत्ति-वागादिकलापस्योत्क्रमिष्यतो जीवस्योक आयतनं हृदयं 'स एतास्तेजो-मात्राः समभ्याददानो हृदयमेवान्ववक्रामती'ति श्रुतेः। तदग्रज्वलन-पूर्विका प्राप्तव्यज्ञानरूपप्रद्योतनपूर्विका 'तेन प्रद्योतेनैष आत्मा निष्क्रा-मतीत्युत्क्रान्तिः। तेन प्रद्योतनेन प्रकाशितद्वारो विद्वानविद्वांश्च भवति। तत्राविदुषः स्थानान्तरेभ्यो निष्क्रान्तत्वेऽपि विद्यासामर्थ्याद्विद्वान् मूर्धस्थानादेव निष्क्रामति। अन्यथा तस्योत्कृष्टलोकप्राप्तिरूपं फलं न लभ्येत, तथा चानर्थक्यं विद्यायाः स्यात्। ननु स्थानान्तरेभ्योप्यु-त्क्रान्तस्योत्कृष्टं फलं स्यादित्यत आह—तच्छेषगत्यनुस्मृति योगाच्च। विद्याशेषभूता मूर्धन्यनाडीसम्बद्धा गतिरनुशीलयितव्येति विद्याशेष-भूतगत्यनुस्मृतिविधानान्नस्थानान्तरेभ्य उत्क्रान्तस्याविदुषोऽप्युत्कृष्ट-फलावाप्तिरभिमता। अन्यथा विदुषो विशिष्टगतिचिन्तनं व्यर्थं स्यात्। अतो हार्देन ब्रह्मणा सूपासितेनानुगृहीतस्तद्भावापन्नो विद्वान् मूधन्यैव शताधिकया 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती' (छा० ८।६।६) ति शतादतिरिक्तयैकशततम्या नाड्या निष्क्रामतीतराभि-रितरे इति ॥१७॥

[१० रश्म्यधिकरणम् । सू० १८]

अत्र पूर्वाधिकरणोक्तनाडीसम्बद्धरश्मीनुपजीव्य किञ्चिद्विचार-यितुमुपजीव्योपजीवकभागसंगत्येदमाह—

(५१४) रश्म्यनुसारी ॥१८॥

अत्र पूर्वपक्षे दिवामृतस्यैव रश्मिप्राप्तिः, सिद्धान्ते रात्रावहनि चाविशेषेण सगुणब्रह्मविदो रश्मिप्राप्तिरिति फलभेदः। 'अथैतैरेव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रश्मिभिरूर्ध्वमाक्रमते' (छा० ८।६।५) इत्यत्र मूर्धन्यनाड्योत्क्रान्तस्य रश्मिसम्बन्धः श्रूयमाणः किमहनि मृतस्यैव किंवा रात्रावपीति संशये; अहन्येव मृतस्यैवेति पूर्वपक्षः। सिद्धान्तस्तु अविशेषश्रवणाद् रात्रावहनि वा मृतो रश्म्यनुसारी भवतीति ॥१८॥

(५१५) निशि नेति चेन्न; सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥१९॥

अहनि नाडीरश्मिसम्बन्धोऽस्तीत्यहनि मृतस्यैव रश्म्यनुसारित्वं स्यान्नतु रात्रौ मृतस्येतिचेन्न; नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात्। दर्शयति चैतमर्थं श्रुतिः—'अमुष्मादादित्यात्प्रतायन्ते, ता आसु नाडीसु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते, तेऽमुष्मिन्नादित्ये सृप्ताः' (छा० ८।६।२) इति। ग्रीष्मकाले निशास्वपि प्रतापादिकार्यदर्शनेन किरणानुवृत्तिरुपलक्ष्यते। यदि रात्रौ मृतस्य विनैव रश्म्यनुसारेणोर्ध्वमाक्रमणं स्यात्तदा रश्म्यनुसरणमनर्थकं स्यात्। रात्रिमरणापराधमात्रेण विद्वान्नोर्ध्वमाक्रमेत, तदा विद्याफलस्य पाक्षिकत्वेन तत्राप्रवृत्तिः स्यात्। तस्मान्निश्यपि प्रेतस्याविशेषेण रश्म्यनुसारित्वमिति ॥१९॥

[११ दक्षिणायनाधिकरणम्। सू० २०–२१]

अत्र पूर्वोक्तन्यायस्यातिदेशत्वान्नास्य पृथक्संगत्यपेक्षेति—

(५१६) अतश्चायनेऽपि दक्षिणे ॥२०॥

अत्र पूर्वपक्षे दक्षिणायने मृतस्य विद्याफलप्राप्तये उत्तरायणार्थं प्रयत्नापेक्षा, सिद्धान्ते तदनपेक्षेति फलभेदः। किं दक्षिणायने मृतस्य विदुषो विद्याफलं प्राप्यते न वेति संशये; उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य तत्प्रतीक्षास्मरणाच्च न प्राप्यते इति पूर्वपक्षे सिद्धान्तमाह—अतएव कालान्तरप्रतीक्षानुपपत्तेरपाक्षिकफलत्वाद्विद्यायाः दक्षिणायनेऽपि मृतो विद्वान् विद्याफलं प्राप्नोत्येव। प्राशस्त्यप्रसिद्धिरविद्वद्विषया। भीष्मस्य प्रतीक्षापरिपालनमाचारपरिपालनार्थं पितृप्रसादलब्धस्वेच्छामरणज्ञापनार्थं चेत्यर्थः ॥२०॥

ननु तर्हि गीतायामनावृत्तयेऽहरादिकालविशेषनियमनं व्यर्थमिति चेत्तत्राह—

(५१७) योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥२१॥

योगिनः स्मार्त्तोपासकान्प्रति चायमहरादिकालविशेषः स्मर्यतेऽना-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृत्तये। स्मार्ते चैते योगसांख्ये, न श्रौते। अतो विषयभेदात्प्रमाणविशेषाच्च नास्य स्मार्तस्य कालनियमस्य श्रौतोपास्तिष्ववतारः। ननु 'अग्निर्ज्योतिरहः शुक्लः' 'धूमो रात्रिस्तथा कृष्ण.' इत्यादौ श्रौतार्थस्यैव प्रत्यभिज्ञानमिति चेन्न; तं कालं वक्ष्यामीति कालप्रतिज्ञानाद्विरोधपरिहारस्योक्तत्वात्तदभिमानिदेवतार्थपक्षे समानार्थकतयाऽदोषाच्च। तस्माद्विद्वान् सर्वदैव प्रेतो विद्याफलमाप्नोतीत्यनवद्यम् ॥२१॥

इति ब्रह्मसूत्रविद्यानन्दवृत्तौ चतुर्थाध्यायस्य द्वितीयः पादः ॥२॥

चतुर्थाध्याये तृतीयः पादः

[अत्र पादे सगुणविद्यावतो मृतस्योत्तरमार्गाभिधानम्]

इत्थ मुत्क्रान्तिमतिक्रान्ते पादे निरुप्य तत्साध्यमार्गं निरुपयितु हेतुहेतुमद्भावसंगत्या पादोऽयमारभ्यते।

[१ अर्चिराद्यधिकरणम्। सू० १]

यदा कदाचिन्मृतस्यापि फलप्राप्तिवद्येन केनचिन्मार्गेण गतस्य फलप्राप्तिः स्यादिति दृष्टान्तसंगत्येदमधिकरणमारभ्यते—

(५१८) अर्चिरादिना तत्प्रथितेः ॥१॥

अत्र पूर्वपक्षे विद्याफलप्राप्तये मार्गविकल्पः, सिद्धान्ते तदैक्यमिति फलभेदः। 'अथैतैरेव रश्मिभिरुर्ध्वमाक्रमते' (छा० ८।६।५) इति रश्मिरुपोमार्गः। 'तेऽर्चिषमभिसम्भवन्ती' (बृ० ६।२।१५) त्वर्चिरादिरूपः। 'सूर्यद्वारेण ते विरजाः प्रयान्ती' (मु० १।२।११) इति सूर्यरूपश्चेत्यनेकधा मार्गाः श्रूयन्ते। तत्र ब्रह्मलोकप्राप्तिहेतौ मार्गे श्रुतिविप्रतिपत्त्या किमेते मिथो भिन्नामार्गाः किंवानेकविशेषणोपेतः एक एवेति संशये; भिन्नप्रकरणत्वाद्भिन्नोपासनाशेषत्वाच्चैते मार्गा भिन्ना इति पूर्वपक्षः। सिद्धान्तस्तु सर्वो ब्रह्मलोकप्रेप्सुरर्चिरादिनैकेन पथा गच्छति। कुतः ? तत्प्रथितेः। पञ्चाग्निविद्याप्रकरणे 'ये चेमे अरण्ये श्रद्धा सत्यमित्युपासते, तेऽर्चिषमभिसम्भवन्ती' (बृ० ६।२।१५) त्यादिना तस्यार्चिरादिमार्गस्य विद्यान्तरशीलिनामपि प्रथितेः श्रुतत्वादित्यर्थः। न च प्रकरणभेदाद्भिन्नोपासनशेषत्वाच्च मार्गभेद इति वाच्यम्; मार्गैकदेशप्रत्यभिज्ञानाद्गन्तव्यब्रह्मलोकाभेदाच्च विद्यैकत्वे मिथो गुणोपसंहारवत्सर्वत्र सर्वमार्गविशेषणानामुपसंहारेऽदोषात्। तस्मादनेकविशेषणयुक्त एक एव पन्थेति भावः ॥१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[२ वाय्वधिकरणम् । सू० २]

इत्थं यथा सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानान्मार्गैक्यं, तथाऽन्यनन्तरं वायुप्रत्यभिज्ञानात्स तत्रैव निवेशयितव्य इति दृष्टान्तसंगत्येदमाह—

(५१६) वायुमब्दादविशेषविशेषाभ्याम् ॥२॥

अत्र पूर्वपक्षे पाठक्रमोऽनुसरणीयः, सिद्धान्तेऽर्थक्रमात्तद्बाध इति फलभेदः। 'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति, स वायुलोकमि' (कौ० १।३) ति देवयानः पन्थाः श्रूयते कौषीतक्याम्। छान्दोग्ये 'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्मान्। मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति' (छा० ५।१०।१२) इति। तत्रोभयश्रुतावग्निरादौ पठितः पश्चात्कौषीतकिश्रुतौ वायोः पाठः। सोऽर्चिरादिमार्गेऽश्रूयमाणः कतमस्मिन् निवेशयितव्यः अग्नेः परं संवत्सरात्परं वेति संशये; पाठक्रमानुरोधादग्नेः परमिति पूर्वपक्षः। सिद्धान्तस्तु अब्दात्संवत्सरात्परमादित्यादर्वाञ्चं वायुमभिसम्भवन्ति। कुतः? अविशेषविशेषाभ्याम्। 'स वायुलोकमि' (कौ० १।३) त्यत्राविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे 'यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते, स आदित्यमागच्छती' (बृ० ५।१०।१) त्यादावादित्यात्पूर्वं विशेषेणोपदिश्यते। तस्मादादित्यात्पूर्वं वायोर्विशेषशब्दात्संवत्सरादित्ययोरन्तराले वायुर्निवेशयितव्यः। ननु स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकमि' त्यग्नेः परत्वविशेषदर्शनादग्नेः परं वायुः कस्मान्न निवेश्यत इति चेन्न; क्रमवचनस्यात्राभावात् तस्य पदार्थमात्रावबोधकत्वाच्च। तस्मान्मासेभ्यः संवत्सरं संवत्सराद्देवलोकं देवलोकाद्वायुलोकं तस्मादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतमिति निष्पन्नक्रमः। छान्दोग्यवाजसनेयकयोरेकत्र देवलोको नास्ति परत्र संवत्सरः। उभयमुत्रयत्र निवेशनीयमिति भावः ॥२॥

[३ तडिदधिकरणम् । सू० ३]

अस्तु स्थानविशेषश्रुत्याऽर्चिरादिमार्गपर्वत्वेन वायोः सम्बन्धः, तथापि वरुणादीनां स्थानविशेषश्रुत्यभावात्कथं तत्र सम्बन्धः स्यादिति प्रत्युदाहरणसंगत्येदमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तडितोधिवरुणः सम्बन्धात् ॥३॥

अत्र पूर्वपक्षे वरुणादेर्नार्चिरादिमार्गपर्वत्वसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। 'स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमि' (कौ० १।३) ति श्रुतोऽपि वरुणादिमार्गपर्वत्वेन सम्बध्यते न वेति संशये; नेति पूर्वपक्षः। सिद्धान्तस्तु—'चन्द्रमसो विद्युतमि'ति विद्युतोऽधि उपरिष्टाद्वरुणः सम्बध्यते। कुतः ? सम्बन्धात्। विद्युद्वरुणयोरब्द्वारा सम्बन्धात्। दृश्यते हि विद्युत्तीव्रनिर्घोषानन्तरमपां वर्षणम्। अपामधिपतिश्च वरुण इति श्रुत्यादौ प्रसिद्धिः। वरुणादधीन्द्रादेः पाठसामर्थ्याद्बाधकाभावाच्च निवेशः। तस्मादागन्तुकानामन्ते निवेश इति न्यायादर्चिरादिमार्गे वरुणादीनामन्ते निवेशः समुचितः॥ ३॥

[४ आतिवाहिकाधिकरणम्। सू० ४–६]

इत्थमर्चिरादिक्रमं निरुप्य स्वरूपमिह चिन्त्यते। सम्बन्धात्तडितोधि वरुणो निवेश्य इत्युक्तं तद्वत्साद्दश्यसम्बन्धादर्चिरादेर्मार्गचिह्नत्वोपदेशः कुतो नाभ्युपेयते इत्याक्षेपसंगत्येदमाह—

(५२१) आतिवाहिकास्तल्लिङ्गात् ॥४॥

अत्र पूर्वपक्षेऽनुशासनस्य लोकश्रुतेर्वा मुख्यत्वं, सिद्धान्ते न्यायोपेतलिङ्गस्य मुख्यत्वमिति फलभेदः। किमर्चिरादीनि मार्गचिह्नानि, भोगभूमयो, नेतारो वा गन्तॄणां वेति संशये; ग्रामं गच्छतां गिरिवृक्षादिवच्चिह्नानि, लोकशब्दप्रयोगाद्भोगभूमयो वेति पूर्वपक्षः। सिद्धान्तस्तु आतिवाहिकास्ते कार्यब्रह्मगन्तॄणां नेतारः। कुतः ? तल्लिङ्गात्। तथाहि चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान्ब्रह्म गमयति' (छा० ४।१५।५) इति श्रुतिरमानवपुरुषो विद्युल्लोकादुपासकान्गमयतीति गमयितृत्वं श्रावयति। किं चोपदेशस्यार्चिरादीनामातिवाहिकत्वेऽप्यविरोधः। ननु लोकशब्दश्रुतेर्भोगभूमय इति चेन्न, तत्र गतानामुपासकानां निलीनेन्द्रियतया भोगासम्भवात्। अतोऽर्चिरादिषु पुरुषा मानवास्ततश्च तन्नेतार इति ॥४॥

ननु न्यायाभावाल्लिङ्गमात्रमगमकमित्यत आह—

(५२२) उभय व्यामोहात्तत्सिद्धेः ॥५॥

अर्चिरादयस्तत्रगन्तारश्च देहाभावादचेतनाश्चेत्तर्हि उभयोर्व्यामोहादचेतनत्वादुपासकानामूर्ध्वगतिर्न स्यात्। अतः स स्वयं यत्नशून्यश्च-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्तो नेयोऽन्येन चेतनेनेति लोकन्यायोपेताल्लिङ्गात्तत्सिद्धेर्नेतृत्वसिद्धेरिति। तस्मादग्निस्वामिकं गतो जीवस्तदभिमानिना देवेनातिवाह्यते इत्येवमन्यत्रापि बोध्यम् ॥५॥

नन्वस्तु विद्युल्लोकादमानवस्य नेतृत्वं, वरुणादीनां तदश्रवणेन कथं नेतृत्वमित्यत आह—

(५२३) वैद्युतेनैव ततस्तच्छ्रुतेः ॥६॥

विद्युल्लोकमागतोऽमानवो वैद्युतस्तेनैव ततो विद्युल्लोकादूर्ध्वं वरुणादि लोकेष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्तीति। 'चन्द्रोमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयती' (छा० ४।१५।५) त्यमानवस्यैव गमयितृत्वश्रुतेः। वरुणादयस्तु तस्यैव साहाय्यानुष्ठानेनातिवाहका न प्राधान्येनेति भावः ॥६॥

[५ कार्याधिकरणम्। सू० ७–१४]

इत्थं गतिनिरुपणानन्तरं गन्तव्यं निरुपयितुं हेतुहेतुमद्भावसंगत्येदमाह—

(५२४) कार्यं बादरिरस्य गत्युपपत्तेः ॥७॥

अत्र पूर्वपक्षे मार्गस्य मोक्षार्थता, सिद्धान्ते भोगार्थतेति फलभेदः। 'स एनान्ब्रह्म गमयती' त्यत्र कारणं कार्यं वा ब्रह्मग्राह्यमिति संशये; कारणं ब्रह्मेति पूर्वपक्षः। सिद्धान्तस्तु कार्यमेव ब्रह्मैनानमानवो गमयतीति बादरिराचार्यो मन्यते। कुतः? अस्यैव कार्यब्रह्मणः प्रदेशवत्त्वेन गन्तव्यत्वोपपत्तेः। अतः परस्मिन्ब्रह्मणि न गन्तव्यत्वादिकमिति भावः ॥७॥

(५२५) विशेषितत्वाच्च ॥८॥

'ब्रह्मलोकान्गमयति' (बृ० ६।२।१५) इति श्रुत्यन्तरे बहुवचनेन विशेषितत्वात्कार्यब्रह्मविषयैव गतिः। नहि बहुवचनविशेषणं परस्मिन्ब्रह्मणि युक्तं, कार्ये त्ववस्थाभेदात्सम्भवति बहुवचनमिति चकारार्थः॥

ननु कार्यविषयेऽपि ब्रह्मशब्दोऽनुपपन्नः, तत्र नपुंसकत्वाभावादित्यत आह—

(५२६) सामीप्यात्तु तद्व्यपदेशः ॥९॥

तुशब्दः शङ्कानिरासार्थः। परब्रह्मसामीप्यादपरस्मिन्ब्रह्मण्यपि ब्रह्मशब्दस्य लक्षणया व्यपदेशो न विरुध्यते। परस्यैव ब्रह्मणः क्वचित्कैश्चिदुपाधिधर्मैर्मनोमयत्वादिभिरुपास्यमानत्वेनापरत्वमिति ॥९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नन्वेतेषां कार्यब्रह्मप्राप्तावनावृत्तिश्रवणं न घटते। दर्शयति चानावृत्तिं तेषाम् 'एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्तन्ते' (४। १५।६) इति श्रुत्यत आह—

(५२७) कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥१०॥

कार्यब्रह्मलोकस्य प्रलये सति तत्रैवोत्पन्नब्रह्मात्मसाक्षात्कारास्तदध्यक्षेण हिरण्यगर्भेण सहातः कार्याद्ब्रह्मणः परं विशुद्धं ब्रह्म प्रतिपद्यन्ते इति क्रममुक्तिरनावृतिश्रुत्यभिधानादवगन्तव्येत्यर्थः ॥१०॥

(५२८) स्मृतेश्च ॥११॥

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमि'ति स्मृतेरपि ब्रह्मलोकं गतानां क्रमेणमुक्तिरवगम्यते ॥११॥

इत्थं सिद्धान्तमुक्त्वा पूर्वपक्षमाह—

(५२९) परं जैमिनिर्मुख्यत्वात् ॥१२॥

'स एनान्ब्रह्म गमयती' (छा० ४।१५।६) त्यत्र परमेव ब्रह्मामानवः प्रापयति। कुतः? मुख्यत्वात्। तत्रैव ब्रह्मशब्दस्य मुख्यत्वादिति जैमिनिराचार्यो मन्यते ॥१२॥

(५३०) दर्शनाच्च ॥१३॥

'तयोर्ध्वमायनमृतत्वमेती' (छा० ८।६।६, क० ६।१६) इत्यत्रामृतत्वस्यप्राप्तेर्गतिपूर्वकत्वदर्शनात् परमेव ब्रह्म गमयतीति। नहि कार्ये ब्रह्मण्यमृतत्वं मुख्यमुपपद्यते; तस्य कार्यत्वेन विनाशित्वादित्यर्थः॥१३॥

(५३१) न च कार्ये प्रतिपत्त्यभिसन्धिः ॥१४॥

अपि च 'प्रजापतेः सभां वेश्म प्रपद्ये' (छा० ८।१४।१) इति नायं प्रतिपत्त्यभिसन्धिः प्रजापतिवेश्मप्राप्तिसंकल्पः कार्ये कार्यब्रह्मविषये सम्भवति, किन्तु परस्मिन्नेव ब्रह्मणि। 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मे' (छा० ८।१४।१) ति कार्यविलक्षणस्य परस्यैव ब्रह्मणः प्रकृतत्वादिति पूर्वपक्षे सिद्धान्ते यद्वक्तव्यमासीत् तत्पुरस्तादेवोक्तम्। किंच 'ब्रह्मलोकान् गमयती' त्यादिश्रुत्यन्तरे बहुवचनमवस्थाभेदमुपादाय कार्यब्रह्मण्येव संघटते न कारणे ब्रह्मणि। न च प्रकरणात्परं ब्रह्माभ्युपेयमिति वाच्यम्; 'प्रजापतेः सभां वेश्म प्रपद्य' इति श्रुतिवाक्याभ्यां बलस्य प्रकरणप्रमाणस्य वाधितत्वाद्वेश्मप्राप्तिसंकल्पस्य कार्यब्रह्मविषद्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यकत्वोपपत्तेश्च । अमृतत्वश्रुतिरपि समाप्ताधिकारेण कार्यब्रह्मणा सहोपासकस्य परब्रह्मप्राप्तिरुपपद्यते । किं च मुख्यामृतत्वप्राप्तिर्न गतिपूर्विका, तस्य स्वरूपत्वेन नित्यप्राप्तत्वात्सर्वगतत्वाच्च । अतः कार्यमेव ब्रह्म गन्तव्यमित्यर्थः ॥१४॥

[६ अप्रतीकालम्बनाधिकरणम् । सू० १५–१६]

इत्थं गन्तव्यविशेषनिरुपणानन्तरं गन्तृविशेषं निरुपयितुं गन्तृगन्तव्यभावसंगत्येदमाह—

(५३२) अप्रतीकालम्बनान्नयतीति बादरायणः उभयथाऽदोषात्तत्क्रतुश्च ॥१५॥

अत्र पूर्वपक्षे सर्वेषामुपासकानामुत्तरमार्गसिद्धिः, सिद्धान्ते विभज्य तत्सिद्धिरिति फलभेदः । किं सर्वान्विकारालम्बनोपासकानमानवः पुरुषोऽविशेषेण ब्रह्मलोकं नयति, कंश्चिदेवेति संशये; नियामकाभावात्सर्वानिति पूर्वपक्षः । सिद्धान्तस्तु—प्रतीकोपासकभिन्नान्विकारोपासकान्नयत्यमानवः पुरुषः ब्रह्मलोकमित्याचार्यबादरायणो मन्यते । एवं च कांश्चिदुपासकान्नयति कांश्चिन्नेत्युभयथा स्वीकारेऽदोषात् 'अनियमः सर्वासामि'त्यनियमन्यायस्य प्रतीकभिन्नोपासनेषूपपत्तेरविरोधः। तत्क्रतुश्चास्योभयथाभावस्य नियामको हेतुर्बोध्यः तस्य ब्रह्मणः क्रतुरुपासनं यस्य स तत्क्रतुर्ब्रह्मोपासक एव ब्राह्ममैश्वर्यमाप्नोति नान्यः प्रतीकोपासकः । 'तं यथा यथोपासते तदेव भवती'ति श्रुतेः । प्रतीकोपासनासु 'नामब्रह्मे' त्यादिषु प्रतीकानां प्राधान्यान्न तत्र ब्रह्मक्रतुत्वमस्ति, येन प्रतीकोपासकानां ब्रह्मप्राप्तिराशङ्क्येत । केवलं पञ्चाग्न्युपासकानामब्रह्मक्रतूनां श्रुतिबलाद्ब्रह्मप्राप्तिरिति विवेकः ॥१५॥

(५३३) विशेषं च दर्शयति ॥१६॥

'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति' (छा० ७।१।५) इति नामादिषु प्रतीकोपासनेषु पूर्वापेक्षयोत्तरोत्तरत्र विशेषं फलं दर्शयति 'वाग्वाव नाम्नो भूयसी' (छा० ७।२।१) ति श्रुतिः । स चायं फलविशेषः प्रतीकानामुत्कर्षापकर्षधर्माणामुपास्यत्वे युज्यते नैकरूपस्य निर्विशेषब्रह्मण उपास्यत्वे । तस्मान्न समेषां प्रतीकाप्रतीकोपासकानां ब्रह्मप्राप्तिरिति शोभनम् ॥१६॥

इति ब्रह्मसूत्रविद्यानन्दवृत्तौ चतुर्थाध्यायस्य तृतीयः पादः ॥३॥

—:०ॐ०:—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्थाध्याये चतुर्थः पादः

[अत्रपादे ब्रह्मप्राप्ति–ब्रह्मलोकस्थितिनिरूपणम्]

तृतीये पादे सगुणविद्याफलोपयोगिनो गतिगन्तव्यगन्तृविशेषा विचारिताः। अधुना निर्गुणब्रह्मविदां ब्रह्मभावाविर्भावं, सगुणोपासकानां च तत्फलं सर्वेश्वरतुल्यभोगभाक्त्वं निरूपयितुं पादोऽयमारभ्यते।

[१ सम्पद्याविर्भावाधिकरणम् । सू० १–३]

(५३४) सम्पद्याविर्भावः स्वेन शब्दात् ॥१॥

पादान्तरत्वान्नास्य पूर्वाधिकरणसंगत्यपेक्षा। अत्र पूर्वपक्षे स्वर्गमोक्षयोरविशेषः, सिद्धान्ते विशेष इति फलभेदः। 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा० ८।१२।३) इत्यत्र किं देवलोकाद्युपभोगस्थानेष्विवात्र निर्गुणब्रह्मविदामपि केनचिदागन्तुकेनविशेषेणाभिनिष्पत्तिरात्ममात्रेण वेति सन्देहे, मोक्षस्यापि फलत्वाविशेषात्स्वर्गवद्विशेषेणाभिनिष्पत्तिरिति पूर्वपक्षः। सिद्धान्तस्तु–सम्पद्य स्वप्रकाशमात्मानं साक्षादनुभूय केवलेनैवात्मनाविर्भवति विद्वान्, न धर्मान्तरेण। कुतः ? 'स्वेन रूपेणाभिनिष्पद्यते' इति शब्दादित्यर्थः। अन्यथा स्वेनेति विशेषणमनर्थकम्। ननु तस्यात्मीयत्वमप्यर्थं इति चेन्न; येन केनापि रूपेणाभिनिष्पत्तौ तस्य तदात्मीयत्वात्। न च निर्गुणब्रह्मविदो विशेषरूपेणाभिनिष्पत्तिः, फलत्वात्, स्वर्गादिवदित्यनुमानमिति वाच्यम्; तस्य मोक्षनित्यत्वश्रुत्या बाधितत्वादिति भावः ॥१॥

ननु स्वरूपात्मकमोक्षस्य नित्यप्राप्तत्वात्किमत्र पूर्वावस्थातो वैशिष्ट्यमित्यत आह—

(५३५) मुक्तः प्रतिज्ञानात् ॥ २॥

पूर्वमवस्थात्रयकलुषितोऽपि सन् जीवोऽधुना सर्वबन्धविनिर्मुक्तः शुद्धेनात्मनावतिष्ठते। कुतो यमवगम्यते ? प्रतिज्ञानात्। 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामी' (छा० ८।९।३, ८।१०।४, ८।११।३) त्यवस्थासकलदोषनिर्मुक्तस्यावात्मनो व्याख्येयत्वेन प्रतिज्ञातात्। एवं च प्रतिज्ञानुसारम् 'अशरीरं वावसन्तं न प्रियाप्रिये स्पृशतः' (छा० ८।१२।१) इत्युपन्यासः 'स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुषः' (छा० ८।१२।३) इत्युपसंहारोऽपि तत्रावलोकनीयः ॥२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु 'परं ज्योतिरूपसम्पद्यते' (छा ८।१२।३) इति कार्यगोचर ज्योतिरुपसन्नस्य कथं मुक्ततेत्यत आह—

(५३६) आत्मा प्रकरणात् ॥३॥

आत्मैवात्र ज्योतिः शब्देनोच्यते न भौतिकं तेजः। कुतः ? प्रकरणात्। 'य आत्माऽपहतपाप्मा विजरो विमृत्युः' (छा० ८।७।१) इत्यात्मप्रकरणात्। अन्यथा प्रकृतहाना प्रकृतप्रक्रिये प्रसज्येयाताम्। 'तद्देवा ज्योतिषां ज्योतिः' (बृ० ४।४।१६) इत्यात्मन्यपि ज्योतिःशब्दप्रयोगादित्यर्थः ॥३॥

[२ अविभागेन दृष्टत्वाधिकरणम् । सू० ४]

इत्थं परंज्योतिरूपसम्पत्तिर्ब्रह्मविदोऽविशेषेणोक्ता। अधुना तत्रैवान्यत्किञ्चिद्विचारयिमुपजीव्योपजीवकभावसंगत्येदमाह—

(५३७) अविभागेन दृष्टत्वात् ॥४॥

अत्र पूर्वपक्षे मुक्तौ जीवब्रह्मणोरत्यन्तभेदसिद्धिः, सिद्धान्तेऽत्यन्ताभेदसिद्धिरिति फलभेदः। किं स्वेन रूपेणाभिनिष्पन्नायां मुक्तौ जीवो ब्रह्मभिन्नत्वेनावतिष्ठतेऽभिन्नत्वेन वेति संशये; 'ज्योतिरूपसम्पद्य' (छा० ८।१२।३) ति कर्त्तृकर्मनिर्देशाद्ब्रह्मभिन्नत्वेनावस्थानमिति पूर्वपक्षः। सिद्धान्तस्तु मुक्तोऽविभागेन परेणात्मनावतिष्ठते। कुतः ? दृष्टत्वात्। 'तत्त्वमसि' (छा० ६।८।७), 'अहं ब्रह्मास्मि' (बृ० १।४।१०) 'यत्र नान्यत्पश्यति' (छा० ७।२४।१) 'न तु तद्द्वितीयमस्ति, ततोऽन्यद्विभक्तं यत्पश्येद्' (बृ० ४।३।२३) त्यादिश्रुतिष्वविभागेन तयोर्दृष्टत्वात्। भेदनिर्देशस्त्वभेदेऽप्युपचर्यते 'स्वे महिम्नी'ति भावः ॥४॥

[३ ब्राह्माधिकरणम् । सू० ५–७]

यथोक्तं ब्रह्माभिन्नं मुक्तमुपजीव्यान्यत्किञ्चिद्विचारयितुमुपजीव्योपजीवकभावसंगत्येदमाह—

(५३८) ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥५॥

अत्र पूर्वोत्तरपक्षयोः स्वस्वपक्षसिद्धिरेव फलं द्रष्टव्यम्। किमत्र ब्रह्मात्मना सम्पन्नो जीवः सर्वज्ञत्वादिना ब्राह्मेणरूपेणावतिष्ठते, चिन्मात्रेण, उभयात्मना वेति सन्देहे; जीवस्य स्वं रूपं ब्राह्ममपहतपाप्मत्वादिसत्यसकल्पत्वावसानं सर्वज्ञत्वं सर्वेश्वरत्वं च, तेन स्वरूपेण मुक्तात्माऽवतिष्ठते। कुतः ? उपन्यासादिभ्यस्तथात्वावगमात्। तथा हि 'य आत्मापहतपाप्मा ... सत्यकामः सत्यसंकल्पः' (छा० ८।७।१)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यत्रोपन्यासस्तावदुपदेशः। 'तस्य सर्वेषु लोकेषु कामचारोभवती' (छा० ७।२५।२) ति 'स तत्र पर्येती' (छा० ८।१२।३) त्यैश्वर्यावेदनम्। 'यः सर्वज्ञः सर्वविदि'त्यादिव्यपदेशः। अतस्तेभ्योहेतुभ्यः सप्रपञ्च एव मुक्तात्मेति जैमिनिराचार्यो मन्यते ॥५॥

(५३६) चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥६॥

सन्ति खल्वपहतपाप्मत्वादयो धर्मा भेदेन निर्दिष्टाः, ते च पाप्मादिनिवृत्तिमात्रपरतया शब्दविकल्पमात्रास्तदा। जीवस्य तदात्मकत्वाच्चैतन्यात्मकत्वात्तन्मात्रेण चिति ब्रह्मचैतन्येऽवस्थितिर्मुक्तिरित्यौडुलोमिराचार्यो मन्यते। 'अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे' (बृ० ४।५।१३) त्यादिश्रुत्यनुगृहीतत्वात् सत्यकामत्वादि धर्माणा मौपाधिकत्वात् 'न स्थानतोऽपि परस्योभयलिङ्गमि' (ब्र० सू० ३।२।११) त्यनेकारताप्रतिषेधाच्चेति भावः ॥६॥ तत्र सिद्धान्तमाह—

(५४०) एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥७॥

एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि पूर्वोक्तोपन्यासादिभ्यःपूर्वस्यावगतस्य ब्राह्मस्य सर्वज्ञत्वादेर्व्यवहारदृष्ट्या भावाद्विद्यमानत्वान्मुक्तात्मनि सप्रपञ्चत्वनिष्प्रपञ्चत्वयोरविरोधं बादरायण आचार्यो मन्यते, तेषामाविद्यकत्वेन तुच्छत्वादिति भावः ॥७॥

[४ सकल्पाधिकरणम् । सू० ८–६]

पूर्वत्र मुक्तात्मनः सप्रपञ्चत्वनिष्प्रपञ्चत्वयोर्व्यावहारिक तात्त्विकत्वाभ्यां व्यवस्थोक्ता। इह तु संकल्पातिरिक्तसाधनभावाभावयोरेकत्रोपाधावापाततो विरोधेपि न लौकिकानुमानाच्छ्रुतेर्बाध इति प्रत्युदाहरण संगत्येदमाह—

(५४१) संकल्पादेव तु तच्छ्रुतेः ॥८॥

अत्र पूर्वपक्षे संकल्पातिरिक्तस्य लोकवृत्तस्याप्यनुसरणं फलं सिद्धान्ते तु विद्याबलेन संकल्पस्यैव भोगसाधकत्वसिद्धिः फलमिति भेदः। 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ती' (छा० ८।२।१) त्यत्र किं ब्रह्मलोकस्थस्य विदुषः पित्रादिसमुत्थाने संकल्प एव हेतुर्निमित्तान्तरसहितो वा संकल्प इति सन्देहे; विमताः प्रयत्नादिसापेक्षसंकल्पजन्या, भोगसाधनत्वात्सम्मतवदित्यनुमानेन यत्नान्तरसापेक्षसंकल्पाद्विभूतिप्राप्तिरिति पूर्वपक्षः। सिद्धान्तस्तु—संकल्पादेव तु केवलात्पित्रादिविभूतिप्राप्तिरस्य भवति। कुतः ? तच्छ्रुतेः

RajGuru Math; Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'संकल्पादेवास्यपितरः समुत्तिष्ठन्ती' तिनिमित्तान्तरनिरपेक्षसकल्पस्यैव तत्साधनत्वश्रवणात्। तथा च मुक्तात्मसंकल्पस्य लौकिकसंकल्पवत्सापेक्षत्वानुमानं सावधारणश्रुत्या वाधितम्। तत्संकल्पस्य यत्नान्तर सापेक्षत्वे मुक्तस्य यत्नान्तरारम्भात्प्राक् वन्ध्यसंकल्पत्वेन सत्यसंकल्पत्वं हीयेत, श्रुतिश्च पीड्येत। अतः सकल्पादेवास्य यावत्प्रयोजनं सिध्यतीत्यर्थः ॥८॥

(५४२) अत एवं चानन्याधिपतिः ॥९॥

किं चात एव सत्यसंकल्पत्वादेवानन्याधिपतिर्विद्वान्भवति-नास्यान्योऽधिपतिरित्यर्थः।

ब्रह्मस्वरूपस्य विदुषश्चेदन्यः कश्चिदधिपतिस्तदा तद्भोगस्य पराधीनतया सत्यसंकल्पत्वं हीयेत। तस्मात्संकल्पादेव सर्वैश्वर्यप्राप्तिरिति भावः ॥९॥

[५ अभावाधिकरणम् । सू० १०-१४]

पूर्वत्र संकल्पादेवेत्यवधारणात्साधनान्तरानपेक्षाविदुषोविभूतिप्राप्तिरुक्ता, एवमिहापि मनसेति विशेषणस्यान्ययोगव्यवच्छेदकत्वेनावधारणाथत्वात्कथं विदुषो देहाद्यभाव इत्याक्षेपसंगत्येदमाह—

(५४३) अभावं वादरिराह ह्येवम् ॥१०॥

अत्र पूर्वपक्षे विशेषणश्रुतेरनेकधाभावश्रुतेर्वा मुख्यार्थत्वं, सिद्धान्ते द्वयोरपि श्रुत्योर्मुख्यार्थत्वमितिफलभेदः। 'संकल्पादेवे'ति श्रुत्या संकल्पसाधनं मनोऽस्तीत्यवगतम्। तत्र किं प्राप्तैश्वर्यस्य विदुषःशरीरेन्द्रियाणि सन्ति, न सन्ति, उत सन्ति न सन्ति चेति सन्देहे? 'सकल्पादेवे'ति सावधारणश्रुत्या देहेन्द्रियाद्यभावं वादरिराचार्यो मन्यते। कुतः? 'मनसैतान्कामान्पश्यन्रमते' (छा० ८।१२।५) इति श्रुतिर्ह्येवमाह। विदुषो ब्रह्मलोके देहादिसत्त्वे 'मनसेति विशेषणमनर्थकं स्यादिति ॥१०॥

(५४४) भावं जैमिनिर्विकल्पामननात् ॥११॥

मनोवद्देहादीनामपि भावं विदुषो मन्यते जैमिनिराचार्यः। 'स एकधा भवति त्रिधाभवती' (छा० ७।२६।२) त्यनेकधाभावविकल्पामननात्। नहि देहादिभेदमन्तरेणैकधाभावः, अनेकधाभावश्च सम्भवति ॥११॥

त्युभयोः पूर्वपक्षयोः सतोः सिद्धान्तमाह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५४५) द्वादशाहवदुभयविधं बादरायणोऽतः ॥१२॥

अत एवोभयलिङ्गश्रुतिदर्शनादुभयविधमाचार्यबादरायणो मन्यते, सशरीरता 'संकल्पात्सशरीरत्वमशरीरतासंकल्पाच्चाशरीरत्वं; सत्यसंकल्पस्त्वात्संकल्पवैचित्र्याच्च । द्वादशावत् । यथा 'द्वादशाहमृद्धिकामा उपेयुरि' त्युपायिचोदनेन 'य एवं विद्वांसः सत्रमुपयन्ती'ति च द्वादशाहस्य बहुकर्तृकत्वेन सत्रत्वं, तस्यैव 'द्वादशाहेन प्रजाकामं याजयेदि' ति यजतिचोदनेन नियतकर्तृपरिमाणत्वेन 'द्विरात्रेण यजेते' तिवदहीनत्वमपि गम्यते इति (जै० १०।६ ५६–६०) जैमिनिसूत्राभ्यां द्वादशाहस्योभयविधत्वं निर्णीतं तद्वदित्यर्थः ॥१२॥

ननु ब्रह्मलोकस्थस्य विदुषो देहाद्यभावे कथं भोग इत्यत आह—

(५४६) तन्वभावे सन्ध्यवदुपपत्तेः ॥१३॥

सेन्द्रियस्य तनोः शरीरस्याभावेऽपि सन्ध्यवद्भोगस्योपपत्तेः । यथा सन्ध्ये स्वप्नेऽविद्यमानेष्वपि देहादिषु मानसिकविषयभोगो जाग्रद्विलक्षणो भवति । तद्वन्मोक्षेऽपि पित्रादीनां समुत्थानमुपपद्यते इत्यर्थः ॥

(५४७) भावे जाग्रद्वत् ॥१४॥

देहादिभावे यथा जाग्रद्भोगो व्यावहारिकस्तद्वन्मुक्तस्यापि पित्रादिकामानामुपपत्तेर्न देहादिसत्त्वाभ्युपगमस्य वैयर्थ्यमिति ॥१४॥

[६ प्रदीपाधिकरणम् । सू० १५–१६]

ननु सर्गः संकल्पमात्रेण तनूनां निष्प्रयोजनः । पुंसां निरात्मिकास्वासु भोगस्यानवकल्पनात् ॥ इत्याक्षेपसंगत्येदमाह—

(५४८) प्रदीपवदावेशस्तथा हि दर्शयति ॥१५॥

अत्र पूर्वपक्षे एकस्मिन्नेव देहे भोगः, सिद्धान्ते सर्वेषु देहेष्विति फलभेदः । किमत्र ब्रह्मलोकस्थेन विदुषा सृज्यमानानि शरीराणि दारुयन्त्रवन्निरात्मकानि, किंवाऽस्मदादिशरीरवत्सात्मकानीति संशये; आत्ममनसोर्भेदानुपपत्तेरेकेन शरीरेण योगादितराणि शरीराणि निरात्मकानीति पूर्वपक्षः । सिद्धान्तस्तु—तेषु शरीरेषु विद्यासामर्थ्यात्प्राप्तैश्वर्यस्य विदुषः प्रदीपवदावेशोऽभिव्यक्तिर्भवति । यथैकः प्रदीपोविकारशक्तियोगादनेकभावमापद्यते, तथाविद्वानेकोऽपि सन्ननेकान्तःकरणद्वारा सर्वदेहेषु प्रविशति । तथा हि दर्शयति श्रुतिरेकस्यानेकभावं 'स एकधा भवति, स त्रिधा भवती'ति । नन्वात्ममनसोर्भेदानुपपत्तेर-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नेकदेहयोगासम्भव इति चेन्न; एकमनोऽनुवर्तीनि समनस्कान्येवान्यानि शरीराणि प्राप्तैश्वर्यो जीवः सृजति,तत्र चोपाधिभेदादात्मनो विभोरपि भेदेनाधिष्ठातृत्वमुपपद्यते। तस्मात्सर्वाणि शरीराणि सात्मकानीति सिद्धम् ॥१५॥

ननु कथं विदुषः सशरीरत्वमुच्यते, यावता 'तत्केन कं पश्येदि' (बृ० ४।५ १५) ति 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात्' (बृ० ४।३।३०) इति च श्रुतिर्विशेषज्ञानं वारयतीत्यत आह—

(५४९) स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥

स्वाप्ययसम्पत्त्योः स्वापकैवल्ययोरन्यतरापेक्षं विशेषज्ञानाभावश्रवणम्। 'स्वमपीतो भवति' 'ब्रह्मैव सन्ब्रह्माप्येती' त्यादिश्रुतेः। कथमवगम्यते ? हि यतः प्रकरणवशादेवमाविष्कृतम्। स्वापावस्थामपेक्ष्य 'ततोऽन्यदि'ति कैवल्यावस्थामपेक्ष्य 'तत्केन कमि'ति च श्रुतम्। तस्मात्सगुणब्रह्मविदः शरीराभ्युपगमे नेदं बाधकमिति ॥१६॥

[७ जगद्व्यापाराधिकरणम्। सू० १७–२२]

इत्थं 'स्वाराज्यकामचारादिश्रुतिभ्यः स्यान्निरङ्कुशः। जगत्सर्गे तदुत्सृष्टमिह मानादपोद्यते ॥ इत्युत्सर्गापवादसंगत्येदमाह—

(५५०) जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥१७॥

अत्र पूर्वपक्षे विदुषो निरङ्कुशैश्वर्यसिद्धिः, सिद्धान्ते साङ्कुशैश्वर्यसिद्धिरिति फलभेदः। तत्र किं सगुणब्रह्मोपासकस्येश्वरस्येव निरङ्कुशमैश्वर्यमुत साङ्कुशमिति सन्देहे; 'तेषां सर्वेषु लोकेषु कामचारो भवती' (छा० ७।२५।२, ८।१।६) त्यादिश्रुत्या निरङ्कुशमिति पूर्वपक्षः। सिद्धान्तस्तु–जगदुत्पत्त्यादिव्यापारं वर्जयित्वाऽन्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवति। जगदुत्पत्त्यादिव्यापारस्तु परमेश्वरस्यैव। कुतः ? तस्य तत्र प्रकृतत्वादसन्निहितत्वाच्चेतरेषाम्। सर्वत्र सृष्टिवाक्येषु हि परमेश्वरं प्रकृत्यैव सर्गोपदेशः श्रूयते। तेनानित्यैश्वर्यवतामितरेषां जगद्व्यापारेऽसन्निधानमिति भावः ॥१७॥

(५५१) प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥१८॥

ननु 'आप्नोति स्वाराज्यमि' (तै० १।६।२) त्यादिप्रत्यक्षोपदेशान्निरङ्कुशमैश्वर्यं विदुषां न्याय्यमिति चेन्न; आधिकारिकमण्डलस्थोक्तेः। आधिकारिकास्तत्तदधिकारेषु सर्गादितो नियुक्ता हिरण्यगर्भादयस्तेषां मण्डलानि लोकास्तेषु सर्वव्यापकतया स्थितस्य परमेश्वर एव 'आप्नोति॰

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनसस्पति' (तै० १।६।२) त्यादावुत्तरवाक्ये प्राप्यत्वेनोक्तेः। पूर्वत्र वाक्ये विदुषामैश्वरस्य निरङ्कुशे पुनरीश्वरप्राप्तिवचनमनर्थकं स्यात्। अतस्तेषां साङ्कुशमैश्वर्यमिति सिद्धम् ॥१८॥

(५५२) विकारावर्ति च तथाहि स्थितिमाह ॥१९॥

सगुणे ब्रह्मणि विकारावर्ति च नित्यमुक्तं निर्विकारं पारमेश्वरं रूपमप्यस्ति। तथाहि तस्य सगुणत्वनिर्गुणत्वाभ्यां स्थितिमाह 'तावानस्य महिमा ततो ज्यायांश्च पुरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' (छा० ३।१२।६) इत्यादि श्रुतिः। तच्च सदपि निर्विकाररूपं सगुणोपसका यथा नोपयन्तीत्येवमेव सगुणब्रह्मगतं जगदुत्पत्त्यादिकमैश्वर्यमपि ते न प्राप्नुवन्ति। तदुपास्त्यभावात्, उपास्त्यभावश्च श्रुत्यभावादित्यर्थः ॥१९॥

(५५३) दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥

एवं ब्रह्मणो विकारावर्तित्वं निर्गुणत्वं 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः' (क० ५।१५, श्वे० ६।१४, मु० २।२।१४) इति श्रुतिः 'न तद्भासयते सूर्यो न शशाङ्को न पावकः' (गी० १५।६) इति स्मृतिश्च दर्शयतः ॥२०॥

(५५४) भोगमात्र साम्यलिङ्गाच्च ॥२१॥

किं चोपासकानामेषामुपास्येन नित्यसिद्धेश्वरेण सह भोगमात्रेण साम्यम् 'आपो वै खलु मीयन्ते लोकोऽसौ' 'स यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवविदं सर्वाणि भूतान्यवन्ती' (बृ० १।५।२०) त्यादौ श्रूयते। तस्माद्भोगमात्रसाम्य लिङ्गाद्विदुषां साङ्कुशमैश्वर्यमिति गम्यते ॥२१॥

नन्वेवंसति साङ्कुशत्वाद्विदुषामैश्वर्यमनित्यं स्यात्। ततश्चैषां पुनरावृत्तः प्रसज्येते त्याशङ्कायां परमकारुणिको भगवान् बादरायणः समादधाति—

(५५५) अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥२२॥

'नाडीरश्मिसमन्वितेनार्चिरादिमार्गेण ब्रह्मलोकं गतानां 'तयोर्ध्वमायन्नमृतत्वमेति' (छा० ८।६।६, क० ६।१६) 'तेषां न पुनरावृत्तिः' (बृ० ६।२।१५) 'ब्रह्मलोकमभिसम्पद्यते' 'न स पुनरावर्तते' (छा० ८।१५।१) इत्यादि क्रममुक्तिबोधक शब्दादनावृत्तिरभिधीयते। सम्यग्दर्शनविध्व-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्ततमसां निर्गुण ब्रह्मविदामनावृत्तिः सिद्धैव, तदाश्रयेण सगुणब्रह्मविदामप्यनावृत्तिर्नान्यथा। तस्मान्निर्गुणब्रह्मविदां सद्यः सगुणब्रह्मविदां च क्रमशो निरस्तनिखिलदुःखनिरतिशयानन्दरूप ब्रह्मात्मनावस्थितिरिति। अनावृत्तिःशब्दादिसूत्राभ्यासः शास्त्रसमाप्तिद्योतनार्थः।२२

भूतनेत्र वियच्चक्षुर्मिते (२०२५) वैक्रमवत्सरे।
माघमासे सिते पक्षे, पञ्चम्यां चान्द्रवासरे ॥१॥
विद्यानन्दाभिधावृत्तिर्विद्यानन्देन निर्मिता।
समापनं गता नूनं निर्विघ्नं भूतिशर्मदा ॥२॥
प्रवेशमीहते कश्चिन्नरश्चेद्व्यास निर्मिते।
सूत्रे चाद्वैतराद्धान्ते शङ्कराचार्य भाषिते ॥३॥
अवश्यं तेन दृश्येत, वृत्तिरेषा मुमुक्षुणा।
अन्यथा भाष्यतात्पर्ये प्रवेशः स्यात्सु दुर्लभः ॥४॥
शङ्करः पातु नो नित्यं व्यासश्च ज्ञानदो गुरुः।
दक्षिणामूर्तिदेवोऽस्तु लोकानां वरदः सदा ॥५॥

श्री मत्परमहंसपरिव्राजकाचार्यस्वामि विद्यानन्दगिरिविरचितायां ब्रह्मसूत्रशाङ्करभाष्यावलम्बिन्यां विद्यानन्दवृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः ॥४॥ इत्योंशम्।

॥ समाप्तोऽयं ग्रन्थः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रथितम्

"परीक्षाप्रसवोन्मुखाः प्रश्नाः"

परीक्षाब्धिसन्तरणी

१. प्रश्नः—ब्रह्मविचारशास्त्रारम्भं भामती रीत्याऽऽक्षिप्य समाधत्त ?

उत्तरम्—अथातो ब्रह्मजिज्ञासा, इति उत्तरमीमांसाया आदिमं सूत्रम्। तत्र ब्रह्मजिज्ञासा उक्ता। सा च व्यापकविरुद्धोपलब्ध्या सन्दिग्धत्वसप्रयोजनत्वाभावात् नोदेति। न चेदं ब्रह्म सन्दिग्धं, बृहत्त्वाद् बृंहणत्वाद्वात्मैव ब्रह्मेति सर्वेषां प्राणिनां प्रसिद्धत्वात्। स चात्मा प्राणिमात्रस्य देहेन्द्रियविषयेभ्योभिन्नोहमित्यपरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम्। नहि जातु कश्चिदत्र सन्दिग्धे अहं वा नाहं वेति, न च विपर्यस्यति, नाहमेवेति।

न चाहं कृशः, स्थूल इत्यादिदेहधर्मसामानाधिकरण्यदर्शनात् देहालम्बनोऽयमहंकार इति युक्तम् योऽहं बाल्ये पितरावन्वभवं स एव स्थाविरे प्रणप्तॄननुभवामीति प्रत्यभिज्ञाविरोधात्। अपि च स्वप्नान्ते दिव्यशरीरभेदमास्थाय तदुचितान् भोगान् भुञ्जान एव प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन् 'नाहं देवो मनुष्य एवेति' देवशरीरं बाध्यमानेऽपि अहमास्पदमबाध्यमानं देहाद्भिन्नं प्रतिपद्यते। अपि च योगव्याघ्रः शरीरभेदेऽपि आत्मानमभिन्नमनुभवतीति नाहङ्कारालम्बनं देहः। एवमिन्द्रियभेदेऽपि योऽहमद्राक्षम् स एवाधुना स्पृशामीत्यहमालम्बनस्य प्रत्यभिज्ञाविरोधादेव नेन्द्रियाण्यप्यस्यालम्बनम्। बुद्धिमनसोश्चकरणयोः कर्तृत्वायोगः। कृशोहमित्यादिप्रयोगाश्च मञ्चाः क्रोशन्तीत्यादिवदौपचारिकाः। तस्मादिदहङ्कारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यः व्यावृत्तः स्फुटतराहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति।

नापीह संसारनिवृत्तिरपवर्गः प्रयोजनं विवक्षितम्, आत्मयाथात्म्याननुभवनिमित्तस्य संसारस्यात्मयाथात्म्यज्ञानेन सहानुवृत्तिदर्शनेन तयोर्मिथो निरोधाभावात्। न चाहमिति सर्वजनीनस्फुटतरानुभवसमर्थित आत्मा देहेन्द्रियादिव्यतिरिक्तः, उपनिषदां सहस्रैरपि शक्योऽन्यथयितुमनुभवविरोधात् इत्याशयवानाह भाष्यकारः—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरित्यादिना युक्त इत्यन्तेन ग्रन्थेन इति चेन्न, अन्योऽन्यस्मिन्नन्योऽन्यात्मकतामन्योऽन्यधर्मांश्चाध्यस्येतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः प्रवर्तते। व्यवहारस्यानादितया तत्कारणस्याध्यासस्यानादिता, ततश्च पूर्वं पूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्यासोपयोगान्न परस्पराश्रयत्वम्। एवं च जिज्ञासाशास्त्रं जिज्ञासायाः सन्दिग्धत्वसप्रयोजनत्वाभ्यामारम्भणीयमेवेति।

२. प्र०—प्रत्यक्षागमयोरागमस्यैव प्राबल्यं समर्थ्याहमनुभवस्य गौणत्वनिरासं भामतीरीत्या कुरुत ?

उ०—ननु उपक्रमादिभिः समस्तोपाध्यपरिच्छिन्नात्मतत्त्वप्रतिपादनपरं शास्त्रमुपचरितार्थं माभूत्, ज्येष्ठप्रमाणप्रत्यक्षविरोधात्सापेक्षस्यागमस्योपचरितार्थत्वं तु स्यादेवेति चेन्न विकल्पासहत्वात्। तथाहि— किमागमः स्वकार्ये प्रमितौ प्रत्यक्षमपेक्षते, उत्पत्तौ वा। नाद्यः तस्यापौरुषेयतया निरस्तदोषाशङ्कस्य बोधकतया स्वतः सिद्धप्रामाण्यस्य तत्रानपेक्षत्वात्। नापि द्वितीयः, उत्पादकाप्रतिद्वन्द्वित्वात्। आगमज्ञानं प्रत्यक्षस्य तात्त्विकत्वमुपहन्ति, न तु सांव्यवहारिकत्वम्। सांव्यवहारिकं चागमज्ञानोत्पत्तौ कारणं, तत्राविरोधात्। न चातात्त्विकं सांव्यवहारिकं कथं तात्त्विकज्ञानोत्पत्तिं प्रतिकारणमिति वाच्यं वर्णे समारोपितस्य ह्रस्वत्वादेर्ध्वनिधर्मस्य तत्त्वप्रतिपत्तिकारणत्वदर्शनात्। न चानन्यपरं वाक्यं स्वार्थे उपचरितार्थं युक्तम् उक्तं हि—शबरस्वामिना—न विधौ परः शब्दार्थः इति। नापि अनपेक्षितस्य ज्येष्ठत्वं बाधकत्वे कारणं, किन्तु बाध्यत्वे। दृष्टं हि ज्येष्ठस्य रजतज्ञानस्य कनीयसा शुक्तिज्ञानेन बाधः, अन्यथा शुक्तिज्ञानस्योत्पत्त्यसम्भवापत्तेः। तत्र च परमार्षं सूत्रमपि प्रमाणम्—पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्। तथाभियुक्तवचनमपि प्रमाणं पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योऽन्यनिरपेक्षाणां यत्र जन्मधियां भवेत्॥ इति अपि चाहंकारालम्बनमात्मानमभ्युपगच्छद्भिरपि तस्य तात्त्विकत्वं नाभ्युपेतव्यम्। अहमिहैवास्मि सदने जानान इति सर्वव्यापकस्य प्रादेशिकत्वेन ग्रहत्वात्। न चेदं देहस्य प्रादेशिकत्वम्, तथासति—अहमिति, गौणत्वे वा जानानः न स्यात्। अपिच अन्य वाचकः शब्दः अन्यार्थे लक्ष्यमाणगुणयोगेन वर्तते इति। यत्र प्रयोक्तृप्रतिपत्त्रोः सम्प्रतिपत्तिः स गौणः स च भेदपुरस्सरः। तथा च 'नैयमिकाग्निहोत्रवचनोऽग्निहोत्रशब्दः' प्रकरणान्तरावधृतभेदे कौण्डपायिनामयनगते कर्मणि 'मासमग्निहोत्रं जुहोतीत्यत्र साध्यसादृश्येन गौणः, माणवके चानुभवसिद्धभेदेसिंहाविहशब्दः। न त्वहंकारस्य मुख्योऽर्थे देहादिभ्यो भिन्नत्वेनानुभूयते, येन परशब्दः शरीरादौ गौणो भवेत्। स्नेहगुणयोगात्तिलभवात्सिद्धे एव भेदे सार्षपादीनां तैलशब्दवाच्यत्वाभिमानो, न त्वर्थयोरभेदाध्यवसायः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्सिद्धं गौणत्वमुभयदर्शिनो गौणमुख्यविवेकज्ञानेन व्याप्तं तदिह व्यापकं विवेकज्ञानं निवर्तमानं तद्व्याप्यगौणतामपि निवर्तयतीति। तस्मादहमर्थस्याविवेकदशायां देहादौ अहं शब्दप्रयोगः गौण इति वक्तुमशक्यम्, किन्तु आध्यासिकः इति सिद्धम्।

३. प्रश्नः—अतिव्याप्त्यादिदोष निरासपूर्वकमध्यासलक्षणं भामतीरीत्या निरुपयत ?

उत्तरम्—ननु—द्वैतापत्तिभियाऽनवस्थापत्तिभिया च न सत्ता सामान्यसमवायो वार्थक्रिया कारिता वा सत्ता, किन्तु प्रकाशमानत्वमेव चिदात्मनः सत्त्वम्। तथा च देहादयः प्रकाशमानत्वान्ना सन्तश्चिदात्मवत्, असत्त्वे वा न प्रकाशमानाः। ततः कथं सत्यानृतयोर्मिथुनीभावादि पुरस्सरमध्यास इति चेन्न स्मृतिरूपःपरत्र पूर्वदृष्टावभासोऽध्यास इत्यध्यासलक्षणत्वात्। तथाहि—प्रत्ययान्तरबाधात्मकोऽवसन्नोऽवमतो वा भासोऽवभास इति सामान्यलक्षणम्। दृश्यते हि—इदं रजतमिति ज्ञानस्याधिष्ठानतत्त्वसाक्षात्कारेण यौक्तिकज्ञानेन बाधः। अतो मिथ्याज्ञानमध्यासलक्षणमिति फलितार्थः। शेषं तस्यैव व्याख्यानमिति। मिथ्याप्रत्ययश्चारोपविषयारोपणीयस्य मिथुनं विना न भवतीति पूर्वदृष्टग्रहणेनारोपणीयमुपस्थाप्यते तस्य चाध्यासे दृष्टत्वमात्रमुपयुज्यते न वस्तु सत्तेति दृष्टलक्षणम्। नापि वर्तमानदर्शनमारोपोपयोगीति, पूर्वेत्युक्तम्। आरोपविषयं सत्यमाह परत्रेति परत्र शुक्तिकादौ परमार्थे सति। न च स्वस्तिमत्यां गवि पूर्वदृष्टस्य गोत्वस्य परत्रकालाद्यामवभासनेन, पाटलिपुत्रे पूर्वदृष्टदेवदत्तस्य मथुरायामवभासनेन चातिव्यापकमिदं लक्षणम्। अतःस्मृतिरूप इति। स्मृतिरूपमिवरूपस्येति तदर्थः। असन्निहितविषयत्वं स्मृतिरूपत्वं सन्निहितविषयत्वं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः—स्वप्नज्ञानस्यापि विभ्रमरूपस्यैवं रूपत्वात्।

एवं तिक्तोगुडः पीतः शंख इत्यत्राप्ये तल्लक्षणं युज्यते एव। तथाहि—बहिर्निर्गच्छदतिस्वच्छनयनरश्मिसम्पृक्तपित्तद्रव्यवर्तिनीं पित्तरहितां पित्तत्तामनुभवन् शंखं च दोषाच्छादित शुक्लिमानमनुभवन् पीततायाश्च शंखासम्बन्धमननुभवमप्यसम्बन्धाग्रहसारूप्येण पीतं तपनीयपिण्डं पीतं विल्वफलमित्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशंखयोरारोप्याह—पीतः शंख इति। एतेन तिक्तोगुड इति प्रत्ययो व्याख्यातः। एवं विज्ञातृपुरुषाभिमुखेषु जलादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि वलीयसा सौर्येण तेजसा प्रतिश्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयद्दोषवशातामनभिमुखतां च मुखस्या ग्राह्यत्पूर्वदृष्टाभिमुखजलादिदेशतामाभिमुख्यं च मुखस्यारोपयतीति प्रतिबिम्ब विभ्रमोऽपि लक्षितो भवति। एतेन दिङ्मोहादिविभ्रमेष्वपि यथा सम्भवं लक्षणं व्याख्यातमिति। अयमाशयः न प्रकाशमानतामात्रं सत्त्वं येन देहादेः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशमानतया सत्त्वं भवेत्। अन्यथा रज्ज्वादेः मरीच्यादेश्चापि सर्पादिभावेन तोयात्मना च सत्त्वप्रसङ्गः। तस्मादनिच्छयापि आरोपितस्य प्रकाशमानस्यापि न वस्तुतत्त्वमभ्युपेयम्। न च दृष्टान्तवैषम्यमिति वाच्यम् मरीच्यादीनामसतां तोयात्मनाऽनुभवागोचरत्वापत्तेः। अतोऽसतोऽपि आरोपितस्य भ्रान्त्या प्रकाशमानस्य सदात्मना मिथुनीकरणभावेनाध्यासलक्षणत्वोपपत्तिरिति दिक्।

४. प्रश्नः—सत्ख्यात्यसत्ख्यात्योरभिमतं सत्त्वनिर्वचनं निरस्य सिद्धान्ते सत्त्वं निरुच्यताम्?

उत्तरम्—अथान्योऽन्याध्यासायाध्यासात्प्राठान्योऽन्ययोः उभयोःप्रकाशोऽपेक्ष्यते। सत्यानृतयोरन्योऽन्याध्यासस्थलेऽसतोदेहादेः कथं प्रकाशः स्यात्। ननु—विज्ञानसामर्थ्यात् असत्प्रकाशते, असत् प्रकाशनशक्तिश्चाविद्येति चेन्न तादृशशक्तेः शक्यस्यानिरुपणेन तद्रूपमशक्यत्वात्। तथाहि तादृशशक्तेः शक्यमसत् कार्यम् उतज्ञाप्यं, नाद्यः, असतस्तत्त्वानुपपत्तेः। नान्त्य, ज्ञानान्तरानुपलब्धेरनवस्थापाताच्च। एवं सदसतोः सम्बन्धनिरुपणमप्यशक्यम्। तस्मादत्यन्तासन्तः शरीरेन्द्रियादयो निस्तत्त्वा नानुभवविषया भवितुमर्हन्तीति, अत्रोच्यते किमिदानीं मरीचयोऽपि तोयात्मना सत्तत्त्वाः सन्ति यदनुभवगोचराःस्युः। मरीच्यादीना स्वरुपेणसत्त्वेऽपि तोयात्मनाऽसत्त्वान्न तत्र तोयनिर्भासप्रत्ययस्तत्त्वगोचरः। अन्यथा तस्याबाध्यत्वापत्तेः। तच्चानिष्टं, नाह मरीचीनतोयतत्त्वान् तोयात्मना गृह्णन् कथमप्यभ्रान्तः स्यात् अबाध्यो वा। अपि च तोयाभावात्मकेषु मरीचिषु भ्रमविषयीभूतं तोयात्मकत्वं सद्वा असद्वा उभयात्मकं वा। नाद्यः तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः। न द्वितीयः, वस्त्वन्तरमेव वस्त्वन्तरस्यासत्त्वमितिमते आरोपितस्य वस्त्वन्तराभावात्। नापि तृतीयः, परस्परविरोधात् इत्यनिर्वचनीयमेवारोपणीय मरीचिषु तोयमास्थेयम्। तदनेन क्रमेण अध्यस्तं तोयं परमार्थतोयमिव। अत एव पूर्वदृष्टमिव तत्त्वतस्तु न तोयं, न च पूर्वदृष्टं, किन्तु अनृतमनिर्वचनीयम्। एवं च देहादिप्रपञ्चोऽपि सदसद्विलक्षणोऽनिर्वाच्योऽपूर्वोऽपि पूर्वं मिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यते इत्युपपन्नमध्यासलक्षणयोगात् देहादिप्रपञ्चबाधनमपि तत्त्वज्ञानेन स्यादेव। चिदात्मा तु श्रुत्यादिगोचरस्तन्मूलतदविरुद्ध न्यायनिर्णीतः शुद्धबुद्धमुक्तस्वभावः सत्वेन निर्वाच्योऽतएवाबाधितः स्वयं प्रकाशतैवास्य सत्ता। सा च स्वरूपमेव चिदात्मनो न तु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वेति।

तस्मात् सत्यानृतयोः मिथुनभावेनाध्यासलक्षणमुपपन्नमिति ॥

५. प्र०—भ्रमस्थले वादिनां विप्रतिपत्तिदर्शनपुरस्सरं तन्मतं निरसनीयम्।

उ०—भ्रमस्थले वादिनां विप्रतिपत्तयो दृश्यन्ते। तत्र सौत्रान्तिकनये बाह्यवस्तुनोऽस्तित्वाभ्युपगमेऽपि तत्र ज्ञानाकारस्यारोपः। विज्ञानवादिमते तु अलीके

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बाह्यवस्तुनि अनाद्यविद्यावासनया ज्ञानाकारस्यारोपः। नेदं रजतमिति बाधकप्रत्ययस्य बाधकत्वं वहिष्ट्वबाधनमात्रेणैवोपपद्यते। रजतं च तद्गतेदन्ता चेत्युभयबाधने गौरवंप्रसङ्गात्।

तत्र प्राभाकरा अपरितुष्यन्तः तादृग्भ्रमेऽनुभवानुमानादिप्रमाणाभावात् अख्यातिवादं समर्थयन्ते। तथाहि—रजतमिदमिति च द्वेविज्ञाने स्मृत्यनुभवरूपे। तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणं, दोषवशात् तद्गतशुक्तित्वसामान्यविशेषाग्रहात्, तन्मात्रं च गृहीतं चाकचक्यसादृश्येन संस्कारोद्बोधक्रमेण रजतविषयिकां स्मृतिं जनयति। सा च गृहीतग्रहणस्वभावापि दोषवशात् गृहीतत्त्वांशप्रमोषात् ग्रहणमात्रमवतिष्ठते। तथा चात्रग्रहणस्मरणयोर्मिथः स्वरूपतो विषयतश्च भेदाग्रहात् सन्निहितरजतगोचरज्ञानसारूप्येण इदं रजतम् इति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः। पीतः शङ्ख इत्यादिस्थले तु ग्रहणे एवमिथोऽगृहीतभेदे। तत्रापि शङ्खपीतत्वयोर्गुणगुणिनो रसंसर्गाग्रहसारूप्यादभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च। भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च नेदमिति विवेकप्रत्ययस्य बोधकत्वमप्युपपद्यते। एतेन प्राक्तनस्य प्रत्ययस्य भ्रान्तत्वमपि लोकसिद्धं सिद्धं भवति। तस्माद् विवादास्पदाः सर्वे प्रत्ययाः यथार्थाः प्रत्ययत्वात्, घटादिप्रत्ययवत्। तदिदमुक्तं यत्र यदध्यासस्तद्विवेकाग्रहनिवन्धनो भ्रमः इति। तस्यायमर्थः—यत्र=शुक्तिकादौ यस्य रजतादेरध्यासः लोकसिद्धः नासावन्यथाख्यातिनिवन्धनः, किन्तु गृहीतस्य रजतादेस्तत्स्मरणस्य च गृहीततत्त्वांशप्रमोषेण, गृहीतमात्रस्य इदमिति पुरोवस्थिताद्द्रव्यमात्रात्तद्ग्रहणाच्च विवेकस्तदग्रहनिवन्धनो भ्रमः। भ्रान्तत्वं च ग्रहणस्मरणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति।

तत्रापि अपरितुष्यन्तो नैयायिका आचक्षते, यत् ग्रहणनिवन्धनौ चेतनस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद् भवेताम्। ननु ग्रहणस्मरणयोर्मिथः स्वरूपतो विषयतश्चागृहीतभेदयोः समीचीनपुरःस्थितरजतविज्ञानसादृश्येनाभेदव्यवहारसामानाधिकरण्यव्यपदेशयोः कारणत्वमुक्तमिति चेन्न, विकल्पासहत्वात्! तथाहि—समीचीन ज्ञानसारूप्यमनयोर्गृह्यमाणं वा व्यवहारहेतुः सत्तामात्रेण वा। नाद्यः गोसदृशोगवय इति ज्ञानस्यापि गवार्थिनो गवये प्रवर्तकत्वप्रसङ्गात्। नान्त्यः चेतन व्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेः। न चाविदितविवेकग्रहणस्मरणपूर्वको व्यवहारहेतुरिति वाच्यम् रजतप्रतिपादिकार्थमात्रस्मरणस्य प्रवृत्तावनुपयुक्तत्वात् रजतार्थिनां खलु इदंकारास्पदाभिमुखीप्रवृत्तेरविवादाच्च। इदंकारस्पदरजतज्ञानमन्तरेण तद्विषयकेच्छानुत्पत्त्या कथञ्चिदपि तत्र प्रवृत्त्युत्पत्त्यनुत्पत्तिप्रसङ्गात्। तस्मात्परिशेषतो भेदाग्रहः समारोपोत्पत्तिक्रमेणैव चेतनप्रवृत्तिहेतुरिति। अयमाशयः भेदाग्रहादिदंकारास्पदे रजतत्वं समारोप्य तज्जातीयस्योपकारकत्वमनुचिन्त्य तज्जातीयतयेदंकारास्पदे रजते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदनुमाय तदर्थी प्रवर्तते इत्यानुपूर्व्यं सिद्धम् ।

न च तटस्थ रजतस्मृतिरिदंकारास्पदस्योपकारकत्वमनुमापयितुमर्हति, तदा रजतत्वहेतोरपक्षधर्मत्वात्, एकदेशदर्शनस्यैवानुमापकत्वाच्च । यथोक्तं स्वामिना—ज्ञातसम्बन्धस्यैकदेशदर्शनात् अस्ति च समारोपे सत्येकदेशदर्शनम् । तस्मात् विवादास्पदं रजतादिज्ञानम्, पुरोवर्तिवस्तुविषयं, रजतार्थिनस्तत्र नियमेन प्रवर्तकत्वात्, उभयवादिसिद्धसमीचीनरजतज्ञानवत् । तथा चेदं तस्मात्तथेति प्रयोगः ।

अथानवभासमानतया शुक्तिर्नालम्बनमिति, तत्किं रजतमिदमिति ज्ञानं प्रतिशुक्तिकात्वस्यानालम्बनत्वमुच्यते उत, पुरःस्थितस्य द्रव्यमात्रस्य सितभास्वरस्य । आद्ये इष्टापत्तिः । अन्त्ये तवैवानुभवविरोधः पुरोवर्तिवस्तुनोऽङ्गुल्यादिना निर्देशदर्शनात् । न च समीचीनज्ञानजनकस्य चक्षुरादेः कथं मिथ्याज्ञानजनकत्वमिति वाच्यम् दोषवशात् तथात्वस्याभ्युपगमात् । न च दोषाणामौत्सर्गिककार्यजननसामर्थ्यप्रतिबन्धकत्वमात्रमेवेति वाच्यम्, कार्यान्तरोपजननसामर्थ्यस्यापि दर्शनात् । यथा—दावाग्निदग्धानां नेत्रबीजानां कदलीकाण्डजनकत्वम् भस्मकदुष्टस्य चौदर्यस्य तेजसो बहन्नपचनसामर्थ्यदर्शनम् । विभ्रमाणां यथार्थत्वानुमानं च प्रत्यक्षबाधापहृतविषयकत्वेनाभासोऽग्नावनुष्णत्वानुमानवत् । तदिदमुक्तमाचार्यैः—यत्र शुक्तिकादौ यस्य रजतादेरध्यासः तस्यैव शुक्तिकादेः विपरीतधर्मकल्पनां = रजतत्वधर्मकल्पनामापेक्षते इति भावः । एवं च सत्यामपि वादिनां विप्रतिपत्तौ सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति । अन्यस्यान्यधर्मकल्पना चानृतता, सा चानिर्वचनीयतेत्युपपादितं पुरस्तात् नेह वितन्यते । इतिदिक् ।

६. प्रश्न—आत्मनः स्वप्रकाशत्वं भामतीरीत्या प्रतिपादयत ।

उत्तर—ननु चिदात्मा प्रकाशते, न वा ? अन्त्ये कथं तत्र विषयतद्धर्माणामध्यासः । न खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वाध्यासः सम्भवति । आद्ये पराधीनप्रकाशतया घटादिवज्जडत्वप्रसङ्गः न चैकस्मिन् कर्तृत्वं कर्मत्वं च सम्भवति, विरोधात् । परसमवेतक्रियाफलशालित्वं कर्मत्वम् । न च ज्ञानक्रिया परसमवायिनी, तथासति ज्ञेयस्यात्मनोऽनात्मत्वप्रसङ्गः । एवं तस्य तस्येत्यनवस्थाप्रसङ्गः । सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति । एतदुक्तं भवति—यत्पराधीनप्रकाशमंशवच्च तत्सामान्यांशग्रहे कारणदोषवशाच्च विशेषाग्रहेऽन्यथा प्रकाशते । प्रत्यगात्मा त्वपराधीनप्रकाशतया न स्वज्ञाने कारणान्यपेक्षते येन तदाश्रयदोषैर्दुष्येत । न चांशवान्, येन कश्चिदस्यांशो गृह्येत । कश्चिन्न गृह्येत सनातनेऽप्रकाशपक्षे च पुरोऽवस्थितत्वाभावान्नाध्यासः । नहि शुक्तावपुरः स्थितायां रजतमध्यस्यतीदं रजतमिति । तस्मादत्यन्तग्रहेऽत्यन्ताग्रहे च नाध्यासः इति सिद्धमिति चेन्न अस्मत्प्रत्ययविषयत्वात् । तथाहि—सत्यं प्रत्यगात्मा स्वप्रकाशतयाऽविषयोऽनंशश्च ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथाप्यनाद्यविद्यापरिकल्पितबुद्धिमनः सूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इवाभिन्नोऽपि भिन्न इवाकर्तापि कर्त्तेवाभोक्तापि भोक्तेवाविषयोऽपि अस्मत्प्रत्ययविषय इव जीवभावापन्नोऽवभासते घटाद्यवच्छेदभेदेनाकाशवत्। नहि चिदेकरस्यात्मनश्चिदंशेगृहीतेऽगृहीतं किञ्चिदस्ति। न खल्वानन्दनित्यत्व विभुत्वादयोऽस्यचिद्रूपाद्वस्तुतो भिद्यन्ते, येन तद्ग्रहे न गृह्येरन्। गृहीता एवं तु कल्पितेन भेदेन न विवेचिता इत्यगृहीता इवाभान्ति। न चात्मनो बुद्ध्यादिभ्योभेदस्तात्त्विकः, येन चिदात्मनि गृह्यमाणे सोऽपि गृहीतो भवेत्, बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्वाच्यत्वात्। तस्माच्चिदात्मनः स्वयंप्रकाशस्यानवच्छिन्नस्यावच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात् तदध्यासेन जीवभाव इति। तस्य चानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते। अतएव चिदात्मैव कार्यकरणसंघातेन ग्रथितो लब्धक्रियाभोग शक्तिः स्वयंप्रकाशोऽपि बुद्ध्यादिविषयतादात्म्यात् कथञ्चिदस्मत्प्रत्ययोऽहंकारास्पदं इति च जन्तुरिति च क्षेत्रज्ञ इति चाख्यायते। न खलु जीवश्चिदात्मनो भिद्यते। तथा च श्रुतिः—'अनेन जीवेनात्मना इति। तस्माच्चिदात्मनोऽव्यतिरेकाजीवः स्वयंप्रकाशोऽप्यहं प्रत्ययेन कर्तृभोक्तृतया व्यवहारयोग्यः क्रियते इत्यहंप्रत्ययालम्बनमुच्यते। न चाध्यासे सति विषयत्वं विषयत्वे सत्यभास इत्यन्योऽन्याश्रयत्वमिति युक्तम्, वीजाङ्कुरवदनादित्वात्। तस्मात् सुष्ठूक्तं 'न तावदयमेकान्तेनाविषयः। जीवो हि चिदात्मतया स्वयंप्रकाशतयाऽविषयोऽप्यौपाधिकरूपेण विषय इति भावः।

७. प्र०—गुरुमताभिमतं संवित्स्वप्रकाशत्वमुत्थाप्य भामतीरीत्यानिरसनीयम्।

उ०—अथ प्राभाकरा मन्यन्ते, आत्मा न स्वयं प्रकाशः किन्तु जडः सर्वार्थज्ञानेषु भासमानोऽपि कर्त्तैव न कर्म, परसमवेतक्रियाफलशालित्वाभावात् चैत्रवत्। तथा च ज्ञेयस्यात्मनोऽनात्मत्वप्रसक्तिः परिहृता इति चेन्न श्रुतिविरोधात्। 'सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिः। उपपत्तिः च 'योऽयमर्थप्रकाशः फलं यस्मिन्नर्थश्चात्मा च प्रथेते, स किं जडः स्वयं प्रकाशो वा। आद्ये संविद्विषयात्मनां जडत्वाविशेषतया जगदान्ध्यप्रसङ्गः। तथा चाभाणकः 'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे। उत्तरोत्तरज्ञानकल्पनेऽपि तत्र जडत्वाविशेषेणोक्तदोषापत्तेरनवस्थाप्रसङ्गाच्च। द्वितीयेपि विषयात्मनोर्जडत्वं तादवस्थ्यम्। नहि पुत्रः पण्डित इति पितापि पण्डितोऽस्तु। स्वभाव एष संविदः स्वयंप्रकाशाय यदर्थात्मसम्बन्धितेति चेत्, हन्त! पुत्रस्यापि पण्डितस्य स्वभाव एष यत्पितृसम्बन्धितेति समानम्। न च अर्थात्मप्रकाशेन सह संवित्प्रकाशो न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेत्, तत्किं संविदर्थात्मप्रकाशौ संविदो भिन्नोवास्यादभिन्नौ वा। आद्ये संविदः स्वप्रकाशत्वाभावप्रसङ्गः। अन्त्ये पूर्ववद्निवाञ्छितार्थसिद्धिः। न चातीतानागतार्थगोचरायाः संविदोऽर्थसहभावोऽपि संभवति। तद्विषयज्ञानादिर्बुद्धिजननादर्थं सहभाव इति चेन्न, अर्थ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संवेद इव हानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः। अपि च स्वप्रकाशत्वमपि संविदः स्वात्मन्येवखद्योतवत्, अर्थविषये तु जडत्वमेव। नहि प्रकाशस्यात्मानो विषयाः, यतस्ते विच्छिन्नदीर्घस्थूलतयाऽनुभूयन्ते, प्रकाशश्च तद्विपरीतः। तस्माच्चन्द्रेऽनुभूयमाने इव द्वितीयश्चन्द्रमाः। स्वप्रकाशाद्भिन्नोऽर्थोऽनिर्वचनीय एवेति युक्तम्। किं च प्रकाशस्य स्वभावतो वा भेदः, उपाधितो वा। नाद्यः सर्वेषां पुंसाम्। अनुभवामी' त्यनुभवांशे एकाकारतावभासेन भेदाप्रतीतेः। नापि द्वितीयः, अनिर्वाच्यार्थभेदस्य प्रकाशभेदकत्वाभ्युपगमेऽतिप्रसङ्गात्। तदयं प्रकाश एव स्वयं प्रकाश एकः कूटस्थनित्यो निरंशः प्रत्यगात्मा अशक्यनिर्वचनीयेभ्यो देहादिभ्यः आत्मानं प्रतीपं निर्वचनीयमञ्चति जानातीति प्रत्यङ् स चात्मा इति प्रत्यगात्मा। स एव चापराधीनप्रकाश इत्यलम्।

८. प्र०—कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ग्रंथोक्तं पूर्वपक्षमुत्थाप्य भाष्यभामतीदिशा समाधत ?

उ०—ननु आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वेषां लौकिकवैदिकव्यवहाराणां विधिप्रतिषेधमोक्षपराणां शास्त्राणां च प्रवृत्तिरित्युक्तम्। तत्र तत्त्वपरिच्छेदात्मकप्रमा नाम विद्या, तत्साधनानि प्रमाणानि कथमविद्यावन्तं पुरुषमाश्रयन्तीति, तत्कार्यविद्यायाः अविद्याविरोधित्वात्। सन्तु वा प्रत्यक्षादीनि संवृत्यापि यथा तथा, पुरुषहितानुशासनपराणि शास्त्राणि तु अविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीति चेन्न, देहेन्द्रियादिषु अहंममाभिमानहीनस्य तादात्म्यतद्धर्माध्यासहीनस्य प्रमातृत्वानुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेः। अयमर्थः—प्रमां प्रतिकर्तृत्वं प्रमातृत्वं, स च प्रमाता समस्तकारकप्रयोक्तृत्वेन प्रमाकरणस्य प्रमाणस्यापि प्रयोक्ता, न च प्रमाता स्वव्यापारमन्तरेण करणं प्रयोक्तुमर्हति। न चाध्यासात्प्राक् स्वतः कूटस्थस्य चिदात्मनो व्यापारवत्त्वं सम्भवति। अत एवाविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति। प्रत्यक्षादिप्रमाणानां फलं चेन्द्रियाण्युपादायैव भवति। न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते सुषुप्तेऽपि व्यापारवत्त्वप्रसङ्गात्। न चैतस्मिन् सर्वस्मिन्नसत्यसङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न चानध्यस्तात्मभावं विना वेमादिकं कुविन्दो व्यापारयन् परस्य कर्ता यथा, एवमनध्यस्तात्मभावं देहेन्द्रियादिकं व्यापारयन् भविष्यति तदभिज्ञः प्रमातेति, व्यापारवन्तो हि कुविन्दादयो वेमादीनधिष्ठाय व्यापारयन्ति, नैवं देहादिष्वनध्यस्तात्मभावस्यात्मनो व्यापारयोगोऽसङ्गत्वात्। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। प्रमात्मके फले स्वतन्त्रः प्रमाता भवति। अन्तःकरणपरिणामभेदश्च प्रमेयविषयकः कर्तृस्थश्चित्स्वभावः प्रमा। कथं च जडस्यान्तःकरणस्य परिणामः चिद्रूपो भवेत्, यदि चिदात्मा तत्र नाध्यस्येत्। कथं चैव चिदात्मको भवेत्, यद्यन्तःकरणंव्यापारवच्चिदात्मनि नाध्यस्येत्। तस्मादितरेतरा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्यासाच्चिदात्मकर्तृस्थं प्रमाफलं सिध्यति। तत्सिद्धौ च प्रमातृत्वम्। तामेन च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः। प्रमातृत्वेन प्रमोपलक्ष्येत। प्रमायाः फलस्याभावे प्रमाणं न प्रवर्तेत। तथा च प्रमाणमप्रमाण स्यादित्यर्थः। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति सिद्धम्।

९ प्र०—बिम्बप्रतिबिम्बवादान् भामतीरीत्या निराकुरुत, भामती सम्मतं च वाद प्रदर्शयत।

उ०—जीवब्रह्मणोर्विषयेविवरणानुसारिणां बिम्बप्रतिबिम्बवादोऽभिमतः। किन्तु भामतीकारः तं मतं नाभ्युपगच्छति। तस्यायमभिप्रायः—रूपवतो द्रव्यस्य रूपवति द्रव्येप्रतिबिम्बो भवति। नीरूपतयाऽत्मनः प्रतिबिम्बायोगः तस्मात् नीरूपपदार्थस्य बिम्बप्रतिबिम्बाभावादिदं वर्णनमयुक्तम्। अत एव शब्दार्थयोः परस्पराध्यासप्रसङ्गे कुमारिलेनोक्तम्—'शब्दगन्धरसादीनां कीदृशीप्रतिबिम्बतेति। तस्मान्नीरूपस्य प्रतिबिम्बासम्भवात् बिम्बप्रतिबिम्बभावोऽभ्युगन्तुमशक्यः। अतो यथाकाशस्यघटपटादिनाऽवच्छेदः स्वीक्रियते, एवमेव क्वचिन्मायावच्छेदिका भवति, क्वचिदन्तःकरणम्। तथा च मायावच्छिन्न चैतन्यमीश्वरः, अन्तःकरणावच्छिन्न चैतन्यं जीवः इति वदन्तः वाचस्पतिमिश्राः अवच्छेदवादमभ्युपगच्छन्ति। इति।

१० प्र०—प्रत्यक्षागमयोर्विरोधे कतरद्बलीय इति सयुक्तिक भामतीदिशा प्रतिपादयत ?

उ०—अहंकर्ताऽहंसुखीत्याद्यनुभवे कर्तृत्वादिविशिष्टः आत्मा प्रतीयते। 'असङ्गो ह्ययं पुरुषः इत्याद्यागमेनात्मा निर्धर्मकः प्रतीयते। अतः एकस्मिन् धर्मिणि द्वाभ्यां प्रमाणाभ्यां विरुद्धधर्मप्रसंजनात् ज्येष्ठत्वनिरपेक्षत्वाभ्यां प्रत्यक्षं प्रबलम्। तद्वैपरीत्येनागमस्तु दुर्बलः। 'विरोधे सति प्रबलेन दुर्बलोबाध्यते' इति न्यायेन प्रत्यक्षेणागमो बाध्यते। अतः पूर्वमीमांसादर्शने 'आदित्यो यूपः' 'सोमेन यजेत' इत्यत्र प्रत्यक्षविरोधे गौणीं लक्षणां वा वृत्तिमास्थायार्थान्तरपरत्वं वर्णितम्। तस्मादुपनिषदां प्रत्यक्षविरोधाज्जपमात्रोपयोगित्वमुपचरितार्थत्वं वाभ्युपेयम्।

अत्रोच्यते—तात्पर्यवतीश्रुतिः प्रत्यक्षाद्बलवती न श्रुतिमात्रम्। नहि श्रुतिइत्येतावता तत्र प्राबल्यं किन्तु तात्पर्यवत्याः श्रुतेः सर्वप्रमाणापेक्षया प्राबल्यं। श्रुतेः तात्पर्यं चोपक्रमादिभिः षड्भिलिङ्गैर्निर्धार्यते। अत एव 'तत्परत्वातत्परत्वयोर्मध्ये तत्परत्वस्य बलीयस्त्वमिति प्रत्यक्षापेक्षया श्रुतेर्बलीयस्त्वमिति।

किं चापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य बोधकतया स्वतः प्रमाणभावस्य प्रामाण्यं सम्पदादीनां निरपेक्षत्वादागम एव प्रबलो न तु प्रत्यक्षम्। सांव्यावहारिकप्रामाण्यविशिष्टप्रत्यक्षमागमेन शाब्दबोधोपजनने उपजीव्यं भवति, नत्वेतावता तत्र तात्विकं प्रामाण्यमभ्युपेयम्। अतयदुत्पादकं नास्ति खलु तेन सह विरोधो येन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विरोधस्तन्नोत्पादकन्। अत एव भामतीकृद्भिः उत्पादकाप्रतिद्वंन्द्वित्वात् इत्युक्तम्। तथाहि—न उपक्रमाधिकरणन्यायेन प्रत्यक्षेणागमो बाध्यते। न खलु तस्य प्रकृते प्रवृत्तिः किन्तु अपच्छेदन्यायेन तस्य प्रवृत्तिः। अयं च न्यायः पूर्वमीमांसायां 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् इत्यत्र प्रतिपादितः। इति दिक्।

११. प्र०—संविदः स्वप्रकाशत्वं निरस्यात्मनः स्वप्रकाशत्वं भामतीरीत्या समर्थयत।

उ०—आत्मनः स्वप्रकाशत्वविषये वादिनो विवदन्ते। तथाहि—आत्मा न स्वप्रकाशः, किन्तु सर्वार्थज्ञानेषु स कर्तृत्वेन भासते न तु कर्मत्वेन। परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वमिति तल्लक्षणात्। न खल्वीदृशं कर्मत्वमात्मनि सम्भवति किन्तु घटादिष्वेव। अतो ज्ञानं स्वप्रकाशम्। यदि च ज्ञानमपि स्वप्रकाशं न स्यात् तर्हि सर्वेषां जडतया किं कस्य प्रकाशमिति सर्वत्रान्धत्वं प्रसज्ज्येत। तथा चोक्तम् अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे। तस्मात्संवित् स्वप्रकाशः सा चार्थात्मानौ प्रकाशयतीति जडत्वेऽप्यात्मनो न कापि क्षतिः। अतो नास्ति आत्मा स्वयंप्रकाशः इति पूर्वपक्षः—

मिश्रास्तु—इदमनुपपन्नमिति मन्वते। तथाहि ज्ञानस्य स्वप्रकाशत्वेऽपि नैवमात्मनः प्रकाशः सम्भवति। न खलु पुत्रः पण्डित इत्येतावता पितरि पाण्डित्यमनुमातुं शक्यम। यद्युच्येत पुत्रस्य पित्रा सह स्वाभाविकः सम्बन्धो यथा, एवं ज्ञानस्यापि आत्मना सह सम्बन्धः। तदप्ययुक्तम्, पूर्वोक्तदोषप्रसङ्गात्।

किं च संवित्स्वप्रकाशिका सती अर्थात्मानौ प्रकाशयतीति पक्षेऽपि संविदः स्वप्रकाशः संवित्स्वप्रकाशः, उत संविदेव प्रकाशः संवित्स्वप्रकाशः? नाद्यः, घटादिवत् संविदोऽपि विषयत्वेन जडत्वापत्तेः। नान्त्यः प्रकाशाभिन्नत्वेन संविदा सहार्थात्मानौ इति पर्यवस्येत। तथा च संवित् प्रकाशेन सहार्थात्मनोः प्रकाश इति न विवक्षितार्थसिद्धिः।

किं चातीतानागतघटादेः वंतमानज्ञानेन सहभावोऽपि वक्तुमशक्यः न च तद्विषयकहानादिबुद्धिजननादर्थसहभाव इति वाच्यम् अर्थसंविद इव हानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः। अथ हानादिजननाद्धानादिबुद्धीनामर्थविषयकहानादिबुद्धिजननाच्चार्थसंविदस्तद्विषयत्वमिति, तर्कि देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्तिनिमितोहेतुरर्थे इत्यर्थप्रकाशकः केन वार्येत। अतः संवित्प्रकाशेन सहार्थप्रकाशः, आत्मप्रकाशो वेति नोपपादयितुं शक्यते। तस्मात्स्वप्रकाशोऽपि स स्वात्मन्येव खद्योतवत् प्रकाशकः। न तु विषयादौ, तत्र तेषां जडत्वमेवेत्युपपादितम्। अतः आत्मा स्वयंप्रकाशः। तदेवश्रुत्यामुक्तं सत्यं ज्ञानमनन्तं ब्रह्मेति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१२. प्र०—'अथातो ब्रह्मजिज्ञासे' तिसूत्रेऽथशब्दस्याधिकारार्थकत्वादिपरत्वं निरस्यानन्तर्यार्थकत्वं प्रतिपादयत ?

उ०—'अथैव ज्योतिः' 'अथशब्दानुशासनम्' 'अथ योगानुशासनमिति' अधिकारार्थेऽपि अथशब्दस्य प्रयोगदर्शनेन कथमानन्तर्यार्थ एवाथशब्दो, नाधिकारार्थ इति चेन्न ब्रह्मजिज्ञासाया अनधिकार्यत्वात्। तथाहि—जिज्ञासासूत्रे ब्रह्मतत्प्रज्ञानयोः प्रधान्यं जिज्ञासायां प्रतीयते 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठ भित्त्वा विनिर्यातौ, तस्मान्माङ्गलिकावुभौ ॥' इति ॥

न च दण्डी प्रैषानन्वाहेत्यत्राप्रधानस्यापि दण्डशब्दार्थस्य विवक्षावत् ब्रह्मतज्ज्ञानयोरपि प्राधान्यमिति वाच्यम् ब्रह्ममीमांसा शास्त्रप्रवृत्त्यङ्गसंशयप्रयोजन सूचनार्थत्वेन जिज्ञासाया एवात्र विवक्षितत्वात्। नहि तस्या अधिकार्यत्वं सम्भवति, अप्रस्तूयमानत्वात्। अतः तत्समभिव्याहृतोऽथशब्दोपि नाधिकारार्थः। जिज्ञासा-विशेषण तु ब्रह्मतज्ज्ञानमधिकार्यं भवेत्। न च तदपि अथशब्देन सम्बध्यते, प्राधान्याभावात्। न च जिज्ञासामीमांसा, येन योगानुशासनवदधिक्रियेत, व्युत्पत्ति-सिद्धस्य मीमांसा शब्दस्य पूजितविचारवचनत्वात् जिज्ञासापदस्य ज्ञानेच्छावाचक-त्वात्। अतो जिज्ञासा मीमांसायां प्रवर्त्तिका। न च तयोरैक्यम्, तथासति प्रवर्त्य-प्रवर्त्तकभावानुपपत्तेः। तस्मात्सुष्ठूक्त जिज्ञासाया अनधिकार्यत्वादिति।

अथ मङ्गलार्थोऽथशब्दः कस्मान्न भवति। तथा च मङ्गलहेतुत्वात्प्रत्यहं ब्रह्म-जिज्ञासा कर्तव्येति चेन्न मङ्गलस्य वाक्यार्थे समन्वयाभावात्। पदार्थ एव वाक्यार्थे समन्वीयते, स च वाच्यो वा लक्ष्यो वा। न चेह मङ्गलमथशब्दस्य वाच्यं वा लक्ष्यं वा, किन्तु अर्थान्तरप्रयुक्त एवाथशब्दः श्रुत्यामङ्गलप्रयोजनो भवति, अन्या-र्थमानीयमानोदककुम्भदर्शनवत्। तेन न स्मृतिव्याकोपः। अस्तु, तर्हि पूर्वप्रकृता-पेक्षोऽथशब्दार्थं इति चेन्न पूर्वप्रकृतापेक्षायाः फलतः आनन्तर्याव्यतिरेकात्। वस्तु-तस्तु-कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा। न चेह कल्पान्तरोपन्यास इति। पारिशेष्या-दानन्तर्यार्थं एवेति युक्तम्। तच्चानन्तर्यं साधनचतुष्टयात्, तस्यैव ब्रह्मजिज्ञासाया नियमेन विद्यमानत्वादिति दिक्।

१३. प्र०—कर्मावबोधानन्तरं ब्रह्मजिज्ञासा कथं नोपपद्यते इति भामतीम-नुसृत्य प्रतिपादयत।

उ०—अथ—धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्याया-नन्तर्यं, धर्मवद्ब्रह्मणोऽप्याम्नायैकप्रमाणगम्यत्वात्। न हि अगृहितवेदान्तवाक्यं स्ववि-षये विज्ञानं जनयति। ग्रहणस्य च स्वाध्यायाध्ययनेनैव नियतत्वात्। तस्माद् वेदाध्य-यनानन्तरमेव ब्रह्मजिज्ञासाकर्तव्येति चेन्न धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद्-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मणोऽपिवेदार्थत्वाविशेषेण वेदाध्ययनानन्तर्योपदेशसाम्येन ब्रह्मजिज्ञासाया अनारब्ध-त्वप्रसङ्गात्। न चेह कर्मावबोधानन्तर्ये विशेषः तथाहि—'विविदिषन्ति यज्ञेन इति तृतीयाश्रुत्या यज्ञादीनामङ्गत्वेन ब्रह्मज्ञाने विनियोगात् ज्ञानस्यैवेच्छां प्रतिकर्मतया प्राधान्यम्। प्रधानसम्बन्धाच्चाप्रधानां पदार्थान्तराणाम् सम्बन्धः। तत्रापि च न वाक्यार्थज्ञानोत्पत्तावङ्गत्वं यज्ञादीनाम्, वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः। अनुत्पत्तौ नाविधिनिषेधवाक्यार्थ प्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावः सङ्गः। तद्बोधतस्तु तदर्थानुष्ठानपरिवर्जनेऽन्योऽन्याश्रयः। तस्मिन् सति तदर्थानुष्ठानपरिवर्जनम्, ततश्च तद्बोध इति। न च वेदान्तवाक्यानामेव स्वार्थप्रत्यायने कर्मापेक्षा, न वाक्यान्तराणामिति वाच्यम् विशेषहेतोरभावात्। न च 'तत्त्वमसी'ति वाक्यात् त्वंपदार्थस्य कर्तृत्वादिविशिष्टस्य जीवस्य तत्पदार्थेन नित्यशुद्धबुद्धोदासीनस्वभावेन कर्मानुष्ठानमन्तरेणैक्यप्रतिपत्तिरशक्येति यज्ञाद्यनुष्ठानेन तु विशुद्धसत्त्वा श्रद्दधाना योग्यतावगमपुरःसरं तादात्म्यमवगमिष्यन्तीति वाच्यम्, योग्यतावधारणकारणेभ्यः प्रत्यक्षादिप्रमाणेभ्योऽतिरिक्तस्य कर्मणोऽपि प्रामाण्यप्रसङ्गात्। वेदान्ताविरुद्ध तन्मूलन्यायेन तु योग्यतावधारणे कृतं कर्मभिः। तस्मात् श्रुतिमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया चोपपत्त्या व्यवस्थाप्य तदुपासनायां भावनापराभिधानायां दीर्घकालनैरन्तर्यवत्यां ब्रह्मसाक्षात्कारफलायां यज्ञादीनामुपयोगः। यथाहुः—स तु दीर्घकालनैरन्तर्यसत्कारासेवितादृढभूमिः इति। अत एव श्रुतिः—तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत। तस्माच्छ्रुत्यादिप्रमाणेन यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना विशेषणत्रयवती अनाद्यविद्यावासनासमुच्छेदक्रमणे ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पते तदर्थं कर्मानुष्ठेयानि। न च कर्मानुष्ठानं तत्स्वरूपादिज्ञानं विना सम्भवति। नापि धर्ममीमांसापरिशीलनमन्तरेण तत्परिज्ञानम्। तस्मात्साधूक्तं 'कर्मावबोधानन्तर्यविशेष इति। अत्रोच्यते—प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। अयमभिप्रायः—ब्रह्मोपासनया कर्माण्यपेक्ष्यन्ते इत्युक्तम्। तत्र ब्रूमः क्व पुनरस्याः कार्यापेक्षा? किं कार्ये यथाऽग्नेयादीनां परमापूर्वोत्पत्तौ समिदाद्यपेक्षा। स्वरूपे वा, यथा तेषामेव द्विरवत्तपुरोडाशादि द्रव्याग्निदेवताद्यपेक्षा। नाद्यः, ब्रह्मस्वरूपे साक्षात्कारे उत्पत्तिविकारादीनासम्भवेन तत्रोपासनायाः—कर्मानपेक्षत्वात्। न च विद्यापिधाननिरसनरूपे ब्रह्मसंस्कारे उपासनायाः कर्मापेक्षत्वमिति वाच्यम् तस्मादपि ब्रह्मसंस्कारे उपासनायाः कर्मापेक्षत्वमिति वाच्यम् तस्मापि ब्रह्मस्वभावस्य नित्यत्वेनानुत्पाद्यत्वात्। नापि द्वितीयः निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकाले कर्मणि अधिकाराभावात्। तथा च श्रुतिः—न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। न चात्र कर्मणां सर्वथैवानुपयोग इति वाच्यम् तेषामाराद्युपकारकत्वात्। तथाहि—'वेदानुवचनेन ब्रह्मणा विविदिषन्ति' वेदितुमिच्छन्ति, न तु विदन्ति। वस्तुतः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रधानस्यापिवेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाश्च प्रत्ययार्थतया प्राधान्यात्। प्रधानेन च कार्यसम्प्रत्ययात्। नहि राजपुरुषमानयेत्युक्ते वस्तुतः प्रधानमपि राजापुरुषविशेषणतया शब्दत उपसर्जनः आनीयतेऽपितु पुरुष एव, शब्दतस्तस्य प्राधान्यात्। अतो नित्यनैमित्तिककर्मानुष्ठानप्रक्षीणकल्मषस्य विशुद्धसत्त्वास्यविदुष एव उत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणीश्रुतिः विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः इति। एवं चाननुष्ठितकर्माणि प्राग्भवीयकर्मवशाद्योविशुद्धसत्त्वः संसारासारतादर्शनेन निष्पन्नवैराग्यः, कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना, प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेः। इममेव च पुरुष धौरेयमधिकृत्य श्रुतिराह—'यदि वेतरया ब्रह्मचर्यादेव प्रव्रजेत् इति। तस्मात्तस्यानन्तयर्यमयशब्दो यद्विना ब्रह्मजिज्ञासा न भवति, यस्मिंस्तु सति भवन्ती भवत्येव। चेत्थं कर्मावबोधः। तस्मान्नकर्मावबोधानन्तर्यमय शब्दार्थः।

१४. प्र०—अपरोक्षभ्रमनिवृतिकारणं निरूप्य तत्र कर्मणां सहकारित्वं भामतीदिशा प्रत्याचढ्वम् ?

उ०—अथ—तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिश्रुत्या ब्रह्मसाक्षात्कारणोपासनायां यज्ञादिकर्मणांसहकारित्वमायाततः प्रतिभाति। तत्रायं प्रश्नः-केयं खलु ब्रह्मोपासना ? किं भ्रमप्रमासाधारणशाब्दज्ञानसन्ततिः, उत निर्विचिकित्सशाब्दज्ञानसन्ततिः ? आद्ये, अभ्यस्यमानापीयमविद्यां समुच्छेत्तुं नार्हति, तत्त्वविनिश्चयाभ्यासस्यैव सवासनविपर्यासोन्मूलनकारणत्वाभ्युपगमात्। नहि स्थाणुर्वापुरुषोवा इति संशयाभ्यासः, आरोहपरिणाहवद्द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयायालमृतेविशेषदर्शनात् द्वितीयेऽपि नासावनुत्पादितब्रह्मानुभवाविद्याद्वयोच्छेदाय पर्याप्ता। साक्षात्काररूपस्य हि विपर्यासस्य साक्षात्काररूपेणैवतत्त्वज्ञानेनोच्छिद्यमानत्वात्। तथैव दिङ्मोहादिपुअपरोक्षविभ्रमेषु दर्शनात्। नो खल्वासवचनलिङ्गादिनिश्चितदिगादितत्त्वानां दिङ्मोहादयो निवर्तन्ते। तस्मात् त्वंपदार्थस्य तत्पदार्थेन साक्षात्कार एषितव्यः। तेनैव हि त्वम्पदार्थस्य दुःखित्वादिसाक्षात्कारनिवृतिर्नान्यथा। न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दप्रमाणस्य फलम् कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात्। अतो निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तः करणं त्वम्पदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थरूपतामनुभावयतीति युक्तम्। च चायमनुभवो ब्रह्मस्वभावोऽपितु अन्तकरणस्यैव वृत्तिभेदो ब्रह्मविषयः। न चैतावता ब्रह्मणः पराधीनप्रकाशत्वम्, नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वप्रकाश्यं न भवति। सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि। न चान्तःकरणवृत्तौ तस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः, ब्रह्माकारवृत्तेरेव स्वपरोपाधिविरोधिन्यास्तदा विद्यमानत्वात्। न चानुमतभावितवह्निसाक्षात्का-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रवत् प्रतिभात्वेनास्याप्रामाण्यं, तत्र वह्निस्वलक्षणस्य परोक्षत्वात्, अत्र तु ब्रह्मरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात्। नहि उपाधेः साहित्यराहित्याभ्यां वस्त्वतिरिच्यते। तत्तदुपाधिविरहितो जीव एव शुद्धबुद्धादिस्वभावो ब्रह्मेतिगीयते। तस्माद् गान्धर्वशास्त्रार्थज्ञानाभ्यासाहित संस्कारसचिवश्रोत्रेन्द्रियेण षड्जादिस्वरग्राम मूर्च्छनाभेदप्रत्यक्षमिव वेदान्तार्थज्ञानाभ्यासाहितसंस्कारसहकृतान्तःकरणेन जीवस्य ब्रह्मभावप्रत्यक्षम्।

न चान्तःकरणवृत्तौ ब्रह्मसाक्षात्कारेजनयितव्येऽस्ति तदुपासनायाः कर्मापेक्षेतिवाच्यम् तस्याः कर्मानुष्ठानेन सहभावाभावेन तत्सहकारित्वानुपपत्तेः। न खलु 'तत्त्वमसी' त्यादिवाक्य निःसन्दिग्धं शुद्धबुद्धादिस्वभावकर्तृत्वाद्युपतेमपेतब्राह्मणत्वादिजातिं देहादिभिन्नमेकमात्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हति। तस्मान्न ब्रह्म साक्षात्कारजनने उपासनायां यज्ञादिकर्मसहकृतत्वमिति दिक्।

१५ प्र०—ज्ञानकर्मणोः समुच्चयं भामतीमनुसृत्य निराकुरुत ?

उ०—ननु पित्तोपहतेन्द्रियाणां पुरुषाणां गुडस्य माधुर्यविनिश्चयेऽपि तिक्ततावभासानुवृत्तिरिव निश्चितेपि परमार्थतत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तते। एवं चाविद्यासंस्कारानुवृत्या विद्यया सह कर्मानुष्ठानमपि सम्भवति। तेन च विद्यासहकारिणा विद्यासमुच्छेद उपपास्यते। न च कर्माविद्यात्मकम् कथमविद्यामुच्छिनत्ति ? तदुच्छेदकस्य कर्मणो वा कुत उच्छेद इति वाच्यम् सजातीयस्वयंरविरोधिनां भावानां बहुलमुपलब्धेः। पयोविषकतकरज इत्यादिषु तथैव लोके दर्शनात्। एवं कर्माप्यविद्यात्मकमविद्यान्तराणि अपगामय्य स्वयमपि अपगच्छतीति। अत्रोच्यते—सत्यम् 'सदेव सोम्येदमग्र आसीत् इत्युपक्रमात् 'तत्त्वमसी' त्यन्तात् शब्दाद् ब्रह्ममीमांसोपकरणादसकृदभ्यस्तात् निर्विचिकित्सेऽनाद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधेजातेऽपि अविद्यासंस्कारानुवृत्तौसांसारिकाप्रत्ययाः तद्व्यवहाराश्चानुवर्तन्ते। तथापि तान् व्यवहारप्रत्ययान् मिथ्येति मन्यमानो विद्वान्नश्रद्धत्ते। यथा पित्तोपहितेन्द्रियो गुड़ं थूत्कृत्य त्यजन्नपि तस्य तिक्ततां न श्रद्धत्ते, तद्वत्। तथा चाय क्रियाकारकफलेतिकर्तव्यतादिप्रपञ्चमतात्त्विकं विनिश्चिन्वन् कथं तत्राधिकृतो भवेत्। क्रियाकर्त्रादिवस्तुत्वं निश्चयवतो ह्यधिकारः कर्मकाण्डे, न तु परमार्थतत्त्वज्ञानिनः। अत एव भगवान्विद्वद्विषयत्वं शास्त्रस्य वर्णयाम्बभूव। तस्माद् राजजातीयाभिमानकर्तृके राजसूये यथा न विप्रवैश्यजातीयाभिमानिनोरधिकारः। एवं द्विजातिकर्तृकरणादिविभागाभिमानिकर्तृके कर्मणि न तदनभिमानिनोऽधिकारः। न चानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते, वैश्यस्तोम इव ब्राह्मणराजन्याभ्याम्। तेन दृष्टार्थेषु कर्मसु शक्तः प्रवर्तमानः प्राप्नोति फलं, दृष्टत्वात्। अदृष्टार्थेषु तु शास्त्रैकसमाधिगम्यं फलमनधिकारिणि न युज्यते इति नोपासनया कर्मणां समुच्चयः। न चैवं निषिद्धकर्मस्वपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनुष्याधिकारदर्शनेन तदभिमानरहितः तेष्वपि नाधिक्रियेत, पश्वादिवत् । तथा चायं निषिद्धमनुनिष्ठन् न प्रत्यवायभाग् भवेत्, तिर्यगादिवदिति भिन्नकर्मतायातः इति वाच्यम्, तस्य सर्वथा मनुष्याभिमानरहितत्वाभावात् । यद्यपि अविद्यासंस्कारानुवृत्त्या यस्य मात्रया तदभिमानोऽनुवर्तते, तथापि तं मिथ्येति मन्यमानो न श्रद्धत्ते इति । विधिषु श्रद्धामपेक्षते न निषेधेषु, अपि तु निषिध्यमानक्रियोन्मुखो नर इत्येतावानपेक्षितः । तथा च सांसारिकवत् श्रद्धावगत ब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्तमानोऽवश्यम् प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः । तस्मान्नोपासनया सह कर्मणां समुच्चयः इति ।

१६. प्र०—कर्मब्रह्मावबोधयोः शेषशेषिणोः श्रौतार्थक्रमनिरासं भामतीग्रन्थानुरोधेन कुरुत ?

उ०—'अथातो ब्रह्मजिज्ञासे' ति सूत्रेऽथशब्द आनन्तर्यार्थकः । तत्र कस्मादनन्तरमिति जिज्ञासायां 'कर्मावबोधानन्तरं सा भवतीति । अत एव ऋणत्रयापाकरणपरास्मृतिः 'ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत् । 'जायमानो वै ब्राह्मणः त्रिभिर्ऋणवान् भवतीति श्रुतिः । कर्मानुष्ठानं प्रागविधाय मोक्षाय यतनीयमिति चेन्न कर्मणामारादुपकारकत्वेन चित्तशुद्धिं प्रति कारणत्वादिति । एवं चेह कर्मानुष्ठानमन्तरेण प्राग्भवीयकर्मानुष्ठानेनैवविशुद्धयादि परम्परयानिष्पन्नवैराग्यः, कृतं तस्य कर्मानुष्ठानेन वैराग्यजननोपयोगिना । प्रागपि तस्य सिद्धत्वात् । अत एव श्रुतिः यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् । एतच्छ्रुत्यनुरोधेन 'जायमानो वै' इति श्रुतिः गृहस्थः सम्पद्यमान इति व्याख्येया । तस्मान्न ब्रह्मचारिण ऋणानि सन्ति । गृहस्थस्यापि सत्त्वशुद्ध्यर्थमेव ऋणापाकरणम् । भस्मान्तवादादिस्तु कर्मजडानविदुषः प्रति, न त्वात्मतत्त्वपण्डितान् । तस्मान्नियतकारणंजिज्ञासाया अथशब्दो द्योतयति । न चेत्थं कर्मावबोधः इति । न चाग्निहोत्रयवागूपाकवदार्थक्रमाभावेऽपि श्रौतक्रमस्तु भविष्यति । 'गृही भूत्वा वनी भवेत्' वनीभूत्वा प्रव्रजेत्, इति श्रुतेः गृहस्थस्यैव यज्ञाद्यनुष्ठानसूचनात् । तथा च स्मृतिः—

अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥
निन्दन्ति च योऽनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

इति चेन्न क्रमस्यात्राविवक्षितत्वात् । नह्यत्र हृदयाद्यवदानानामानन्तर्यनियमवत् नियमो, यतो हृदयस्याग्रेऽवद्यति अथ जिह्वाया इत्यत्राथाग्र शब्दाभ्यां क्रमस्य विवक्षितत्वात् । 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत' इति तथैवश्रुत्याऽनियमदर्श-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नात्। यदहरेव विरजेत् तदहरेव प्रव्रजेत 'इति श्रुतेः संन्यासं प्रति वैराग्यस्यैव कारणत्वोपदेशात्। निन्दावचनं चाविशुद्धसत्त्वपुरुषाभिप्रायम्। न च पौर्वापर्यात्मकस्य क्रमस्य नियामकैः पाठमुख्यस्थानप्रवृत्तिप्रमाणैः क्रमस्य विवक्षास्तु इति वाच्यम् शेषशेषित्वे प्रमाणाभावात्। तथाहि—शेषाणां समिदादीना शेषिणां चाऽनेयादीनामेकफलावच्छिन्नत्वेनैकाधिकारिकर्तृकत्वेन च युगवदनुष्ठानाशक्तेः सामर्थ्यात् क्रमप्राप्तौ तद्विशेषापेक्षायां पाठादिः तद्भेद नियमार्थं प्रभवति। यत्र तु न शेषशेषिभावो नाप्येकाधिकारावच्छेदः, तत्र क्रमभेदापेक्षाभावान्न पाठादिः क्रमविशेषनियामकः प्रमाणम्। न चेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीनामन्यतमं प्रमाणमस्ति। न च शेषशेषिभावेऽपि क्रमनियमो दृष्टः। यथा गोदोहनस्य पुरुषार्थस्य दर्शपौर्णमासिकैरङ्गैः सहेति वाच्यम् तत्र स्वर्गकामस्य दर्शपौर्णमासाधिकृतस्य पशुकामस्य सतो दर्शपौर्णमासक्रत्वर्थाप्रणयनाश्रिते गोदोहनेऽधिकारेऽप्यत्राधिकृताधिकारे प्रमाणाभावात्। किं च शेषशेषित्वाधिकृताधिकाराभावेऽपि क्रमो विवक्ष्येत यदि आग्नेयादीनामेकफलावच्छिन्नानां षण्णामिवैकफलावच्छेदो भवेत्, यदि वा जिज्ञास्य ब्रह्मणोंऽशो धर्मो भवेत्। तस्माद् धर्मब्रह्मजिज्ञासयोः फल जिज्ञास्यभेदादपि नात्र क्रमो विवक्षित इत्यलम्।

१७. प्र०—अथातो ब्रह्मजिज्ञासेतिसूत्रेऽतः शब्दस्यप्रयोजनं भामतीरीत्या दर्शयत ?

उ०—अथातो ब्रह्मजिज्ञासे त्यत्राथशब्दः आनन्तर्यार्थकः। तत्र कस्मादनन्तरमिति विशेषाकांक्षायां विवेकादिसाधनचतुष्टयानन्तरमित्युक्तम्। अतः शब्दो हेत्वर्थः। यस्माद्वेद एवाग्निहोत्रादिनां श्रेयःसाधनानामनित्यफलतां दर्शयति, तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवात्र पुण्यचितो लोकः क्षीयते इत्यादिः। तथाब्रह्मविज्ञानादपि परमपुरुषार्थं दर्शयति 'ब्रह्मविदाप्नोति परम्' इत्यादिः। तत्रैवं चोद्यते भवतु नाम यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा। सैवात्रानुपपन्ना। इहामुत्रफलभोगविरागस्यानुपपत्तेः। नहि—अनुकूलवेदनीयत्वेनेष्टलक्षणं फलमनुरागकारण वैराग्यजनकं भवितुमर्हति। न च दुःखानुसङ्गदर्शनात् सुखेऽपि वैराग्यमिति वाच्यम् सुखानुसङ्गदर्शनेन दुःखेष्वप्यनुरागसम्भवात्। अतो मत्स्यार्थिधान्यार्थिवत्. अवर्जनीयतया दुःखमागतं परिहृत्य भोक्तव्यमिति दुःखभयान्नानुकूलवेदनीयमैहिकं नामुस्मिकं वा सुखं परित्यक्तुमुचितम्। नाहि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। किं च दृष्टं सुखं विषयसंसर्गजन्यं विनाशलक्षणदुःखेन ग्रस्तत्वादतिभीरूणा त्यज्येतापि नत्वामुष्मिकं स्वर्गादि। तस्य 'अपाम सोममदृता बभूव' इत्यादिना अविनाशित्वश्रवणात्। न चात्र कृतकत्वेहतुना विनाशित्वानुमानं सम्भवति, नरशिरः कमालं शुचि, प्राण्यङ्गत्वात् शंखवदित्यनुमानस्य 'नारं स्पृष्टवास्थि सस्नेहं सवासा जलमाविशेदित्यागमेन बाधितविषयत्ववदत्रापि विनिशित्वानु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मानस्य बाधितविषयकत्वात्। तस्माद्यथोक्तसाधनसम्पत्त्यभावात् न ब्रह्मजिज्ञासेति प्राप्ते ब्रूमः:—

सत्यं याचककृषिबलादिभिर्मृगभिक्षुकादयः शक्याः परिहर्तुम्, दुःखं त्वनेकविधानेकसम्पातजमशक्यपरिहारम्। अन्ततः साधनपारतन्त्र्यक्षमितालक्षणयोः दुःखयोः समस्तकृतकसुखाविनाभावनियमात्। न खलु मधुविषसम्पृक्तमन्नं विषं परित्यज्य समधुशिल्पिवरेणापि भोक्तुं शक्यम्। विनाशित्वानुमानोपोद्बलितं च 'तद्यथेह कर्मचित इत्यादिवचनं क्षयिताप्रतिपादकम्। 'अपाम सोमममृतं बभूव' इत्यादि वचनं मुख्यासम्भवे लक्षणावृत्तिमापादयतीति। तदुक्तं पौराणिकैः—'आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते' इति। न च यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुसङ्गस्तथा ब्रह्मणोऽपि दुःखानुषङ्गः इति वाच्यम्। ब्रह्मविदाप्नोति परमिति विज्ञानस्य परमपुरुषार्थताप्रतिपादकत्वात्। तस्माद्यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासेति सिद्धम्।

१८. प्र०—'अथातो ब्रह्मजिज्ञासेतिसूत्रे ब्रह्मजिज्ञासेति पदे कः समासः किं तत्र स्वारस्यमिति भाष्यभामतीदिशा सम्यक् प्रतिपादयत ?

उ०—अथातो ब्रह्मजिज्ञासेत्यत्र ब्रह्मणो जिज्ञासा-ब्रह्मजिज्ञासेति षष्ठीसमासः। ननु ब्रह्मणेजिज्ञासेति चतुर्थीसमासेसम्भवेपि कथं षष्ठीसमास एवेति तादर्थ्यसमासे प्रकृतिविकारग्रहणं कर्तव्यमिति वार्तिककारवचनविरोधात्, यूपदारुरित्यादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात्। न च चतुर्थीसमासपरिग्रहे ब्रह्मण उद्देश्यत्वेन प्राधान्यं लभते, न तु तत् षष्ठीसमासपरिग्रहे घटते इति वाच्यम् इच्छाविषयत्वेन ब्रह्मणो वास्तवप्राधान्योपपत्तेः' ब्रह्मणश्च 'जन्माद्यस्ययत्' इति वक्ष्यमाणलक्षणोपेतत्वात्। ब्रह्मण इति कर्मणि षष्ठी, न तु शेषे। इच्छायाः प्रत्यनुबन्धो ज्ञानम्, तस्य च ज्ञेयं ब्रह्म। अतः प्रत्यनुबन्धत्वेन प्रथमं जिज्ञासा कर्मैवापेक्षते, न तु सम्बन्धिमात्रमेव। तदन्तरेणापि सति कर्मणि तन्निरूपणात्। तस्मात् जिज्ञास्यमन्तरेणापि जिज्ञासाया अनिरूपणात् जिज्ञास्यान्तरानिर्देशाच्च तत्कर्मतया ब्रह्मण उपस्थितिरिति। न च शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते, सम्बन्धसामान्यस्य विशेषनिष्ठत्वात् इति वाच्यम् वाच्यत्वेन कर्मत्वस्योपस्थितिं परित्यज्य कथञ्चिदपेक्षितस्य सम्बन्धिमात्रस्य सम्बन्धपरिग्रहे जघन्यवृत्तित्वाश्रयप्रसङ्गात्। न चैवं ब्रह्माश्रिताशेषविचारस्य प्रतिज्ञानविरोधप्रसक्तिरिति वाच्यम्, प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्महि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम्। तस्मिन् प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्मजिज्ञासितं न भवति, तान्यर्थाक्षिप्तान्येव न पृथक् सूत्रयितव्यानि। यथा राजासौ गच्छति इत्युक्तौ सर्वपरिवारस्य राज्ञोगमनमुक्तं भवति तद्वत्। श्रुत्यनुगमाच्च, यतो वा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इमानि भूतानि जायन्ते इत्यादि। तद्विजिज्ञासा तद्ब्रह्मेति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयति। तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्मात् ब्रह्मण इति कर्मणि षष्ठी। ज्ञातुमिच्छा जिज्ञासा। साक्षात्कारपर्यन्तं ज्ञानं सन्प्रत्ययेच्छायाः कर्म, फलविषयत्वादिच्छायाः। ज्ञानेनावगन्तुमिष्टं ब्रह्म तच्च ब्रह्मज्ञानं पुरुषार्थः, निःशेष संसारवीजाऽविद्याद्यनर्थनिवारणात्। अविद्यातत्संस्कारश्चावगति पर्यन्तं ब्रह्म ज्ञानं विना निवर्तयितुमशक्यः। सवासन विविध दुःख निदानाविद्योच्छेदेन निखिल दुःखानुसङ्गशून्यानन्दघन ब्रह्मसाक्षात्कारो जीवस्य भवतीति। तस्मादानन्दघन ब्रह्मता मिच्छता तदुपायो ज्ञानमेषितव्यम्। तच्च ज्ञानं न केवलेभ्यो वेदान्तेभ्यः अपितु ब्रह्ममीमांसोपकरणेभ्यः। तस्मात् ब्रह्म जिज्ञासितव्यम्।

१६. प्र०—ब्रह्मणो जिज्ञासा सम्भवति नवेति भाष्य भामतीदिशाऽऽक्षिप्य समाधत्त।

उ०—ननु ब्रह्म जिज्ञासितव्यमित्युक्तम्। तत्र ब्रह्मणः प्रसिद्ध्यप्रसिद्धिभ्यां जिज्ञासाऽयुक्ता। तथाहि ब्रह्म वेदान्तेभ्योऽपौरुषेयतया स्वतः सिद्धप्रमाणेभ्यः प्रसिद्धमप्रसिद्धं वा। न तावदाद्यः, अजिज्ञासितव्यत्वप्रसङ्गात्। नहि प्रसिद्धे वस्तुनि जिज्ञासा सम्भवति, तथा लोकेऽदृष्टत्वात्। नापि द्वितीयः, सर्वथाऽप्रसिद्धस्येच्छाविषयत्वाभावात्। अनुभूते हि प्रिये भवतीच्छा, न सर्वथाननुभूते इति चेन्न बृंहत्वाद् बृंहणत्वाद्वेति व्युत्पत्त्याऽऽत्मत्वेन सर्वस्य ब्रह्मणः प्रसिद्धत्वेऽपि तद्विशेषस्वरूपं प्रतिविप्रतिपत्तिदर्शने जिज्ञासाविषयत्वाभ्युपगमात्। सा च विप्रतिपत्तिः संशय वीजम्। सन्दिग्धत्वेन च तस्य जिज्ञासाविषयत्वमविरुद्धम्। विप्रतिपत्तिश्च देहमात्रं चैतन्यविशिष्टमात्मेति केचित्। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। शून्यमित्यपरे। देहादिभिन्नः संसारी कर्त्ताभोक्तेत्यपरे। भोक्तैव केवलं न कर्त्तेत्येके। एवं तत्पदार्थेऽपि विप्रतिपत्तिः। तथा च देहेन्द्रियमनः क्षणिक विज्ञानपक्षे न तत्पदार्थं नित्यत्वादयस्त्वंपदार्थेन सम्बध्यन्ते। योग्यताविरहात्। शून्यपक्षेऽपि सर्वोपाख्यारहितमपदार्थः कथं तत्त्वमार्गोचरः। कर्तृभोक्तृस्वभावस्यापि परिणामितया तत्पदार्थ नित्यत्वाद्यसंगतिरेव। भोक्तृत्वपक्षेऽपि परिणामितया नित्यत्वाद्यसंगतिः। अभोक्तृत्वेऽपि नानात्वेनावच्छिन्नत्वात् अनित्यत्वादिप्रसक्तावद्वैतहानाच्च। एवं तत्पदार्थसंगतिस्तदवस्थैव। ननु सन्तु विप्रतिपत्तयस्तन्निमित्तश्च संशयस्तथापि किमर्थं ब्रह्ममीमांसारभ्यते इति चेन्न विचारमन्तरेण यत्किञ्चित्प्रतिपद्यमानस्य निःश्रेयसात्प्रच्युतरेनर्थप्रसक्तेश्च। तत्त्वज्ञानं च विचारं विनाऽसम्भवं तदर्थं ब्रह्ममीमांसाशास्त्रमारम्भणीयम् इति दिक्।

।तत्तुसमन्वयात।

१. प्र०—वेदान्तानां सिद्धान्तापरत्वमाक्षिप्य समाधत्त?

उ०—'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति शास्त्रस्य क्रियापरत्वप्रदर्शितेन कथं शास्त्रप्रमाणकं ब्रह्मेति। तथा चाशुद्धबुद्धोदासीनस्वभावतयोपेक्ष-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सीर्यं ब्रह्म भूतमभिदधतां वेदान्तानामपुरुषार्थोपदर्शिनामप्रयोजनत्वापत्तेः भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत् तदर्थानुवादकत्वेनाप्रामाण्यप्रसङ्गात्। न खलु लौकिकानिवाक्यानि न प्रमाणान्तरविषयमवबोधयन्ति स्वतः प्रमाणम्, एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत। न च तैरप्रमाणैरप्रयोजनैश्च भवितुं युक्तम्। स्वाध्यायाध्ययनविध्यापादितप्रयोजनत्वनियमात्। तस्मात्तत्तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरत्वेनैव तेषां क्रियार्थत्वम्। न चासन्निधानात्तत्परत्वं न भवितुमर्हन्तीति वाच्यम् सन्निहितोपासनादिक्रियापरत्वाभ्युपगमेऽविरोधात्। एवं च प्रत्यक्षाद्यनधिगतः गोचरत्वेनानपेक्षतया प्रामाण्यं सिध्यतीति चेन्न, सर्वेषां वेदान्तवाक्यानां साक्षात्परम्परया वा तस्यार्थस्यैव प्रतिपादकत्वेन समन्वयात्। तथा च 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् इत्युपक्रम्य 'ऐतदात्म्येदंसर्वमि' त्युपसंहारात्। तथा 'तत्त्वमसीति अभ्यासः' जीवब्रह्मणोरैक्यमपूर्वता, वाचारम्भणं विकारो नामधेयमिति 'उपपत्तिः' इति तात्पर्यबोधकैः षड्भिः लिङ्गैर्वेदान्ततात्पर्यविषयत्वाद्ब्रह्मणः शास्त्रप्रमाणकत्वमिति। एवं 'ब्रह्मैवेदं सर्वं पुरस्तात्।' आत्मा वा इदमेक एवाग्र-आसीत्। 'अयमात्मा ब्रह्म सर्वानुभूः' इत्यादिवाक्यमपि तत्र प्रमाणम्। न च पुंवाक्यनिदर्शनेन भूतार्थतया वेदान्तानां सापेक्षत्वमाशङ्कनीयमिति वाच्यम् विचारासहत्वात्। तथाहि—किं पुंवाक्यानां भूतार्थत्वेन सापेक्षत्वमभ्युपेयते उतपौरुषेयत्वेन। आद्ये–प्रत्यक्षादीनामपि परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः। द्वितीये, अपौरुषेयाणां वेदान्तानां भूतार्थानामपि नियतेन्द्रियलिङ्गादिजन्मनां प्रत्यक्षादीनामिव नाप्रामाण्यमिति। न च सिद्धे सत्यपौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिध्येत्, तदेव तु भूतार्थत्वेन न सिध्यति, भूतार्थस्य हि शब्दानपेक्षेण पुरुषेण मानान्तरतः शक्यज्ञानत्वात् बुद्धिपूर्वं विरचनोपपत्तेः, वेदाः पौरुषेया वाक्यत्वात् भारतादि वाक्यवदिति प्रयोगः। तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारम्। कार्यार्थत्वेऽपि तु कार्यस्यापूर्वस्य मानान्तरागोचरतयाऽत्यन्ताननुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावनारोहात् तदर्थानां वेदान्तानामशक्य रचनतया पौरुषेयत्वाभावात् नापेक्षत्वं प्रामाण्यं सिध्यतीति प्रामाण्याय वेदान्तानां कार्यपरत्वमभ्युपेयमिति वाच्यम् कार्यपदार्थस्य निरुपयितुमशक्यत्वात्। अपूर्वं कार्यमिति चेत्, तर्हि मानान्तरानवगते तस्मिन्नपूर्वे संगतिग्रहाभावाल्लिङादीनामवोधकत्वापातः। लोकानुसारतः क्रियाया एव लौकिक्याः कार्याया लिङादेरवगमात्। न च क्रिया क्षणभङ्गुरामुष्मिकाय स्वर्गाय न कल्पते, अतः 'स्वर्गकामो यजेत' इति साध्यस्वर्गविशिष्टो नियोज्यः स्वर्गानुकूलं कार्यमवगच्छतीति पारिशेष्याद्वेदत एवापूर्वे कार्ये लिङादीनां शक्तिग्रह इति वाच्यम् चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसम्बन्धादपूर्वकार्यत्वाद्यसक्त्या तेषामप्यशक्यरचनत्वेनापौरुषेयत्वापातात्। न च स्पष्टदृष्टेन पौरुषेयत्वेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चैत्यवन्दनादि वाक्यानामपूर्वार्थत्वप्रतिषेध इति वाच्यं, वाक्यत्वादिलिङ्गेन वेदानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थत्वाभावप्रसङ्गात्। एवं चापौरुषेयत्वे सिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः। नचानधिगतगन्तृत्वाभावान्न तत्र प्रामाण्यमिति वाच्यम् 'तत्त्वमसि' इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगमात्। तस्माच्छास्त्रप्रमाणकं ब्रह्मेतिसिद्धम्।

२. प्र०—अहेयोपादेयार्थे वेदान्तानामप्रामाण्यमाशंक्य समाधत्त ?

उ०—ननु प्रवृत्तिनिवृत्तिबोधकशास्त्रस्य हेयोपादेयार्थबोधकतया प्रामाण्याद् ब्रह्मणो हेयोपादेयशून्यत्वेन तत्र शास्त्रोपदेशानर्थक्यमिति चेन्न हेयोपादेयशून्यब्रह्मात्मतावगमेनैव सर्वक्लेशप्रहाणात् पुरुषार्थत्वसिद्धेः। तथाहि पुरुषस्य द्विविधमीप्सितं, किञ्चिदप्राप्त ग्रामादि, किञ्चित्प्राप्तमपिभ्रान्त्याअप्राप्तमित्यवगत, यथा—स्वग्रीवावनद्धग्रैवेयकम्। एवं जिहासितमपि द्विविधम्, किञ्चिदहीनं जिहासति, यथा वलयितचरणं फणिनम्। किञ्चित्पुनर्हीनमेव जिहासति, यथाचरणाभरणे नूपुरे फणिनमारोपितम्। तत्राप्राप्ताप्राप्तौ चात्यक्तत्यागे च बाह्यानुष्ठानसाध्यत्वात् तदुपायतत्त्वज्ञानादस्ति प्राचीनानुष्ठानापेक्षा। समारोपिते तु प्रेप्सितजिहासिते तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठाननिरपेक्षेण शक्येते प्राप्तमिव हातुमिव, समारोपमात्रजीविते हि ते। समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्तीति। तथेहाविद्यासमारोपित जीवभावे ब्रह्मण्यानन्दे वस्तुतः शोकदुःखादिरहिते समारोपनिबन्धनस्तद्भावः तत्त्वमसीत्यादिवाक्यार्थज्ञानादवगतिपर्यन्तान्निवर्तते। तन्निवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति। त्यक्तमपि सुखदुःखाद्यत्यक्तमिव त्यक्तं भवति। तस्माद् ब्रह्मात्मैक्यज्ञानेनैव जीवस्य सवासनसर्वक्लेशस्य हानपुरःसरं दुःखनिवृत्तिसुखावाप्तिलक्षणस्य पुरुषार्थस्य सिद्धिर्भवतीति। न च आत्मेत्येवोपासीत; 'आत्मानमेव लोकमुपासीतेत्युपासना वाक्यगतदेवतादिप्रतिपादनेनोपासनापरत्वं वेदान्तानामभ्युपेयमिति वाच्यं देवतादि प्रतिपादनस्य स्ववाक्यगतोपासनार्थत्वेऽपि अविरोधात्। न च सन्तु तर्हि वेदान्ता उपासनाविधिपरा एवेति वाच्यम् उपास्योपासकोपासनादिभेदसिद्ध्यधीनोपासनाया निरस्तसमस्तभेदप्रपञ्चे वेदान्तवेद्ये ब्रह्मणि असम्भवेन वेदान्तानामुपासनाविधिशेषत्वासम्भवात्। अपि चैकत्व विज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनरुत्पत्त्यसम्भवेनोपासनाधिशेषत्वं कथमपि नोपपद्यते। न चैवं विधिविरहेऽपि वेदान्तानां प्रामाण्याभ्युपगमे 'सोऽरोदित्यादिवाक्यानामपि प्रामाण्यापत्तिरिति वाच्यम् वेदान्तवाक्यानामिवार्थवादवाक्यानामर्थावगममात्रेण पुरुषार्थत्वादर्शनात् विधिशेषत्वेनैव तत्र पुरुषार्थत्वाभ्युपगमात्। तथा हि—स्वाध्यायविध्यधीनग्रहणतया निखिल वेदराशेः पुरुषार्थतन्त्रत्वेन वर्णैकस्यापि वैयर्थ्याशंक्यमयुक्तम् किं पुनरियता सोऽरोदीदित्यादिपदप्रबन्धेन तस्मात् 'बर्हिषि रजतं न देयमिति निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते, अन्यथा ततश्चेतनो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निवर्तयितुमशक्यः। सोऽरोदीतित्यत्र तु पुरुषार्थमपेक्षते। एवं च परस्परसाकांक्षयोः पदसन्दर्भयोर्लक्ष्यमाणनिन्दाद्वारेण नष्टाश्वदग्धरथवत् परस्परं समन्वयः। किं चान्यत्र वेदवाक्यानां विधिसंस्पर्शनन्तरेण प्रामाण्यमदृष्टमपि आत्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्। न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षेत। अतोऽवाधितानधिगतासंदिग्धबोधजनकत्वं प्रमाणत्वं प्रमाणानां स्वतः सिद्धमिति सिद्धं शास्त्रप्रमाणकत्वं ब्रह्मणः इत्यत्रम्।

३. प्र०—अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया, मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चय इति श्लोकं भामतीरीत्या व्याचढ्वम्?

उ०—अथ वेदान्ता ब्रह्मपरा भवितुं नार्हन्ति, सिद्धार्थेऽविदितसंगतित्वात्। यत्र हि शब्दा लोके न प्रयुज्यन्ते, तत्र न तेषां संगतिग्रहः न चाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान्, तस्याबुभूत्सितत्वात्। अबुभूत्सितार्थाविवोधने प्रेक्षावत्ताविघानात्। तस्मात् प्रतिपित्सितं प्रतिपिपादयिषन्नयं लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत्। कार्यं चावगतं तद्धेतुरिति तदेव वोधयेत्। एवं वृद्धव्यवहारप्रयोगात् पदानां कार्यपरतामवगच्छति। साक्षात्परम्परया वा सर्वपदानां कार्याभिधायकत्वं। अपि च नरान्तरस्य व्युत्पन्नस्यार्थप्रत्ययमनुमाय तस्य च शब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयबोधकत्वं निश्चेतव्यम्। किं च वेदान्तानां वेदत्वात् शास्त्रत्वप्रसिद्धिरस्ति प्रवृत्तिनिवृत्तिपराणां च संदर्भाणां शास्त्रत्वम्। यथाहुः—प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते इति। तस्माच्छास्त्रत्वप्रसिद्ध्या व्याहतमेषां स्वरूपपरत्वम्। अपि च न ब्रह्मपराणामेषामर्थवत्वं पश्यामः। नहिं रज्जुरियमिति वाक्यार्थनिश्चयेन भयकम्पादिनिवृत्तिवत् 'तत्त्वमस्यादिवाक्यार्थावगमात्संसार धर्माणां निवृत्तिर्भवतीति, श्रुतवेदान्तवाक्यार्थस्यापि तेषां तादवस्थ्यात्। अपि च वेदान्तश्रवणमात्रेण पुंसां संसारधर्मनिवृत्तिश्चेत् मननादिविधानस्य वैयर्थ्यप्रसङ्गात्। तस्मान्न ब्रह्मपराः वेदान्ताः किन्त्वात्मप्रतिपत्तिविषयकार्यपराः। तच्च कार्यं स्वात्मनि नियोज्यं नियुञ्जानं नियोगः इति, मानान्तरापूर्वतया' पूर्वमिति चाख्यायते। न च विषयानुष्ठानं विना तत्सिद्धिरिति स्वसिद्ध्यर्थं तदेव कार्यं स्वविषयस्य कारणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति। यथा च कार्यं स्वविषयाधीननिरूपणमिति ज्ञानेनविषयेण निरूप्यते, एवं ज्ञानमपि स्वविषयमात्मानमन्तरेणाशक्यनिरूपणमिति तन्निरूपणाय तादृशमात्मानमाक्षिपति तदेव कार्यम्। यथाहुः—'प्राभाकराः। यत्तु तत्सिद्ध्यर्थमुपादीयते आक्षिप्यते तदपि विधेयमिति तन्त्रे व्यवहारः। विधेयता च नियोगविषयस्य ज्ञानस्य भावार्थत्वेनानुष्ठेयता तद्विषयस्य त्वात्मनः स्वरूपसत्ताविनिश्चितिः। अहं ब्रह्मास्मीति ज्ञाने भासमानं यद्ब्रह्म तद्भावारोपितस्य जीवस्य स्वरूपकोटिवहिभूतस्य सत्यज्ञानानन्दस्य ज्ञान-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निरुपकत्वे तेन प्रतिभासमानांशेन तज्ज्ञानं निरुपितं न स्यात्। तस्मात्तादृगात्म-प्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यस्तादृगात्मतत्त्वनिश्चयः, तदेतत्सर्वं यद्यपि शास्त्र-प्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्थ्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत् इति भाष्य ग्रन्थे स्पष्टम्।

४. प्र०—उपासनाविधिपरत्वं वेदान्तानां भामतीरीत्या निराकुरुत ?

उ०—ननु—श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिवाक्ये विध्यर्थकस्य तव्यप्रत्ययस्य श्रवणोत्तरकालयोर्मनननिदिध्यासनयोश्च दर्शनात् प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्मेत्यभ्युपगन्तव्यमिति चेन्न विचारासहत्वात्। तथाहि—उपासनाविधिपरत्व वेदान्तानामभ्युपगच्छता त्वया नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मत्वं जीवस्यस्वाभाविकं वेदान्तगम्यमास्थीयते। तच्चोपासनाविषयस्य विधेर्नफलं नित्यत्वेनाकार्यत्वात्। नाप्यन्तावविद्यापिधानापनयस्तस्य फलम्, तस्य तद्विरोधिविद्योदयमात्रेणैव सद्भावात्। नापि विद्योदयः, तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवदुपासनापूर्वमपि चेतः सहकारीति, दृष्टं हि नैयोगिक फलमैहिकमपि, यथा चित्रकार्यादिनियोगानामनियतनियतफलानामिति चेत् न गांधर्वशास्त्रोपासना इवापूर्वानपेक्षायाःषड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया अपूर्वानपेक्षाया एव ब्रह्मसाक्षात्कारे सामर्थ्यात् तथा च उपासनापूर्वस्यामृतत्वं प्रत्यहेतुत्वात् नामृतत्वकामस्तत्कार्यमवबोद्धुमर्हति। नह्यन्यदिच्छत्यन्यकरोतीति विप्रतिषेधात्। न च तत्कानः क्रियामेव कार्यमवगमिष्यतीति वाच्यम् तस्याः मानान्तरेण तत्साधनत्वप्रतीतेर्विधेर्वैयर्थ्यात्। न चावघातादिनियमविधितुल्यम्, तत्रापि नियमापूर्वस्यान्यतोऽनवगतेः। न च ब्रह्मभूयादन्वदमृतत्वमार्थवादिकं किञ्चिदस्ति, येनोपासनायां तत्कामोऽधिक्रियेत। न च विश्वजिन्न्यायेनस्वर्गफलत्वं कल्पनीयत्वमिति, उपासनाफलस्यनित्यत्वानुपपत्तेः सातिशयत्वच्चयित्वप्रसङ्गाच्च। तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयनमात्रेणाविर्भावादविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव सम्भवात्, उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने मनः साचिव्यस्य च मानान्तर सिद्धत्वात् आत्मेत्येवोपासीत इत्यादौ न विधिः किन्तु विधिस्वरूपोऽयम् विष्णुरुपांशु यष्टव्य इत्यादिवदिति बोध्यम्।

५. प्र०—आत्मनि कीदृशं नित्यत्वमिति भाष्यभामतीग्रन्थानुसारेण निरुपयत ?

उ०—अथानुष्ठेयकर्मफलविलक्षण मोक्षाख्यमशरीरत्वं नित्यमिति भाष्यकारैरुक्तम्। तत्र मोक्षस्य नित्यत्वं कीदृशमिति प्रश्ने ? कूटस्थनित्यत्वं न तु परिणामि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नित्यत्वमिति तस्यापारमार्थिकत्वात्। तथा हि मोक्षे परिणामि नित्यत्वाभ्युपगमे सर्वात्मना वा परिणमेदेकदेशेन वा। आद्ये तत्त्वव्याहतिः। द्वितीये स एकदेशस्ततो भिन्नो वाऽभिन्नो वा। आद्ये कथं तस्य परिणामः, नह्यन्यस्मिन् परिणममानेऽन्यः परिणमते अतिप्रसङ्गात्। द्वितीये कथं न सर्वात्मना परिणामः। भेदाभेदपक्षस्तु परस्परव्याहतत्वान्नयुक्तः। तथाहि कोयं भेदो नाम यः सहाभेदेनैकत्र भवेत्। परस्पराभाव? इति चेत् किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा। आद्येऽभेदपक्षबाधप्रसङ्गः। द्वितीये भेदपक्षबाधप्रसङ्गः। न च भावाभावयोरविरोधः, सहावस्थानासम्भवात्। सम्भवे वा कटकवर्धमानकयोरपि तत्त्वेनाभेदप्रसङ्गः भेदस्याभेदाविरोधात्। अपि च कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटादयो न भिद्यन्ते एवं कटकात्मना न भिद्येरन्, कटकस्य हाटकादभेदः। यदि कुकटकादभिन्नमेव सुवर्णं तदाऽस्य कुण्डलादिष्वनुवर्तमानात्कटकस्यापि कुण्डलादिष्वनुवृत्तिः प्रसज्येत। सर्वथा तयोरभिन्नत्वाभ्युपगमे सर्वेषामभिन्नत्वप्रसङ्गः। अपि च दूरात्कनकमित्यवगते न तस्य कुण्डलादयो जिज्ञास्येरन्। कनकादभेदात्तेषां तस्य च ज्ञातत्वात्। न च भेदस्यापि सत्त्वेन जिज्ञासेति, अभेदस्यापि विद्यमानत्वेन ज्ञाततया जिज्ञासाभावप्रसङ्गात्। कथं तर्हि सुवर्णं कुण्डलमिति सामानाधिकरण्यमिति, नह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यं सम्भवतीति। अथानुवृत्तिव्यावृत्तिव्यवस्था च सुवर्णे ज्ञाते कुण्डलादि जिज्ञासा च कथम्? न खल्वभेदे ऐकान्तिकेऽनैकान्तिके चैतदुपपद्यते इत्युक्तम्। तस्माद् भेदाभेदयोरन्यतरस्मिन् त्याज्येऽभेदोपादानैव भेदकल्पना, न भेदोपादानाभेदकल्पनेति युक्तम्। भिद्यमानतन्त्रत्वाद्भेदस्य भिद्यमानानां च प्रत्येकमेकत्वाद्। एकाभावे चानाश्रयस्य भेदस्यायोगात्। एकस्य च भेदानधीनत्वात्। नाममिति भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वादभेदोपादानैवानिर्वचनीयभेद कल्पनेति साम्प्रतम्। तथा च श्रुतिर्मृत्तिकेत्येव सत्यमिति। तस्मात् कूटस्थनित्यतैव पारमार्थिकी न परिणामिनित्यतेति सिद्धम्।

६. प्र०—कार्यबोधे यथा चेष्टालिङ्गं हर्षादयस्तथा। इति पद्यं संगतिनिर्देश पुरःसरं व्याख्यायताम्?

उ०—कार्यं परेभ्यो वाक्येभ्य एव शक्तिग्रहो, न तु सिद्धपरेभ्य इति प्राभाकराः, तदनुसारिणश्च वेदान्तैकदेशिनः आतिष्ठते। तन्मतनिराकरणायेदं पद्यं भामतीकारैरूपन्यस्तम्। तथाहिकार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा। सिद्धबोधेऽर्थवत्तैवं शास्त्रत्वं हितशासनात्। इति। इदमत्राकूतम्—यथा सर्वेषां वाक्यानां कार्यपरत्वेऽभ्युपगमे प्रवृत्तिरूपं लिङ्गमस्ति तथैव सिद्धार्थपरत्वेऽपि वाक्यानां मुखविकाशादि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हेतुभूत वाक्यार्थशक्तिग्रहो भवितुमर्हति । तावता च सर्वेषां कार्यपरत्वमित्याग्रहः किं निबन्धनः । अत्र एत्राविदितार्थजन भाषो द्रविडो देवदत्त प्रासादमध्यासीनः 'पुत्रस्ते जातः' इत्यादि वाक्यं पुत्रजननसूचकं वार्ताहारमुखेन पुत्रपदचिह्नाङ्कितं वस्त्रप्रदान पुरःसरं श्रुत्वा देवदत्तस्य हर्षहेतुभूतं पारिशेष्यात्सिद्धं पुत्रजननमवगच्छति । तस्मात् सिद्धार्थपराणामपि वाक्यानां शक्तिग्रहानुपपत्तिर्नास्ति । किं च यथा कार्यबोधक-वाक्यानां कार्ये पर्यवसानम् । तथा सिद्धार्थपराणामपि वाक्यानां भयकम्पादिरूप-प्रयोजनदर्शनात् सिद्धार्थपरत्वे न कोऽपि दोषः । अपि च शास्त्रत्वमपि हित-शासनात्संगच्छते । इदं च शास्त्रनिर्वचनं कार्यपर वाक्ये इव सिद्धार्थपर वाक्येष्वपि संघटते । तत्र कोऽयमाग्रहः सर्वेषां शब्दानां कार्यपरत्वे । किं च कार्यपरत्वाभावे-ऽपि कीदृशो वृक्षः ? फलितः, कस्यायं ? राज्ञ इत्यादिप्रश्नोत्तराणां प्रयोगानां लोके बाहुल्येन प्रयोगा उपलभ्यन्ते । तस्मात्कार्ये परत्वत् सिद्धार्थपरत्वेऽपि वेदान्तानां । प्रामाण्याभ्युपगमे न कोऽपि दोषः इति दिक् ।

७. प्र०—आत्मज्ञानं सम्पदादिरूपमित्याक्षेपमुत्थाप्य निराकुरुत ।

उ०—'तत्त्वमसी' त्यादि वाक्याज्जायमानं ज्ञान तात्त्विकमितिवस्तुस्थितिः । तत्र केचिदेवमाशङ्कन्ते । तथा हि—आत्मज्ञानं सम्पदादिरूपं भवितुमर्हति । यथा—अनन्तासु मनोवृत्तिषु विश्वदेवबुद्धिः क्रियते, तेन चानन्तलोकावाप्तिर्भवति । अतो विश्वान् देवान् मनसि सम्पाद्यमाने आलम्बनमविद्यमानसमं कृत्वाऽरोप्य प्रधान-मुपासनम् । अथवाऽदित्यो ब्रह्मेत्यादेशः 'योऽसावाव गौतमाग्निः' इत्यध्यासरूपं भवति । उपासनं तादृशं वा भवतु । आत्मज्ञान न तात्त्विकमिति । अथवा 'प्राणो वा संवर्गः' इत्यध्यात्मसंवर्ग क्रियाविशिष्टस्य प्राणस्य यथोपासनमिति । यथा वा वायुर्वा व संवर्ग इत्यत्राधिदैवतसंवर्गक्रियाविशिष्टस्य वायोरुपासनं, यथा वाऽज्यावे-क्षणमाज्यसंस्कारत्वेन विधीयते । तथादर्शनेन आत्मनः संस्कारः सम्पद्यते, तेन संस्कृतस्यात्मनो दर्शपौर्णमासादिषु यागेषु कर्तृत्वेन विनियोगः । एवं चाज्यावेक्षण-वद्दर्शनापरपर्याय आत्मज्ञानं क्रत्वङ्गविधिः । तथा चैतस्मिन् प्रकारचतुष्टयेऽन्तर्भय-त्वात्मज्ञानम् । तत्र सम्भवति विधौ न तात्त्विकत्वं, तस्य भूतवस्तुविषयत्वेन विधेर-प्रवृत्तेः । तस्मात्सम्पदादिषु अन्यतममात्मज्ञानं न तात्त्विकमिति पूर्वपक्षः ।

अत्रोच्यते, 'तत्त्वमस्यादि' महावाक्यजन्यं ज्ञानं न सम्पदादिरूपमपितु तात्त्वि-कम्, तस्य सम्पदादिरूपत्वे भेदानुवृत्तिप्रसङ्गात् । न खलु तत्र कोऽपि भेदोऽभिमतः, 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति भेदनिन्दाप्रतिपादनात् । अत-स्तस्य सम्पदादिरूपत्वे 'अहं ब्रह्मास्मि तत्त्वमसि' इत्यादि पदसमन्वयः पीड्येत ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवमेवाध्यासोपासनपक्षोपि न घटते, पूर्वोक्तदोषादेव। नहि योषिति अग्निबुद्धि कुर्वाणस्तयोर्भेदं न पश्यति, प्रत्युत पश्यत्येव। केवलं शास्त्रप्रमाणादेव योषित्यग्नि-बुद्धिं करोतीति। तस्मान्नाध्यासरूपमप्यात्मज्ञानम्। नापि तृतीयः, अध्यात्माधिदैव-तादिकथनेनैव भेदपरिस्फुरणात्। नापि चतुर्थः, आज्यावेक्षणादिवदंगतावोधक-प्रमाणेष्वन्यतमप्रमाणस्य तत्राभावात्। आज्यावेक्षणादौ प्रकरणप्रमाणेन-क्रत्वर्थत्व-मस्तु दार्ष्टान्तिके तु आत्मज्ञानेऽनधिगताबाधितार्थावबोधकं प्रमाणं न प्रसरति। अतोऽङ्गतावोधकप्रमाणाभावादेवाज्यावेक्षणादिवदात्मज्ञानं न क्रत्वङ्गं, किन्तु स्वतन्त्र-मेव। अतः आत्मज्ञानस्य सम्पदादिरूपत्वाभावात्तात्त्विकमेष्टव्यमिति। अतः तस्य सिद्धवस्तुविषयत्वेन तत्र विधिर्न प्रवर्तते। तस्मात् 'तत्त्वमसी' त्यादिमहावाक्यजन्यं ज्ञानं ब्रह्मात्मैक्यविषयं निःश्रेयसफलकञ्चेति स्वतन्त्रमिति भावः।

८. प्र०—सर्वेषां वेदान्तानां कार्यपरत्वमिति प्राभाकरमतमुत्थाप्य निराकुरुत ?

उ०—प्राभाकराः—लिङ्गादिपदानां शक्त्यासाक्षात्क्रियाभिधायित्वमन्येषां तु परम्परयाकार्यान्वितस्वार्थबोधकत्वमिति साक्षात्परम्परया वा सर्वेषां वेदान्तवाक्यानां कार्यपरत्वम्। तत्राप्ययं विशेषः, कार्याभिधायिनामेव लिङादीनां भावना वाचित्वं लडादीनान्तु संख्यावाचित्वम्। अतो यत्र कार्यं तत्र वृत्तिः, यत्रवृत्तिस्तत्रैवधात्वर्थ-स्यानुष्ठेयता। यथा—'यजेत' इत्यादौ यागस्य। निषेधस्थले तु लिङर्थस्य तथान्वये बाधकाभावे प्रतिषेधः, तथात्वे तु न प्रतिषेधोऽपितु पर्युदासः। तच्च बाधकं द्विविधम्, 'तस्य व्रतम्' इत्युपक्रम्यः विकल्पप्रसक्तिश्च। अत एव नेक्षेत उद्यन्तमादित्यमित्यादौ न प्रतिषेधः अपि तु पर्युदासः इति मीमांसकानां मतम्। तथा पर्युदासस्थलं विहाय सर्वत्रप्रतिषेधस्थले धात्वर्थस्यानुष्ठेयत्वं नास्ति। यथा—'न कलञ्जं भक्षयेदि' त्यादौ कलञ्जभक्षणस्य। अतो नात्रघटितेषु वाक्येषु सर्वं कार्यपरत्वमिति वक्तुं न शक्यते प्राभाकरैः। यदा विधिप्रतिषेधात्मकस्य वेदस्यैव कार्यपरत्वं न निर्वहति, तदा किमु वक्तव्यं, वेदान्तानां कार्यपरत्वं प्रतिपादनपरेणाग्रहेण। तस्माद्वेदान्तानां सिद्धब्रह्म-प्रतिपादनपरत्वं न विरुध्यते इति संक्षेपः।

९. प्र०—भामतीकारमते लिङाद्यर्थः क इति साधकबाधकप्रमाणेन व्यत्यास-पूर्वकं सुष्ठूपपादयत ?

उ०—लिङर्थविषयेदार्शनिकानां मतभेदो दृश्यते। तथाहि—पुरुषाभिप्रायो-विध्यर्थ इत्युदयनाचार्यप्रभृतयो नैयायिकाः। कार्यं विध्यर्थः इति प्राभाकरमीमांसका मन्यन्ते। परं भामतीकार इमान्पक्षान् निराकुर्वन् कृतिसाधनमिष्टञ्चेति द्वयविध्यर्थ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

.CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मित्याह । तथाहि—चेतन इष्टसाधनताज्ञानसत्त्वे एव प्रवर्तते नान्यथेति सर्वानुभवसिद्धम् । एवं सुमेरुशृङ्गाहरणस्यापि इष्टसाधनत्वात्तत्रापि चेतनप्रवृत्तिप्रसङ्गस्तद्वारणाय कृतिसाधनत्वं विशेषणम् । तावन्मात्रोक्तौ विषमिश्रितमध्योदनभक्षणे प्रवृत्तिः स्यादिति अवश्यमिष्टसाधनत्वं विशेषणीयम् । तथा च कृतिसाधनत्वसामानाधिकरण्यमिष्टसाधनत्वं विध्यर्थो न तु कार्यं, न वा पुरुषाभिप्रायो न वा शाब्दीभावना इत्याम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति प्रामाण्यमिति ।

छात्राणामुपकाराय, श्रीविद्यानन्दस्वामिभिः ।
सन्तरणीकृतैषा तैः, विद्यानन्दविवृद्धये ॥

इति शिवम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विश्वबन्धुओं !

क्या सम्पूर्ण-संसृति के भौतिकवाद के प्रभाव में र
बचकर दीर्घ-निःश्वास लेना चाहते हैं ? क्या आप अप
संकीर्णता के लघुगृह से निकाल कर शान्ति के विशाल र
में शुभ्रगगन की भाँति स्वयं स्वच्छ होना चाहते हैं
यदि चाहते हैं, तो निज को वेदान्त के रस से आप
कीजिए। वेदान्त के रस का पेट भरकर पान कोजिए।
देखिए कि आप को एक शान्ति की, और दूसरी सन्तो
दीर्घ डकार आती है कि नहीं ?

—शारद

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

...u Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon